KÂVYAMÂLÂ. 82.

THE

SUBHÂSHITA-RATNA-SANDOHA

OF

AMITAGATI.

EDITED BY

PAṆḌIT BHAVADATTA S'ÂSTRÎ,

2nd Paṇḍit, Government College, Ajmer,

Son of

MAHÂMAHOPÂDYÂYA PAṆḌIT S'IVADATTA

Head Paṇḍit and Superintendent, Sanskṛit Department,

Oriental College, Lahore.

AND

KÂS'ÎNÂTH PÂṆḌURANG PARAB.

PRINTED AND PUBLISHED

BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF JÂVAJÎ DÂDAJÎ'S 'NIRNAYA-SÂGARA' PRESS.

BOMBAY.

1903.

Price 12 Annas.

काव्यमाला. ८२.

श्रीमदमितगतिविरचितः

सुभाषितरत्नसंदोहः

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसाददारककेदारनाथ-
कृपाङ्गीकृतशोधनकर्मणा
महामहोपाध्यायपण्डितशिवदत्तशर्मतनूजपण्डितभवदत्तशास्त्रिणा,
मुम्बापुरवासिपरबोपाह्वपाण्डुरङ्गात्मजकाशीनाथशर्मणा च
संशोधितः ।

स च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतः ।

१९०३

मूल्यं १२ आणकाः ।

अमितगतिः।

सुभाषितरत्नसंदोहकृती सुकृती श्रीमद्दिगम्बरजैनधर्मभृतिः श्रीमान**मितगति**-यतिः कदा कतमं धरामण्डलं मण्डयामासेति मीमांसायां बहुविधग्रन्थपर्यालोचने प्रवृत्ते—

'अलङ्घ्यमहिमालयो विपुलसत्त्ववान्रत्नधि-
वीरस्थिरगभीरतो गुणमणिः पयोवारिधिः।
समस्तजनता मतां श्रियमनश्वरीं देहिनां
सदा मदजलच्युतो विबुधसेवितो दत्तवान्॥
तस्य ज्ञातसमस्तशास्त्रसमयः शिष्यः सतामग्रणीः
श्रीमान्**माथुर**संघसाधुतिलकः श्री**नेमिषेणो**ऽभवत्।
शिष्यस्तस्य महात्मनः शमयुतो निर्धूतमोहद्विषः
श्रीमान्**माधवसेन**सूरिरभवत्क्षोणीतले पूजितः॥
कोपागतिर्विधानकोऽपि सकृपः सोमोऽप्यदोषाकरो
जैनोऽप्युग्रतरस्तपोगतभवो भीतोऽपि संसारतः।
निष्कामोऽपि समिष्टमुक्तिवनितायुक्तोऽपि यः संयतः
सत्यारोपितमानसो धृतत्रपोऽप्यर्च्यप्रियोऽप्यप्रियः॥
दलितमदनशत्रोर्भव्यनिर्व्याजबन्धोः शमदमयममूर्तिश्चन्द्रशुभ्रोरुकीर्तिः।
अमितगतिरभूद्यस्तस्य शिष्यो विपश्चिद्विरचितमिदमर्घ्यं तेन शास्त्रं पवित्रम्॥
समारूढे पूतत्रिदशवसतिं विक्रमनृपे
सहस्रे वर्षाणां प्रभवति हि पञ्चाशदधिके (१०५०)।
समाप्तं पञ्चम्यामवति धरणीं **मुञ्ज**नृपतौ
सिते पक्षे पौषे बुधहितमिदं शास्त्रमनघम्॥'

इति '**श्रावकाचार**'-'**धर्मपरीक्षा**'द्यनेकग्रन्थकृतिश्रीमद**मितगति**यतिविरचित**सुभाषि**-

१. 'अभूत्समो यस्य न तेजसेनः स शुद्धबोधोऽजनि **देवसेनः**।
मुनीश्वरो निर्जितकामसेनः पादारविन्दप्रणमद्रसेनः॥
दोषान्धकारपरिमर्दनबद्धकक्ष्यो भूतस्ततो**ऽमितगति**र्भुवनप्रकाशः।
तिग्मद्युतेरिव दिनः कमलावबोधी मार्गप्रबोधनपरो बुधवन्दनीयः॥
विद्वत्समूहार्चितचित्रशिष्यः श्री**नेमिषेणो**ऽजनि तस्य शिष्यः।
श्री**माथुरा**नूकनभःशशाङ्कः सदा विधूतार्हततत्त्वशङ्कः॥
माधवसेनोऽजनि महनीयः संयतनाथो जगति जनीयः।
जीवनराशेरिव मणिराशौ रम्यतमोऽलोऽखिलमिति राशिः॥
तस्मादजायत नयादिव साधुवादः शिष्टार्चितो**ऽमितगति**र्जगति प्रतीतः॥'
इति श्री**अमितगति**विरचितः **श्रावकाचारः** समाप्तः।

२. 'संवत्सराणां विगते सहस्रे ससप्ततौ (१०७०) विक्रमपार्थिवस्य।
इदं निषिद्धान्यमतं समाप्तं जिनेन्द्रधर्मामिति युक्तिशास्त्रम्॥'
इत्य**मितगति**विरचिता **धर्मपरीक्षा** समाप्ता।

तरत्नसंदोहसमाप्तिपद्यपर्यालोचनतो **मालव**मण्डलाधीश्वरयशःपुञ्जश्रीमन्**मुञ्जराज**-समकालीनोऽयं कविस्तद्राजधान्यामेनं ग्रन्थं वैक्रमे १०५०=A. D. 994 शरदि प्राणैष्ट.

मुञ्जराजापरपर्यायवाक्पतिराजराज्यं च—

'याः स्फूर्जत्फणभृद्विषानलमिलद्धूमप्रभाः प्रोल्लस-
न्मूर्धाबद्धशशाङ्ककोटिघटिता याः सैंहिकेयोपमाः ।
याश्चाद्रिगिरिजाकपोललुलिताः कस्तूरिकाविभ्रमा-
स्ताः श्रीकण्ठकठोरकण्ठरुचयः श्रेयांसि पुष्णन्तु वः ॥
यल्लक्ष्मीवदनेन्दुना न सुखितं यन्नार्द्रितं वारिधे-
र्वारा यन्न निजेन नाभिसरसीपद्मेन शान्तिं गतम् ।
यच्छेषाहिफणासहस्रमधुरश्वासैर्न चाश्वासितं
तद्राधाविरहातुरं मुररिपोर्वेल्लद्वपुः पातु वः ॥

परमभट्टारकमहाराजाधिराजपरमेश्वरश्री[2]**कृष्णराजदेव**पादानुध्यात-परमभट्टारकमहा-राजाधिराजपरमेश्वरश्री[3]**वैरिसिंहदेव**पादानुध्यात-परमभट्टारकमहाराजाधिराजपरमेश्वर-श्री[4]**सीयकदेव**पादानुध्यात-परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीम[5]**दमोघवर्षदेवा**प-राभिधानश्रीम[6]**द्वाक्पतिराजदेव**पृथ्वीवल्लभश्रीवल्लभनरेन्द्रदेवः कुशली तिणिसपद्द्वादश-

१. **मुञ्जराज**देवस्य **'अमोघवर्षदेव–वाक्पतिराजदेव–उत्पलराज'** इति नामान्तराणि. See Indian Antiquary, Vol. VI., P. 51–54; Nava-sâhasânka-charita and Tilaka-manjari.

२. श्री**कृष्णराजदेव**स्य **'उपेन्द्रराज'** इत्यपि नामान्तरम्. See Epigraphia Indica, Vol. I., P. 222–228 and Navasâhasânka-charita.

३. श्री**वैरिसिंहदेव**स्य **'वज्रट'** इत्यपि नामान्तरम्. See Epigraphia Indica, Vol. I., P. 222–228.

४. श्री**सीयकदेव**स्य **'श्रीहर्ष–हर्ष–सिंहदन्त'** इत्यपि नामान्तरम्. See Epigraphia Indica, Vol. I., P. 222–228; Navasâhasânka-charita and Prabandha-chintâmani.

५. 'विवेकात्यक्तराज्येन राज्ञेयं **रत्नमालिका** ।
रचि**तामोघवर्षे**ण विदुषां सदलंकृतिः ॥'

इति **प्रश्नोत्तररत्नमाला**कर्तायमे**वामोघवर्षः** कश्चिदन्यो वेति संदेहः.

६. **'वाक्पतिराज'** इति **मुञ्ज**स्यैव नामान्तरं प्रतिभाति—

'प्रीत्या योग्य इति प्रतापवसतिः ख्यातेन **मुञ्जा**ख्यया
यः स्वे **वाक्पतिराज**भूमिपतिना राज्येऽभिषिक्तः स्वयम् ।'

इति **तिलकमञ्जर्यां** धनपालेन **मुञ्जे**त्यपरपर्यायतया श्री**वाक्पतिराज**स्य नाम

कर्संबद्धमहासाधनिकश्री**महाइकभुक्तसेलम्बपुर**ग्रामे समुपगतान्समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिवासिपट्टकिलजनपदादींश्च बोधयति—अस्तु वः संविदितम्—यथा ग्रामोऽयमस्माभिः षट्त्रिंशसहस्रिक (१०३६) संवत्सरेऽस्मिन्कार्तिकशुद्धपौर्णमास्यां

संकीर्तितम्. अपि च **दशरूपकावलोके** चतुर्थपरिच्छेदे **धनिक**पण्डितेन 'प्रणयकुपितां दृष्ट्वा देवीं–' इत्यादि श्लोकः श्री**वाक्पतिराजदेव**नाम्ना समुद्धृतः. तत्रैव पुनरयं श्लोकः श्री**मुञ्ज**नाम्ना समुद्धृतः. एवमेव **पिङ्गलसूत्र**वृत्तौ **भट्टहलायुधेन**

'ब्रह्मक्षत्रकुलीनः प्रलीनसामन्तचक्रनुतचरणः ।
सकलसुकृतैकपुञ्जः श्रीमान्**मुञ्ज**श्चिरं जयति ॥'
'जयति भुवनैकवीरः सीरायुधतुलितविपुलबलविभवः ।
अनवरतवित्तवितरणनिर्जितचम्पाधिपो **मुञ्जः** ॥'
'स जयति **वाक्पतिराजः** सकलार्थिमनोरथैककल्पतरुः ।
प्रत्यर्थिभूतपार्थिवलक्ष्मीहठहरणदुर्ललितः ॥'

'सप्तमः सप्तमादिः' (पि० सू० ४।१९), 'अन्त्ये पञ्चमः' (पि० सू० ४।२०) इत्येतत्सूत्रोदाहरणभूतास्वेतास्वार्यास्वार्याद्वये '**मुञ्ज**' इति, तृतीयायां '**वाक्पतिराज**' इति नामोपलभ्यते. अथ चैतद्दानपत्रस्य संवत्सरे (१०३६), '**सुभाषितरत्नसंदोहाख्य**ग्रन्थान्ते जैने**नामितगति**यतिना

'समारूढे पूतत्रिदशवसतिं विक्रमनृपे
सहस्रे वर्षाणां प्रभवति हि पञ्चाशदधिके (१०५०) ।
समाप्तं पञ्चम्यामवति धरणिं **मुञ्ज**नृपतौ
सिते पक्षे पौषे बुधहितमिदं शास्त्रमनघम् ॥'

इत्युक्ते **मुञ्जमही**पतिराज्यसमये च स्वल्पमेवान्तरमस्ति. तस्मादस्ति '**वाक्पतिराज**' इति **मुञ्ज**स्यैव नामान्तरमिति प्रतीयते. **मुञ्ज**राजापरनाम**वाक्पतिराज**समये **उज्जयिन्येव** राजधान्यासीदित्यस्माद्दानपत्रात्, Indian Antiquary, Vol. VI, P. 51-52 **वाक्पतिराज**दानपत्रात्,

'अस्ति क्षिता**वुज्जयिनी**ति नाम्ना पुरी विहायस्यमरावतीव ।
बबन्ध यस्यां पदमिन्द्रकल्पो महीपति**र्वाक्पतिराजदेवः** ॥' (१।१७)

इत्यस्मा**त्परिमल**कविप्रणीत**नवसाहसाङ्कचरित**काव्यश्लोकाच्च प्रतीयते. **धारा**नगरी तु **भोजदेवे**नैव राजधानीत्वं नीता.

'कवि**र्वाक्पतिराजश्रीभवभूत्या**दिसेवितः ।
जितो ययौ **यशोवर्मा** तद्गुणस्तुतिवन्दिताम् ॥' (४।१४५)

इति **राजतरङ्गिण्यां** वर्णितो **गौडवधा**ख्यमहाकाव्यकर्ता श्री**कमलायुधशिष्यः** **कान्यकुब्जाधीशयशोवर्म**नरेन्द्राश्रितो **वाक्पतिराज**कविः ख्रिस्ताब्दसप्तमशतकोत्तरार्धसमुद्भूत इत्यस्माद्भिन्नः. एवमेतत्तुल्यनामानो भूयांसो राजान उपलभ्यन्ते.

सोमग्रहणपर्वणि श्रीभगवत्पुरावासितैरस्माभिर्महासाधनिकश्री**महाइकपत्नीआसिनी**-प्रार्थनयोपरिलिखितग्रामः स्वसीमातृणयूतिगोचरपर्यन्तः सहिरण्याभोगभागः सोपरिकरः **सर्वादायसमेतः श्रीमदुज्जयिन्यां** भट्टारिकाश्रीमद्भट्टेश्वरीदेव्यै स्नानविलेपनपुष्पगन्धधूपनैवेद्यप्रेक्षणादिनिमित्तं च, तथा खण्डस्फुटितदेवगृहजगतीसमारचनार्थं च मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धयेऽदृष्टफलमङ्गीकृत्याचन्द्रार्कार्णवक्षितिसमकालं परया भक्त्या शासनेनोदकपूर्वकं प्रतिपादित इति मत्वा तन्निवासिपट्टकिलजनपदैर्यथादीयमानभागभोगः करहिरण्यादिकं सर्वमाज्ञाश्रवणविधेयैर्भूत्वा सर्वथा सर्वमस्याः समुपनेतव्यम् । सामान्यं चैतत्पुण्यफलं बुद्ध्वास्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मदायोऽयमनुमन्तव्यः पालनीयश्च । उक्तं च—

'बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
अस्मत्कुलक्रममुदारमुदाहरद्भिरन्यैश्च दानमिदमभ्यनुमोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया दानं फलं परयशःप्रतिपादनं च ॥
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥

इति । संवत् १०३६=A. D. 980 चैत्रवदि ९। गुणपुरावासिते श्रीमन्महाविजयस्कन्धावारे स्वयमाज्ञादायकश्चात्र श्री**रुद्रादित्यः** । स्वहस्तोऽयं श्री**वाकपतिराजदेवस्य** ।' (Indian Antiquary, Vol. XIV., P. 160.) इत्येतद्दर्शनेन, **धर्मपरीक्षा**समाप्तिपद्यदर्शनेन च, ख्रिस्ताब्ददशमैकादशोत्तरार्धपूर्वार्धयोरन्तरालभूता ख्रिस्ताब्दशतिका **अमितगति**यतिपतिसत्ताधारभूतावगम्यते. **मुञ्जराज**राजधान्येवास्य कवितुर्वासभूमिरिति. अने**नामितगति**यतिपतिना कियन्तो ग्रन्था रचिता इति न निर्धार्यते.

इदानीं श्रीमन्**मालव**मण्डलमण्डन**मुञ्जराज**राज्यसमयविवेचनसंदर्भावसरे 'श्रीम**द्धारा**नगराधीशश्रीम**द्भोजराज**राजस्य पितृव्यः पितामहो वा श्रीमान्**मुञ्जराजः**' इत्यपि निर्णेतव्यतरविषयो दरीदृश्यते. तत्र च कियन्तो विद्वांसः 'परमभट्टारकमहाराजाधिराजपरमेश्वरश्री**सीयकदेव**पादानुध्यात-परमभट्टारकमहाराजाधिराजपरमेश्वरश्री**वाकपतिराजदेव**पादानुध्यात-परमभट्टारकमहाराजाधिराजपरमेश्वरश्री**सिन्धु**-

---

१. श्री**सिन्धुराजस्य 'सिन्धुल–सिन्धल–कुमारनारायण–नवसाहसाङ्क'** इति च नामान्तराणि. Vide Navasâhasânka-charita and Prabandha-chintâmani. **सिन्धुराज**पर्यन्तम**प्युज्जयिन्येव** राजधान्यासीत्—

राजदेवपादानुध्यात-परमभट्टारकमहाराजाधिराजपरमेश्वरश्री**भोजराजदेवः** कुशली–' इति Indian Antiquary, Vol. VI., P. 53-54 स्थं श्रीमद्**धारान**गराधीशश्रीमद्**भोजराज**वितीर्णवैक्रम १०७८=A. D. 1022 संवत्सरीयदानपत्रान्तर्गतलेखम्, 'परमभट्टारकमहाराजाधिराजपरमेश्वरश्री**वाक्पतिराजदेव**पादानुध्यात-परमभट्टारकमहाराजाधिराजपरमेश्वरश्री**सिन्धुराजदेव**पादानुध्यात-परमभट्टारकमहाराजाधिराजपरमेश्वर**श्रीभोजदेव**–' इति Epigraphia Indica, Vol. III., p. 48-50स्थं श्रीमद्**धारा**नगराधीशश्रीम**ज्जयसिंह**महाराजवितीर्णवैक्रम १११२=A. D. 1056 संवत्सरीयदानपत्रान्तर्गतलेखं च प्रमाणीकृत्य '**मुञ्जः** पितामहो **भोजस्य**' इति मन्वतेतराम्. परं त्वहमस्मिन्संदर्भे तत्प्रमाणीभूतप्रमाणाभासान्वक्ष्यमाणलेखेतिहासादिभिरपनेतुं स्वसंमतं च द्रढयितुमाशासेतराम्.

अथ च लेखेतिहासादयः—

'आयातस्य कदाचन क्षितिपतेराच्छिन्दतः कौशिकस्यातिथ्योचितवस्तुजातजननादानन्दिनीं नन्दिनीम् ।
निर्जेता कुपितेन तेन हविषा संहर्षिताद्बर्हिपो
वीरः श्री**परमार** इत्यनुपमः सत्याभिधानोऽभवत् ॥
राज्यवर्धनविशालधर्मभृत्सत्यकेतुपृथुकीर्तिपार्थिवः ।
वर्धतेऽयमहिमांशुचन्द्रमःसंततिप्रतिकृतिर्यदन्वयः ॥
वराजरामराजितोऽनलोद्भवः स भारतः ।
ग्रहेन्द्रचन्द्रयोरिव व्यजायतायमन्वयः ॥
वंशेऽस्मिन्**वैरिसिंहः** क्षितिपतिरभवद्भूरिभूतिप्रभावप्रागल्भ्यौदार्यशौर्यप्रचयपरिचयप्राज्यसौराज्यसिद्धिः ।
नम्रक्ष्मापालभालस्थलदलितलुलत्कान्तकोटीरकोटित्रुट्यन्माणिक्यचक्रस्थपुटितमणिमत्पादपीठोपकण्ठः ॥

'अस्ति क्षिता**वुज्जयिनी**ति नाम्ना पुरी विहायस्यमरावतीव ।
बबन्ध यस्यां पदमिन्द्रकल्पो महीपति**र्वाक्पतिराजदेवः** ॥' (१।१७)

इत्यादिश्लोकानन्तरं **नवसाहसाङ्कचरिते** चत्वारिंशच्छ्लोकै**रुज्जयिनी** वर्णिता. तदनन्तरम्—

'राजास्ति तस्यां स कुलाचलेन्द्रनिकुञ्जविश्रान्तयशस्तरङ्गः ।
भास्वान्ग्रहाणामिव भूपतीनामवाप्तसौख्यो धुरि **सिन्धुराजः** ॥'(१।५८)
'दोश्चन्दनानोकहमाप्य यस्य समुल्लसत्सान्द्रयशःप्रसूना ।
गतातिवृद्धिं लवलीलतेव निबद्धमूला **परमार**लक्ष्मीः ॥' (१।७७)

इत्युज्जयिन्यामेव **सिन्धुराजो**ऽपि वर्णितः. **नवसाहसाङ्कचरितं** च **परिमलदेवेन** **सिन्धुराज**समये A. D. 1005 मिते वर्षे निर्मितम्.

सर्वाशाविजयप्रयाणसमये यस्येन्द्रनीलप्रभै-
  र्मायूरातपवारणैः शुशुभिरे नष्टावकाशा दिशः ।
सर्पन्मत्तकरीन्द्रचक्रचरणप्राग्भारदीर्णस्थिरा
  रन्ध्रोद्भूतविषण्णशेषसविषश्वासावरुद्धा इव ॥
पाताले वडवामुखानलमिषात्पृथ्वीतले च स्फुर-
  त्सौवर्णाचलकैतवाद्वियति च ब्रह्माण्डखण्डच्छलात् ।
चश्चत्काश्चनचक्रवालवलयव्याजाच्च दिङ्मण्डले
  यस्याद्यापि समुल्लसत्यविचलीभूतः प्रतापानलः ॥
स्वर्लोकेषु च विद्विषत्क्षितिषु च व्यालेन्द्रगेहेषु च
  स्वाराजं च रिपुव्रजं च मुरजिन्नागाधिराजं च यः ।
ऐश्वर्येण च विक्रमेण च धराभारक्षमत्वेन च
  न्यक्कुर्वंश्च पराभवंश्च समतिक्रामंश्च पृथ्वीमपात् ॥
तस्माद्वैरिनृपावरोधनवधूवैधव्यदुःखोद्भव-
  द्बाष्पाम्भःकणशान्तकोपदहनः श्री**सीयको**ऽभून्नृपः ।
आविर्भावितनूतनस्थितिरयं ब्रह्माण्डखण्डच्छला-
  द्यस्याद्यापि विलोक्यते वियदधो धूमः प्रतापानलः ॥
अनुगगनमुदस्थुः स्थूलमुक्तोच्चया ये यदसिदलितकुम्भिकुम्भिकुम्भस्थलेभ्यः ।
सततमपि पतन्तस्तेऽद्य यावन्न पृथ्वीं पृथुलतरलताराव्याजभाजो भजन्ते ॥
अत्याश्चर्यमदृष्टमश्रुतमिदं कस्मै समाचक्ष्महे
  को न्वेतत्प्रतिपद्यते च तदपि प्रस्तूयते कौतुकात् ।
उद्धृत्यापि वसुंधरामसदृशीं लब्ध्वापि लक्ष्मीं च यः
  कुर्वन्कार्यमनेकशः सुमनसामागान्न वैकुण्ठताम् ॥
तस्माद्वैरिवरूथिनीबहुविधप्रारब्धयुद्धाध्वर-
  प्रध्वंसैकपिनाकपाणिरजनि श्री**मुञ्जराजो** नृपः ।
प्रायः प्रावृतवान्निपालयिषया यस्य प्रतापानलो
  लोकालोकमहामहीध्रवलयव्याजान्महीमण्डलम् ॥
यस्मिन्सर्पति लीलयापि ललितैः सैन्यैः समुज्जृम्भितं
  वाहव्यूहविसारिधूलिपटलव्यालुप्तदिग्मण्डलैः ।
अत्यद्रीन्द्रकरीन्द्रसंचयपदप्रेङ्खोलनोच्छृङ्खल-
  प्रेङ्खच्छृङ्खलनादनिर्भरभृतब्रह्माण्डभाण्डोदरैः ॥
यन्निस्त्रिंशनिरस्तमस्तकतया लब्ध्वान्यथा दुर्लभं
  देवत्वं स्वकबन्धमुद्धतमधो दृष्ट्वा भटैर्वेष्टितम् ।

---

१. देवानाम्, धीमतां च.   २. विष्णुताम्, निश्चयेन कुण्ठताम्.

संहर्षोत्पततो विमानशिखरादाश्लिष्य कण्ठे हठा-
द्वीरान्संगररागिणो रुरुधिरे संभूय सिद्धाङ्गनाः ॥
तस्यासीदथ पार्थिवः पृथुयशाः श्री**सिन्धुराजो**ऽनुजः
स्फूर्जद्वाडवपावकस्फुटमहःसौन्दर्यशौर्यानलः ।
यः संग्रामयुगान्तवल्गितभुजादुर्वातदूरोल्लस-
त्कल्लोलायितमण्डलाग्रपटलेनामज्जयद्भूभृतः ॥
व्रजति जयिनि यत्रामित्रजातेन जज्ञे तरलतुरगवेगोद्धूतभूरेणुराजिः ।
विकटकरटिभारभ्रष्टभूपृष्ठरन्ध्रादुदित इव समन्तादन्तकालाग्निधूमः ॥
गाम्भीर्यं प्रलयार्णवस्य च बलं कल्पान्तवातस्य च
स्थेमानं कमठेशितुश्च गुरुतां ब्रह्माण्डभाण्डस्य च ।
तेजः कालहुताशनस्य च महीयस्त्वं द्युचक्रस्य च
स्वीकृत्येव विनिर्मितं यमविदुः प्रत्याजि पृथ्वीभुजः ॥
तत्सूनुर्भुवनैकभूषणमभूद्भूपालचूडामणि-
श्छायाडम्बरचुम्बिताङ्घ्रिकमलः श्री**भोजदेवो** नृपः ।
यस्याद्यापि समाश्रयन्ति चरणौ शक्रासनाध्यासिनः
स्पर्धाबन्धविनम्रनिर्जरनटत्कोटीरकोटित्विषः ॥'

इति Epigraphia Indica, Vol. III., P. 182–88 स्थ Dr. F. Kielhorn, Ph. D., C. I. E. महाशयप्रकाशितविक्रम ११६१=A. D. 1105 वर्षोत्कीर्ण**परमार**वंशावतंसश्री**नरवर्मदेव**कारितमन्दिरप्रशस्तिलेखान्तर्गतपद्यतः,

'अस्त्युर्वीध्रः प्रतीच्यां हिमगिरितनयः सिद्धदाम्पत्यसिद्धेः
स्थानं च ज्ञानभाजामभिमतफलदोऽखर्वितः सोऽ**र्बुदा**ख्यः ।
विश्वामित्रो वशिष्ठादहरत बलतो यत्र गां तत्प्रभावा-
ज्जज्ञे वीरोऽग्निकुण्डाद्रिपुबलनिधनं यश्चकारैक एव ॥
मारयित्वा परां धेनुमानिन्ये स ततो मुनिः ।
उवाच **परमार**ख्यः पार्थिवेन्द्रो भविष्यति ॥
तदन्ववायेऽखिलयज्ञसंघतृप्तामरोदाहृतकीर्तिरासीत् ।
उपेन्द्रराजो द्विजवर्गरत्नं शौर्यार्जितोत्तुङ्गनृपत्वमानः ॥
तत्सूनुरासीदरिराजकुम्भिकण्ठीरवो वीर्यवतां वरिष्ठः ।
श्री**वैरिसिंह**श्चतुरर्णवान्तधात्र्यां जयस्तम्भकृतप्रशस्तिः ॥
तस्माद्बभूव वसुधाधिपमौलिमालारत्नप्रभारुचिररञ्जितपादपीठः ।
श्री**सीयकः** करकृपाणजलोर्मिमग्नशत्रुव्रजो विजयिनां धुरि भूमिपालः ॥

---

१. 'प्रशस्तिरियमिदानीं पाषाणोल्लिखिता **नागपुर**प्रदर्शिन्यां वर्तते' इति Dr. F. Kielhorn, Ph. D., C. I. E. महाशयाः

तस्मादवन्तितरुणीनयनारविन्दभास्वानभूत्करकृपाणमरीचिदीप्रः ।
श्रीवाक्पतिः शतमुखानुकृतिस्तुरंगा गङ्गासमुद्रसलिलानि पिबन्ति यस्य ॥
जातस्तस्माद्वैरिसिंहोऽन्यनाम्ना लोको ब्रूते वज्रटस्वामिनं यम् ।
शत्रोर्वर्गं धारयासेर्निहत्य श्रीमद्धारा सूचिता येन राज्ञा ॥
तस्मादभूदरिनरेश्वरसंघसेनागजेन्द्रजेन्द्ररवसुन्दरतूर्यनादः ।
श्रीहर्षदेव इति खोट्टिगदेवलक्ष्मीं जग्राह यो युधि नगादसमप्रतापः ॥
पुत्रस्तस्य विभूषिताखिलधराभोगो गुणैकास्पदं
शौर्याक्रान्तसमस्तशत्रुविभवाधिन्याग्यवित्तोदयः ।
वक्तृत्वोच्चकवित्वतर्ककलनप्रज्ञातशास्त्रागमः
श्रीमद्वाक्पतिराजदेव इति यः सद्भिः सदा कीर्त्यते ॥
कर्णाटलाटकेरलचोलशिरोरत्नरागिपदकमलः ।
यश्च प्रणयिगणार्थितदाता कल्पद्रुमप्रख्यः ॥
युवराजं विजित्याजौ हत्वा तद्वाहिनीपतीन् ।
खड्ग ऊर्ध्वीकृतो येन त्रिपुर्यां विजिगीषुणा ॥
तस्यानुजो निर्जितहूणराजः श्रीसिन्धुराजो विजयार्जितश्रीः ।
श्रीभोजराजोऽजनि येन रत्नं नरोत्तमाकम्पकृदद्वितीयम् ॥'

इति Epigraphia Indica, Vol. I., P. 226–228 स्थ Dr. G. Bühler Ph. D., L. L. D., C. I. E. महाशयप्रकाशितमालवमण्डलाधिपतिमहीपतिप्रशस्तिलेखान्तर्गतपद्यतः,

'अस्त्याश्चर्यनिधानमर्बुद इति ख्यातो गिरिः खेचरैः
कृच्छ्राल्लङ्घितदिग्विलङ्घिशिखरग्रामोऽग्रिमः क्ष्माभृताम् ।
मैनाकेन महार्णवे हरतनौ सत्याप्रवेशे कृते
येनैकेन हिमाचलः शिखरिणां पुत्रीति लक्ष्योऽभवत् ॥
वासिष्ठैः स्म कृतस्मयो वरशतैरस्त्यग्निकुण्डोद्भवो
भूपालः परमार इत्यभिधया ख्यातो महीमण्डले ।
अद्याप्युद्गतहर्षगद्गदगिरो गायन्ति यस्यार्बुदे
विश्वामित्रजयोज्झितस्य भुजयोर्विस्फूर्जितं गुर्जराः ॥
तस्मिन्नभूद्रिपुकलत्रकपोलपत्रवल्लीवितानपरशुः परमारवंशे ।
श्रीवैरिसिंह इति दुर्धरसैन्यदन्तिदन्ताग्रभिन्नचतुरर्णवकूलभित्तिः ॥
तत्राभूद्वसतिः श्रियामपरया श्रीहर्ष इत्याख्यया
विख्यातश्चतुरम्बुराशिरसनादाम्नः प्रशास्ता भुवः ।
भूपः खर्वितवैरिगर्वगरिमा श्रीसीयकः सायकाः
पञ्चेषोरिव यस्य पौरुषगुणाः केषां न लग्ना हृदि ॥

तस्योदग्रयशाः समस्तसुभटग्रामाग्रगामी सुतः
सिंहो दुर्धरशक्रसिन्धुरततेः श्रीसिन्धुराजोऽभवत् ।
एकाधिज्यचतुर्जिताब्धिवलयावच्छिन्नभूर्यस्य स
श्रीमद्वाक्पतिराजदेवनृपतिर्वीराग्रणीरग्रजः ॥
आकीर्णाङ्घ्रितलः सरोजकलशच्छत्रादिभिर्लाञ्छनै-
स्तस्याजायत मांसलायतभुजः श्रीभोज इत्यात्मजः ।
प्रीत्या योग्य इति प्रतापवसतिः ख्यातेन मुञ्जाख्यया
यः स्वे वाक्पतिराजभूमिपतिना राज्येऽभिषिक्तः स्वयम् ॥'

इति **मालव**मण्डलाधीशश्रीमन्**मुञ्जराज**तदात्मज**भोजराज**महाराजसमकालीन**धनपाल**कविविरचित**तिलकमञ्जरी**प्रस्तावनापद्यपर्यालोचनतः,

'पुरा तस्मिन्मण्डले श्री**परमार**वंश्यः **सिंह[दन्त]भट**नामा नृपती राजपाटिकायां परिभ्रमञ्शरवणमध्ये जातमात्रं रूपपात्रमतिमात्रं कमपि बालकमालोक्य पुत्रवात्सल्यादुपादाय देव्यै समर्पयामास । तस्य सान्वयं **मुञ्ज** इति नाम निर्ममे । तदनु **सिन्धलः**, **सिन्धुलः**, **सिन्धुराजो** वेति नाम्ना सुतः समजनि । निःशेषगुणपुञ्जमञ्जुल**मुञ्ज**स्य राज्याभिषेकचिकीर्षुर्नृपस्तस्य सौधमलंकुर्वन्नमन्दमन्दाक्षतया निजवधूं वेत्रासनान्तरितां विधाय प्रणामपूर्वं भूपतिमारराध । राजा तं प्रदेशं विजनमवलोक्य तज्जन्मवृत्तान्तमादित एव तस्मै निवेद्य 'तव भक्त्या परितोषितः सन् सुतं विहाय तुभ्यं राज्यं प्रयच्छामि' इति वदन् 'परमनेन **सिन्धल**नाम्ना बान्धवेन समं प्रीत्या वर्तितव्यम्' इत्यनुशास्तिं दत्त्वा तस्याभिषेकं चकार । तदनु—

भीमभूपसुतां **सिंहभटे**न मेदिनीभुजा ।
श्रीमतीं सन्महं **मुञ्ज**कुमारः परिणायितः ॥

स्वजन्मवृत्तान्तप्रसरशङ्किना तेन स्वदयितापि निजघ्ने । तदनु पराक्रमाक्रान्तभूतलः समस्तसज्जनचक्रवर्ति**रुद्रादित्य**नाम्ना महामात्येन चिन्तितराज्यश्चिरं सुखमनुभवन् कस्यामपि योषित्यनुरक्तश्चिरिकल्लाभिधकरभमधिरुह्य द्वादशयोजनीं निशि प्रयाति, प्रत्यायाति च । तया समं विश्लेषे जाते इमं दोधकं प्रैषीन्—

'**मुञ्ज** षडल्ला दोरडी पेक्खिसि न गम्मारि ।
असाढि घण गज्जीइं चिक्खिलि होसेऽवारि ॥'

तं **सिन्धल**नामानं भ्रातरमुत्कटतयाज्ञाभङ्गकारिणं स्वदेशान्निर्वास्य सुचिरं राज्यं चकार । स **सिन्धलो गुर्जरदेशे** समागत्य **काशहृद्**नगरसंनिधौ निजां पल्लीं निवेश्य

---

१. '**श्रीहर्षदेव**' इत्यपि नामान्तरम्.

२. '**मुञ्ज** स्खलिता दवरकी प्रेक्षसे न जाल्म ।
आषाढीयो घनो गर्जति पिच्छिला भविष्यत्यधुना ॥' इति च्छाया.

दीपोत्सवे रात्रौ मृगयां कर्तुं प्रयातः। चौरवधभूमेः संनिधौ शूकरं चरन्तमालोक्य शूलिकायाः पतितं चौरशवमजानन् जानुनाधो विधाय यावत्प्रतिकिरि शरं सज्जीकुरुते तावत्तेन शवेन संकेतितः। ततस्तं करस्पर्शान्निवार्य शूकरं तं शरेण विदार्य यावदाकर्षति तावत्स शवोऽट्टहासपूर्वमुत्तिष्ठन् **सिन्धलेन** प्रोचे—'तव संकेतकाले शूकरे शरप्रहारः श्रेयान्। किं वा बुध्य मया प्रदत्तः प्रहारः' इति। तद्वाक्यान्ते सच्छिद्रान्वेषी प्रेतस्तन्निःसीमसाहसेन परितुष्टो 'वरं वृणु' इत्यभिहितो 'मम बाणः क्षितौ मा पततु' इति याचिते 'भूयोऽपि वरं वृणु' इति श्रुत्वा 'मद्भुजयोः सर्वापि लक्ष्मीः स्वाधीना' इति। तत्साहसचमत्कृतः स प्रेत इत्याह—'त्वया **मालव**मण्डले गन्तव्यम्' इति। 'तत्र श्री**मुञ्जराजः** संनिहितविनाशः, तथापि तत्र त्वया गन्तव्यमेव। तत्र तवान्वये राज्यं भविष्यति।' इति तत्प्रेषितस्तत्र गत्वा श्री**मुञ्जराज**संपदः पदं कमपि जनपदमवाप्य पुनरुत्कटतया श्री**मुञ्जेन** निगृहीतनेत्रः काष्ठपञ्जरनियन्त्रितो **भोजं** सुतमजीजनत्। सोऽभ्यस्तसमस्तराजशास्त्रः षट्त्रिंशदायुधान्यधीत्य द्वासप्ततिकलाकूपारपारंगमः समस्तलक्षणलक्षितो ववृधे। तज्जन्मनि जातकविदा केनापि नैमित्तिकेन जातकं समर्पितम्—

'पञ्चाशत्पञ्च वर्षाणि मासाः सप्त दिनत्रयम्।
भोक्तव्यं **भोजराजे**न सगौडं दक्षिणापथम्॥'

इति श्लोकार्थमवगम्य 'अस्मिन्सति मत्सूनो राज्यं न भविष्यति' इत्याशङ्क्यान्त्यजेभ्यो वधाय तं समर्पयामास।

अथ तैर्निशीथे माधुर्यधुर्यां तन्मूर्तिमवधार्य तैर्जातानुकम्पैः सकम्पैश्च 'इष्टदैवतं स्मर' इत्यभिहिते—

'मान्धाता स महीपतिः कृतयुगालंकारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते
नैकेनापि समं गता वसुमती **मुञ्ज** त्वया यास्यति॥'

इदं काव्यं पत्रके आलिख्य तत्करेण नृपतये समर्पयामास। नृपतिस्तद्दर्शनात्खेदमेदुरमना अश्रूणि मुञ्चन् भ्रूणहत्याकारिणं स्वं निनिन्द।

अथ तैस्तं सबहुमानमानीय युवराजपदवीदानपूर्वं संमान्य **तिलिङ्ग**देशीयराज्ञा श्री**तैलिपदेव**नाम्ना सैन्यप्रेषणैराक्रान्तो रोगग्रस्तेन **रुद्रादित्य**नाम्ना महामात्येन निषिध्यमानोऽपि तं प्रतिष्ठासुर्**गोदावरीं** सरितमवधीकृत्य 'तामुल्लङ्घ्य प्रयाणकं न कार्यम्' इति शपथदानपूर्वं व्यासिद्धोऽपि 'तं पुरा षोढानिर्जितम्' इत्यवज्ञया पश्यन्नतिरेकवशात्तां सरितमुत्तीर्य स्कन्धावारं निवेशयामास। **रुद्रादित्यो** नृपतेर्वृत्तान्तमवगम्य कामपि भाविनीमविनीततया विपदं विमृश्य स्वयं चितानले प्रविवेश।

अथ **तैलिपेन** तत्सैन्यं छलबलाभ्यां हतविग्रहतं कृत्वा मुञ्जरज्वा विबध्य **श्रीमुञ्जराजो** जगृहे। कारागृहे निहितः काष्ठपञ्जरनियन्त्रितो **मृणालवत्या** तद्भगिन्या परिचार्यमाणस्तया सह जातकलत्रसंबन्धः। पाश्चात्यैर्निजप्रधानैः सुरङ्गादानपूर्वं तत्र ज्ञापितसंकेतः कदाचिद्दर्पणे स्वं प्रतिविम्बं पश्यन्नज्ञातवृत्त्या पृष्ठतः समागतायाः **मृणालवत्या** वदनप्रतिबिम्बं जराजर्जरं मुकुरे निरीक्ष्य यूनः श्री**मुञ्जस्य** वदनसामीप्यात्तद्विशेषविच्छायतया तां विषण्णामालोक्यैवमवादीत्—

'**मुञ्ज** भणइ **मुणालवइ** जुव्वण गयुं न झूरि।
जइ सक्कर सयखण्ड थिय तो इस मीठी चूरि॥'

इति तां संभाष्य स्वस्थानं प्रति यियासुस्तद्विरहासहो भयात्तं वृत्तान्तं ज्ञापितुमशक्तो भूयो भूयः प्रोच्यमानोऽपि तां चिन्तामनुचरन् अलवणातिलवणरसवतीं भोजितोऽपि तदास्वादानवबोधात्तया निर्बन्धवन्धुरया गिरा सप्रणयं पृष्टः प्राह—'अहमनया सुरङ्गया स्वस्थाने गन्तास्मीति चेद्भवती तत्र समुपैति तदा महादेवीपदेऽभिषिच्य प्रसादफलं दर्शयामि' इत्यभिहिते 'यावदाभरणकरण्डिकामुपनयामि तावत्क्षणं प्रतीक्षस्व' इत्यभिदधानासौ कात्यायनी 'तत्र गतो मां परिहरिष्यति' इति विमृशन्ती स्वभ्रातुर्भूपतेस्तं वृत्तान्तं निवेद्य विशेषतो विडम्बनाय बन्धनबद्धं कारयित्वा प्रतिगृहं भिक्षाटनं कारयामास। स प्रतिगृहं परिभ्रमन्निर्वेदमेदुरतयेमानि वाक्यानि पपाठ। तथाहि—

---

१. "He says that Muñja had conquered the Chalukya Tailapa II. sixteen times, before he undertook his last expedition, in which he lost his throne and his life, and that he hence despised him." (*Vide* Epigraphia Indica, Vol. I., P. 227.)

२. 'इत**स्तैलिपदेवस्य** पित्रा **देवल**भूभुजा।
पल्लीस्थाने कृता दासी **सुन्दरी**त्यभिधा पुनः॥ ६९॥
पुत्रीं **मृणालवत्या**ह्वां सूते स्म **सुन्दरी** पराम्।
वर्धयामास माता च तां स्तन्यादिप्रदानतः॥ ७०॥
वर्धमाना क्रमात्प्राप्ता यौवनं भगिनी पुनः।
दत्ता **तैलिपदेवेन श्रीपुरे चन्द्र**भूपतेः॥ ७१॥
चन्द्रो यदागमच्छूलरोगेण यममन्दिरम्।
सापि **तैलिपदेवस्य** भ्रातुर्गेहमुपागमत्॥ ७२॥
स्वसा **तैलिपदेवस्य** रण्डा **मृणालवत्यथ**।
भक्तपानादि **मुञ्जस्य** चक्रे भ्रातृनिदेशतः॥ ७३॥' इतीतिहासान्तरात्.

३. '**मुञ्जो** भणति **मृणालवति** यौवनं गतं न खिद्यस्व।
यदि शर्करा शतखण्डा स्थिता तदप्येषा मिष्टा चूर्णिता॥' इति च्छाया.

'[१]सउचित्तहरिसट्ठी मम्मणहवत्तीस डीहियां ।
हिअम्मि ते नर दड्ढ सीझे जे वीससइं थियां ॥
[२]झाली तुट्टी किं न मुउ किं न हूयउ छारपुञ्ज ।
हिण्डइ दोरीबन्धीयउ जिम मङ्कड तिम मुञ्ज ॥'

तथा च—

'[३]गयगयरहगयतुरयगयपायक्कडा निभिच्च ।
सग्गट्ठिय करि मन्तण उम्मुहुं ता रुद्दाइच्च ॥'

अथास्मिन्नवसरे कस्यापि गृहपतेर्गृहे भिक्षानिमित्तं नीतः । पड्डकपाणीं तत्पत्नी तक्रं पाययित्वा गर्वोद्धुरकन्धरां भिक्षादाननिषेधं विदधतीं मुञ्जः प्राह—

'[४]भोलि मुन्थि म गव्वु करि पिक्खि वि पड्डुगुपाइं ।
चउदसइ सइं छहुत्तरइं मुञ्जह गयह गयाइं ॥
मा मङ्कड कुरूद्वेगं यदहं खण्डितोऽनया ।
रामरावणमुञ्जाद्याः स्त्रीभिः के के न खण्डिताः ॥
रे रे यन्त्रक मा रोदीर्यदहं भ्रामितोऽनया ।
कटाक्षाक्षेपमात्रेण कराकृष्टौ च का कथा ॥
[५]जा मति पच्छइ सम्पज्जइ सा मति पहिली होइ ।
मुञ्ज भणइ मृणालवइ विघन न वेढइ कोइ ॥
यशःपुञ्जो मुञ्जो गजपतिरवन्तिक्षितिपतिः
सरस्वत्यावासः समजनि पुरा यः कृतिरिति ।
स कर्णाटेशेन स्वसचिव[वि]बुद्ध्यैव विधुतः
कृतः शूलारोपस्त्वहह विषमाः कर्मगतयः ॥

---

१. 'सर्वचित्तहर्षार्थे मन्मथवार्तायां दाक्षिण्यायाम् ।
हृदये ते नरा दृढं खिद्यन्ते ये विश्वसन्ति स्त्रियाम् ॥' इति च्छाया.

२. 'ज्वलित्वा त्रुटित्वा किं न······किं न भवेयं भस्मपुञ्जः ।
हिण्डति दवरकबद्धो यथा मर्कटस्तथा मुञ्जः ॥' इति च्छाया.

३. 'गतगजरथगततुरगगतपद्गो निर्भृत्यः ।
स्वर्गस्थितः कुर्वामन्त्रणं······ तस्माद्रुद्रादित्य ॥' इति च्छाया.

४. 'अज्ञे मुग्धे मा गर्वं कुरु प्रेक्ष्यापि लघुपिठरपाणिम् ।
चतुर्दशशतानि षड्त्तराणि मुञ्जस्य गजानां गतानि ॥' इति च्छाया.

५. 'या मतिः पश्चात्संपद्यते सा मतिः प्रथमा भवेत् ।
मुञ्जो भणति मृणालवति विघ्नं न वहति कोऽपि ॥' इति च्छाया.

सुहृद्देवेन्द्रस्य क्रतुपुरुषतेजोंशजनकः
प्रमीतः शय्यायां सुतविरहदुःखाद्दशरथः ।
ज्वलत्तैलद्रोण्यां निहितवपुषस्तस्य नृपते-
श्चिरात्संस्कारोऽभूदहह विषमाः कर्मगतयः ॥

आपद्गतं हससि किं द्रविणान्धमूढ लक्ष्मीः स्थिरा न भवतीति किमत्र चित्रम् ।
किं त्वं न पश्यसि घटीर्जलयन्त्रचक्रे रिक्ता भवन्ति भरिताश्च पुनश्च रिक्ताः ॥

अलंकारः शङ्काकरनरकपालं परिजनो
विशीर्णाङ्गो भृङ्गी वसु च वृष एको बहुवयाः ।
अवस्थेयं स्थाणोरपि भवति सर्वामरगुरो-
र्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी ॥
सायर षाई लङ्क गढ गढवइ दससिरु राउ ।
भग्गक्खय सो भज्जिगय **मुञ्ज** म करि विसाउ ॥'[1]

इत्थं सुचिरं भिक्षां भ्रामयित्वा वध्यभूमौ नृपादेशाद्वधविधौ नीतः । तैरुक्तम्—'इष्टं दैवतं स्मर ।'

'लक्ष्मीर्यास्यति गोविन्दे वीरश्रीर्वीरवेश्मनि ।
गते **मुञ्जे** यशःपुञ्जे निरालम्बा सरस्वती ॥'

इत्यादि तद्वाक्यानि यथाश्रुतमवगन्तव्यानि । तदनु **मुञ्जं** निहत्य तच्छिरो राजाङ्गणे शूलिकाप्रोतं कृत्वा नित्यं दधिवेष्टितं कारयन्निजममर्षं पुपोष ।

अथ **मालव**मण्डले तद्वृत्तान्तवेदिभिः सचिवैस्तद्भ्रातृजं **भोज**नामानं राज्येऽभ्यषिच्यत ।

'विक्रमाद्वासरादष्टमुनिव्योमेन्दु([2]१०७८)संमिते ।
वर्षे **मुञ्ज**पदे **भोज**भूपः पट्टे निवेशितः ॥'

इति विक्रम १३६१=A. D. 1305 वत्सरे **मेरुतुङ्गाचार्येण** विरचिते **प्रबन्धचिन्तामणौ** श्री**मुञ्जराजप्रबन्ध**तश्च सुप्रसिद्ध**धारा**नगराधीशश्रीम**द्भोजराज**राजस्य श्री**मालव**मण्डलान्तर्गतश्रीम**दुज्जयिनीश्वरवाक्पतिराजा**परपर्याय**मुञ्ज**महाराजः पितृव्य एवासीन्न पितामह इति सुदृढं निश्चीयतेतराम्.

अतो विविधलेखाद्यवगतश्रीम**द्धारानगरा**धीश**भोजराज**पूर्वपुरुषवंशावली (Geneology) प्रकाश्यते—

---

१. 'सागरः परिखा लङ्का दुर्गो दुर्गपतिर्दशशिरा राजा ।
भाग्यक्षये तद्भग्नं **मुञ्ज** मा कुरु विषादम् ॥' इति च्छाया.

२. A. D. 1022.

उदयपुरप्रशस्तितः	नवसाहसाङ्कचरिततः	नागपुरप्रशस्तितः	तिलकमञ्जरीतः	इण्डियन् आण्टिकेरी(६।५१-५४)पत्रतः
परमार	परमार	परमार	परमार	
उपेन्द्रराज	उपेन्द्रराज			कृष्णराज
वैरिसिंह I.			वैरिसिंह	वैरिसिंह
सीयक				
वाक्पति I.	वाक्पति			
वैरिसिंह II.–वज्रट	वैरिसिंह	वैरिसिंह		
हर्ष	सीयक–हर्ष	सीयक	श्रीहर्ष–सीयक	सीयकदेव
वाक्पति	वाक्पति–उत्पलराज	मुञ्ज	मुञ्ज–वाक्पति	वाक्पतिराज–अमोघवर्ष
सिन्धुराज	सिन्धुराज–नवसाहसाङ्क–कुमारनारायण	सिन्धुराज	सिन्धुराज	सिन्धुराज
भोजदेव	भोजदेव	भोजदेव	भोजदेव	भोजदेव

किंच 'श्रीमद्भोजराजपितामहो मुञ्जराजमहाराजः' इत्यस्य प्रमाणीभूते Indian Antiquary Vol. VI., P. 53-54 लिखिते विक्रम १०७८=A. D. 1022 वर्षीये श्रीमद्भोजनरेन्द्रदानपत्रे, Epigraphia Indica Vol. III., P. 48-50 लिखिते विक्रम १११२=A. D. 1056 वर्षीये श्रीमज्जयसिंहवितीर्णदानपत्रे च 'श्रीवाक्पतिराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीसिन्धुराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीभोजदेव–' इति यो लेख उपलभ्यते, तत्र तु श्रीमद्भोजदेवनरेन्द्रेण निजजनयितुः श्रीमन्मालवमण्डलान्तर्गतश्रीमदुज्जयिनीराजस्य श्रीमत्सिन्धुराजस्य नामन्यासश्चिरकालनामसंख्यातिसंकीर्तनायैव निवेशितो भवेत्. उत च तैलिङ्गाधिपतितैलिपराजराजहंसहिञ्जीरहंसकावतंसालंकृतस्य निरलंकृतनिखिलशौर्यैकलापुञ्जस्य मञ्जुलमुञ्जराजमहाराजस्य कारावासनिवासानेहस्येकादशख्रिस्ताब्दशतकाद्यचरणे भ्रातृप्रतिनिधित्वेन श्रीमत्सिन्धुराजदेवस्तन्मण्डलमण्डको भवेत् इति कल्पना कथंचित्संभाव्यते. श्रीमदुज्जयिनीराजवाक्पतिराजापराभिधानश्रीमुञ्जराजमहाराजात् सिन्धुराजस्योत्पत्त्यसंभवात्, Epigraphia Indica Vol. II., P. 182-88 स्थ Dr. F. Kielhorn, Ph. D., C. I. E. महाशयप्रकाशितविक्रम ११६१=A. D. 1105 वर्षोत्कीर्णपरमारवंशावतंसश्रीनरवर्मदेवकारितमन्दिरप्रशस्तिलेखान्तर्गतैः, Epigraphia Indica Vol. I., P. 226-28 स्थ Dr. G. Bühler, Ph. D., L. L. D., C. I. E. महाशयप्रकाशितमालवमण्डलाधिपतिमहीपतिप्रशस्तिलेखान्तर्गतैः, श्रीमत्सिन्धुराजसमकालिकश्रीमत्परिमलकविविरचितनवसाहसाङ्कचरित-श्रीमद्धनपालकविविरचिततिलकमञ्जरीप्रस्तावनान्तर्गतैः, प्रबन्धचिन्तामणिस्थमुञ्जराजप्रबन्धान्तर्गतैश्च श्रीमद्वाक्पतिराजापरनाममुञ्जराजानुजसिन्धुराजदर्शिभिर्लेखैर्विरोधापाताच्च.

अथ च किलेतिहासादिषु भूयांसो वाक्पतिराजसमनामानो राजानोऽराजानो दरीदृश्यन्ते. तद्रहस्यमजानानैः कैश्चन पण्डितमण्डलीमण्डितैः पण्डितैः समुद्रापितसुभाषितावलीभूमिकायां दशमख्रिस्तशतकोत्तरार्धोत्पन्नमुञ्जराजापरपर्यायवाक्पतिराजमहाराजस्य सप्तमख्रिस्तशतकोत्तरार्धोत्पन्नस्य राजतरङ्गिण्यां (४।१४५) वर्णितस्य कश्मीरमण्डलाधीशश्रीमल्ललितादित्यराजपराजितकन्यकुब्जमण्डलाधीशयशोवर्मयशोवर्ममहाराजस्य राजसभासिगौडवधाख्यमहाकाव्यप्रकाशिश्रीमत्कमलायुधान्तेवासिश्रीमद्वाक्पतिराजदेवस्य दशमख्रिस्ताब्दशतकोत्तरार्धोत्पन्नसोमदेवकविविरचितयशस्तिलकापरनामयशोधरमहाराजचरिते वर्णितस्य च नामसाम्यादेकता प्रकाशिता। अतस्तेषां धन्यवादपुरःसरं लेखं प्रकाशयामि—

---

1. *Vide* Archealogical Survey P. 124-129, Epigraphia Indica Vol. I., P. 140-147 and Vol. II., P. 119-125.

"Vâkpati—Author of the Gaudavadha. He is stated in our book to have been the son of Harshadeva. For Vâkpatirâja's relations to Bhavabhûti, see Bhandarkar's Preface to his edition of Mâlatîmâdhava already referred to under Bhavabhûti. That Vâkpatirâja was a prince as well as a poet is evident both from the passage in the Râjatarangini and from the following reference to him found in Halâyudha's commentary on the Piṅgala sûtras

'स जयति **वाक्पतिराजः** सकलार्थिमनोरथैककल्पतरुः ।
प्रत्यर्थिभूतपार्थिवलक्ष्मीहठहरणदुर्ललितः ॥'

Halâyudha's verse is quoted in the Das'arûpâvaloka with the note that the king referred to is Muñja.

According to a statement in the Yas'astilaka Vâkpatirâja was thrown into prison by Yas'ovarman, and there, like James I. of Scotland, composed his poem."

अथ च 'आदौ **धारा**राज्ये **सिन्धुल**संज्ञो राजा चिरं प्रजा पर्यपालयत् । तस्य वृद्धत्वे **भोज** इति पुत्रः समजनि । स यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूय अनुजं **मुञ्जं** महाबलमालोक्य पुत्रं च बालं वीक्ष्य विचारयामास–' इति **मुञ्जराज**कथानकसूचक**भोजप्रबन्धा**रम्भलेखकस्तु नीलं नभ इति लिखन्निव स्वनिर्मूलतां द्रढयति. **उज्जयिनी**श्वरत्वेन वर्णिता **भोजराज**पूर्वपुरुषा (Indian Antiquary Vol. XIV., P. 160 and Vol. VI., P. 51–52 स्थलेखैः, **प्रबन्धचिन्तामणि–नवसाहसाङ्कचरित**स्थश्लोकैश्च **उज्जयिनी**श्वरः श्री**मुञ्जराजापरनामवाक्पतिराज** आसीत्. अथ च **नवसाहसाङ्कचरित** ११।७–५८ श्लोकैः, **प्रबन्धचिन्तामणि**स्थश्लोकैश्च **उज्जयिनी**राजः श्रीमत्**सिन्धुराज** आसीदिति) उपलभ्यन्ते. कथं तर्हि **उज्जयिनी**राजस्य श्रीमन्**मुञ्जराजस्य** श्रीमत्**सिन्धुराजस्य** वा **धारा**राज्ये राज्यकर्तृता पुनः संभाव्येत.

'**भोजराज** मया ज्ञातं राधावेधस्य कारणम् ।
धाराया विपरीतं हि न सहेत भवानिति ॥'

विद्वद्भिरिति श्लाघ्यमानो नवनगरनिवेशं कर्तुकामः पटहे वाद्यमाने **धारा**भिधया पणस्त्रि**याग्निवेताल**नाम्ना पत्या सह **लङ्कां** गत्वा तं नगरनिवेशमालोक्य पुनः समागतया 'मन्नाम नगरे दातव्यम्' इत्यभिधाय तत्प्रतिच्छदपटं समर्प्य सा **धारां** नगरीं निवेशयामास–' इति **प्रबन्धचिन्तामणि**स्थ**भोजभीम**प्रबन्धान्तर्गतलेखतो **धारा**नगरी श्री**भोजदेवे**नैव निर्मापितेत्यवगम्यते. एवं **भोजराज**जनकः श्री**सिन्धुराजो**-

ऽपि श्री**मुञ्जराज**स्यानुज एवासीत् (Epigraphia Indica, Vol. II., P. 182-88 स्थ Dr. F. Kielhorn, Ph. D., C. I. E. महाशयप्रकाशितविक्रम ११६१=A. D. 1105 वर्षोत्कीर्ण**परमार**वंशावतंसश्री**नरवर्मदेव**कारितमन्दिरप्रशस्तिलेखतः, Epigraphia Indica, Vol. I., P. 226-228 स्थ Dr. G. Bühler, Ph. D., L. L. D., C. I. E. महाशयप्रकाशित**मालव**मण्डलाधिपतिमहीपतिप्रशस्तिलेखतः, **नवसाहसाङ्कचरित-तिलकमञ्जरी**लेखतः, **प्रबन्धचिन्तामणि**स्थ**भोजभीम**प्रबन्धान्तर्गतलेखतः) इत्यादिबहुविधलेखतः सुदृढं निश्चीयते. नहि **सिन्धुराज**स्यानुजो **मुञ्जः** कथमपि संभाव्यते. **मुञ्जराजा**नुजत्वेन वर्णितेषु (Epigraphia Indica, Vol. II., P. 182-88 स्थ Dr. F. Kielhorn, Ph. D., C. I. E. महाशयप्रकाशितविक्रम ११६१=A. D. 1105 वर्षोत्कीर्ण**परमार**वंशावतंसश्री**नरवर्मदेव**कारितमन्दिरप्रशस्तिलेखे, Epigraphia Indica, Vol. I., P. 226-228 स्थ Dr. G. Bühler, Ph. D., L. L. D., C. I. E. महाशयप्रकाशित**मालव**मण्डलाधिपतिमहीपतिप्रशस्तिलेखे, **नवसाहसाङ्कचरित-तिलकमञ्जरी**लेखे, **प्रबन्धचिन्तामणि**स्थ**भोजभीम**प्रबन्धान्तर्गत**मुञ्ज**प्रबन्धदर्शिलेखे च) इत्येवंविधेष्वनेकेषु लेखेषु **भोजप्रबन्ध**कारीत्या **मुञ्जराजात्सिन्धुराज**स्याभ्यर्हितत्वाद्राजधानीश्वरत्वाच्च पूर्वं वर्णनावसरप्रसङ्गः, **मुञ्जराजा**नुजत्वेन वर्णितानां **सिन्धुराज**पराणां वाक्यवृन्दानामुच्छेदनावसरप्रसङ्गश्च स्यादित्यलं पल्लवितेन.

अस्य हि ग्रन्थस्य पुस्तकत्रयमस्मत्सरस्वतीसदनत उपलब्धम्. तदाधारेण शोधितमुद्रितेऽप्यस्मिन्ग्रन्थे टिप्पण्यां वा यत्र कुहचनाशुद्धिः स्थिता जाता वा भवेत्, तत्र सुहृदयहृदयाः संशोधयन्तु । यतः—

गच्छतः स्खलनं वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

इति प्रार्थयति—

भवदत्तशास्त्री.
(गव्हर्नमेण्ट कॉलेज, अजमेर.)

सुभाषितरत्नसंदोहस्थविषयानुक्रमणिका ।

काव्यमाला

अमितगतिविरचितः

सुभाषितरत्नसंदोहः

जनयति मुदमन्तर्भव्य[1]पाथोरुहाणां

हरति तिमिरराशिं या प्रभा भानवं।

कृत[2]निखिलपदार्थद्योतना भारतीद्धा[3]

वितरतु धुतदोषा सार्हती भा[4]रती वः ॥ १ ॥

न तदरिरिभराजः केशरी केतुरुग्रो

नरपतिरतिरुष्टः कालकूटोऽतिरौद्रः ।

अतिकुपितकृतान्तः पावकः पन्नगेन्द्रो

यदिह विषयशत्रुर्दुःखमुग्रं करोति ॥ २ ॥

न नरदिविजनाथा येषु[5] तृप्यन्ति तेषु

कथमपरनराणामिन्द्रियार्थेषु तृप्तिः ।

वहति सरिति यस्यां दन्तिनाथोऽतिमत्तो

भवति हि शशकानां केन तत्र व्यवस्था ॥ ३ ॥

ददति विषयदोषा ये तु दुःखं सुराणां

कथमि[6]तरमनुष्यास्तेषु सौख्यं ल[7]भन्ते ।

मदमलिनकपोलः क्लिश्यते ये[8]न हस्ती

क्र[9]मपतितमृगं स त्यक्ष्यती[10]भारि[11]रत्र ॥ ४ ॥

यदि भवति समुद्रः सिन्धु[12]तोयेन तृप्तो

यदि कथमपि वह्निः काष्ठसंघाततश्च ।

---

१. भव्या एव पाथोरुहाणि कमलानि तेषाम्. २. कृतं निखिलपदार्थानां द्योतनं यया सा. ३. ऋद्धिं प्राप्ता. ४. वाणी. ५. विषयेषु. ६. सामान्यपुरुषाः. ७. अपि तु न लभन्ते. ८. सिंहेन. ९. चरणपतितमृगम्. १०. किं त्यक्ष्यति, अपि च न त्यक्ष्यतीत्यर्थः. ११. सिंहः. १२. सरिज्जलेन.

अयमपि विषयेषु प्राणिवर्गस्तदा स्या-
दिति मनसि विदन्तो मा व्यधुस्तेषु यत्नम् ॥ ५ ॥
असुरसुरनराणां यो न भोगेषु तृप्तः
कथमपि मनुजानां तस्य भोगेषु तृप्तिः ।
जलनिधिजलपाने [1]यो न जातो वितृष्ण-
स्तृणशिखरगताम्भःपानतः किं स तृप्येत् ॥ ६ ॥
सततविविधजीवध्वंसनाद्यैरुपायैः
स्वजनतनुनिमित्तं कुर्वते पापमुग्रम् ।
व्यथिततनुमनस्का जन्तवोऽमी सहन्ते
नरकगतिमुपेता दुःखमेकाकिनस्ते ॥ ७ ॥
यदि भवति विचित्रं संचितं द्रव्यमर्थ्यै
परिजनसुतदारा भुञ्जते तन्मिलित्वा ।
न पुनरिह समर्था ध्वंसितुं दुःखमेत-
त्तदपि बत विधत्ते पापमङ्गी तदर्थम् ॥ ८ ॥
धनपरिजनभार्याभ्रातृमित्रादिमध्ये
व्रजति [2]भवभृता यो नैष एकोऽपि कश्चित् ।
तदपि गतविमर्षाः कुर्वते तेषु रागं
न तु विदधति धर्मं यः समं याति [3]यात्रा ॥ ९ ॥
यदिह भवति सौख्यं [4]वीतकामस्पृहाणां
न तदमरविभूनां नापि चक्रेश्वराणाम् ।
इति मनसि नितान्तं प्रीतिमाधाय धर्मे
भजत जहित चैतान्कामशत्रून्दुरन्तान् ॥ १० ॥
यदि कथमपि नश्येद्भोगलेशेन नृत्वं
पुनरपि तदवाप्तिर्दुःखतो देहिनां स्यात् ।
इति हतविषयाशा धर्मकृत्ये यतध्वं
यदि भवमृतिमुक्ते मुक्तिसौख्येऽस्ति वाञ्छा ॥ ११ ॥

---

१. यः कश्चन. २. जीवेन सह. ३. गन्त्रा. ४. जन्ममरणरहिते.

विषमविषसमानान्नाशिनः कामभोगां-
स्त्यजति यदि मनुष्यो दीर्घसंसारहेतून् ।
व्रजति कथमनन्तं दुःखमत्यन्तघोरं
त्रिविधमुपहतात्मा श्वभ्रभूम्यादिभूतम् ॥ १२ ॥

विगलितरसमस्थि स्वादयन्दारितास्यः
स्वकवदनजरक्ते मन्यते श्वा सुखित्वम् ।
स्वतनुजनितखेदाज्जायमानं जनानां
तदुपममिह सौख्यं कामिनां कामिनीभ्यः ॥ १३ ॥

किमिह परमसौख्यं निःस्पृहत्वं यदेत-
त्किमथ परमदुःखं सस्पृहत्वं यदेतत् ।
इति मनसि विधाय त्यक्तसङ्गाः सदा ये
विदधति जिनधर्मं ते नराः पुण्यवन्तः ॥ १४ ॥

उपधिवसतिपिण्डान्गृह्णते[1] नो विरुद्धां-
स्तनुवचनमनोभिः सर्वथा ये मुनीन्द्राः ।
व्रतसमितिसमेता ध्वस्तमोहप्रपञ्चा
ददतु मम विमुक्तिं ते हतक्रोधयोधाः ॥ १५ ॥

जनयति परभूतिं स्त्रीधनं नाशदुःखं
ददति विषयवाञ्छा बन्धनं बन्धुवर्गाः ।
इति रिपुषु विमूढास्तन्वते सौख्यबुद्धिं
जगति धिगिति कष्टं मोहनीयं जनानाम् ॥ १६ ॥

मदमदनकषायारातयो नोपशान्ता
न च विषयविमुक्तिर्जन्मदुःखान्न भीतिः ।
न तनुसुखविरागो विद्यते यस्य जन्तो-
र्भवति जगति दीक्षा तस्य भुक्त्यै न मुक्त्यै ॥ १७ ॥

श्रुतमतिबलवीर्यप्रेमरूपायुरङ्ग-
स्वजनतनयकान्ताभ्रातृपित्रादि सर्वम् ।

---

१. ज्ञानसंयमशौचोपकरणस्थानान्.

तितउगतजलं वा[1] न स्थिरं वीक्षतेऽङ्गी
तदपि बत विमूढो नात्मकृत्यं करोति ॥ १८ ॥

त्यजत युवतिसौख्यं क्षान्तिसौख्यं श्रयध्वं
विरमत भवमार्गान्मुक्तिमार्गे रमध्वम् ।
जहित विषयसङ्गं ज्ञानसङ्गं कुरुध्वं
अमितगतिनिवासं येन नित्यं लभध्वम् ॥ १९ ॥

श्रुतिसहजविवेकं ज्ञानसंसर्गदीपा-
स्तिमिरदलनदक्षाः सर्वदात्यन्तदीप्ताः ।
प्रकटितनयमार्गा यस्य पुंसोऽत्र सन्ति
स्खलति यदि स मार्गे तत्र दैवापराधः ॥ २० ॥

जिनपतिपदभक्तिर्भावना जैनतत्वे
विषयसुखविरक्तिर्मित्रता सत्ववर्गे ।
श्रुतिशमयमशक्तिर्मूकतान्यस्य दोषे
मम भवतु च बोधिर्यावदाप्नोमि मुक्तिम् ॥ २१ ॥

इति सांसारिकविषयनिराकरणम् ॥ १ ।

कोपोऽस्ति यस्य मनुजस्य निमित्तमुक्तो
नो तस्य कोऽपि कुरुते गुणिनोऽपि भक्तिम् ।
आशीविषं भजति को ननु दन्दशूकं
नानोग्ररोगशमिना मणिनापि युक्तम् ॥ २२ ॥

पुण्यं चितं व्रततपोनियमोपवासैः
क्रोधः क्षणेन दहतीन्धनवद्धुताशः ।
मत्वेति तस्य वशमेति न यो महात्मा
तस्याभिवृद्धिमुपयाति नरस्य पुण्यम् ॥ २३ ॥

दोषं[2] न तं नृपतयो रिपवोऽपि रुष्टाः
कुर्वन्ति केशरिकरीन्द्रमहोरगा वा ।

---

१. इवार्थे वाशब्दः. २. हानिम्.

धर्मं निहत्य भवकाननदाववह्निं
यं [1]दोषमत्र विदधाति नरस्य रोषः ॥ २४ ॥

यः कारणेन वितनोति रुषं मनुष्यः
कोपं प्रयाति शमनं तद[3]भावतोऽस्य ।
यस्तत्र कुप्यति विनापि निमित्तमङ्गी
नो तस्य कोऽपि शमनं विदधातुमीशः ॥ २५ ॥

धैर्यं धुनाति विधुनोति मतिं क्षणेन
[4]रागं करोति शिथिलीकुरुते शरीरम् ।
धर्मं हिनस्ति वचनं विदधात्यवाच्यं
कोपो ग्रहो रतिपतिर्मदिरामदश्च ॥ २६ ॥

[5]रागं दृशोर्वपुषि कम्पमनेकरूपं
चित्तं विवेकरहितानि च चिन्तितानि ।
पुंसाममार्गगमनं समदुःखजातं
कोपः करोति सहसा मदिरामदश्च ॥ २७ ॥

मैत्रीयशोव्रततपोनियमानुकम्पा-
सौभाग्यभाग्यपठनेन्द्रियनिर्जयाद्याः ।
नश्यन्ति कोपपरवैरिहताः समस्ता-
स्तीव्राग्नितप्त[6]रसवत्क्षणतो नरस्य ॥ २८ ॥

मासोपवासनिरतोऽस्तु तनोतु सत्यं
ध्यानं करोतु विदधातु बहिर्निवासम् ।
ब्रह्मव्रतं धरतु भैक्ष्यरतोऽस्तु नित्यं
रोषं करोति यदि सर्वमनर्थकं तत् ॥ २९ ॥

आत्मानमन्यमथ हन्ति जहाति धर्मं
पापं समाचरति युक्तमपाकरोति ।

१. हानिम्. २. संसारे. ३. कारणाभावतः. ४. हठात्मकं रागम्. ५. रक्तताम्. ६. पारदवत्.

पूज्यं न पूजयति वक्ति विनिन्द्यवाक्यं
  किं किं करोति न नरः खलु कोपयुक्तः ॥ ३० ॥
दोषेषु सत्सु यदि कोऽपि ददाति शापं[1]
  सत्यं ब्रवीत्ययमिति प्रविचिन्त्य सह्यम् ।
दोषेष्वसत्सु यदि कोऽपि ददाति शापं[2]
  मिथ्यां ब्रवीत्ययमिति प्रविचिन्त्य सह्यम् ॥ ३१ ॥
कोपेन कोऽपि यदि ताडयतेऽथ हन्ति
  पूर्वं मयास्य कृतमेतदनर्थबुद्ध्या ।
दोषो ममैव पुनरस्य न कोऽपि दोषो
  ध्यात्वेति तत्र मनसा सहनीयमस्य ॥ ३२ ॥
व्याध्यादिदोषपरिपूर्णमनिष्ठसङ्गं
  पूतीदमङ्गमपनीय विवर्ध्य धर्मम् ।
शुद्धं ददाति गतवाधमनल्पसौख्यं
  लाभो ममायमिति घातकृतो विषह्यम् ॥ ३३ ॥
धर्मे स्थितस्य यदि कोऽपि करोति कष्टं
  पापं चिनोति गतबुद्धिरयं वराकः ।
एवं विचिन्त्य परिकल्पकृतं त्वमुष्य
  ज्ञानान्वितेन भवति क्षमितव्यमत्र ॥ ३४ ॥
शप्तोऽस्म्यनेन न हतोऽस्मि नरेण रोषा-
  न्नो मारितोऽस्मि मरणेऽपि न धर्मनाशः ।
कोपस्तु धर्ममपहन्ति चिनोति पापं
  संचिन्त्य चारुमतिनेति तितिक्षणीयम् ॥ ३५ ॥
दुःखार्जितं खलगतं वैलभीकृतं[3] च
  धान्यं यथा दहति वह्निकणः प्रविष्टः ।
नानाविधव्रतदयानियमोपवासै-
  रोषोऽर्जितं भवभृतां पुरुपुण्यराशिम् ॥ ३६ ॥

१.-२. दुर्वचनम्. ३. राशीकृतम्.

कोपेन यः परमभीप्सति हन्तुमज्ञो
नाशं स एव लभते शरभो ध्वनन्तम् ।
मेघं लिलङ्घिषुरिवान्यजनो न किंचि-
च्छक्नोति कर्तुमिति कोपवता न भाव्यम् ॥ ३७ ॥

कोपः करोति पितृमातृसुहृज्जनाना-
मप्यप्रियत्वमुपकारिजनापकारम् ।
देहक्षयं प्रकृतकार्यविनाशनं च
मत्वेति कोपवशिनो न भवन्ति भव्याः ॥ ३८ ॥

तीर्थाभिषेकजपहोमदयोपवासा
ध्यानव्रताध्ययनसंयमदानपूजा ।
नेदृक्फलं जगति देहवतां ददन्ते
यादृग्दमो निखिलकालहितो ददाति ॥ ३९ ॥

भ्रूभङ्गभङ्गुरमुखो विकरालरूपो
रक्तेक्षणो दशनपीडितदन्तवासाः ।
त्रासं गतोऽतिमनुजो जननिन्द्यवेषः
क्रोधेन कम्पिततनुर्भुवि राक्षसो वा ॥ ४० ॥

कोऽपीह लोहमिति तप्तमुपाददानो
दंदह्यते निजकरे परदाहमिच्छुः ।
यद्वत्तथा प्रकुपितः परमाजिघांसु-
र्दुःखं स्वयं व्रजति वैरिवधे विकल्पः ॥ ४१ ॥

वैरं विवर्धयति सख्यमपाकरोति
रूपं विरूपयति निन्द्यमतिं तनोति ।
दौर्भाग्यमानयति शातयते च कीर्तिं
रोषोऽत्र रोषसदृशो न हि शत्रुरस्ति ॥ ४२ ॥

इति कोपनिराकरणोपदेशः ॥ २ ॥

---

१. अष्टापदो महासिंहः.

रूपेश्वरत्वकुलजातितपोबलाज्ञा-
ज्ञानाष्टदुःसहमदाकुलबुद्धिरज्ञः ।
यो मन्यतेऽहमिति नास्ति परोऽधिकोऽपि
मानात्स नीचकुलमेति भवाननेकान् ॥ ४३ ॥
नीतिं निरस्यति विनीतिमुपाकरोति
कीर्तिं शशाङ्कधवलां मलिनीकरोति ।
मान्यान्न मानयति मानवशेन हीनः
प्राणीति मानमपहन्ति महानुभावः ॥ ४४ ॥
हीनाधिकेषु विदधात्यविवेकभावं
धर्मं विनाशयति संचिनुते च पापम् ।
दौर्भाग्यमानयति कार्यमपाकरोति
किं किं न दोषमथवा कुरुतेऽभिमानः ॥ ४५ ॥
माने कृते यदि भवेदिह कोऽपि लाभो
यद्यर्थहानिरथ काचन मार्दवे स्यात् ।
ब्रूयाच्च कोऽपि यदि मानकृतं विशिष्टं
मानो भवेद्भवभृतां सफलस्तदानीम् ॥ ४६ ॥
मानी विनीतिमपहन्त्यविनीतिरङ्गी[1]
सर्वं निहन्ति गुणमस्तगुणानुरागः ।
सर्वापदां जगति धाम विरागतः स्या-
दित्याकलय्य सुधियो न भरन्ति मानम् ॥ ४७ ॥
हीनोऽयमन्यजननोपहताभिमाना-
ज्जातोऽहमुत्तमगुणस्तदकारकत्वात् ।
अन्यं निहीनमवलोकयतोऽपि पुंसो
मानो विनश्यति सदेति वितर्कभाजः ॥ ४८ ॥
गर्वेण मातृपितृबान्धवमित्रवर्गाः
सर्वे भवन्ति विमुखा विहितेन[2] पुंसः ।

१. अविनीतिं रञ्जयति. २. मानकृतेन.

अन्योऽपि तस्य तनुते न जनोऽनुरागं
मत्वेति मानमपहस्तयते सुबुद्धिः ॥ ४९ ॥

आयासकोपभयदुःखमुपैति मर्त्यो
मानेन सर्वजननिन्दितवेषरूपः ।
विद्यादयादमयमादिगुणांश्च हन्ति
ज्ञात्वेति गर्ववशमेति न शुद्धबुद्धिः ॥ ५० ॥

स्तब्धो विनाशमुपयाति नतोऽतिवृद्धिं
मर्त्यो नदीतटगतो धरणीरुहो वा[1] ।
गर्वस्य दोषमिति चेतसि संनिधाय
नाहं करोति गुणदोषविचारदक्षः ॥ ५१ ॥

हीनानवेक्ष्य कुरुते हृदयेऽभिमानं
मूर्खः स्वतोऽधिकगुणानवलोक्य मर्त्यान् ।
प्राज्ञः परित्यजति गर्वमतीव लोके
सिद्धान्तशुद्धधिषणा मुनयो वदन्ति ॥ ५२ ॥

जिह्वासहस्रकलितोऽपि समा सहस्रै-
र्यस्यां न दुःखमुपवर्णयितुं समर्थः ।
सर्वज्ञदेवमपहाय परो मनुष्य-
स्तां श्वभ्रभूमिमुपयाति नरोऽभिमानी ॥ ५३ ॥

यां छेदभेददमनाङ्कनदाहदोह-
वातातपान्नजलरोधवधादिदोषाम् ।
मायावशेन मनुजो जननिन्दनीयां
तिर्यग्गतिं व्रजति तामतिदुःखपूर्णाम् ॥ ५४ ॥

यत्र प्रियाप्रियवियोगसमागमान्य
प्रेष्यत्वधान्यधनबान्धवहीनताद्यैः ।
दुःखं प्रयाति विविधं मनसाप्यसह्यं
तं मर्त्यवासमधितिष्ठति माययाङ्गी ॥ ५५ ॥

---

1. इवार्थे वाशब्दः.

यत्रावलोक्य दिवि दीनमना विभूति-
मन्यामरेष्वधिककान्तिसुखादिकेषु ।
प्राप्याभियोगपदवीं लभतेऽतिदुःखं
तत्रेति वञ्चनपरः पुरुषो निवासम् ॥ ५६ ॥
जामातृभर्तृपितृबान्धवमित्रपुत्र-
वस्त्रासनाभरणमण्डनसौख्यहीनः ।
दीनाननो मलिननिन्दितवेषरूपो
नारीषु तासु भवमेति नरो निकृत्या[1] ॥ ५७ ॥
शीलव्रतोद्यमतपःशमसंयुतोऽपि
नात्राश्नुते निकृतिशल्यधरो मनुष्यः ।
आत्यन्तिकीं श्रियमबाधसुखस्वरूपां
शल्यान्वितो विविधधान्यधनेश्वरो वा[2] ॥ ५८ ॥
क्लेशार्जितं सुखकरं रमणीयमर्घ्यं
धान्यं कृषीवलजनस्य शिखीव सर्वम् ।
भस्मीकरोति बहुधापि जनस्य सत्यं
मायाशिखी प्रचुरदोषकरः क्षणेन ॥ ५९ ॥
विद्वेषवैरिकलहासुखघातभीति-
निर्भर्त्सनाभिभवनासुविनाशनादीन् ।
दोषानुपैति निखिलान्मनुजोऽतिमायी
बुद्ध्वेति चारुमतयो न भजन्ति मायाम् ॥ ६० ॥
या[3] प्रत्ययं[4] बुधजनेषु निराकरोति
पुण्यं हिनस्ति परिवर्धयते च पापम् ।
सत्यं निरस्यति तनोति विनिन्द्यभावं
तां सेवते निकृतिमत्र जनो न भव्यः ॥ ६१ ॥
प्रच्छादितोऽपि कपटेन जनेन दोषो
लोके प्रकाशमुपयातितरां क्षणेन ।

१. मायया. २. इवार्थे वाशब्दः. ३. माया. ४. विश्वासम.

वर्चो[1] यथा जलगतं विदधाति पुंसां
माया मनागपि न चेतसि संनिधेया ॥ १२ ॥

इति मायाहंकारनिराकरणोपदेशः ॥ ३ ॥

शीतो रविर्भवति शीतरुचिः प्रतापी
स्तब्धं नभो जलनिधिः सरिदम्बुतृप्तः ।
स्थायी मरुद्विदहनो दहनोऽपि जातु
लोभानलस्तु न कदाचिददाहकः स्यात् ॥ १३ ॥

लब्धेन्धनज्वलनवत्क्षणतोऽतिवृद्धिं
लाभेन लोभदहनः समुपैति जन्तोः ।
विद्यागमव्रततपःशमसंयमादी-
न्भस्मीकरोति यमिनां स पुनः प्रवृद्धः ॥ १४ ॥

वित्ताशया खनति भूमितलं सतृष्णो
धातून्गिरेर्धमति धावति भूमिपाग्रे ।
देशान्तराणि विविधानि विगाहते च
पुण्यं विना न च नरो लभते स तृप्तिम् ॥ १५ ॥

वर्धस्व जीव जय नन्द विभो चिरं त्व-
मित्यादिचाटुवचनानि विभाषमाणः ।
दीनाननो मलिननिन्दितरूपधारी
लोभाकुलो वितनुते सधनस्य सेवाम् ॥ १६ ॥

चक्षुःक्षयं प्रचुररोगशरीरबाधा-
स्वान्ताविघातगतिभङ्गममन्यमानः ।
संस्कृत्य पत्रनिचयं च मषीर्विमर्द्य
तृष्णातुरो लिखति लेखकतामुपेतः ॥ १७ ॥

विश्वंभरां विविधजन्तुगणेन पूर्णां
स्त्री गर्भिणीमिव कृपामपहाय मर्त्यः ।

१. गूथो यथा.

नानाविधोपकरणेन हलेन दीनो
लोभार्दितः कृषति पापमलोकमानः ॥ ६८ ॥
भोगोपभोगसुखतो विमुखो मनुष्यो
रात्रिं दिवं पठनचिन्तनसक्तचित्तः ।
शास्त्राण्यधीत्य विविधानि करोति लोभा-
दध्यापनं शिशुगणस्य विवेकशून्यः ॥ ६९ ॥
वस्त्राणि सीव्यति तनोति विचित्रचित्रं
मृत्काष्ठलोहकनकादिविधिं करोति ।
नृत्यं चिनोति रजकत्वमुपैति मर्त्यः
किं किं न लोभवशवर्तितया विधत्ते ॥ ७० ॥
लोकस्य मुग्धधिषणस्य विवञ्चनानि
कुर्वन्नरो विविधमानविशेषकृत्या[1] ।
संसारसागरमपारमवीक्षमाणो
वाणिज्यमत्र विदधाति विवृद्धलोभः ॥ ७१ ॥
अध्येति नृत्यति लुनाति मिनोति नौति
क्रीणन्ति हन्ति वपते चिनुते बिभेति ।
मुष्णाति गायति धिनोति बिभर्ति भिन्ते
लोभेन सीव्यति पणायति याचते च ॥ ७२ ॥
कुन्तासिशक्तिभरतोमरतज्वलादि
नानाविधायुधभयंकरमुग्रयोधम् ।
संग्राममध्यमधितिष्ठति लोभयुक्तः
स्वं जीवितं तृणसमं विगणय्य जीवः ॥ ७३ ॥
अत्यन्तभीमवनजीवगणेन पूर्णं
दुर्गं वनं भवभृतां मनसाप्यगम्यम् ।
चौराकुलं विशति लोभवशेन मर्त्यो
नो धर्मकर्म विदधाति कदाचिदज्ञः ॥ ७४ ॥

---

१. तोलने न्यूनाधिकीकरणेन.

जीवान्निहन्ति विविधं वितथं ब्रवीति
स्तेयं तनोति भजते वनितां परस्य ।
गृह्णाति दुःखजननं धनमुग्रदोषं
लोभग्रहस्य वशवर्तितया मनुष्यः ॥ ७५ ॥

उद्यन्महानिलवशोत्थविचित्रवीचि-
विक्षिप्तनक्रमकरादिनितान्तभीतिम् ।
अम्भोधिमध्यमुपयाति विवृद्धवेलं
लोभाकुलो मरणदोषममन्यमानः ॥ ७६ ॥

निःशेषलोकवनदाहविधौ समर्थं
लाभानलं निखिलतापकरं ज्वलन्तम् ।
ज्ञानाम्बुवाहजनितेन विवेकिजीवाः
संतोषदिव्यसलिलेन शमं नयन्ते ॥ ७७ ॥

द्रव्याणि पुण्यरहितस्य न सन्ति लोभा-
त्सन्त्यस्य चेन्न तु भवन्त्यचलानि तानि ।
सन्ति स्थिराणि यदि तस्य न सौख्यदानि
ध्यात्वेति शुद्धधिषणो न तनोति लोभम् ॥ ७८ ॥

चक्रेशकेशवहलायुधभूतिनोऽपि
संतोषमुक्तमनुजस्य न तृप्तिरस्ति ।
तृप्तिं विना न सुखमित्यवगम्य सम्य-
ग्लोभग्रहस्य वशिनो न भवन्ति धीराः ॥ ७९ ॥

दुःखानि यानि नरकेष्वतिदुःसहानि
तिर्यक्षु यानि मनुजेष्वमरेषु यानि ।
सर्वाणि तानि मनुजस्य भवन्ति लोभा-
दित्याकलय्य विनिहन्ति तमत्र धन्यः ॥ ८० ॥

लोभं विधाय विधिना बहुधापि पुंसः
संचिन्वतः क्षयमनित्यतया प्रयान्ति ।

द्रव्याण्यवश्यमिति चेतसि संनिरूप्य
　　लोभं त्यजन्ति सुधियो धुतमोहनीयाः ॥ ८१ ॥
तिष्ठन्तु बाह्यधनधान्यपुरःसरार्थाः
　　संवर्धिताः प्रचुरलोभवशेन पुंसा ।
कायोऽपि नश्यति निजोऽयमिति प्रचिन्त्य
　　लोभारिमुग्रमुपहन्ति विरुद्धतत्त्वम् ॥ ८२ ॥

इति लोभनिराकरणोपदेशः ॥ ४ ॥

स्वेच्छा विहारसुखतो निवसन्नगानां
　　भक्षद्वने किशलयानि मनोहराणि ।
आरोहणाङ्कुशविनोदनबन्धनादि
　　दन्ती त्वगिन्द्रियवशः समुपैति दुःखम् ॥ ८३ ॥
तिष्ठञ्जलेऽतिविमले विपुले यथेच्छं
　　सौख्येन भीतिरहितो रममाणचित्तः ।
गृद्धो रसेषु रसनेन्द्रियतोऽतिकष्टं
　　निष्कारणं मरणमेति षडीक्षणोऽत्र ॥ ८४ ॥
नानातरुप्रसवसौरभवासिताङ्गो
　　घ्राणेन्द्रियेण मधुपो यमराजधिष्ण्याम् ।
गच्छत्यशुद्धमतिरत्र गतो विशक्ति
　　गन्धेषु पद्मसदनं समवाप्य दीनः ॥ ८५ ॥
सज्जातिपुष्पकलिकेयमितीव मत्वा
　　दीपार्चिषं हतमतिः शलभः पतित्वा ।
रूपावलोकनमना रमणीयरूपे
　　मुग्धोऽवलोकनवशेन यमास्यमेति ॥ ८६ ॥
दूर्वाङ्कुराशनसमृद्धवपुः कुरङ्गः
　　क्रीडन्वनेषु हरिणीभिरसौ विलासैः ।
अत्यन्तगेयरवदत्तमना वराकः
　　श्रोत्रेन्द्रियेण समवर्तिमुखं प्रयाति ॥ ८७ ॥

एकैकमक्षविषयं भजताममीषां
संपद्यते यदि कृतान्तगृहातिथित्वम् ।
पञ्चाक्षगोचररतस्य[1] किमस्ति वाच्य-
मक्षार्थमित्यमलधीरधियस्त्यजन्ति ॥ ८८ ॥

दन्तीन्द्रदन्तदलनैकविधौ समर्थाः
सन्त्यत्र रौद्रमृगराजवधे प्रवीणाः ।
आशीविषोरगवशीकरणेऽपि दक्षाः
पञ्चाक्षनिर्जयपरास्तु न सन्ति मर्त्याः ॥ ८९ ॥

संसारसागरनिरूपणदत्तचित्ताः
सन्तो वदन्ति मधुरां विषयोपसेवाम् ।
आदौ विपाकसमये कटुकां नितान्तं
किंपाकपाकफलभुक्तिमिवाङ्गभाजाम् ॥ ९० ॥

तावन्नरो भवति तत्त्वविदस्तदोषो
मानी मनोरमगुणो मननीयवाक्यः ।
शूरः समस्तजनतामहितः कुलीनो
यावद्धृषीकविषयेषु न शक्तिमेति ॥ ९१ ॥

मर्त्यं हृषीकविषया यदमी त्यजन्ति
नाश्चर्यमेतदिह किंचिदनित्यतातः ।
एतत्तु चित्रमनिशं यदमीषु मूढो
मुक्तोऽपि मुञ्चति मतिं न विवेकशून्यः ॥ ९२ ॥

आदित्यचन्द्रहरिशंकरवासवाद्याः
शक्ता न जेतुमतिदुःखकराणि यानि ।
तानीन्द्रियाणि बलवन्ति सुदुर्जयानि
ये निर्जयन्ति भुवने बलिनस्त एके ॥ ९३ ॥

सौख्यं यदत्र विजितेन्द्रियशत्रुदर्पः
प्राप्नोति पापरहितं विगतान्तरायम् ।

---

१. जीवस्य.

स्वस्थं तदात्मकमनात्मधिया विलभ्यं
किं तद्दुरन्तविषयानलतप्तचित्तः ॥ ९४ ॥

नानाविधव्यसनधूलिविभूतिवातं
तत्त्वं विविक्तमवगम्य जिनेशिनोक्तम् ।
यः सेवते विषयसौख्यमसौ विमुच्य
हस्तेऽमृतं पिबति रौद्रविषं निहीनः ॥ ९५ ॥

दासत्वमेति वितनोति विहीनसेवां
धर्मं धुनाति विदधाति विनिन्द्यकर्म ।
रेफं[1]श्चिनोति कुरुतेऽतिविरूपवेषं
किं वा हृषीकवसतस्तनुते न मर्त्यः ॥ ९६ ॥

अब्धिर्न तृप्यति यथा सरितां सहस्रै-
र्नोचेन्धनैरिव शिखी बहुधोपनीतैः ।
जीवः समस्तविषयैरपि तद्वदेव
संचिन्त्य चारुधिषणस्त्यजतीन्द्रियार्थान् ॥ ९७ ॥

आपातमात्ररमणीयमतृप्तिहेतुं
किंपाकपाकफलतुल्यमथो विपाके ।
नो शाश्वतं प्रचुरदोषकरं विदित्वा
पञ्चेन्द्रियार्थसुखमर्थधियस्त्यजन्ति ॥ ९८ ॥

विद्या दया द्युतिरनुद्धतता तितिक्षा
सत्यं तपो नियमनं विनयो विवेकः ।
सर्वे भवन्ति विषयेपु रतस्य मोघा(?)
मत्वेति चारुमतिरेति न तद्वशित्वम् ॥ ९९ ॥

लोकार्चितोऽपि कुलजोऽपि बहुश्रुतोऽपि
धर्मस्थितोऽपि विरतोऽपि शमान्वितोऽपि ।
अक्षार्थपन्नगविषाकुलितो मनुष्य-
स्तन्नास्ति कर्म कुरुते न यदत्र निन्द्यम् ॥ १०० ॥

---

१. पापम्.

लोकार्चितं गुरुजनं पितरं सवित्रीं
बन्धुं सनाभिमबलां सुहृदं स्वसारम् ।
भृत्यं प्रभुं तनयमन्यजनं च मर्त्यो
नो मन्यते विषयवैरिवशः कदाचित् ॥ १०१ ॥

येनेन्द्रियाणि विजितान्यतिदुर्धराणि
तस्याविभूतिरिह नास्ति कुतोऽपि लोके ।
श्लाघ्यं च जीवितमनर्थविमुक्तमुक्तं
पुंसो विविक्तमतिपूजिततत्त्वबोधैः ॥ १०२ ॥

इतीन्द्रियनिग्रहोपदेशः ॥ ५ ॥

उद्यद्गन्धप्रबन्धां परमसुखरसां कोकिलालापजल्पां
पुष्पस्रक्सौकुमार्यां कुसुमशरवधूं रूपतो निर्जयन्तीम् ।
सौख्यं सर्वेन्द्रियाणामभिमतमभितः कुर्वतीं मानसेष्टं
सत्सौभाग्या लभन्ते कृतसुकृतवशाः कामिनीं मर्त्यमुख्याम् ॥१०३॥

अक्ष्णोर्युग्मं विलोकान्मृदुतनुगुणतस्तर्पयन्ती शरीरं,
दिव्यामोदेन वक्त्रादपगतमरुता नासिकां, चारुवाचा ।
श्रोत्रद्वन्द्वं, मनोज्ञा दशनमपि रसा तर्पयन्ती मुखाब्जं
यद्वत्पञ्चाक्षसौख्यं वितरति युवतिः कामिनां नान्यदेवम् ॥ १०४ ॥

या कूर्मोच्चाङ्घ्रिपृष्ठारुणचरणतला वृत्तजङ्घा वरोरूः
स्थूलश्रोणीनितम्बा प्रविपुलजघना दक्षिणावर्तनाभिः ।
इन्द्रास्त्रक्षाममध्या कनकपुटकुचा वारिजावर्तकण्ठा
पुष्पस्रग्बाहुयुग्मा शशधरवदना पक्वबिम्बाधरोष्ठी ॥ १०५ ॥

संशुम्भत्पाण्डुगण्डा, प्रचकितहरिणीलोचना, कीरनासा,
सज्येष्वासानतभ्रूः, सुरभिकचचया, त्यक्तपद्मेव पद्मा ।
अङ्गैरङ्गं भजन्ती धृतमदनमदैः प्रेमतो वीक्ष्यमाणा
नेदृग्यस्यास्ति योषा स किमु वरतपो भक्तितो नो विधत्ते ॥ १०६ ॥

---

१. कम्बुकण्ठी.

संत्यक्तव्यक्तबोधस्तरुरपि बकुलो मद्यगण्डूषसिक्तः
पिण्डीवृक्षश्च[1] मुञ्चंश्चरणतलहतः पुष्परोमाञ्चमर्च्यम्।
सौख्यं जानाति यस्याकृतमदनपतेर्हावभावास्पदाया-
स्तां नारीं वर्जयन्तो विदधति तरुतोऽप्यूनमात्मानमज्ञाः ॥ १०७ ॥
गौरीं देहार्धमीशो हरिरपि कमलां नीतवानत्र वक्षो
यत्सङ्गात्[2]सौख्यमिच्छुः सरसिजनिलयो[3]ऽष्टार्धवक्त्रो[4] बभूव।
गीर्वाणानामधीशो[5] दशशतभगतामाप्तवानस्तधैर्यः
सा[6] देवानामपीष्टा मनसि सुवदना वर्तते नुनं[7][8] कस्य ॥ १०८ ॥
यत्कामार्तिं धुनीते सुखमुपचिनुते प्रीतिमाविष्करोति
सत्पात्राहारदानप्रभववरवृषस्यास्तदोषस्य हेतुः।
वंशाभ्युद्धारकर्तुर्भवति तनुभुवः[9] कारणं कान्तकीर्ति-
स्तत्सर्वाभीष्टदातृ प्रवदत न कथं प्रार्थ्यते स्त्रीसुरत्नम् ॥ १०९ ॥
कृष्णत्वं केशपाशे, वपुषि च कृशतां, नीचतां नाभिबिम्बे,
वक्रत्वं भ्रूलतायामलककुटिलतां, मन्दिमानं प्रयाणे[10],।
चापल्यं नेत्रयुग्मे, कुचकलशयुगे कर्कशत्वं दधाना,
चित्रं दोषानपि स्त्री लसति मुखरुचा ध्वस्तदोषाकरश्रीः ॥ ११० ॥
बाहुद्वन्द्वेन मालां, मलविकलतया[11] पद्धतीं[12] स्वर्भवानां,
हंसीं गत्या,न्यपुष्टां[13] मधुरवचनतो, नेत्रतो मार्गभार्याम्[14]।
सीतां शीलेन, कान्त्या शिशिरकरतनुं, क्षान्तितो भूतधात्रीं[15]
सौभाग्याढ्या[16] विजिग्ये गिरिपतितनयां, रूपतः कामपत्नीम् ॥ १११ ॥
वक्षोजौ कठिनौ, न वाग्विरचना, मन्दा गति,र्नो मति,-
र्वक्रं भ्रूयुगलं, मनो न जठरं, क्षामं नितम्बो न च,।
युग्मं लोचनयोश्चलं, न चरितं, कृष्णाः कचा, नो गुणा,
नीचं नाभिसरोवरं, न रमणं, यस्या मनोज्ञाकृतेः ॥ ११२ ॥

---

१. अशोकवृक्षः. २. तिलोत्तमासङ्गात्. ३. ब्रह्मा. ४. चतुर्मुखः. ५. इन्द्रः. ६. स्त्री. ७. नरस्य. ८. स्त्रीसुरत्नम्. ९. पुत्रस्य. १०. गतौ. ११. निर्मलतया. १२. आकाशम्. १३. कोकिलाम्. १४. हरिणीम्. १५. सधनभूमिम्. १६. स्त्री.

स्त्रीतः सर्वज्ञनाथः सुरनतचरणो जायतेऽबाधबोध-
स्तस्मात्तीर्थं श्रुताख्यं जनहितकथकं मोक्षमार्गावबोधः ।
तस्मात्तस्माद्विनाशो भवदुरिततते: सौख्यमस्माद्विबाधं
बुध्वैवं स्त्रीं पवित्रां शिवसुखकरणीं सज्जनः स्वीकरोति ॥ ११३ ॥

भृत्यो मन्त्री विपत्तौ भवति, रतिविधौ यात्र वेश्या विदग्धा,
लज्जालुर्या विगीता गुरुजनविनता, गेहिनी गेहकृत्ये, ।
भक्त्या पत्यौ सखी, या स्वजनपरिजने धर्मकर्मैकदक्षा,
साल्पक्रोधाल्पपुण्यैः सकलगुणनिधिः प्राप्यते स्त्री न मर्त्यैः ॥ ११४ ॥

कृत्याकृत्ये न वेत्ति, त्यजति गुरुवचो, नीचवाक्यं करोति,
लज्जालुत्वं जहाति, व्यसनमतिमहद्गाहते निन्दनीयम्, ।
यस्यां शक्तो मनुष्यो निखिलगुणरिपोर्माननीयोऽपि लोके
सानर्थानां निधानं वितरतु युवतिः किं सुखं देहभाजाम् ॥११५॥

शश्वन्मायां करोति, स्थिरयति न मनो, मन्यते नोपकारं,
या वाक्यं वक्त्यसत्यं, मलिनयति कुलं, कीर्तिवल्लीं लुनाति, ।
सर्वारम्भैकहेतुर्विरतिसुखरतिध्वंसिनी निन्दनीया
तां धर्मारामभङ्गीं भजति न मनुजो मानिनीं मान्यबुद्धिः ॥११६॥

या विश्वासं नराणां जनयति, शतधालीकजल्पप्रपञ्चै,-
र्न प्रत्येति स्वयं तु, व्यपहरति गुणानेकदोषेण सर्वान् ।
कृत्वा दोषं विचित्रं रचयति निकृतिं यात्मकृत्यैकनिष्ठां
तां दोषाणां धरित्रीं रमयति रमणीं मानवो नो वरिष्ठः ॥११७॥

उद्यज्ज्वालावलीभिर्वरमिह भुवनप्लोषके हव्यवाहे
रङ्गद्वीचौ प्रविष्टं जलनिधिपयसि ग्राहनक्राकुले वा ।
संग्रामे वारिरौद्रे विविधशरहतानेकयोधाप्रधाने
नो नारीसौख्यमध्ये भवशतजनितानन्तदुःखप्रवीणे ॥ ११८ ॥

विद्युद्द्योतेन रूपं रजनिषु तिमिरे वीक्षितुं शक्यते यैः
पारं गन्तुं भुजाभ्यां विविधजलचरक्षोभिनां(णां) वारिधीनाम् ।

ज्ञातुं चारोऽमितानां वियति विचरतां ज्योतिषां मण्डलस्य
नो चित्तं कामिनीनामिति कृतमतयो दूरतस्तास्त्यजन्ति ॥ ११९ ॥

कात्र श्रीः श्रोणिबिम्बे स्रवदुदरपुरावस्तिखद्वारवाच्ये,
लक्ष्मीः का कामिनीनां कुचकलशयुगे मांसपिण्डस्वरूपे ।
का कान्तिर्नेत्रयुग्मे जलकलुषजुषि, श्लेष्मरक्तादिपूर्णे
का शोभा वक्त्रगर्ते निगदत यदहो मोहिनस्ताः स्तुवन्ति ॥ १२० ॥

वक्त्रं लालाद्यवद्यं सकलशशिभृता, स्वर्णकुम्भद्वयेन
मांसग्रन्थी स्तनौ च, प्रगलदुरुमला स्यन्दनाङ्केन योनिः ।
निर्गच्छद्दूषिकास्त्रं यदुपमितमहो पद्मपत्रेण नेत्रं
तच्चित्रं नात्र किंचिद्यदपगतमतिर्जायते कामिलोकः ॥ १२१ ॥

यत्त्वङ्मांसास्थिमज्जाक्षतजरसवसाशुक्रधातुप्रवृद्धं
विष्टामूत्रास्रगश्रुप्रभृतिमलनवस्रोत्रमत्र त्रिदोषे ।
वर्चः सद्मोपमाने कृमिकुलनिलयेऽत्यन्तबीभत्स्वरूपे
रज्यन्नङ्गे वधूनां व्रजति गतमतिः श्वभ्रगर्भे कृमित्वम् ॥ १२२ ॥

छायावद्यानवद्याचिररुचिचपला खड्गधारेव तीक्ष्णा
बुद्धिर्वा लुब्धकस्य प्रतिहतकरुणाव्याधिवन्नित्यदुःखा ।
वक्रा वा सर्परीतिः कुनृपगतिरिवावद्यकृत्यप्रचारा
चित्रा वा शक्रचापं भवचकितबुधैः सेव्यते स्त्री कथं सा ॥ १२३ ॥

संज्ञातोऽपीन्द्रजालं यदुत युवतयो मोहयित्वा मनुष्या-
न्नानाशास्त्रेषु दक्षानपि गुणकलितं दर्शयन्त्यात्मरूपम् ।
शुक्रासृग्यातनाक्तं ततकुथितमलैः प्रक्षरत्स्रोत्रगर्तैः
सर्वैरुच्चारपुञ्जं कुथितजठरभृच्छिद्रितं यद्वदत्र ॥ १२४ ॥

या सर्वोच्छिष्टवक्त्रा हितजनभुषणासद्गुणास्पर्शनीया
पूर्वाघर्मात्प्रजाता सततमलभृता निन्द्यकृत्यप्रवृत्ता ।
दानस्नेहा शुनीव भ्रमणकृतरतिश्चाटुकर्मप्रवीणा
योषा सा साधुलोकैरवगतजननैर्दूरतो वर्जनीया ॥ १२५ ॥

दुःखानां या निधानं भवनमविनयस्यार्गला स्वर्गपुर्याः
 श्वभ्रावासस्य वर्त्म प्रकृतिरपयशः साहसानां निवासः ।
धर्मारामस्य शस्त्री गुणकमलहिमं मूलमेनोद्रुमस्य
 मायावल्ली धरित्री कथमिह वनिता सेव्यते सा विदग्धैः ॥ १२६ ॥

श्रोणीसद्मप्रपन्नैः कृमिभिरतिशयारुंतुदैस्तुद्यमाना
 यत्पीडातोऽतिदीना विदधति चलनं लोचनानां रमण्यः ।
तन्मन्यन्तेऽतिमोहादुपहतमनसः सद्विलासं मनुष्या
 इत्येतत्तथ्यमुच्चैरमितगतियतिप्रोक्तमाराधनातः ॥ १२७ ॥

इति श्रीगुणदोषविचारः ॥ ६ ॥

दुरन्तमिथ्यात्वतमोदिवाकरा विलोकिताशेषपदार्थविस्तराः ।
उशन्ति मिथ्यात्वतमो जिनेश्वरा यथार्थतत्त्वाप्रतिपत्तिलक्षणम् ॥ १२८ ॥

विमूढतैकान्तविनीतसंशयप्रतीपताग्राहनिसर्गभेदतः ।
जिनैश्च मिथ्यात्वमनेकधोदितं भवार्णवभ्रान्तिकरं शरीरिणाम् ॥ १२९ ॥

परिग्रहेणापि युतास्तपस्विनो वधेऽपि धर्मं बहुधा शरीरिणाम् ।
अनेकदोषामपि देवतां जनस्त्रिमोहमिथ्यात्ववशेन भाषते ॥ १३० ॥

विबोधनित्यत्वसुखित्वकर्तृताविमुक्तितद्धेतुकृतज्ञतादयः ।
न सर्वथा जीवगुणा भवन्त्यमी भवन्ति चैकान्तदृशेति बुध्यते ॥ १३१ ॥

न धूयमानो भजति ध्वजः स्थितिं यथानिलैर्देवकुलोपरि स्थितः ।
समस्तधर्मानिलधूतचेतनो विनीतमिथ्यात्वपरस्तथा नरः ॥ १३२ ॥

समस्ततत्त्वानि न सन्ति सन्ति वा विरागसर्वज्ञनिवेदितानि वै ।
विनिश्चयः कर्मवशेन सर्वथा जनस्य संशीतिरुचेर्न जायते ॥ १३३ ॥

पयोयुतं शर्करया कटूयते यथैव पित्तज्वरभाविते जने ।
तथैव तत्त्वं विपरीतमङ्गिनः प्रतीपमिथ्यात्वदृशो विभासते ॥ १३४ ॥

प्रपूरितश्चर्मलवैर्यथाशनं न मण्डलश्चर्मकृतः समिच्छति ।
कुहेतुदृष्टान्तवचः प्रपूरितो जिनेन्द्रतत्त्वं वितथं प्रपद्यते ॥ १३५ ॥

---

१. कुक्कुरः.

यथान्धकारान्धपटावृतो[1] जनो विचित्रचित्रं न विलोकितुं क्षमः ।
यथोक्ततत्त्वं जिननाथभाषितं निसर्गमिथ्यात्वतिरस्कृतस्तथा ॥ १३६ ॥
दयादमध्यानतपोव्रतादयो गुणाः समस्ता न भवन्ति सर्वथा ।
दुरन्तमिथ्यात्वरजोहतात्मनो रजोयुतालाबुगतं यथा पयः ॥ १३७ ॥
अवैति तत्त्वं सदसत्त्वलक्षणं विना विशेषं विपरीतलोचनः ।
यदृच्छया मत्तवदस्तचेतनो जनो जिनानां वचनात्पराङ्मुखः ॥ १३८ ॥
त्रिलोककालत्रयसंभवा सुखं सुदुःसहं यैस्त्रिविधं[2] विलोक्यते ।
चराचराणां भवगर्तवर्तिनां तदत्र मिथ्यात्ववशेन जायते ॥ १३९ ॥
वरं विषं भुक्तमसुक्षयक्षमं वरं वनं श्वापदवन्निषेवितम् ।
वरं कृतं वह्निशिखाप्रवेशनं नरस्य मिथ्यात्वयुतं न जीवितम् ॥ १४० ॥
करोति दोषं न तमत्र केशरी न दन्दशूको न करी न भूमिपः ।
अतीव रुष्टो न च शत्रुरुद्धतो यमुग्रमिथ्यात्वरिपुः शरीरिणाम् ॥ १४१ ॥
दधातु धर्मं दशधा तु पावनं करोतु भिक्षाशनमस्तदूषणम् ।
तनोतु योगं धृतचित्तविस्तरं तथापि मिथ्यात्वयुतो न मुच्यते ॥ १४२ ॥
ददातु दानं बहुधा चतुर्विधं करोतु पूजामतिभक्तितोऽर्हताम् ।
दधातु शीलं तनुतामभोजनं तथापि मिथ्यात्ववशो न सिध्यति ॥ १४३ ॥
अवैतु शास्त्राणि नरो विशेषतः करोतु चित्राणि तपांसि भावतः ।
अतत्त्वसंसक्तमनास्तथापि नो विमुक्तसौख्यं गतबाधमश्नुते ॥ १४४ ॥
विचित्रवर्णाञ्चितचित्रमुत्तमं यथा गताक्षो[3] न जनो विलोकते ।
प्रदर्श्यमानं न तथा प्रपद्यते कुदृष्टिजीवो जिननाथशासनम् ॥ १४५ ॥
अभव्यजीवो वचनं पठन्नपि जिनस्य मिथ्यात्वविषं न मुञ्चति ।
यथा विषं रौद्रविषोऽपि पन्नगः सशर्करं चारुपयः पिबन्नपि ॥ १४६ ॥
भजन्ति नैकैकगुणं त्रयस्त्रयो द्वयं द्वयं च त्रयमेककः परः ।
इमेऽत्र सप्तापि भवन्ति दुर्दशा यथार्थतत्त्वप्रतिपत्तिवर्जिताः ॥ १४७ ॥
अनन्तकोपादिचतुष्टयोदये त्रिभेदमिथ्यात्वमलोदये यथा ।
दुरन्तमिथ्यात्वविषं शरीरिणामनन्तसंसारकरं प्ररोहति ॥ १४८ ॥

---

१. कृष्णवस्त्रावृतः. २. मनोवाक्कायगतम्. ३. अन्धः.

अलब्धदुग्धादिरसो रसावहं तदुद्भवो निम्बरसं कृमिर्यथा ।
अदृष्टजैनेन्द्रवचोरसायनस्तथा कुतत्त्वं मनुते रसायनम् ॥ १४९ ॥
ददाति दुःखं बहुधातिदुःसहं तनोति पापोपचयोन्मुखं मतिम् ।
यथार्थबुद्धिं विधुनोति पावनीं करोति मिथ्यात्वविषं न किं नृणाम् ॥ १५० ॥
अनेकधेति प्रगुणेन चेतसा विविच्य मिथ्यात्वमलं सदूषणम् ।
विमुच्य जैनेन्द्रमतं सुखावहं भजन्ति भव्या भवदुःखभीरवः ॥ १५१ ॥
विमुक्तशङ्कादिसमस्तदूषणं विमुक्ततत्त्वप्रतिपत्तिमुज्ज्वलम् ।
वदन्ति सम्यक्त्वमनन्तदर्शना जिनेशिनो नाकिनुताङ्घ्रिपङ्कजाः ॥ १५२ ॥
परोपदेशेन शशाङ्कनिर्मलं नरो निसर्गेण तदा तदश्नुते ।
क्षयं शमं मिश्रमपागते मले यथार्थतत्त्वैकरुचेर्निषेधके ॥ १५३ ॥
सुरेन्द्रनागेन्द्रनरेन्द्रसंपदः सुखेन सर्वा लभते भ्रमन्भवे ।
अशेषदुःखक्षयकारणं परं न दर्शनं पावनमश्नुते जनः ॥ १५४ ॥
जनस्य यस्यास्ति विनिर्मला रुचिर्जिनेन्द्रचन्द्रप्रतिपादिते मते ।
अनेकधर्मान्विततत्त्वसूचके किमस्ति नो तस्य समस्तविष्टपे ॥ १५५ ॥
विधाय यो जैनमतस्य रोचनं मुहूर्तमप्येकमथो विमुञ्चति ।
अनन्तकालं भवदुःखसंगतिं न सोऽपि जीवो लभते कथंचन ॥ १५६ ॥
यथार्थतत्त्वं कथितं जिनेश्वरैः सुखावहं सर्वशरीरिणां सदा ।
निधाय कर्णे विहितार्थनिश्चयो न भव्यजीवो वितनोति दुर्मतिम् ॥१५७॥
विरागसर्वज्ञपदाम्बुजद्वये यतौ निरस्ताखिलसंगसंगतौ ।
वृषे च हिंसारहिते महाफले करोति हर्षं जिनवाक्यभावितः ॥ १५८ ॥
भवाङ्गभोगेष्वपि भङ्गुरात्मना जयत्सु नारीजनचित्तसंततिम् ।
भवार्णवभ्रान्तिविधानहेतुषु विरागभावं विदधाति सद्रुचिः ॥ १५९ ॥
कलत्रपुत्रादिनिमित्ततः क्वचिद्विनिन्द्यरूपे विहितेऽपि कर्मणि ।
इदं कृतं कर्म विनिन्दितं सतां मयेति भव्यश्चकितो विनिन्दति ॥१६०॥
गलन्ति दोषाः कथिताः कथंचन प्रतप्तलोहे पतितं यथा पयः ।
नयेषु तेषां व्रतिनां स्वदूषणं निवेदयत्यात्महितोद्यतो जनः ॥ १६१ ॥

निमित्ततो भूतमनर्थकारणं न यस्य कोपादिचतुष्टयं स्थितिम् ।
करोति रेखा पयसीव मानसे सशान्तभावोऽस्ति विशुद्धदर्शनः ॥ १६२ ॥
विशुद्धभावेन विधूतदूषणां करोति भक्तिं गुरुपञ्चके श्रुते ।
श्रुतान्विते जैनगृहे जिनाकृतौ जिनेशतत्त्वैकरुचिः शरीरवान् ॥ १६३ ॥
चतुर्विधे धर्मिजने जिनाश्रिते निरस्तमिथ्यात्वमलेऽतिपावने ।
करोति वात्सल्यमनर्थनाशनं सुदर्शनो गौरिव तर्णके नवे ॥ १६४ ॥
दुरन्तरोगोपहतेषु संततं पुरार्जिते नो वशता शरीरिषु ।
करोति सर्वेषु विशुद्धदर्शनो दयां परामस्तसमस्तदूषणः ॥ १६५ ॥
विशुद्धमेवंगुणमस्ति दर्शनं जनस्य यस्येह विमुक्तिकारणम् ।
व्रतं विनाप्युत्तमसंचितं सतां सतीर्थकृत्त्वं लभतेऽतिपावनम् ॥ १६६ ॥
दमो दयाध्यानमहिंसने तपो जितेन्द्रियत्वं विनयो नयस्तथा ।
ददाति नैतत्फलमङ्गधारिणां यदत्र सम्यक्त्वमनिन्दितं धृतम् ॥ १६७ ॥
वरं निवासो नरकेऽपि देहिनां विशुद्धसम्यक्त्वविभूषितात्मनाम् ।
दुरन्तमिथ्यात्वविषोपभोगिनां न देवलोके वसतिर्विराजते ॥ १६८ ॥
अधस्तनश्वभ्रभुवो न याति षण्न सर्वनारीषु न संज्ञितोऽन्यतः ।
न जायते व्यन्तरदेवजातिषु न भावनज्योतिषिकेषु सद्रुचिः ॥ १६९ ॥
न बान्धवा नो सुहृदो न वल्लभा न देहजा नो धनधान्यसंचयाः ।
तथा हिताः सन्ति शरीरिणां जने यथात्र सम्यक्त्वमदूषितं हितम् ॥१७०॥
तनोति धर्मं, विधुनोति पातकं, ददाति सौख्यं, विधुनोति बाधकम् ।
चिनोति मुक्तिं, विनिहन्ति संसृतिं, जनस्य सम्यक्त्वमनिन्दितं धृतम्१७१
मनोहरं सौख्यकरं शरीरिणां तदस्ति लोके सकले न किंचन ।
यदत्र सम्यक्त्वधनस्य दुर्लभमिति प्रचिन्त्यात्र भवन्तु तत्पराः ॥ १७२ ॥
विहाय दैवीं गतिमर्चितां सतां व्रजन्ति नान्यत्र विशुद्धदर्शनाः ।
ततश्च्युताश्चक्रधरादिमानवा भवन्ति भव्या भवतीरवो(?) भुवि ॥ १७३ ॥
प्रमाणसिद्धाः कथिता जिनेशिना व्ययोद्भवध्रौव्ययुता विमोहिताः ।
समस्तभावा वितथा न वेत्ति यः करोति शङ्कां स निहन्ति दर्शनम् १७४

सुरासुराणामथ चक्रधारिणां निरीक्ष्य लक्ष्मीममलां मनोहराम् ।
अनेन शीलेन भवेन्ममेति यस्तनोति काङ्क्षां स धुनोति सद्रुचिम् ॥१७५॥
मलेन दिग्धानवलोक्य संयतान्प्रपीडितान्वा तपसा महीयसा ।
नरश्चिकित्सां विदधाति यः परां निहन्ति सम्यक्त्वमसावचेतनः ॥१७६॥
विलोक्य रौद्रव्रतिनोऽन्यलिङ्गिनः प्रकुर्वतः कन्दफलाशनादिकम् ।
इमेऽपि कर्मक्षयकारकव्रता विचिन्वतेऽतिप्रतिहन्यते रुचिः ॥ १७७ ॥
कुदर्शनज्ञानचरित्रचिद्रजा निरस्ततत्त्वार्थरुचीनसंयतान् ।
निषेवमाणो मनसापि मानवो लुनाति सम्यक्त्वतरुं महाफलम् ॥ १७८ ॥
जिनेन्द्रचन्द्रामलभक्तिभाविता निरस्तमिथ्यात्वमलेन देहिना ।
प्रधार्यते येन विशुद्धदर्शनमवाप्यते तेन विमुक्तिकामिनी ॥ १७९ ॥

इति सदसत्स्वरूपनिरूपणम् ॥ ७ ॥

अनेकपर्यायगुणैरुपेतं विलोक्यते येन समस्ततत्त्वम् ।
तदिन्द्रियानिन्द्रियभेदभिन्नं ज्ञानं जिनेन्द्रैर्गदितं हिताय ॥ १८० ॥
रत्नत्रयीं रक्षति येन जीवो विरज्यतेऽत्यन्तशरीरसौख्यात् ।
रुणद्धि पापं, कुरुते विशुद्धिं, ज्ञानं तदिष्टं सकलार्थवद्भिः ॥ १८१ ॥
क्रोधं धुनीते, विदधाति शान्तिं, तनोति मैत्रीं, विहिनस्ति मोहम्, ।
पुनाति चित्तं, मदनं लुनीते, येनेह बोधं तमुशन्ति सन्तः ॥ १८२ ॥
ज्ञानेन बोधं कुरुते, परेषां कीर्तिस्ततश्चन्द्रमरीचिगौरी ।
ततोऽनुरागः सकलेऽपि लोके ततः फलं तस्य मनोऽनुकूलम् ॥ १८३ ॥
ज्ञानाद्धितं वेत्ति ततः प्रवृत्ती रत्नत्रये संचितकर्ममोक्षः ।
ततस्ततः सौख्यमबाधमुच्चैस्तेनात्र यत्नं विदधाति दक्षः ॥ १८४ ॥
यदज्ञजीवो विधुनोति कर्म तपोभिरुग्रैर्भवकोटिलक्षैः ।
ज्ञानी तु चैकक्षणतो हिनस्ति तदत्र कर्मेति जिना वदन्ति ॥ १८५ ॥
चौरादिदायादतनूजभूपैरहार्यमर्च्यं सकलेऽपि लोके ।
धनं परेषां नयनैरदृश्यं ज्ञानं नरा धन्यतमा वहन्ति ॥ १८६ ॥
विनश्वरं पापसमृद्धिदक्षं विपाकदुःखं बुधनिन्दनीयम् ।
तदन्यथा भूतगणेन तुल्यं ज्ञानेन राज्यं न कदाचिदस्ति ॥ १८७ ॥

पूज्यं स्वदेशे भवतीह राज्यं ज्ञानं त्रिलोकेऽपि सदर्चनीयम् ।
ज्ञानं विवेकाय, मदाय राज्यं, ततो न ते तुल्यगुणे भवेताम् ॥ १८८ ॥
तमो धुनीते, कुरुते प्रकाशं, शमं विधत्ते, विनिहन्ति कोपम्, ।
तनोति धर्मं, विधुनोति पापं, ज्ञानं न किं किं कुरुते नराणाम् ॥ १८९ ॥
यथा यथा ज्ञानबलेन जीवो जानाति तत्त्वं जिननाथदृष्टम् ।
तथा तथा धर्ममतिप्रसक्ताः प्रजायते पापविनाशशक्ताः ॥ १९० ॥
आस्तां महाबोधबलेन साध्यो मोक्षो विबाधामलसौख्ययुक्तः ।
धर्मार्थकामा अपि नो भवन्ति ज्ञानं विना तेन तदर्चनीयम् ॥ १९१ ॥
सर्वेऽपि लोके विधयो यथार्था ज्ञानादृते नैव भवन्ति जातु ।
अनात्मनीयं परिहर्तुकामास्तदर्थिनो ज्ञानमतः श्रयन्ति ॥ १९२ ॥
शक्यो विजेतुं न मनः करीन्द्रो गन्तुं प्रवृत्तः प्रविहाय मार्गम् ।
ज्ञानाङ्कुशेनात्र विना मनुष्यैर्विनाङ्कुशं मत्तमहाकरीव ॥ १९३ ॥
ज्ञानं तृतीयं पुरुषस्य नेत्रं समस्ततत्त्वार्थविलोकदक्षम् ।
तेजोऽनपेक्ष्यं विगतान्तरायं प्रवृत्तिमत्सर्वजगत्त्रयेऽपि ॥ १९४ ॥
निःशेषलोकव्यवहारदक्षो ज्ञानेन मर्त्यो महनीयकीर्तिः ।
सेव्यः सतां संतमसेन हीनो विमुक्तिकृत्यं प्रतिबद्धचित्तः ॥ १९५ ॥
धर्मार्थकामव्यवहारशून्यो विनष्टनिःशेषविचारबुद्धिः ।
रात्रिंदिवं भक्षणसक्तचित्तो ज्ञानेन हीनः पशुरेव शुद्धः ॥ १९६ ॥
तपोदयादानश्रमक्षमाद्याः सर्वेऽपि पुंसां महिमा गुणा ये ।
भवन्ति सौख्याय न ते जनस्य ज्ञानं विना तेन तदेषु पूज्यम् ॥ १९७ ॥
ज्ञानं विना नास्त्यहितान्निवृत्तिस्ततः प्रवृत्तिर्न हिते जनानाम् ।
ततो न पूर्वार्जितकर्मनाशस्ततो न सौख्यं लभतेऽप्यभीष्टम् ॥ १९८ ॥
क्षेत्रे प्रकाशं नियतं करोति रविर्दिनेऽस्तं पुनरेव रात्रौ ।
ज्ञानं त्रिलोके सकले प्रकाशं करोति नाच्छादनमस्ति किंचित् ॥ १९९ ॥
भवार्णवोत्तारणपूतनावं निःशेषदुःखेन्धनदाववह्निम् ।
दशाङ्गधर्मं न करोति येन ज्ञानं तदिष्टं न जिनेन्द्रचन्द्रैः ॥ २०० ॥

गन्तुं समुल्लङ्घ्य भवाटवीं यो ज्ञानं विना मुक्तिपुरीं समिच्छेत् ।
सोऽन्धोऽन्धकारेषु विलङ्घ्य दुर्गं वनं पुरं प्राप्तुमना विचक्षुः ॥ २०१ ॥
ज्ञानेन पुंसां सकलार्थसिद्धिर्ज्ञानादृते काचन नार्थसिद्धिः ।
ज्ञानस्य मत्वेति गुणान्कदाचिज्ज्ञानं न मुञ्चन्ति महानुभावाः ॥ २०२ ॥
वरं विषं भक्षितमुग्रदोषं वरं प्रविष्टं ज्वलनेऽतिरौद्रे ।
वरं कृतान्ताय निवेदितं स्वं न जीवितं तत्त्वविवेकमुक्तम् ॥ २०३ ॥
शौचक्षमासत्यतपोदमाद्या गुणाः समस्ताः क्षणतश्चलन्ति ।
ज्ञानेन हीनस्य नरस्य लोके वात्याहता वा तरवोऽपि मूलात् ॥ २०४ ॥
माता पिता बन्धुजनः कलत्रं पुत्रः सुहृद्भूमिपतिश्च तुष्टः ।
न तत्सुखं कर्तुमलं नराणां ज्ञानं यदेवं स्थितमस्तदोषम् ॥ २०५ ॥
शक्यो वशीकर्तुमिभोऽतिमत्तः सिंहः फणीन्द्रः कुपितो नरेन्द्रः ।
ज्ञानेन हीनो न पुनः कथंचिदित्यस्य दूरे न भवन्ति सन्तः ॥ २०६ ॥
करोति संसारशरीरभोगविरागभावं विदधाति रागम् ।
शीलव्रतध्यानतपःकृपासु ज्ञानी विमोक्षाय कृतः प्रयासः ॥ २०७ ॥
परोपदेशं स्वहितोपकारं ज्ञानेन देही वितनोति लोके ।
जहाति दोषं श्रयते गुणं च ज्ञानं जनैस्तेन समर्चनीयम् ॥ २०८ ॥
एवं विलोक्यास्य गुणाननेकान्समस्तपापारिनिरासदक्षान् ।
विशुद्धबोधा न कदाचनापि ज्ञानस्य पूजां महतीं त्यजन्ति ॥ २०९ ॥

इति ज्ञाननिरूपणम् ॥ ८ ॥

सद्दर्शनज्ञानबलेन भूता पापक्रियाया विरतिस्त्रिधा या ।
जिनेश्वरैस्तद्गदितं चरित्रं समस्तकर्मक्षयहेतुभूतम् ॥ २१० ॥
शमं क्षयं मिश्रमुपागतायां तन्नाशिकर्म प्रकृतौ त्रिधातः ।
द्विधा सरागेतरभेदतश्च प्रजायते साधनसाध्यरूपम् ॥ २११ ॥
हिंसानृतस्तेयजनातिसङ्गनिवृत्तिरूपं व्रतमङ्गभाजाम् ।
पञ्चप्रकारं शुभसूतिहेतुर्जिनेश्वरैर्ज्ञातसमस्ततत्त्वैः ॥ २१२ ॥
जीवास्त्रसस्थावरभेदभिन्नास्त्रसाश्चतुर्धात्र भवेयुरन्ये ।
पञ्चप्रकारं त्रिविधेन तेषां रक्षामहिंसाव्रतमस्ति पूतम् ॥ २१३ ॥

स्पर्शेन वर्णेन रसेन गन्धाद्यदन्यथा वारिगतं स्वभावम्।
तत्प्रांशुकं साधुजनस्य योग्यं पातुं मुनीन्द्रा निगदन्ति जैनाः ॥ २१४ ॥
उष्णोदकं साधुजनाः पिबन्ति मनोवचःकायविशुद्धिलब्धम्।
एकान्ततस्तत्पिबतां मुनीनां षड्जीवघातं कथयन्ति सन्तः ॥ २१५ ॥
हतं घटीयन्त्रचतुष्पदादि सूर्येन्दुवाताग्निकरैर्मुनीन्द्राः।
प्रत्यन्तवातेन हतं वहच्च यत्प्रांशुकं तन्निगदन्ति वारि ॥ २१६ ॥
भवत्यवश्यायहिमांशुधूसरीघनाम्बुशुद्धोदकबिन्दुसीकरान्।
विहाय शेषं व्यवहारकारणं मनीषिणां वारिविशुद्धिमिच्छताम् ॥ २१७ ॥

उष्णोदकं प्रतिगृहं यदकारि लोकै-
स्तच्छ्रावकः पिबति नान्यजनः कदाचित्।
तत्केवलं मुनिजनाय विधीयमानं
षड्जीवसंततिविराधनसाधनाय ॥ २१८ ॥

यथार्थवाक्यं रहितं कषायैरपीडनं प्राणिगणस्य पूतम्।
गृहस्थभाषाविकलं यथार्थं सत्यं व्रतं स्याद्वदतां यतीनाम् ॥ २१९ ॥
ग्रामादिनष्टादि धनं परेषामगृह्णतोऽल्पादिमुनेस्त्रिधापि।
भवत्यदत्तग्रहवर्जनाख्यं व्रतं मुनीनां गदितं हि लोके ॥ २२० ॥
विलोक्य मातृस्वसृदेहजावत्स्त्रीणां त्रिकं रागवशेन यासाम्।
विलोकनस्पर्शनसंकथाभ्यो निवृत्तिरुक्तं तदमैथुनत्वम् ॥ २२१ ॥
सचेतनाचेतनभेदतोऽन्यथाः परिग्रहाः सन्ति विचित्ररूपाः।
तेभ्यो निवृत्तिस्त्रिविधेन यत्र नैःसङ्ग्यमुक्तं तदपास्तसङ्गैः ॥ २२२ ॥
युगान्तरप्रेक्षणतः स्वकार्याद्दिवा यथा जन्तुविवर्जितेन।
यतो मुनेर्जीवविराधहान्या गतिर्विरेर्या समितिः समुक्ता ॥ २२३ ॥
आत्मप्रशंसापरदोषहासपैशून्यकार्कश्यविरुद्धवाक्यम्।
विवर्ज्य भाषां वदतां मुनीनां वदन्ति भाषां समितिं जिनेन्द्राः ॥ २२४ ॥
अनुद्गमोत्पादनवल्भदोषा मनोवचःकायविकल्पशुद्धाः।
स्वकारणा या मुनिपस्य भुक्तिस्तामेषणाख्यां समितिं वदन्ति ॥ २२५ ॥

आदाननिक्षेपविधेर्विधाने द्रव्यस्य योग्यस्य मुनेः सयत्नः ।
आदाननिक्षेपणनामधेयां वदन्ति सन्तः समितिं पवित्राम् ॥ २२६ ॥
दूरे विशाले जनजन्तुमुक्ते गूढे विरुद्धे त्यजतो मलानि ।
पूतां प्रतिष्ठापननामधेयां वदन्ति साधोः समितिं जिनेन्द्राः ॥ २२७ ॥
समस्तजन्तुप्रतिपालनार्थाः कर्माश्रवद्वारनिरोधदक्षाः ।
इमा मुनीनां निगदन्ति पञ्च पञ्चत्वमुक्ताः समितीर्जिनेन्द्राः ॥ २२८ ॥
प्रवृत्तयः स्वान्तवचस्तनूनां सूत्रानुसारेण निवृत्तयो वा ।
यास्ता जिनेशाः कथयन्ति तिस्रो गुप्तीर्विधूताखिलकर्मबन्धाः ॥ २२९ ॥
एवं चरित्रस्य चरित्रयुक्तैस्त्रयोदशाङ्गस्य निवेदितस्य ।
व्रतादिभेदेन भवन्ति भेदाः सामायिकाद्याः पुनरेव पञ्च ॥ २३० ॥
पञ्चाधिका विंशतिरस्तदोषैरुक्ताः कषायाः क्षयतः शमाद्वा ।
तेषां यथाख्यातचरित्रमुक्तं तन्मिश्रतायामितरं चतुष्कम् ॥ २३१ ॥
सद्दर्शनज्ञानफलं चरित्रं ते तेन हीने भवतो वृथैव ।
सूर्यादिसङ्गेन दिवेव नेत्रे नैतत्फलं येन वदन्ति सन्तः ॥ २३२ ॥
कषायमुक्तं कथितं चरित्रं कषायवृद्धावपघातमेति ।
यदा कषायः शममेति पुंसस्तदा चरित्रं पुनरेति पूतम् ॥ २३३ ॥
कषायसङ्गो सह तेन वृत्तं समार्द्रचक्षुर्न दिनं च रेणुम् ।
कषायसङ्गो विधुनन्ति तेन चारित्रवन्तो मुनयः सदापि ॥ २३४ ॥
निःशेषकल्याणविधौ समर्थं यस्यास्ति वृत्तं शशिकान्तिकान्तम् ।
मर्त्यस्य तस्य द्वितयेऽपि लोके न विद्यते क्वाचन जातु भीतिः ॥ २३५ ॥
न चक्रनाथस्य न नाकिराजो न भोगभूपस्य न नागराजः ।
आत्मस्थितं शाश्वतमस्तदोषं यत्संयतस्यास्ति सुखं विबाधम् ॥ २३६ ॥
निवृत्तलोकव्यवहारवृत्तिः संतोषवानस्तसमस्तदोषः ।
यत्सौख्यमाप्नोति गतान्तरायं किं तस्य लेशोऽपि सरागचित्तः ॥ २३७ ॥
ससंशयं नश्वरमन्तदुःखं सरागचित्तस्य जनस्य सौख्यम् ।
तदन्यथा रागविवर्जितस्य तेनेह सन्तो न भजन्ति रागम् ॥ २३८ ॥

विनिर्मलं पार्वणचन्द्रकान्तं यस्यास्ति चारित्रमसौ गुणज्ञः ।
मानी कुलीनो जगतोऽभिगम्यः कृतार्थजन्मा महनीयबुद्धिः ॥ २३९ ॥
गर्भे विलीनं वरमत्र मातुः प्रसूतिकालेऽपि वरं विनाशः ।
असंभवो वा वरमङ्गभाजो न जीवितं चारुचरित्रमुक्तम् ॥ २४० ॥
निरस्तभूषोऽपि यथा विभाति पवित्रचारित्रविभूषितात्मा ।
अनेकभूषाभिरलंकृतोऽपि विमुक्तवृत्तो न तथा मनुष्यः ॥ २४१ ॥
सद्दर्शनज्ञानतपोदमाढ्याश्चारित्रभाजः सफलाः समस्ताः ।
व्यर्थाश्चरित्रेण विना भवन्ति ज्ञात्वेह सन्तश्चरिते यतन्ते ॥ २४२ ॥

इति चारित्रनिरूपणम् ॥ ९ ॥

अनेकमलसंभवे कृमिकुलैः सदा संकुले
　विचित्रबहुवेदने बुधविनिन्दिते दुःसहे ।
भ्रमन्नयमनारतं व्यसनसंकटे देहवा-
　न्पुरार्जितवशो भवे भवति भामिनीगर्भके ॥ २४३ ॥
शरीरमसुखावहं विविधदोषवर्चोगृहं
　सशुक्ररुधिरोद्भवं भवभृता भवे भ्राम्यते ।
प्रगृह्य भवसंततेर्विदधता निमित्तं विधं
　सरागमनसा सुखं प्रचुरमिच्छता तत्कृते ॥ २४४ ॥
किमस्य सुखमादितो भवति देहिनो गर्भके
　किमङ्गमलभक्षणप्रभृतिदूषिते शैशवे ।
किमङ्गजकृता सुखव्यसनपीडिते यौवने
　किमङ्गगुणमर्दनक्षमजराहते वार्धके ॥ २४५ ॥
किमत्र विरसे सुखं दयितकामिनीसेवने
　किमन्यजनप्रीतये द्रविणसंचये नश्वरे ।
किमस्ति सु(भु)वि भङ्गुरे तनयदर्शने वा भवे
　यतोऽत्र गतचेतसा तनुमता रतिर्बध्यते ॥ २४६ ॥
गतिर्विगलिता वपुः परिणतं हृषीकं मितं
　कुलं नियमितं भवोऽपि कलितः सुखं संमितम् ।

परिभ्रमकृतं भवे भवभृता घटीयन्त्रव-
द्भवस्थितिरियं सदा परिमिताप्यनन्ता कृता ॥ २४७ ॥
तदस्ति न वपुर्भृता यदिह नोपभुक्तं सुखं
न सा गतिरनेकधा गतवता न या गाहिता ।
न ता नरपतिश्रियः परिचिता न या संसृतौ
न सोऽस्ति विषयो न यः परिचितः सदा देहिनाम् ॥ २४८ ॥
इदं स्वजनदेहजातनयमातृभार्यामयं
विचित्रमिह केनचिद्रचितमिन्द्रजालं तनु ।
क कस्य कथमत्र को भवति तत्त्वतो देहिनः[1]
स्वकर्मवशवर्तिनस्त्रिभुवने निजो वा परः ॥ २४९ ॥
हृषीकविषयं सुखं किमिह यन्न भुक्तं भवे
किमिच्छति नरः परं सुखमपूर्वभूतं तनु ।
कुतूहलमपूर्वजं भवति नाङ्गिनोऽस्यास्ति चे-
त्समैकसुखसंग्रहे किमपि नो विधत्ते मनः ॥ २५० ॥
क्षणेन समवानतो भवति कोपवान्संसृतौ
विवेकविकलः शिशुर्विरहकातरो वा युवा ।
जरार्दिततनुस्तदा विगतसर्वचेष्टो जरी
दधाति नटवन्नरः प्रचुरवेषरूपं वपुः ॥ २५१ ॥
अनेकगतिचित्रितं विविधजातिभेदाकुलं
समेत्य तनुमद्गुणः प्रचुरचित्तचेष्टोद्यतः ।
पुरार्जितविचित्रकर्मफलभुग्विचित्रां तनुं
प्रगृह्य नटवत्सदा भ्रमति जन्मरङ्गाङ्गणे ॥ २५२ ॥
अचिन्त्यमतिदुःसहं त्रिविधदुःखमेनोर्जितं[2]
चतुर्विधगतिश्रितं भवभृता न किं प्राप्यते ।
शरीरमसुखाकरं जगति गृह्णता मुञ्चता
तनोति न तथाप्ययं विरतिमूर्जितां पापतः ॥ २५३ ॥

---

१. शरीरिणः. २. मनोवचःकायोत्पन्नम्.

भजन्त्यतनुपीडितो विरहकातरः कामिनीं
करोति मदनोज्झितो विरतिमङ्गनासंगतः।
तपस्यति मुनिः सुखी हसति विक्लवः क्लिश्यति
विचित्रमतिचेष्टितं श्रयति संसृतौ जन्मवान्॥ २९४॥
अनेकभवसंचिता इह हि कर्मणा निर्मिताः
प्रियाप्रियवियोगसंगमविपत्तिसंपत्तयः।
भवन्ति सकलास्त्विमा गतिषु सर्वदा देहिनां
जरामरणवीचिके जननसागरे मज्जताम्॥ २९५॥
करोम्यहमिदं तदा कृतमिदं करिष्याम्यदः
पुमानिति सदा क्रियाकरणकारणव्यावृतः।
विवेकरहिताशयो विगतसर्वधर्मक्षमो
न वेत्ति गतमप्यहो जगति कालमत्याकुलः॥ २९६॥
इमे मम धनाङ्गजस्वजनवल्लभादेहजा
सुहृज्जनकमातुलप्रभृतयो भृशं वल्लभाः।
मुधेति हतचेतनो भववने चिरं खिद्यते
यतो भवति कस्य को जगति वालुकामुष्टिवत्॥ २९७॥
तनूजजननीपितृस्वसृसुताकलत्रादयो
भवन्ति निखिला जनाः कृतपरस्परोत्पत्तयः।
किमत्र बहुनात्मनो जगति देहजो जायते
धिगस्तु भवसंततिं भवभृतां सदा दुःखदा॥ २९८॥
विधाय नृपसेवनं धनमवाप्य चित्तेप्सितं
करोमि परिपोषणं निजकुटुम्बकस्याङ्गनाः।
मनोनयनवल्लभाः समदना निषेवे तथा
सदेति कृतचेतसा स्वहिततो भवे भ्राम्यते॥ २९९॥
विवेकविकलः शिशुः प्रथमतोऽधिकं मोदते
ततो मदनपीडितो युवतिसंगमं वाञ्छति।

पुनर्जरसमाश्रितो भवति सर्वनष्टक्रियो
विचित्रमतिजीवितं परिणतेर्न लज्जायते ॥ २६० ॥

विनश्वरमिदं वपुर्युवतिमानसं चञ्चलं
भुजङ्गकुटिलो विधिः पवनगत्वरं जीवितम् ।
अपायबहुलं धनं बत परिप्लवं यौवनं
तथापि न जना भवव्यसनसंततेर्बिभ्यति ॥ २६१ ॥

विपत्तिसहिताः श्रियो सुखयुतं सुखं जन्मिनां
वियोगविषदूषिता जगति सज्जनैः संगतिः ।
रजोरगबिलं वपुर्मरणनिन्दितं जन्मिनां
तदप्ययमनारतं हतमतिर्भवे रज्यति ॥ २६२ ॥

असातहुतभुक्शिखाकवलितं जगन्मन्दिरं
सुखं विषमवातभुग्रसनवच्चलं कामजम् ।
जलस्थशशिचञ्चलां भुवि विलोक्य लोकस्थितिं
विमुञ्चत जनाः सदा विषयमूर्छनां तत्त्वतः ॥ २६३ ॥

भवेऽत्र कठिनस्तनीस्तरललोचनां कामिनीं
धरापरिवृढश्रियं चपलचामरभ्राजिताम् ।
रसादिविषयांस्तथा सुखकरान्न कः सेवते
भवेद्यदि जनस्य नो तृणशिरोम्बुवज्जीवितम् ॥ २६४ ॥

हसन्ति धनिनो, जना गतधना रुदन्त्यातुराः,
पठन्ति कृतबुद्धयोऽकृतधियोऽनिशं शेरते, ।
तपन्ति मुनिपुंगवा, विषयिणो रमन्ते तथा,
करोति नटनर्तनक्रममयं भवो जन्मिनाम् ॥ २६५ ॥

न किं तरललोचना समदकामिनीवल्लभा
विभूतिरपि भूभुजां धवलचामरच्छत्रभृत् ।
मरुच्चलितदीपवज्जगदिदं विलोक्यास्थिरं
परं तु सकलं जनाः कृतधियो वनान्ते गताः ॥ २६६ ॥

इति प्रकुपितोरगप्रमुखभङ्गुरां सर्वदा
निधाय निजचेतसि प्रबलदुःखदां संसृतिम्।
विमुञ्चत परिग्रहग्रहमनार्जवं सज्जना
यदीच्छत सुखामृतं रसितुमस्तसर्वाशुभम् ॥ २६७ ॥
मनोभवशरार्दितः स्मरति कामिनीं यो नरो
विचिन्तयति सापरं मदनकातराङ्गी परम्।
परोऽपि परभामिनीमिति विभिन्नभावेप्सितां
विलोक्य जगतः स्थितिं बुधजनास्तपः कुर्वते ॥ २६८ ॥

इति जातिनिरूपणम् ॥ १० ॥

जनयति वचो व्यक्तं, वक्रं तनोति मलाविलं,
स्खलयति गतिं, हन्ति स्थाम[1], श्लथीकुरुते तनुम्,।
दहति शिखिवत्सा गर्वाङ्गना(?)यौवनकाननं,
गमयति वपुर्मर्त्यानां वा, करोति जरा न किम् ॥ २६९ ॥
प्रबलपवनापातध्वस्तप्रदीपशिखोपमै-
रलमलनिचैः कामोद्भूतैः सुखैर्विषसंनिभैः।
समपरिचितैर्दुःखप्राप्तैः सतामतिनिन्दितै-
रिति कृतमनाः शङ्के वृद्धः प्रकम्पयते करौ ॥ २७० ॥
चलयति तनुं, दृष्टेर्भ्रान्तिं करोति शरीरिणां,
रचयति बलादव्यक्तोक्तिं, तनोति गतिक्षितिम्।
जनयति जने नुद्यां, निन्दामनर्थपरम्परां
हरति सुरभिं गन्धं देहाज्जरा मदिरा यथा ॥ २७१ ॥
भवति मरणं प्रत्यासन्नं, विनश्यति यौवनं,
प्रभवति जरा सर्वाङ्गानां विनाशविधायिनी।
विरमत बुधाः कामार्थेभ्यो वृषे कुरुतादरं
वदितुमिति वा कर्णोपान्ते स्थितं पलितं जने ॥ २७२ ॥

---

१. सामर्थ्यमित्यर्थः.

मदनसदृशं यं पश्यन्ती विलोचनहारिणी
शिथिलिततनुः कामावस्थां गता मदनातुरा ।
तदपि जरसा शीर्णे मर्त्ये बलादिह भोज्यते
जगति युवतिर्वा भैषज्यं विमुक्तरतस्पृहा ॥ २७३ ॥

भवति विषयान्मोक्तुं भोक्तुं न च क्षमचेष्टितो
वपुषि जरसा जीर्णो देही विधूतबलः परम् ।
रसति तरसा त्वस्थीनि श्वा यथा त्रपयोज्झितः
कररसनया धिग्जीवानां विचेष्टितमीदृशम् ॥ २७४ ॥

तिमिरपिहिते नेत्रे लालावलीमलिनं मुखं
विगलितगती पादौ देहो विसंस्थुलतां गतः ।
पलितकलितो मूर्धा कम्पत्यबोधि जराङ्गना-
मिव कृतपदां तृष्णा नारी तथापि न मुञ्चति ॥ २७५ ॥

गलति सकलं रूपं, लालां विमुञ्चति जल्पनं,
स्खलति गमनं, दन्ता नाशं श्रयन्ति शरीरिणः, ।
विरमति मतिर्नो शुश्रूषां करोति च गेहिनी,
वपुषि जरसा ग्रस्ते वाक्यं तनोति न देहजः ॥ २७६ ॥

रचयति मतिं धर्मे, नीतिं तनोत्यतिनिर्मलां,
विषयविरतिं धत्ते, चेतः शमं नयते, पराम् ।
व्यसननिहतिं दत्ते, सूते विनीतिमथार्चिता
मनसि निहिता प्रायः पुंसां करोति जरा हितम् ॥ २७७ ॥

युवतिरपरा नो भोक्तव्या त्वया मम संनिधा-
विति निगदितस्तृष्णां योषां न मुञ्चति किं सताम् ।
निगदितुमिति श्रोतोपान्तं गतेव जराङ्गना
पलितमिषतो न स्त्रीमन्यां यतः सहतेऽङ्गना ॥ २७८ ॥

वचनरचना जाता व्यक्ता मुखं वलिभिः श्रितं
नयनयुगलं ध्वान्ताघ्रातं शितं पलितं शिरः ।

विघटितगती पादौ हस्तौ सवेपथुतां गतौ
तदपि मनसस्तृष्णा कष्टं व्युपैति न देहिनाम् ॥ २७९ ॥
सुखकरतनुस्पर्शां गौरीं करग्रहलालितां
नयनदयितां वंशोद्भूतां शरीरबलप्रदाम् ।
धृतसरलतां वृद्धो यष्टिं न पर्वविभूषितां
त्यजति तरुणीं त्यक्त्वाप्यन्यां जरावनितासखीम् ॥ २८० ॥
त्यजसि न हते तृष्णायोषे जराङ्गनया नरं
रमितवपुषं धिक्के स्त्रीत्वं शठे त्रपयोज्झिते ।
इति निगदिता कर्णाभ्यर्णे गतैः पलितैरियं
तदपि न गता तृष्णा का वा नु मुञ्चति वल्लभाम् ॥ २८१ ॥
त्यजत विषयान्दुःखोत्पत्तौ पटूननिशं खला-
न्भजत विषयाञ्जन्मारातेर्निराशकृतौ हितान् ।
जरयति यतः कालः कायं निहन्ति च जीवितं
वदितुमिति वा कर्णोपान्ते गतं पलितं जनाः ॥ २८२ ॥
हरति विषयान्दण्डालम्बे करोति गतिस्थिती
स्खलयति पथि स्पष्टं नार्थं विलोकयितुं क्षमा ।
परिभवकृतः सर्वाश्चेष्टास्तनोत्यनिवारिता
कुनृपमतिवद्देहं नृणां जरा परिजृम्भते ॥ २८३ ॥
शिरसि निभृतं कृत्वा पादं प्रपातयति द्विजा-
न्पिबति रुधिरं, मांसं सर्वं समत्ति शरीरिणाम् ।
स्थपुटविषमं चर्माङ्गानां दधति शरीरिणां
विचरति जरा संहाराय क्षिताविव राक्षसी ॥ २८४ ॥
भुवनसदनप्राणिग्रामप्रकम्पविधायिनी
निकुचिततनुर्भीमाकारा जरा जरती रुषा ।
निहितमनसं तृष्णाभार्यां निरीक्ष्य नरं भृशं
पलितमिषतो जातेर्ष्या वा करोति कचग्रहम् ॥ २८५ ॥

विमदमृषिवच्छ्रीकण्ठं वा गदाङ्कितविग्रहं
 शिशिरकरवद्वक्रं वेषं विरूपविलोचनम् ।
रविमिव तमोमुक्तं दण्डाश्रितं च यमं यथा
 वृषमपि विना मर्त्यं निन्द्या करोतितरां जरा ॥ २८६ ॥

विगतदशनं शश्वल्लालाततताकुलसृक्कं
 स्खलति चरणाक्षेपं मुखापरिस्फुटजल्पनम् ।
रहितकरणव्यक्तारम्भं मृदूकृतमूर्धजं
 पुनरपि नरं पापाबालं करोतितरां जरा ॥ २८७ ॥

अहह नयने मिथ्या दृग्वत्सदीक्षणवर्जिते
 श्रवणयुगलं दुष्पुत्रो वा शृणोति न भाषितम् ।
स्खलति चरणद्वन्द्वं मार्गे मदाकुललोकव-
 द्वपुषि जरसा जीर्णे वर्णो व्यपैति कलत्रवत् ॥ २८८ ॥

मुदितमनसो दृष्ट्वा रूपं यदीयमकृत्रिमं
 परवशधियः कामक्षिप्तैर्भवन्ति शिलीमुखैः ।
धवलितमुखभ्रूमूर्धानं जरसा धरात्रयं
 झटिति मनुजं चाण्डालं वा त्यजन्ति जनाङ्गनाः ॥ २८९ ॥

नयनयुगलं व्यक्तं रूपं विलोकितुमक्षमं
 पलितकलितो मूर्धा कम्पी श्रुती श्रुतिवर्जिते ।
वपुषि जरसाश्लिष्टे नष्टं विचेष्टितमुत्तमं
 मरणचकितो नाङ्गी धत्ते तथापि तपोहितम् ॥ २९० ॥

द्युतिगतिधृतिप्रज्ञालक्ष्मीपुरःसरयोषितः
 सितकचवलिव्याजान्मर्त्ये निरीक्ष्य जराङ्गनाम् ।
प्रदधती चेर्ष्यां तृष्णानारी पुनर्न विनिर्गता
 त्यजति हि न वा स्त्री प्रेयांसं कृतागसमप्यलम् ॥ २९१ ॥

परिणतिमतिस्पष्टां दृष्ट्वा तनोर्गुणनाशिनीं
 झटिति न नराः संसाराब्धेः समुत्तरणोद्यताः ।

जिनपतिमतं श्रित्वा पूतं विमुच्य परिग्रहं
विदधति हितं कृत्यं सम्यक्तपश्चरणादिकम् ॥ २९२ ॥

इति जरानिरूपणम् ॥ ११ ॥

संसारे भ्रमतां पुरार्जितवशाद्दुःखं सुखं वाश्नुतां
चित्रं जीवितमङ्गिनां स्वपरतः संपद्यमानापदाम् ।
दन्तान्तःपतितं मनोहररसं कालेन पक्कं फलं
स्थास्यत्यत्र कियच्चिरं तनुमतस्तीव्रं क्षुधाचर्चितम् ॥ २९३ ॥

नित्यं व्याधिशताकुलस्य विधिना संक्षिप्यमाणायुषो
नाश्चर्यं भववर्तिनः श्रममतो यज्जायते पञ्चता ।
किं नामाद्भुतमत्र काननतरोरत्याकुलात्यक्षिभि-
र्यत्प्रोद्यत्पवनप्रतापनिहिता त्यक्तं फलं भ्रश्यति ॥ २९४ ॥

निर्धूतान्यबलोऽविचिन्त्यमहिमा प्रध्वस्तदुर्गक्रियो
विश्वव्यापिगतिः कृपाविरहितो दुर्बोधमन्त्रः शठः ।
शस्त्रास्त्रोदकपावकारिपवनव्याध्यादिनानायुधो
गर्भादावपि हन्ति जन्तुमखिलं दुर्वारवीर्योपमः ॥ २९५ ॥

प्राज्ञं मूर्खमनार्यमार्यमधनं द्रव्याधिपं दुःखितं
सौख्योपेतम्[1]नामम्[2]र्मामनिहितं धर्मार्थिनं पापिनम् ।
व्यावृत्तं व्यसनादराद्व्यसनिनं व्यासाकुलं दानिनं
शिष्टं दुष्टमनर्यमर्यमखिलं लोकं निहन्त्यन्तकः ॥ २९६ ॥

देवाराधनमन्त्रतन्त्रहवनध्यानगृहेज्याजप-
स्थानत्यागधराप्रवेशगमनव्रज्या द्विजार्चादिभिः ।
अत्युग्रेण यमेश्वरेण तनुमानङ्गीकृतो भक्षितुं
व्याघ्रेणेव बुभुक्षितेन गहने नो शक्यते रक्षितुम् ॥ २९७ ॥

प्रारब्धो ग्रसितुं यमेन तनुमान्दुर्वारवीर्येण य-
स्तं त्रातुं भुवने न कोऽपि शकले शक्तो नरो वासुरः ।

१. सरोगम्. २. नीरोगम्.

नो चेद्देवनरेश्वरप्रभृतयः पृथ्व्यां सदा स्युर्जना
विज्ञायेति करोति शुद्धधिषणो धर्मे मतिं शाश्वते ॥ २९८ ॥
चन्द्रादित्यपुरंदरक्षितिधरश्रीकण्ठसीर्यादयो
ये कीर्तिद्युतिकान्तिधीधनबलप्रख्यातपुण्योदयाः ।
स्वे स्वे तेऽपि कृतान्तदन्तकलिताः काले व्रजन्ति क्षयं
किं चान्येषु कथासु चारुमतयो धर्मे मतिं कुर्वताम् ॥ २९९ ॥
ये लोकेशशिरोमणिद्युतिजलप्रक्षालिताङ्घ्रिद्वया
लोकालोकविलोकिकेवललसत्साम्राज्यलक्ष्मीधराः ।
प्रक्षीणायुषि यान्ति तीर्थपतयस्तेऽप्यस्तदेहास्पदं
तत्रान्यस्य कथं भवेद्भवभृतः क्षीणायुषो जीवितम् ॥ ३०० ॥
द्वात्रिंशन्मुकुटावतंसितशिरोभूभृत्सहस्रार्चिताः
षट्खण्डक्षितिमण्डना नृपतयः साम्राज्यलक्ष्मीधराः ।
नीता येन विनाशमत्र विधिना सोऽन्यान्विमुञ्चेत्कथं
कल्पान्तश्वसनो गिरींश्चलयति स्थैर्यं तृणानां कुतः ॥ ३०१ ॥
यात्रादित्यशशाङ्कमारुतघना नो सन्ति सन्त्यत्र ते
देशा यत्र न मृत्युरञ्जनजनो नो सोऽस्ति देशः क्वचित् ।
सम्यग्दर्शनबोधवृत्तजनितां मुक्त्वा विमुक्तिस्थितिं
संचिन्त्येति विचक्षणाः पुरु तपः कुर्वन्तु तामीप्सवः ॥ ३०२ ॥
येषां स्त्री स्तनचक्रवाकयुगले पीतांशु राजत्तटे
निर्जित्कौस्तुभरत्नरश्मिसलिले आस्याम्बुजभ्राजिते ।
श्रीवक्षः कमलाकरे गतभया क्रीडां चकारापरां-
श्चार्हच्छ्रीहरयोऽपि ते मृतिमिताः[1] कुत्रापरेषां स्थितिः ॥ ३०३ ॥
भोक्ता यत्र वितृप्तिरन्तकविभुर्भोज्याः समस्ताङ्गिनः
कालेशः परिवेषकोऽश्रमतनुर्ग्रासाविसन्त्यक्रमैः ।
वक्त्रे तस्य निशातदन्तकलिते तत्र स्थितिः कीदृशी
जीवानामिति मृत्युभीतमनसो जैनं तपः कुर्वते ॥ ३०४ ॥

---

१. मृतिं गताः.

उद्धर्तुं धरणीं निशाकररवी क्षेप्तुं मरुन्मार्गतो
वातं स्तम्भयितुं पयोनिधिजलं पातुं गिरिं चूर्णितम् ।
शक्ता यत्र विशन्ति मृत्युवदने कान्यस्य तत्र स्थिति-
र्यस्मिन्माति गिरिर्बिले सह वनैः कात्र व्यवस्था ह्यणोः ॥३०५॥

सुग्रीवाङ्गदनीलमारुतसुतपृष्ठैः कृताराधनो
रामो येन विनाशितस्त्रिभुवनप्रख्यातकीर्तिध्वजः ।
मृत्योस्तस्य परेषु देहिषु कथा का निघ्नतो विद्यते
कात्रास्था न यतो द्विपं हि शशको निर्यापकः श्रोतसः ॥३०६॥

अत्यन्तं कुरुतां रसायनविधिं वाक्यं प्रियं जल्पतु
वार्धेः[1] पारमियर्तु गच्छतु नभो देवाद्रिमारोहतु ।
पातालं विशतु प्रसर्पतु दिशं देशान्तरं भ्राम्यतु
न प्राणी तदपि प्रहर्तुमनसा संत्यज्यते मृत्युना ॥ ३०७ ॥

कार्यं यावदिदं करोमि विधिवत्तावत्करिष्याम्यद-
स्तत्कृत्वा पुनरेतदद्य कृतवानेतत्पराकारितम् ।
इत्यात्मीयकुटुम्बपोषणपरः प्राणी क्रियाव्याकुलो
मृत्योरेति करग्रहं हतमतिः संत्यक्तधर्मक्रियः ॥ ३०८ ॥

मान्धाता भरतः शिबी दशरथो लक्ष्मीधरो रावणः
कर्णः केशिरिपुर्बलो भृगुपतिर्भीमः परेऽप्युन्नताः ।
मृत्युं जेतुमलं भयं नृपतयः कस्तं परो जेष्यते
भग्नो यो न महातरुर्द्विपवरैस्तं किं शिशो भक्षति ॥ ३०९ ॥

सर्वं शुष्यति सान्द्रमेति निखिला पाथोनिधिं निम्नगा
सर्वं म्लायति पुष्यमत्र मरुतः शम्प्येव[2] सर्वं चलम् ।
सर्वं नश्यति कृत्रिमं च सकलो यद्वद्व्यपक्षीयते
सर्वस्तद्वदुपैति मृत्युवदनं देहीभवंस्तावतः ॥ ३१० ॥

प्रख्यातद्युतिकान्तिकीर्तिधिषणाः प्रज्ञाकलाभूतयो
देवा येन पुरंदरप्रभृतयो नीताः क्षयं मृत्युना ।

---

१. समुद्रस्य. २. विद्युदिव.

तस्यान्येषु जनेषु कात्र गणना हिंसात्मनो विद्यते
मत्तेभं हि हिनस्ति यः स हरिणं किं मुञ्चते केशरी ॥३११॥

श्रीह्रीकीर्तिरतिद्युतिप्रियतमा प्रज्ञा कलाभिः समं
यद्ग्रासीकुरुते नितान्तकठिनो मर्त्यं कृतान्तः शठः ।
तस्मात्किं तदुपार्जनेन भविनां कृत्यं विबुद्धात्मनां
किंतु श्रेयसि जीविते सति चले कार्या मतिस्तत्त्वतः ॥३१२॥

यो लोकैकशिरःशिखामणिसमं सर्वोपकारोद्यतं
राजच्छीलगुणाकरं नरवरं कृत्वा पुनर्निर्दयः ।
धाता हन्ति निरर्गलो हतमतिः किं तत्क्रियायां फलं
प्रायो निर्दयचेतसां न भवति श्रेयोमतिर्भूतले ॥ ३१३ ॥

रम्याः किं न विभूतयोऽतिललिताः सच्चामरभ्राजिताः
किं वा पीनदृढोन्नतस्तनयुगास्त्रस्तैणदीर्घेक्षणाः ।
किं वा सज्जनसंगतिर्न सुखदा चेतश्चमत्कारिणी
किं त्वत्रानिलधूतदीपकलिकाच्छायाचलं जीवितम् ॥ ३१४ ॥

यद्येतास्तरलेक्षणा युवतयो न स्युर्गलद्यौवना
भूतिर्वा यदि भूभृतां भवति नो सौदामिनीसंनिभा ।
वातोद्भूततरङ्गचञ्चलमिदं नो चेद्भवेज्जीवितं
को नामेह तदेव सौख्यविमुखः कुर्याज्जिनानां तपः ॥३१५॥

मांसासृग्रसलालसामयगणव्याधैः समाध्यासितां
नानापायवसुंधरारुहचितां जन्माटवीमाश्रितः ।
धावन्नाकुलमानसो निपतितो दृष्ट्वा जरारक्षसीं
क्षुत्क्षामोद्धृतमृत्युपन्नगमुखे प्राणी कियत्प्राणिति ॥ ३१६ ॥

मृत्युव्याघ्रभयंकराननगतं भीतं जराव्याधत-
स्तीव्रव्याधिदुरन्तदुःखतरुमत्संसारकान्तारगम् ।
कः शक्नोति शरीरिणं त्रिभुवने पातुं नितान्तातुरं
त्यक्त्वा जातिजरामृतिक्षतिकरं जैनेन्द्रधर्मामृतम् ॥ ३१७ ॥

एवं सर्वजगद्विलोक्य कलितं दुर्वारवीर्यात्मना
निस्त्रिंशेन समस्तसत्त्वसमितिप्रध्वंसिना मृत्युना ।
सद्रत्नत्रयशातमार्गणगणं गृह्णन्ति यच्छित्तये[1]
सन्तः शान्तधियो जिनेश्वरतपःसाम्राज्यलक्ष्मीश्रिताः ॥३१८॥

इति मृत्युनिरूपणम् ॥ १२ ॥

कार्याणां गतयो भुजङ्गकुटिलाः स्त्रीणां मनश्चञ्चलं
नैश्वर्यं स्थितिमत्तरंगचपलं नृणां च यो धावति ।
संकल्पाः समदाङ्गनाक्षितरलाः मृत्युः परं निश्चितो
मत्वैवं मतिसत्तमा विदधतां धर्मे मतिं तत्त्वतः ॥ ३१९ ॥

श्रीविद्युच्चपलावपुर्विधुनितं नानाविधव्याधिभिः
सौख्यं दुःखकटाक्षितं तनुमतां सत्संगतिर्दुर्लभा ।
मृत्युध्यासितमायुरत्नबहुभिः किं भाषितैस्तत्त्वतः
संसारेऽस्ति न किंचिदङ्गिसुखकृत्तस्माज्जना जाग्रत ॥ ३२० ॥

यद्येताः स्थिरयौवनाः शशिमुखीः पीनस्तनीर्भामिनीः
कुर्याद्यौवनकालमानमथवा धातारतं जीवितम् ।
चिन्तास्थैर्यमशौचमन्तविरसं सौख्यं वियोगं ननु
को नामेह विमुच्य चारुधिषणः कुर्यात्तपो दुश्चरम् ॥ ३२१ ॥

कान्ताः किं न शशाङ्ककान्तिधवलाः सौधालयाः कस्यचि-
त्काञ्चीदामविराजितोरुजघनाः सेव्या न किं कामिनी ।
किं वा श्रोत्ररसायनं सुखकरं श्रव्यं न गीतादिकं
विश्वं किं तु विलोक्य मारुतचलं सन्तस्तपः कुर्वते ॥ ३२२ ॥

कृष्टेष्वासविमुक्तमार्गणगतिस्थैर्यं[2] जने यौवनं
कामान्क्रुद्धभुजङ्गकायकुटिलान्विद्युच्चलं जीवितम् ।
अङ्गारानलतप्तसूतरसवद्दृष्ट्वा श्रियोऽप्यस्थिरा
निष्क्रम्यात्र सुबुद्धयो वरतपः कर्तुं वनान्तं गताः ॥ ३२३ ॥

---

१. यस्य च्छेदनाय. २. आरोपितचापविमुक्तबाणगतिवद्यौवनम्.

वपुर्व्यसनमस्यति प्रसभमन्तको जीवितं
धनं नृपसुतादयस्तनुमतां जरा यौवनम् ।
वियोगदहनं सुखं समदकामिनीसंगजं
तथापि बत मोहिनो दुरितसंगृहं कुर्वते ॥ ३२४ ॥

अपायकलिता तनुर्जगति सापदः संपदो
विनश्वरमिदं सुखं विषयजं श्रियश्चञ्चलाः ।
भवन्ति जरसा रसास्तरललोचना योषित-
स्तदप्ययमहो जनस्तपसि नो परे रज्यति ॥ ३२५ ॥

भवे विरहितो भवन्भवभृतो न के बान्धवाः
स्वकर्मवशतो न केऽत्र शत्रवो भविष्यन्ति वा ।
जनः किमिति मोहितो नवकुटुम्बकस्यापदि
विमुक्तजिनशासनः स्वहिततः सदा भ्रश्यते ॥ ३२६ ॥

दृढोन्नतकुचात्र या चपललोचना कामिनी
शशाङ्कवदनाम्बुजा मदनपीडिता यौवने ।
मनो हरति रूपतः सकलकामिनां वेगतो
न सैव जरसार्दिता भवति वल्लभा कस्यचित् ॥ ३२७ ॥

इमा यदि भवन्ति नो गलितयौवना नीरुच-
स्तदा कमललोचनास्तरुणमानिनी मामुचत् ।
विलासमदविभ्रमा भ्रमति लुण्टयित्री जरा
यतो भुवि बुधस्ततो भवति निस्पृहस्तन्मुखे ॥ ३२८ ॥

इमा रूपस्थानस्वजनतनयद्रव्यवनिता
सुता लक्ष्मीकीर्तिद्युतिरतिमतिप्रीतिधृतयः ।
मदान्धस्त्रीनेत्रप्रकृतिचपलाः सर्वभविना-
महोकष्टं मर्त्यस्तदपि विषयान्सेवितुमनाः ॥ ३२९ ॥

सहात्र स्त्री किंचित्सुतपरिजनैः प्रेम कुरुते
वशप्राप्तो भोगो भवति रतये किंचिदनघाः ।

श्रियः किंचित्तुष्टिं विदधति परां सौख्यजनिकां
न किंचित्पुंसां हि कतिपयदिनैरेतदखिलम् ॥ ३३० ॥

विजित्योर्वीं सर्वां सततमिह संसेव्य विषयां
श्रियं प्राप्यानर्घ्यां तनयमवलोक्यापि परमम्।
निहन्त्यारातीनां वलय····मत्यन्तमरमं
विमुक्तद्रव्यो हि मुषितवदयं याति मरणम् ॥ ३३१ ॥

श्रियोपाया घ्रातास्तृणजलचरं जीवितमिदं
मनश्चित्रं स्त्रीणां भुजगकुटिलं कामजसुखम्।
क्षणध्वंसी कायः प्रकृतितरले यौवनधने
इति ज्ञात्वा सन्तः स्थिरतरधियः श्रेयसि रताः ॥ ३३२ ॥

गलत्यायुर्देहे व्रजति विलयं रूपमखिलं
जरा प्रत्यासन्नीभवति लभते व्याधिरुदयम्।
कुटुम्बः स्नेहार्तः प्रतिहतमतिर्लोभकलितो
मनो जन्मोच्छित्त्यै तदपि कुरुते नायमसुमान् ॥ ३३३ ॥

बुधा ब्रह्मोत्कृष्टं परमसुखकृद्वाञ्छितपदं
विवेकश्चेदस्ति प्रतिहतमलः स्वान्तवसतौ।
इदं लक्ष्मीभोगप्रभृति सकलं यस्य वसतो
न मोहग्रस्ते तन्मनसि विदुषां भावि सुखदम् ॥ ३३४ ॥

भवन्त्येता लक्ष्म्यः कतिपयदिनान्येव सुखदा-
स्तरुण्यस्तारुण्ये विदधति मनःप्रीतिमतुलाम्।
तडिल्लोला भोगा वपुरपि चलं व्याधिकलितं
बुधाः संचिन्त्येति प्रगुणमनसो ब्रह्मणि रताः ॥ ३२५ ॥

न कान्ता कान्तान्ते विरहशिखिनो दीर्घनयना
न कान्ता भूपश्रीस्तडिदिव चला चान्तविरसा।
न कान्तं ग्रस्तान्तं भवति जरसा यौवनमतः
श्रयन्ते ते सन्तः स्थिरसुखमयीं मुक्तिवनिताम् ॥ ३३६ ॥

वयं येभ्यो जाता मृतिमुपगतास्तेऽत्र सकलाः
समं यैः संवृद्धा ननु विरलतां तेऽपि गमिताः ।
इदानीमस्माकं मरणपरिपाटीक्रमकृता
न पश्यन्तोऽप्येवं विषयविरतिं यान्ति कृपणाः ॥ ३३७ ॥

स यातो यात्येष स्फुटमयमहो यास्यति मृतिं
परेषां यत्रैवं गणयति जनो नित्यमबुधः ।
महामोहाघ्रातस्तनुधनकलत्रादिविभवो
न मृत्युं स्वासन्नं व्यपगतमतिः पश्यति पुनः ॥ ३३८ ॥

सुखं प्राप्तुं बुद्धिर्यदि गतमलं मुक्तिवसतौ
हितं सेवध्वं भो जिनपतिमतं पूतरचितम् ।
भजध्वं मा तृष्णां कतिपयदिनस्थायिनि धने
यतो नायं सन्तः कमपि मृतमन्वेति विभवः ॥ ३३९ ॥

न संसारे किंचित्स्थिरमिह निजं वास्ति सकले
विमुच्यार्च्यं रत्नत्रितयमनघं मुक्तिजनकम् ।
अहो मोहार्तानां तदपि विरतिर्नास्ति भवत-
स्ततो मोक्षोपायाद्विमुखमनसां सौख्यकुशलम् ॥ ३४० ॥

अनित्यं निस्त्राणं जननमरणव्याधिकलितं
जगन्मिथ्यात्वर्धैरहमहमिकालिङ्गितमिदम् ।
विचिन्त्यैवं सन्तो विमलमनसो धर्ममतय-
स्तपः कर्तुं वृत्तास्तदपसृतये जैनमनघम् ॥ ३४१ ॥

तडिल्लोलं तृष्णाप्रचयनिपुणं सौख्यमखिलं
तृषो वृद्धेस्तापो दहति शमनो वह्निवदलम् ।
ततः खेदोऽत्यन्तं भवति भविनां चेतसि बुधा
निधायेदं पूते जिनपतिमते सन्ति निरताः ॥ ३४२ ॥

इति सामान्यानित्यतानिरूपणम् ॥ १३ ॥

यत्पाति हन्ति जनयति रजस्तमःसत्त्वगुणयुतं विश्वम् ।
तद्धरिशंकरविधिवद्विजयतु जगत्यां सदा कर्म ॥ ३४३ ॥

भवितव्यता विधाता कालो नियतिः पुरा कृतं कर्म ।
वेधा विधिस्स्वभावो भाग्यं दैवस्य नामानि ॥ ३४४ ॥
यत्सौख्यदुःखजनकं प्राणभृता संचितं पुरा कर्म ।
स्मरति पुनरिदानीं तद्दैवं मुनिभिराख्यातम् ॥ ३४५ ॥
दुःखं सुखं च लभ्येद्यद्येन यतो यदा यथा यत्र ।
दैवनियोगात्प्राप्यं तत्तेन ततस्तदा तथा तत्र ॥ ३४६ ॥
यत्कर्म पुरा विहितं यातं जीवस्य पाकमिह किंचित् ।
न तदन्यथा विधातुं कथमपि शक्रोऽपि शक्नोति ॥ ३४७ ॥
धाता जनयति तावल्ललामभूतं नरं त्रिलोकस्य ।
यदि पुनरपि गतबुद्धिर्नाशयति किमस्य तत्कृत्यम् ॥ ३४८ ॥
निहितं यस्य मयूखैर्न तमः संतिष्ठते दिगन्तेऽपि ।
उपयाति सोऽपि नाशं नापदि किं तं विधिः स्पृशति ॥ ३४९ ॥
विपरीते सति धातरि साधनमफलं प्रजायते पुंसाम् ।
दशशतकरोऽपि भानुर्निपतति गगनादनवलम्बः ॥ ३५० ॥
यत्कुर्वन्नपि नित्यं कृत्यं पुरुषो न वाञ्छितं लभते ।
तत्रायशो विधातुर्मुनयो न वदन्ति देहभृतः ॥ ३५१ ॥
बान्धवमध्येऽपि जनो दुःखानि समेति पापपाकेन ।
पुण्येन वैरिसदनं यातोऽपि न मुच्यते सौख्यैः ॥ ३५२ ॥
पुरुषस्य भाग्यसमये पतितो वज्रोऽपि जायते कुसुमम् ।
कुसुममपि भाग्यविरहे वज्रादपि निष्ठुरं भवति ॥ ३५३ ॥
किं सुखदुःखनिमित्तं मनुजोऽयं खिद्यते गतमनस्कः ।
परिणमति विधिविनिर्मितमसुभाजां किं वितर्केण ॥ ३५४ ॥
दिशि विदिशि वियति शिखरिणि संयति गहने वनेऽपि यातानाम् ।
योजयति विधिरभीष्टं जन्मवतामभिमुखीभूतः ॥ ३५५ ॥
यदि नीतिमतां लक्ष्मीर्यदपथ्यनिषेविणां च कल्पत्वम् ।
अनुमीयते विधातुः स्वेच्छाकारित्वमेतेन ॥ ३५६ ॥

जलधिगतोऽपि न कश्चित्कश्चित्तटगोऽपि रत्नमुपयाति ।
पुण्यविपाकान्मर्त्यो मत्वेति विमुच्यतां खेदः ॥ ३५७ ॥
सुखमसुखं च विधत्ते जीवानां यत्र तत्र जातानाम् ।
कर्मैव पुरा चरितं कस्तच्छक्नोति वारयितुम् ॥ ३५८ ॥
द्वीपे चात्र समुद्रे धरणीधरमस्तके दिशामन्ते ।
पातं कूपेऽपि विधी रत्नं योजयति जन्मवताम् ॥ ३५९ ॥
विपदोऽपि पुण्यभाजां जायन्ते संपदोऽत्र जन्मवताम् ।
पापविपाकाद्विपदो जायन्ते संपदोऽपि सदा ॥ ३६० ॥
चित्रयति यन्मयूरान्हरितयति शुकान्बकान्सितीकुरुते ।
कर्मैव तत्करिष्यति सुखासुखं किं मनःखेदैः ॥ ३६१ ॥
अन्यत्कृत्यं मनुजश्चिन्तयति दिवानिशं विशुद्धधिया ।
वेधा विदधात्यन्यत्स्वामी च न शक्यते धर्तुम् ॥ ३६२ ॥
द्वीपे जलनिधिमध्ये गहनवने वैरिणां समूहेऽपि ।
रक्षति मर्त्यं सुकृतं पूर्वकृतं भृत्यवत्सततम् ॥ ३६३ ॥
नश्यतु यातु विदेशं प्रविशतु धरणीतलं खमुत्पततु ।
विदिशं दिशन्तु गच्छतु नो जीवस्त्यज्यते विधिना ॥ ३६४ ॥
शुभमशुभं च मनुष्यैर्यत्कर्म पुरार्जितं विपाकमितम् ।
तद्भोक्तव्यमवश्यं प्रतिषेद्धुं शक्यते केन ॥ ३६५ ॥
धनधान्यकोशनिचयाः सर्वे जीवस्य सुखकृतः सन्ति ।
भाग्येनेति विदित्वा विदुषा न विधीयते खेदः ॥ ३६६ ॥
दैवायत्तं सर्वं जीवस्य सुखासुखं त्रिलोकेऽपि ।
बुद्ध्वेति शुद्धधिषणाः कुर्वन्ति मनःक्षतिं नात्र ॥ ३६७ ॥
दातुं हर्तुं किंचित्सुखासुखं नेह कोऽपि शक्नोति ।
त्यक्त्वा कर्म पुरा कृतमिति मत्वा नो शुभं कृत्यम् ॥ ३६८ ॥
नरवरसुरवरविद्याधरेषु लोके न दृश्यते कोऽपि ।
शक्नोति यो निषेद्धुं भानोरिव कर्मणामुदयः ॥ ३६९ ॥

दयितजनेन वियोगं संयोगं खलजनेन जीवानाम् ।
सुखदुःखं च समस्तं विधिरेव निरङ्कुशः कुरुते ॥ ३७० ॥
अशुभोदये जनानां नश्यति बुद्धिर्न विद्यते रक्षा ।
सुहृदोऽपि सन्ति रिपवो विषमविषं जायते त्वमृतम् ॥ ३७१ ॥
नश्यति हस्तादर्थः पुण्यविहीनस्य देहिनो लोके ।
दूरादेत्य करस्थं भाग्ययुतो जायते रत्नम् ॥ ३७२ ॥
कस्यापि कोऽपि कुरुते न सुखं दुःखं च दैवमपहाय ।
विदधाति यथा गर्वं खलोऽहमहितस्य हन्तेति ॥ ३७३ ॥
गिरिपतिराजसानुमधिरोहतु यातु सुरेन्द्रमन्दिरं
विशतु समुद्रवारि धरणीतलमेकधिया प्रसर्पतु ।
गगनतलं प्रयातु विदधातु सुगुप्तमनेकधायुधै-
स्तदपि न पूर्वकर्म सततं बत मुञ्चत देहधारिणाम् ॥ ३७४ ॥

इति दैवनिरूपणम् ॥ १४ ॥

तावज्जल्पति सर्पति तिष्ठति माद्यति विलासति विभाति ।
यावन्नरो न जठरं देहभृतां जायते रिक्तम् ॥ ३७५ ॥
यद्यत्करिष्यति वातो निक्षिप्तद्रव्यनिर्गमद्वारम् ।
को नाम शक्यः कर्तुं जठरघटीपूरणं मर्त्यः ॥ ३७६ ॥
शक्येतापि समुद्रः पूरयितुं निम्नगाशतसहस्रैः ।
नो शक्यते कदाचिज्जठरसमुद्रोऽन्नसलिलेन ॥ ३७७ ॥
वैश्वानरो न तृप्यति नानाविधकाष्ठनिचयतो यद्वत् ।
तद्वज्जठरहुताशो नो तृप्यति सर्वथाप्यशनैः ॥ ३७८ ॥
यस्यां वस्तु समस्तं न्यस्तं नाशाय कल्पते सततम् ।
दुष्पूरोदरपिठरी कस्तां शक्नोति पूरयितुम् ॥ ३७९ ॥
तावन्नरः कुलीनो मानी शूरः प्रजायतेऽत्यर्थम् ।
यावज्जठरपिशाचो वितनोति न पीडनं देहे ॥ ३८० ॥
यदि भवति जठरपिठरी नो मानविनाशका शरीरभृताम् ।
कः कस्य तदा दीनं जल्पति मानापहारेण ॥ ३८१ ॥

गायति नृत्यति वल्गति धावति पुरतो नृपस्य वेगेन ।
किं किं न करोति पुमानुदरग्रहपवनवशीभूतः ॥ ३८२ ॥
जीवान्निहन्त्यसत्यं जल्पति बहुधा परस्वमपहरति ।
यदकृत्यं तदपि जनो जठरानिलतापितस्तनुते ॥ ३८३ ॥
द्युतिगतिमतिरतिलक्ष्मीलता लभन्ते तनुधारिणां तावत् ।
यावज्जठरदवाग्निर्न ज्वलति शरीरकान्तारे ॥ ३८४ ॥
संसारतरणदक्षो विषयविरक्तो जरार्दितोऽप्यसुमान् ।
गर्वोद्ग्रीवं पश्यति सधनमुखं जठरनृपगदितः ॥ ३८५ ॥
कर्षति वपति लुनीते दीव्यति सीव्यति पुनाति वयते च ।
विदधाति किं न कृत्यं जठरानलशान्तये तनुमान् ॥ ३८६ ॥
लज्जामपहन्ति नृणां मानं नाशयति दैन्यमुपचिनोति ।
वर्धयति दुःखमखिलं जठरशिखी वर्धितो देहे ॥ ३८७ ॥
गुणकमलशशाङ्कतनुर्गर्वग्रहनाशने महामन्त्रम् ।
सुखकुमुदौघदिनेशो जठरशिखी बाधते किं न ॥ ३८८ ॥
शिथिलीभवति शरीरं दृष्टिर्भ्राम्यति विनाशमेति मतिः ।
मूर्च्छा भवति जनानामुदरभुजङ्गेन दष्टानाम् ॥ ३८९ ॥
उत्तमकुलेऽपि जातः सेवां विदधाति नीचलोकस्य ।
वदति न वाचां नीचामुदरेश्वरपीडितो मर्त्यः ॥ ३९० ॥
दासीभूय मनुष्यः परवेश्मसु नीचकर्म विदधाति ।
चाटुशतानि च कुरुते जठरदरीपूरणाकुलितः ॥ ३९१ ॥
क्रीणाति खनति याचति गणयति रचयति विचित्रशिल्पानि ।
जठरपिठरीं न शक्तः पूरयितुं गतशुभस्तदपि ॥ ३९२ ॥
प्रविशति वारिधिमध्यं संग्रामभुवं च गाहते विषमम् ।
लङ्घति सकलधरित्रीमुदरग्रहपीडितः प्राणी ॥ ३९३ ॥
कर्माणि यानि लोके दुःखनिमित्तानि लज्जनीयानि ।
सर्वाणि तानि कुरुते जठरनरेन्द्रस्य वशमितो जन्तुः ॥ ३९४ ॥

अर्थः कामो धर्मो मोक्षः सर्वे भवन्ति पुरुषस्य ।
तावद्यावत्पीडां जाठरवह्निर्न विदधाति ॥ ३९५ ॥
एवं सर्वजनानां दुःखकरं जठरविषममतिशिखिनम् ।
संतोषजलैरमलैः शमयन्ति यतीश्वरा ये ते ॥ ३९६ ॥
ज्वलितेऽपि जठरहुतभुजि कृतकारितमोदितैर्नवाहारैः ।
कुर्वन्ति जठरपूर्णं मुनिवृषभा ये नमस्तेभ्यः ॥ ३९७ ॥
तावत्कुरुते पापं जाठरवह्निर्न शाम्यते यावत् ।
धृतिवारिणा शमित्वा तं यतयः पापतो विरताः ॥ ३९८ ॥
श्रीमदमितगतिसौख्यं परमं परिहरति मानमपहन्ति ।
विरमति वृषतस्तनुमानुदरदरीपूरणाशक्तः ॥ ३९९ ॥
शुभसंतोषवारिपरिषेकबलेन यतिः सुदुःसहं
शमयति यः कृतान्तसमचेष्टितमुत्थितमौदरानलम् ।
व्रजति सरोगशोकमदमत्सरदुःखवियोगवर्जितं
विगलितमृत्युजननमपविघ्नमनर्घमनन्तमास्पदम् ॥ ४०० ॥

इति जठरनिरूपणम् ॥ १५ ॥

सर्पत्स्वान्तप्रसूतप्रततमतमस्तोममस्तं समस्तं
सावित्रीव प्रदीप्तिर्नयति वितनुते पुण्यमन्यद्धिनस्ति ।
सूते संमोहमैत्रीद्युतिसुगतिमतिश्रीश्रिताकान्तिकीर्तिं
किं किं वा नो विधत्ते जिनपतिपदगो मुक्तिकर्त्री च दृष्टिः ॥४०१॥
शुश्रूषामाश्रयध्वं, बुधजनपदवीं याहि, कोपं विमुञ्च,
ज्ञानाभ्यासं कुरुष्व, त्यज विषयरिपुं, धर्ममित्रं भजात्मन् ।
निस्त्रिंशत्वं जहीहि, व्यसनविमुखतामेहि, नीतिं विधेहि,
श्रेयश्चेदस्ति पूतं परमसुखमयं लब्धुमिच्छास्तदोषम् ॥ ४०२ ॥
तारुण्योद्रेकरम्यां दृढकठिणकुचां पद्मपत्रायताक्षीं
स्थूलोपस्थां परस्त्रीं किमिति शशिमुखीं वीक्ष्य खेदं प्रयासि ।
त्यक्त्वा सर्वान्यकृत्यं कुरु सुकृतमहो कान्तमूर्त्यङ्गनानां
वाञ्छा चेत्ते हतात्मन्न हि सुकृतमृते वाञ्छितावाप्तिरस्ति ॥४०३॥

लक्ष्मीं प्राप्याप्यनर्घ्यामखिलपरजनप्रीतिपुष्टिप्रदात्रीं
कान्तां कान्ताङ्गयष्टिं विकसितवदनां चिन्तयस्यार्तचित्तः ।
तस्याः पुत्रं पवित्रं प्रथितपृथुगुणं तस्य भार्यां च तस्याः
पुत्रं तस्यापि कान्तामिति विहितमतिः खिद्यते जीवमूढः ॥४०४॥

जन्मक्षेत्रे पवित्रे क्षणरुचिचपले दोषसर्पोरुरन्ध्रे
देहे व्याधादिसिन्धुप्रपतनजलधौ पापपानीयकुम्भे ।
कुर्वाणो बन्धुबुद्धिं विविधमलभृते यासि रे जीव नाशं
संचिन्त्यैवं शरीरे कुरु हत ममतो धर्मकर्माणि नित्यम् ॥ ४०५ ॥

यद्वच्चित्तं करोषि स्मरशरनिहतः कामिनीसङ्गसौख्ये
तद्वत्त्वं चेज्जिनेन्द्रप्रणिगदितमते मुक्तिमार्गे विदध्याः ।
किं किं सौख्यं न यासि प्रगतनवजरामृत्युदुःखप्रपञ्चं
संचिन्त्यैवं विधिस्त्वं स्थिरपरमधिया तत्र चित्त स्थिरत्वम्॥४०६॥

सद्यः पातालमेति प्रविशति जलधिं गाहते देवगर्भं
भुङ्क्ते भोगान्नराणाममरयुवतिभिः संगमं याचते च ।
वाञ्छत्यैश्वर्यमार्यं रिपुसमितिं हतेः कीर्तिकान्तां ततश्च
धृत्वा त्वं जीव चित्तं स्थिरमतिचपलं स्वस्य कृत्यं कुरुष्व ॥४०७॥

नो शक्यं यन्निषेद्धुं त्रिभुवनभवनप्राङ्गणे वर्तमानं
सर्वे नश्यन्ति दोषा भवभयजनका रोधतो यस्य पुंसाम् ।
जीवाजीवादितत्त्वप्रकटननिपुणे जैनवाक्ये निवेश्य
तत्त्वे चेतो विदध्याः स्ववशसुखप्रदं स्वं तदा त्वं प्रयासि॥४०८॥

मित्रत्वं याति शत्रुः कथमपि सुकृतां नापहर्तुं समर्थो
जन्मन्येकत्र दुःखं जनयति भविनां शक्यते चापघातम् ।
नैवं भोगोऽथ वैरी मृतजननजरादुःखतो जीव शश्व-
त्तस्मादेनं निहत्य प्रशमशितशरैर्मुक्तिभोगं भज त्वम् ॥ ४०९ ॥

रे जीव त्वं विमुञ्च क्षणरुचिचपलानिन्द्रियार्थोपभोगा-
नेभिर्दुःखं न नीतः किमिह भववनेऽत्यन्तरौद्रे हतात्मन् ।

तृष्णां चेत्तेन तेभ्यो विरमति विमतेऽद्यापि पामात्मकेभ्यः
संसारात्यन्तदुःखान्कथमपि न तदा मुञ्च मुक्तिं प्रयासि ॥ ४१० ॥
मत्तस्त्रीनेत्रलोलाद्विरमति च सुखाद्योषितानन्तदुःखा-
त्प्राज्ञोप्रेक्षातितिक्षामतिधृतिकरुणामित्रताश्रीगृहांश्च ।
एतांस्तारुण्यरम्या नहि तरलदृशो मोदयित्वा तरुण्यो
दुःखात्पातुं समर्था नरकगतिमितानङ्गिनो जीव जातु ॥ ४११ ॥
दृष्ट्वा लक्ष्मीं परेषां किमिति हतमते खेदमन्तःकरोषि
नैषा नैतेन च त्वं कतिपयदिवसैर्गत्वरं येन सर्वम् ।
तत्त्वं धर्मं विधेहि स्थिरविशदधिया जीव मुक्त्वान्यवाञ्छां
येन प्रध्वस्तबाधां विततसुखमयीं मुक्तिलक्ष्मीमुपैषि ॥ ४१२ ॥
भोगा नश्यन्ति कालात्स्वयमपि न गुणो जायते तत्र कोऽपि
तज्जीवैतान्विमुञ्च व्यसनभयकरानात्मना धर्मबुद्ध्या ।
स्वातन्त्र्याद्येन याता विदधति मनसस्तापमत्यन्तमुग्रं
तन्वन्त्येते नु मुक्ताः स्वयमसमसुखं स्वात्मजं नित्यमर्च्यम् ॥ ४१३ ॥
धर्मे चित्तं निधेहि, श्रुतकथितविधिं जीव भक्त्या विधेहि,
सम्यक्स्वान्तं पुनीहि, व्यसनकुसुमिनं कामवृक्षं लुनीहि, ।
पापे बुद्धिं धुनीहि, प्रशमयमदमाञ्शिशाधि, पिण्ढि प्रमादं,
छिन्धि क्रोधं, विभिन्धि प्रचुरमदगिरिस्तेऽस्ति चेन्मुक्तिवाञ्छा ४१४
बाधा व्याधा च कर्माणि विपुलभववने भ्राम्यता संचितानि
दग्ध्वा कर्मेन्धनानि ज्वलितशिखिवदत्यन्तदुःखप्रदानि ।
यद्वत्ते नित्यसौख्यं व्यपगतविपदं जीवमोक्षं समीक्ष्य
बाह्यान्तर्ग्रन्थमुक्तः तपसि जिनमते तत्र तोषं कुरुष्व ॥ ४१५ ॥
एको मे शाश्वतात्मा सुखमसुखभुजो ज्ञानदृष्टिस्वभावो
नान्यत्किंचिन्निजं मे तनुधनकरणभ्रातृभार्यासुखादि ।
कर्मोद्भूतं समस्तं चपलमसुखदं तत्र मोहो मुधा मे
पर्यालोच्येति जीव स्वहितमवितथं मुक्तिमार्गं श्रय त्वम् ॥ ४१६ ॥

ये बुध्यन्तेऽत्र तत्वं न प्रकृतिचपलं तेऽपि शक्ता निरोद्धुं
प्रोद्यत्कल्पान्तवातक्षुभितजलनिधिस्फीतवीचिस्पदो वा ।
प्रागेवान्ये मनुष्यास्तरलतरमनोवृत्तयो दृष्टनष्टा-
स्तच्चेतश्च दृगेतत्स्थिरपरमसुखं त्वं तदा किं न यासि ॥ ४१७ ॥

रे पापिष्ठातिदुष्टव्यसनगतमते निन्द्यकर्मप्रशक्त
न्यायान्यायानभिज्ञ प्रतिहतकरुण व्यस्तसन्मार्गबुद्धे ।
किं किं दुःखं न यातो विनयवशगतो येन जीवो विषह्य
त्वं तेनेनोऽतिवर्त्य प्रसभमिह मनो जैनतत्त्वे निधेहि ॥ ४१८ ॥

लज्जादीनात्मशत्रो कुमतगनमते त्यक्ततत्वप्रणीते
स्विष्टानुष्ठाननिष्टस्थिरमदनरते मुक्तिमार्गप्रवृत्ते ।
संसारे दुःखमुग्रं सुखरहितगताविन्द्रियैः प्रापितो यै-
स्तेषामद्यापि जीव व्रजसि गतघृण ध्वस्तबुद्धे वशित्वम् ॥ ४१९ ॥

सर्पव्याघ्रेभवैरिज्वलनविषयमग्राहशत्रुगृहाद्या-
न्हित्वा दुष्टस्वरूपान्ददति तनुभृतां ये व्यथां सर्वतोऽपि ।
तान्कोपादीन्निकृष्टाननिविषमरिपून्निर्जय त्वं प्रवीणा-
न्रे रे जीव प्रलीनप्रशमगतिमते दम्भभग्नस्वशत्रो ॥ ४२० ॥

मैत्री सत्त्वेषु मोदं गुणवति करुणं क्लिशिते देहभाजि
मध्यस्थत्वं प्रतीपे जिनवचसि रतिं निग्रहं क्रोधयोधे ।
अक्षार्थेभ्यो निवृत्तिं मृतिजननभवाद्भीतिमत्यन्तदुःखा-
द्रे जीव त्वं विधत्स्व च्युतनिखिलमले मोक्षसौख्येऽभिलाषम् ४२१

कर्मानिष्टं विधत्ते भवति परवशो लज्जते नो जनानां
धर्माधर्मौ न वेत्ति त्यजति गुरुकुलं सेवते नीचलोकम् ।
भूत्वा प्राज्ञः कुलीनः प्रथितपृथुगुणो माननीयो बुधोऽपि
ग्रस्तो येनात्र देहीनुदमदनरिपुं जीव तं दुःखदक्षम् ॥ ४२२ ॥

रागोन्मुक्तोऽपि देवोत्तरतदितरजग्रन्थशक्तोऽपि साधु-
जीवध्वंसोऽपि धर्मस्तनुविभवसुखं स्थाप्णु मे सर्वदेति ।

संसारापातहेतुं मतिगतिदुरतं कार्यते येन जीव-
स्तं मोहं मर्दय त्वं यदि सुखमतुलं वाञ्छसि त्यक्तबाधम्॥४२३॥
तीव्रत्रासप्रदायिप्रभवमृतिजराश्वापदव्राजपाते
दुःखोर्वीजप्रपञ्चे भवगहनवनेऽनेकयोऽन्यद्विरौद्रे।
भ्राम्यन्न प्रापि नृत्वं कथमपि शमतः कर्मणो दुष्कृतस्य
नो चेद्धर्मं करोषि स्थिरपरमधिया वञ्चितस्त्वं तदात्मन्॥ ४२४॥
ज्ञानं तेऽघप्रबोधो जिनवचनरुचिर्दर्शनं धूतदोषं
चारित्रं पापमुक्तं त्रयमिदमुदितं मुक्तिहेतुं प्रधत्स्व।
मुक्त्वा संसारहेतुस्त्रितयमपि परं निन्द्यबोधाद्यवद्यं
रे रे जीवात्मवैरिन्नमितगतिसुखे चेत्तवेच्छास्ति पूते॥ ४२५॥

इति जीवसंबोधननिरूपणम्॥ १६॥

पापं वर्धयते, चिनोति कुमतिं, कीर्त्यङ्गनां नश्यति,
धर्मं ध्वंसयति, तनोति विपदं, संपत्तिमुन्मर्दति,।
नीतिं हन्ति, विनीतिमत्र कुरुते, कोपं धुनीते समं,
किंवा दुर्जनसंगतिर्न कुरुते लोकद्वयध्वंसिनी॥ ४२६॥
न व्याघ्रः क्षुधयातुरोऽपि कुपितो, नाशीविषः पन्नगो,
नारातिर्बलसत्वबुद्धिकलितो मत्तः करीन्द्रो न च।
तं शक्नोति न कर्तुमत्र नृपतिः कण्ठीरवो नोद्धुरो
दोषं दुर्जनसङ्गतिर्वितनुते यं देहिनां निन्दिता॥ ४२७॥
व्याधव्यालभुजङ्गसंगभयकृत्कक्षं वरं सेवितं
कल्पान्तोद्गतभीमवीचिनिचितो वार्द्धिर्वरं गाहितः।
विश्वप्लोषकरोद्धतोज्ज्वलशिखो वह्निर्वरं चाश्रित-
स्त्रैलोक्योदरवर्तिदोषजनकेनासाधुमध्ये स्थितम्॥ ४२८॥
वाक्यं जल्पति कोमलं सुखकरं कृत्यं करोत्यन्यथा
वक्रत्वं न जहातु जातु मनसा सर्पो यथा दुष्टधीः।
नो भूतिं सहते परस्य न गुणं जानाति कोपाकुलो
यस्तं लोकविनिन्दितं खलजनं कः सत्तमः सेवते॥ ४२९॥

नीचोच्चादिविवेकनाशकुशलो बाधाकरो देहिना-
माशाभोगनिरासनो मलिनताच्छन्नात्मनां वल्लभः ।
सद्दृष्टिप्रसरावरोधनपटुर्मित्रप्रतापाहतः
कृत्याकृत्यविदा प्रदोषसदृशो वर्ज्यः सदा दुर्जनः ॥ ४३० ॥

ध्वान्तध्वंसपरः कलङ्किततनुर्वृद्धिक्षयोत्पादकः
पद्माशी कुमुदप्रकाशनिपुणो दोषाकरो यो जडः ।
कामोद्वेगरसः समस्तभविनां लोके निशानाथव-
त्कस्तं नाम जनो महासुखकरं जानाति नो दुर्जनम् ॥४३१॥

दुष्टो यो विदधाति दुःखमपरं पश्यत्सुखेनान्वितं
दृष्ट्वा तस्य विभूतिमस्तधिषणो हेतुं विना कुप्यति ।
वाक्यं जल्पति किंचिदाकुलमना दुःखावहं यन्नृणां
तस्माद्दुर्जनतो विशुद्धमतयः काण्ड्याद्यथा बिभ्यति ॥ ४३२ ॥

यस्त्यक्त्वा गुणसंहतिं वितनुते गृह्णाति दोषान्परे
दोषानेव करोति जातु न गुणं त्रेधाप्ययं दुष्टधीः ।
युक्तायुक्तविचारणाविरहितो विध्वस्तधर्मक्रियो
लोकानन्दिगुणोऽपि कोऽपि न खलं शक्नोति संबोधितुम्४३३

दोषेषु स्वयमेव दुष्टधिषणो यो वर्तमानः सदा
तत्रान्यानपि मन्यते स्थितिवतस्त्रैलोक्यवर्त्यङ्गिनाम् ।
कृत्यं निन्दितमातनोति वचनं यो दुःश्रवं जल्पति
चापारोपितमार्गणादिव खलात्सन्तस्ततो बिभ्यति ॥ ४३४ ॥

योऽन्येषां भषणोद्यतः श्वशिशुवच्छिद्रेक्षणः सर्पव-
दग्राह्यः परमाणुवन्मुरजवद्वक्त्रद्वयेनान्वितः ।
नानारूपसमन्वितः शरदवद्वक्रो भुजङ्गेशव-
त्कस्यासौ न करोति दोषनिलयश्चित्तव्यथां दुर्जनः ॥ ४३५ ॥

गाढं श्लिष्यति दूरतोऽपि कुरुतेऽभ्युत्थानमार्द्रेक्षणो
दत्तेऽर्धासनमातनोति मधुरं वाक्यं प्रसन्नाननः ।

चिन्तान्तर्गतवञ्चनो विनयवान्मिथ्यावधिर्दुष्टधी-
यो दुःखामृतभर्मणा विषमयो मन्ये कृतो दुर्जनः ॥ ४३६ ॥

यद्वच्चन्दनसंभवोऽपि दहनो दाहात्मकः सर्वदा
संपन्नोऽपि समुद्रवारिणि यथा प्राणान्तको डुण्डुभिः ।
दिव्याहारसमुद्भवोऽपि भवति व्याधिर्यथा बाधक-
स्तद्वद्दुःखकरः खलस्तनुमतां जातः कुलेऽप्युत्तमे ॥ ४३७ ॥

लब्धं जन्म यतो यतः पृथुगुणा जीवन्ति यत्राश्रिता
ये तत्रापि जने वने फलवति प्लोषं पुलिन्दा इव ।
निस्त्रिंशा वितरन्ति धूतमतयः शश्वत्खलाः पापिन-
स्ते मुञ्चन्ति कथं विचाररहिता जीवन्तमन्यं जनम् ॥ ४३८ ॥

यत्साधूदितमन्त्रगोचरमतिक्रान्तो द्विजिह्वाननः
क्रुद्धो रक्तविलोचनोऽसिततमो मुञ्चत्यवाच्याविषम् ।
रौद्रो दृष्टिविषो विभीषितजनो रन्ध्रावलोकोदितः
कस्तं दुर्जनपन्नगं कुटिलगं शक्नोति कर्तुं वशम् ॥ ४३९ ॥

नो निर्धूतविषं पिबन्नपि पयः संपद्यते पन्नगो
निम्बाङ्घ्रिः कटुतां पयोमधुघटैः सिक्तोऽपि नो मुञ्चति ।
नोशीरैरपि सर्वदा विलसितं धान्यं ददात्यूषरं
नैवं मुञ्चति वक्रतां खलजनः संसेवितोऽप्युत्तमैः ॥ ४४० ॥

वैरं यः कुरुते निमित्तरहितो मिथ्यावचो भाषते
नीचोक्तं वचनं शृणोति सहते स्तौति स्वमन्यं जनम् ।
नित्यं निन्दति गर्वितोऽभिभवति स्पर्धां तनोत्यूर्जिता-
मेवं दुर्जनमस्तशुद्धधिषणं सन्तो वदन्त्यङ्गिनाम् ॥ ४४१ ॥

भानोः शीतमतिग्मगोरहितता शृङ्गात्पयोऽधेनुतः
पीयूषं विषतोऽमृताद्विषलता शुक्लत्वमङ्गारतः ।
वह्नेर्वारि ततोऽनिलः सुरसजं निम्बाद्धवेज्जातुचि-
न्नो वाक्यं महितं सतां हतमतेरुत्पद्यते दुर्जनात् ॥ ४४२ ॥

सत्या (?) यो निरुजं वदन्ति यमनो दम्भं शुचेर्धूर्ततां
लज्जालोर्जडतां पटोर्मुखरतां तेजस्विनो गर्वताम् ।
शान्तस्याक्षमताम्जोरमतितां धर्मार्थिनो मूर्खता-
मित्येवं गुणिनां गुणास्त्रिभुवने ना दूषितो दुर्जनैः ॥ ४४३ ॥
प्रत्युत्थाति समेति नौति नमति प्रह्लादते सेवते
भुङ्क्ते भोजयते धिनोति वचनैर्गृह्णाति दत्ते पुनः ।
अङ्गं श्लिष्यति संतनोति वदनं विस्फारितार्द्रेक्षणं
चित्तारोपितवक्रिमोऽनुकुरुते कृत्यं यदिष्टं खलः ॥ ४४४ ॥
सर्वोद्वेगविचक्षणाः प्रचुररुग्दुःखनवाच्यं विषं
प्राणाकर्षपदोपदेशकुटिलस्वान्तो द्विजिह्वान्वितः ।
भीमभ्रान्तविलोचनोऽसमगतिः शश्वद्दयावर्जित-
श्छिद्रान्वेषणतत्परो भुजगवद्वर्ज्यो बुधैर्दुर्जनः ॥ ४४५ ॥
धर्माधर्मविचारणाविरहिताः सन्मार्गविद्वेषिणो
निन्द्याचारविधौ समुद्यतधियः स्वार्थैकनिष्ठापराः ।
दुःखोत्पादकवाक्यभाषणरताः सर्वाप्रशंसाकरा
द्रष्टव्या अपरिग्रहव्रतिसमा विद्वज्जनैर्दुर्जनाः ॥ ४४६ ॥
मानं मार्दवतः क्रुधं प्रशमतो लोभं तु संतोषतो
मायामार्जवतोजनीमवमतेर्जिह्वाजयान्मन्मथम् ।
ध्वान्तं भास्करतोऽनलं सलिलतो मन्त्रात्समीराशनं
नेतुं शान्तिमलं कुतोऽपि न खलं मर्त्यो निमित्ताद्भुवि ॥ ४४७ ॥
वीक्ष्यात्मीयगुणैर्मृणालधवलैर्यद्वर्धमानं जनं
राहुर्वा सितदीधितिं सुखकरैरानन्दयन्तं जगत् ।
नो नीचः सहते निमित्तरहितो न्यक्कारबद्धः स्पृहः
किंचिन्मात्र तदद्भुतं खलजने येम वृकेव स्थितिः ॥ ४४८ ॥
त्यक्त्वा मौक्तिकसंहतिं करटिनो गृह्णन्ति काकाः पलं
त्यक्त्वा चन्दनमाश्रयन्ति कुपितेभ्योऽतिक्षयं मक्षिकाः ।

---

१. इवार्थे वाशब्दः.

हित्वान्नं विविधं मनोहररसं श्वानो मलं भुञ्जते
यद्वद्गृह्णाति गुणं विहाय सततं दोषं तथा दुर्जनाः ॥ ४४९ ॥

इति दुर्जननिरूपणम् ॥ १७ ॥

ये जल्पन्ति व्यसनविमुखां भारतीमस्तदोषां
ये श्रीनीतिद्युतिमतिधृतिप्रीतिशान्तीर्ददन्ते ।
येभ्यः कीर्तिर्विगलितमला जायते जन्मभाजां
शश्वत्सन्तः कलिलहतये ते नरेणात्र सेव्याः ॥ ४५० ॥

नैतच्छ्यामा चकितहरिणीलोचना कीरनाशा
मृद्वालापा कमलवदना पक्वबिम्बाधरोष्ठी ।
मध्ये क्षामा विपुलजघना कामिनी कान्तरूपा
यन्निर्दोषं वितरति सुखं संगतिः सज्जनानाम् ॥ ४५१ ॥

यो नाक्षिप्य प्रवदति कथां नाभ्यसूयां विधत्ते
न स्तौति स्वं हसति न परं वक्ति नान्यस्य मर्म ।
हन्ति क्रोधं स्थिरयति शमं प्रीतितो न व्ययीनि
सन्तः सन्तं व्यपगतमदं तं सदा वर्णयन्ति ॥ ४५२ ॥

धृत्वा धृत्वा ददति तरवः सप्रणामं फलानि
प्राप्तं प्राप्तं भुवनभृतये वारि वार्दाः क्षिपन्ति ।
हत्वा हत्वा वितरति हरिर्दन्तिनः सश्रृतेभ्यो
भो साधूनां भवति भवने कोऽप्यपूर्वोऽत्र पन्थाः ॥ ४५३ ॥

वार्धेश्चन्द्रः किमिह कुरुते नाकिमार्गस्थितोऽपि
वृद्धौ वृद्धिं श्रयति यदयं तस्य हानौ च हानिम् ।
अज्ञातो वा भवति महतः कोऽप्यपूर्वस्वभावो
देहेनापि व्रजति तनुतां येन दृष्ट्वान्यदुःखम् ॥ ४५४ ॥

सत्यां वाचं वदति कुरुते नात्मशंसान्यनिन्दे
नो मात्सर्यं श्रयति तनुते तापकारं परेषाम् ।
नो शप्तोऽपि व्रजति विकृतिं नैति मन्युं कदाचि-
त्केनाप्येतन्निगदितमहो चेष्टितं सज्जनस्य ॥ ४५५ ॥

नश्यत्तन्द्रो भुवनभवतोऽद्भूततत्त्वप्रदर्शी
सम्यङ्मार्गप्रकटनपरो ध्वस्तदोषाकरश्रीः ।
पुष्यत्पद्मो गलिततिमिरो दत्तमित्रप्रतापो
राजत्तेजा दिवससदृशः सज्जनो भाति लोके ॥ ४५६ ॥

ये कारुण्यं विदधति जने सापकारेऽनपेक्षा
मान्याचारा जगति विरला मण्डनं ते धरित्र्याः ।
ये कुर्वन्ति ध्रुवमुपकृतिं स्वस्वकृत्यप्रसिद्धौ
मर्त्याः सन्ति प्रतिग्रहममी काश्यपीभारभूताः ॥ ४५७ ॥

सम्यग्धर्मव्यवसितपरः पापविध्वंसदक्षो
मित्रामित्रस्थिरसममनाः सौख्यदुःखैकचेताः ।
ज्ञानाभ्यासात्प्रशमितमदक्रोधलोभप्रपञ्चः
सद्वृत्ताढ्यो मुनिरिव जनो सज्जनो राजतेऽत्र ॥ ४५८ ॥

यः प्रोत्तुङ्गः परमगरिमास्थैर्यवान्वा नगेन्द्रः
पद्मानन्दी विहितजडिमो भानुवद्धूतदोषः ।
शीतः सोमोऽमृतमयवपुश्चन्द्रवद्ध्वान्तघाती
पूज्याचारो जगति सुजनो भात्यसौ ख्यातकीर्तिः ॥ ४५९ ॥

तृष्णां चित्ते शमयति मदं ज्ञानमाविष्करोति
नीतिं सूते हरति विपदं संपदं संचिनोति ।
पुंसां लोकद्वितयशुभदा संगतिः सज्जनानां
किं वा कुर्यान्न फलममलं दुःखनिर्नाशदक्षाः ॥ ४६० ॥

चित्ताह्लादिव्यसनविमुखः शोकतापापनोदि
प्रज्ञोत्पादि श्रवणसुभगं न्यायमार्गानुयायि ।
तथ्यं पथ्यं व्यपगतमलं सार्थकं मुक्तबाधं
यो निर्दोषं रचयति वचस्तं बुधाः सन्तमाहुः ॥ ४६१ ॥

कोपो विद्युत्स्फुरति तरलो ग्रावरेखेव मैत्री
मेरुस्थैर्यं चरतमचलः सर्वजन्तूपचारः ।

बुद्धिर्धर्मग्रहणचतुरा वाक्यमस्तोपमानं
    किं पर्याप्तं न सुजनगुणैरेभिरेवात्र लोके ॥ ४६२ ॥

जातु स्थैर्याद्विचलयति गिरिः शीततां याति वह्नि-
    र्यादोनाथः स्थितिविरहितो मारुतः स्तम्भमेति ।
तीव्रश्चन्द्रो भवति दिनपो जायते चाप्रतापः
    कल्पान्तेऽपि व्रजति विकृतिं सज्जनो न स्वभावात् ॥ ४६३ ॥

वृत्तत्यागं विदधति न ये नान्यदोषं वहन्ते
    नो याचन्ते सुहृदमधनं नाशतो नापि दीनम् ।
नो सेवन्ते विगतचरितं कुर्वते नाभिभूतं
    नो लङ्घन्ते क्रममलिनं सज्जनास्ते भवन्ति ॥ ४६४ ॥

मातृस्वामिस्वजनजनकभ्रातृभार्याजनाद्या
    दातुं शक्तास्तदिह न फलं सज्जना यद्ददन्ते ।
काचित्तेषां वचनरचना येन सा ध्वस्तदोषा
    यां शृण्वन्तः शमितकलुषा निर्वृतिं यान्ति सत्त्वाः ॥ ४६५ ॥

नित्यच्छायाफलभरनताः प्रीणितप्राणिसार्थाः
    क्षिप्त्वा प्रेक्षामुपकृतिकृतो दत्तसत्त्वावकाशाः ।
शश्वत्तुङ्गा विपुलसुमनोभ्राजिनो लङ्घनीयाः
    प्रीतिमन्तः स्थिरतरधियो वृक्षवद्वर्धयन्ति ॥ ४६६ ॥

मुक्त्वा सार्थं सकृपहृदयाः कुर्वते ये परार्थं
    ये निर्व्याजां विजितकलुषां तन्वते धर्मबुद्धिम् ।
ये निर्गर्वा विदधति हितं गृह्णते नापवादं
    ते पुंनागा जगति विरलाः पुण्यवन्तो भवन्ति ॥ ४६७ ॥

हन्ति ध्वान्तं हरयति रजः सत्त्वमाविष्करोति
    प्रज्ञां सूते वितरति सुखं न्यायवृत्तिं तनोति ।
धर्मे बुद्धिं रचयतितरां पापबुद्धिं धुनीते
    पुंसां नो वा किमिह कुरुते संगतिः सज्जनानाम् ॥ ४६८ ॥

अस्यत्युच्चैः शकलितवपुश्चन्दनो नात्मगन्धं
नेक्षुर्यन्त्रैरपि मधुरतां पीड्यमानो जहाति ।
यद्वत्स्वर्णं न चलति हितं छिन्नघृष्टोपतप्तं
तद्वत्साधुः कुजननिहतोऽप्यन्यथात्वं न याति ॥ ४६९ ॥

यद्वद्भानुर्वितरति करैर्मोदमम्भोरुहाणां
शीतज्योतिः सरिदधिपतिं लब्धवृद्धिं विधत्ते ।
वार्दो लोकानुदकविसरैस्तर्पयत्यस्तहेतु-
स्तद्वद्दोषं रचयति गुणैः सज्जनः प्राणभाजाम् ॥ ४७० ॥

देवा धौतक्रमसरसिजाः सौख्यदाः सर्वलोके
पृथ्वीपालाः प्रददति धनं कालतः सेव्यमानाः ।
कीर्तिः प्रीतिप्रशमपटुता पूज्यता तत्त्वबोधा
संपद्यन्ते झटिति कृतिनश्चैव पुंसः श्रितस्य ॥ ४७१ ॥

यद्वद्वाचः प्रकृतिसुभगाः सज्जनानां प्रसूताः
शोकक्रोधप्रभृतिजवपुस्तापविध्वंसदक्षाः ।
पुंसां सौख्यं विदधतितरां शीतलाः सर्वकालं
तद्वच्छीतद्युतिरुचिलवानमृतस्यन्दिनोऽपि ॥ ४७२ ॥

आक्रुष्टोऽपि व्रजति न रुषं भाषते नापभाष्यं
नो कुष्टोऽपि प्रवहति मदं शौर्यधैर्यादिधर्मैः ।
यो यातोऽपि व्यसनमनिशं कातरत्वं न याति
सन्तः प्राहुस्तमिह सुजनं तत्त्वबुद्ध्या विवेच्य ॥ ४७३ ॥

इति सज्जननिरूपणम् ॥ १८ ॥

तुष्टिश्रद्धाविनयभजना लुब्धता क्षान्तिसत्त्व-
प्राणत्राणव्यवसितगुणज्ञानकालज्ञताढ्यः ।
दानाशक्तिर्जननमृतिभिश्चास्तिको मत्सरेर्ष्यो
दक्षात्मा यो भवति स नरो दातृमुख्यो जिनोक्तः ॥ ४७४ ॥

---

१. मेघः.

कालेऽन्नस्य क्षुधमवहितो दित्समानो विधृत्य
नो भोक्तव्यं प्रथममतिथेर्यः सदा तिष्ठतीति।
तस्याप्राप्तावपि गतमलं पुण्यराशिं श्रयन्तं
तं दातारं जिनपतिमते मुख्यमाहुर्जिनेन्द्राः॥ ४७५॥

सर्वाभीष्टा बुधजननुता धर्मकामार्थमोक्षाः
सत्सौख्यानां वितरणपरा दुःखविध्वंसदक्षाः।
लब्धुं शक्या जगति नयतो जीवितव्यं विनैव
तद्दानेन ध्रुवमसुभृतां किं न दत्तं ततोऽत्र॥ ४७६॥

कृत्याकृत्ये कलयति यतः कामकोपौ लुनीते
धर्मे श्रद्धां रचयति परां पापबुद्धिं धुनीते।
अक्षार्थेभ्यो विरमति रजो हन्ति चित्तं पुनीते
तद्दातव्यं भवति विदुषा शास्त्रमत्र व्रतिभ्यः॥ ४७७॥

भार्याभ्रातृस्वजनतनयान्यन्निमित्तं त्यजन्ति
प्रज्ञासत्त्वव्रतसमितयो यद्विना यान्ति नाशम्।
क्षुद्दुःखेन ग्लपितवपुषो भुञ्जते च त्वभक्ष्यं
तद्दातव्यं भवति विदुषा संयतायान्नशुद्धम्॥ ४७८॥

सम्यग्विद्याशमदमतपोध्यानमौनव्रताढ्यं
श्रेयोहेतुर्गतरुजि तनौ जायते येन सर्वम्।
तत्साधूनां व्यथितवपुषां तीव्ररोगप्रपञ्चै-
स्तद्रक्षार्थं वितरत जनाः प्राशुकान्यौषधानि॥ ४७९॥

सावद्यत्वान्महदपि फलं नो विधातुं समर्थं
कन्यास्वर्णद्विपहयधरागोमहिष्यादिदानम्।
त्यक्त्वा दद्याज्जिनमतदयाभेषजाहारदानं
भूत्वाप्यल्पं विपुलफलदं दोषमुक्तं वियुक्तम्॥ ४८०॥

नीतिश्रीतिश्रुतिमतिधृतिज्योतिभक्तिप्रतीति-
प्रीतिज्ञातिस्मृतिरतियतिख्यातिशक्तिप्रगीतिः।

यस्माद्देही जगति लभते नो विना भोजनेन
तस्माद्दानं स्युरिह ददता ताः समस्ताः प्रशस्ताः ॥ ४८१ ॥
दर्पोद्रेकव्यसनमथनक्रोधयुद्धप्रबाधा-
पापारम्भक्षितिहतधियां जायते यन्निमित्तम् ।
यत्संगृह्य श्रयति विषयान्दुःखितं यत्स्वयं स्या-
द्यद्दुःखाद्यं प्रभवति न तच्छ्लाघ्यतेऽत्र प्रदेयम् ॥ ४८२ ॥
साधू रत्नत्रितयनिरतो जायते निर्जिताक्षो
धर्मं दत्ते व्यपगतमलं सर्वकल्याणमूलम् ।
रागद्वेषप्रभृति मथनं यद्गृहीत्वा विधत्ते
तद्दातव्यं भवति विदुषा देयमिष्टं तदेव ॥ ४८३ ॥
धर्मध्यानव्रतसमितिभृत्संयतश्चारु पात्रं
व्यावृत्तात्मात्र सहननतः श्रावको मध्यमं तु ।
सम्यग्दृष्टिर्व्रतविरहितः श्रावकः स्याज्जघन्य-
मेव त्रेधा जिनपतिमते पात्रमाहुः श्रुतज्ञाः ॥ ४८४ ॥
यो जीवानां जनकसदृशः सत्यवाग्दत्तभोजी
सप्रेमस्त्रीनयनविशिखाभिन्नचित्तः स्थिरात्मा ।
द्वेधा ग्रन्थादुपरममनाः सर्वथा निर्जिताक्षो
दातुं पात्रं व्रतपतिममुं वर्यमाहुर्जिनेन्द्राः ॥ ४८५ ॥
यद्वत्तोयं निपतति घनादेकरूपं रसेन
प्राप्याधारं सगुणमगुणं याति नानाविधत्वम् ।
तद्वद्दानं सफलमफलं प्राप्यमप्येति मत्वा
देयं दानं समयमभृतां संयतानां यतीनाम् ॥ ४८६ ॥
यद्वत्क्षिप्तं गलति सकलं छिद्रयुक्ते घटेऽम्भ-
स्तिक्तालाबूनिहितमहितं जायते दुग्धमद्यम् ।
आमामत्रे रचयति भिदां तस्य नाशं च याति
तद्वद्दत्तं विगततपसे केवलं ध्वंसमेति ॥ ४८७ ॥

शश्वच्छीलव्रतविरहिताः क्रोधलोभादिवन्तो
नानारम्भप्रहितमनसो ये मदग्रन्थशक्ताः ।
ते दातारं कथमसुखतो रक्षितुं सन्ति शक्ता
नावा लोहं न हि जलनिधेस्तार्यते लोहमय्या ॥ ४८८ ॥

क्षेत्रद्रव्यप्रभृतिसमयान्वीक्ष्य बीजं यथोप्तं
दत्ते सस्यं विपुलममलं चारुसंस्कारयोगात् ।
दत्तं पात्रे गुणवति तथा दानमुक्तं फलाय
सामग्रीतो भवति हि जने सर्वकार्यप्रसिद्धिः ॥ ४८९ ॥

नानादुःखव्यसननिपुणान्नाशिनोऽतृप्तिहेतू-
न्कर्मारातिप्रचयनपरांस्तत्त्वतो वेत्त्यभोगान् ।
मुक्त्वाकाङ्क्षां विषयविषयां कर्मनिर्नाशनेच्छो
दद्याद्दानं प्रगुणमनसा संयतायापि विद्वान् ॥ ४९० ॥

यस्मै गत्वा विषयमपरं दीयते पुण्यवद्भिः
पात्रे तस्मिन्गृहमुपगते संयमाधारभूते ।
नो यो मूढो वितरति धने विद्यमानेऽप्यनल्पे
तेनात्मात्र स्वयमपधिया वञ्चितो मानवेन ॥ ४९१ ॥

श्रुत्वा दानं कथितमपरैर्दीयमानं परेण
श्रद्धां धत्ते भजति च परां तुष्टिमुत्कृष्टबुद्धिः ।
दृष्ट्वा दानं जनयति मुदं मध्यमो दीयमानं
दृष्ट्वा श्रुत्वा भजति मनुजो नानुरागं जघन्यः ॥ ४९२ ॥

दीर्घायुष्कः शशिसितयशो व्याप्तदिक्चक्रवालः
सद्विद्याश्रीकुलबलधनप्रीतिकीर्तिप्रतापः ।
शूरो धीरः स्थिरतरमना निर्भयश्चारुरूप-
स्त्यागी भोगी भवति भविनां देहभीतिप्रदायी ॥ ४९३ ॥

कर्मारण्यं दहति शिखिवन्मातृवत्पाति दुःखा-
त्सम्यक्प्रीतिं वदति गुरुवत्स्वामिवद्वृद्धिमर्ति ।

तत्त्वातत्त्वप्रकटनपटुस्पष्टमाप्नोति पूतं
तत्संज्ञानं विगलितमलं ज्ञानदानेन मर्त्यः ॥ ४९४ ॥
दाता भोक्ता बहुधनयुतः सर्वसत्त्वानुकम्पी
सत्सौभाग्यो मधुरवचनः कामरूपातिशायी।
शश्वद्भक्त्या बुधजनशतैः सेवनीयाङ्घ्रियुग्मो
मर्त्यः प्राज्ञो व्यपगतमदो जायतेऽन्नस्य दानात् ॥ ४९५ ॥
रोगैर्वातप्रभृतिजनितैर्वह्निभिर्वाम्बुमग्नः
सर्वाङ्गीणव्यथनपटुभिर्बाधितुं नो स शक्यः।
आजन्मान्तः परमसुखितां जायते चौषधानां
दाता यो निर्भरकुलवपुःस्थानकान्तिप्रतापः ॥ ४९६ ॥
दत्त्वा दानं जिनमतरुचिः कर्मनिर्नाशनाय
भुक्त्वा भोगांस्त्रिदशवसतौ दिव्यनारीसनाथः।
मर्त्यावासे वरकुलवपुर्जैनधर्मं विधाय
हत्वा कर्म स्थिरतररिपुं मुक्तिसौख्यं प्रयाति ॥ ४९७ ॥

इति दाननिरूपणम् ॥ १९ ॥

भवति मद्यवशेन मनोभ्रमो भजति कर्म मनोभ्रमतो यतः।
व्रजति कर्मवशेन च दुर्गतिं त्यजत मद्यमतस्त्रिविधेन भो ॥ ४९८ ॥
हसति नृत्यति गायति वल्गति भ्रमति धावति मूर्छति शोचते।
पतति रोदिति जल्पति गद्गदं धमति धाम्यति मद्यमदातुरः ॥४९९॥
स्वसृसुताजननीरपि मानवो व्रजति सेवितुमस्तगतिर्यतः।
सगुणलोकविनिन्दितमद्यतः किमपरं खलु कष्टतरं ततः ॥ ५०० ॥
गलति वस्त्रमधस्तनमीक्ष्यते सकलमन्यतया श्लथते तनुः।
स्खलति पादयुगं पथि गच्छतः किमु न मद्यवशाच्छ्रूयते जनः ॥५०१॥
असुभृतां वधमाचरति क्षणाद्वदति वाक्यमसत्यमसूनृतम्।
परकलत्रधनान्यपि वाञ्छति न कुरुते किमु मद्यमदाकुलः ॥ ५०२ ॥
व्यसनमेति जनैः परिभूयते गदमुपैति न सत्कृतिमश्नुते।
भजति नीचजनं व्रजति क्लमं किमिह कष्टमियर्ति न मद्यपः ॥ ५०३ ॥

प्रियतमामिव पश्यति मातरं प्रियतमां जननीमिव मन्यते ।
प्रचुरमद्यविमोहितमानसस्तदिह नास्ति न यत्कुरुते जनः ॥ ५०४ ॥
अहह कर्मकरीयति भूपतिं नरपतीयति कर्मकरं नरः ।
जलनिधीयति कूपमपांनिधिं गतजलीयति मद्यमदाकुलः ॥ ५०५ ॥
निपतितो वदते धरणीतलं वमति सर्वजनेन विनिन्द्यते ।
श्वशिशुभिर्वदने परिचुम्बिते बत सुरासुरतस्य च मूत्र्यते ॥ ५०६ ॥
भवति जन्तुगणो मदिरारसे तनु तनुर्विविधो रसकायिकः ।
पिबति....मदिरारसलालसः श्रयति दुःखममुत्र ततो जनः ॥ ५०७ ॥
व्यसनमेति करोति धनक्षयं मदमुपैति न वेत्ति हिताहितम् ।
क्रममतीत्य तनोति विचेष्टितं भजति मद्यवशेन न कां क्रियाम् ५०८
रटति रुष्यति तुष्यति वेपते पतति मुह्यति दीव्यति खिद्यते ।
नमति हन्ति जनं ग्रहिलो यथा यदपि किं च न जल्पति मद्यतः ५०९
व्रततपोयमसंयमनाशिनीं निखिलदोषकरीं मदिरां पिबन् ।
वदत धर्मवचो गतचेतनः किमु परं पुरुषस्य विडम्बनम् ॥ ५१० ॥
श्रयति पापमपाकुरुते वृषं त्यजति सद्गुणमन्यमुपार्जितं ।
व्रजति दुर्गतिमस्यति सद्गतिं किमथवा कुरुते न सुरारतः ॥ ५११ ॥
नरकसंगमनं सुखनाशनं व्रजति यः परिपीय सुधारसम् ।
बत विदार्य मुखं परिपायते प्रचुरदुःखमयो ध्रुवमत्र सः ॥ ५१२ ॥
पिबति यो मदिरामथ लोलुपः श्रयति दुर्गतिदुःखमसौ जनः ।
इति विचिन्त्य महामतयस्त्रिधा परिहरन्ति सदा मदिरारसम् ॥ ५१३ ॥
मननदृष्टिचरित्रतपोगुणं दहति वह्निरिवेन्धनमूर्जितम् ।
यदिह मद्यमपाकृतमुत्तमैर्न परमस्ति ततो दुरितं महत् ॥ ५१४ ॥
त्यजति शौचमियर्ति विनिन्द्यतां श्रयति दोषमपाकुरुते गुणम् ।
भजति गर्वमपास्यति सद्गुणं हृतमना मदिरारसलङ्घिनः ॥ ५१५ ॥
प्रचुरदोषकरीमिह वारुणीं पिबति यः परिगृह्य धनेन ताम् ।
असुहरं विषमुग्रमसौ स्फुटं पिबति मूढमतिर्जननिन्दितम् ॥ ५१६ ॥

तदिय दूषणमङ्गिगणस्य नो विषमरिर्भुजगो धरणीपतिः ।
यदसुखं व्यसनभ्रमकारणं वितनुते मदिरा गुणिनिन्दिता ॥ ५१७ ॥
मतिधृतिद्युतिकीर्तिकृपाङ्गना परिहरन्ति रुषेव जनार्चितम् ।
नरमवेक्ष्य सुराङ्गनयाश्रितं न हि परां सहते वनिताङ्गनाम् ॥ ५१८ ॥
कलहमातनुते मदिरावशस्तमिह येन निरस्यति जीवितम् ।
वृषमपास्यति संचिनुते मलं धनमपैति जनैः परिभूयते ॥ ५१९ ॥
स्वजनमन्यजनीयति मूढधीः परजनं स्वजनीयति मद्यपः ।
किमथवा बहुना कथितेन भो द्वितयलोकविनाशकरी सुधा ॥ ५२० ॥
भवति मद्यवशेन मनोभवः सफलदोषकरोऽत्र शरीरिणः ।
भजति तेन विकारमनेकधा गुणयुतेन सुरा परिवर्ज्यते ॥ ५२१ ॥
प्रचुरदोषकरीं मदिरामिति द्वितयजन्मविबाधविचक्षणम् ।
निखिलतत्त्वविवेचकमानसाः परिहरन्ति सदा गुणिनो जनाः ॥ ५२२ ॥

इति मद्यनिषेधनिरूपणम् ॥ १० ॥

मांसाशनाज्जीववधानुमोदस्ततो भवेत्पापमनन्तमुग्रम् ।
ततो व्रजेद्दुर्गतिमुग्रदोषां मत्वेति मांसं परिवर्जनीयम् ॥ ५२३ ॥
तनूद्भवं मांसमदन्नमेध्यं कृम्यालयं साधुजनप्रनिन्द्यम् ।
निस्त्रिंशचित्तो विनिकृष्टगन्धं शुनीविशेषं लभते कथं न ॥ ५२४ ॥
मांसाशिनो नास्ति दयासुभाजां दयां विना नास्ति जनस्य पुण्यम् ।
पुण्यं विना याति दुरन्तदुःखं संसारकान्तारमलभ्यपारम् ॥ ५२५ ॥
पलादिनो नास्ति जनस्य पापं वाचेति मांसाशिजनप्रभुत्वम् ।
ततो वधास्तित्वमतोघमस्मान्निष्पापवादी नरकं प्रयाति ॥ ५२६ ॥
षट्कोटिशुद्धं पलमश्नतो नो दोषोऽस्ति ये नष्टधियो वदन्ति ।
नरादिमांसं प्रतिषिद्धमेतैः किं किं न पोढास्ति विशुद्धिरत्र ॥ ५२७ ॥
अश्नाति यो मांसमसौ विधत्ते वधानुमोदं त्रसदेहभाजाम् ।
गृह्णाति रेफांसि ततस्तपस्वी तेभ्यो दुरन्तं भवमेति जन्तुः ॥ ५२८ ॥

---

१. स्वादन.

आहारभोजी कुरुते न मोदं नरो वधे स्थावरजङ्गमानाम् ।
तस्यापि तस्माद्दुरितानुषङ्गमित्याह यस्तं प्रतिवच्मि किंचित् ॥ ५२९ ॥
येऽन्नाशिनः स्थावरजन्तुघातान्मांसाशिनो येऽत्र सजीवघातान् ।
दोषस्तयोः स्यात्परमाणुमेर्वोर्यथान्तरं बुद्धिमतेति वेद्यम् ॥ ५३० ॥
अन्नाशने स्यात्परमाणुमात्रः प्रशक्यते शोधयितुं तपोभिः ।
मांसाशने पर्वतराजमात्रो नो शक्यते शोधयितुं महत्वात् ॥ ५३१ ॥
मांसं यथा देहभृतः शरीरं तथान्नमप्यङ्गि शरीरतातः ।
ततस्तयोर्दोषगुणौ समानावेतद्वचो युक्तिविमुक्तमत्र ॥ ५३२ ॥
मांसं शरीरं भवतीह जन्तोर्जन्तोः शरीरं न तु मांसमेव ।
यथा तमालो नियमेन वृक्षो वृक्षस्तमालो न तु सर्वथापि ॥ ५३३ ॥
रसोत्कटत्वेन करोति गृद्धिं मांसं यथान्नं न तथात्र जातु ।
ज्ञात्वेति मांसं परिवर्ज्य साधुराहारमश्नातु विशोध्य पूतम् ॥ ५३४ ॥
करोति मांसं बलमिन्द्रियाणां ततोऽभिवृद्धिं मदनस्य तस्मात् ।
करोत्ययुक्तिं प्रविचिन्त्य बुद्ध्या त्यजन्ति मांसं त्रिविधेन सन्तः॥५३५॥
गृद्धिं विना भक्षयतो न दोषो मांसं नरस्यान्नवदस्तदोषम् ।
एवं वचः केचिदुदाहरन्ति युक्त्या विरुद्धं तदपीह लोके ॥ ५३६ ॥
आहारवर्गे सुलभे विचित्रे विमुक्तपापे भुवि विद्यमाने ।
प्रारम्भदुःखं विविधं प्रपोष्य चेदस्ति गृद्धिर्न किमस्ति मांसम्॥५३७॥
वरं विषं भक्षितमुग्रदोषं यदेकवारं कुरुतेऽसुनाशम् ।
मांसं महादुःखमनेकवारं ददाति जग्धं मनसापि पुंसाम् ॥ ५३८ ॥
अश्नाति यः संस्कुरुते निहन्ति ददाति गृह्णात्यनुमन्यते च ।
एते षडप्यत्र विनिन्दनीया भ्रमन्ति संसारवने निरन्तरम् ॥ ५३९ ॥
चिरायुरारोग्यसरूपकान्तिप्रीतिप्रतापप्रियवादिताद्याः ।
गुणा विनिन्द्यस्य सता नरस्य मांसाशिनः सन्ति परत्र नेमे ॥ ५४० ॥
विद्यादयासंयमसत्यशौचध्यानव्रतज्ञानदमक्षमाद्याः ।
संसारनिस्तारनिमित्तभूताः पलाशिनः सन्ति गुणा न सर्वे ॥ ५४१ ॥

मृगान्वराकांश्चलतोऽपि तूर्णान्निरागसोऽत्यन्तविभीतचित्ताः ।
येऽश्नन्ति मांसानि निहत्य पापास्तेभ्यो निकृष्टा अपरे न सन्ति ५४२
मांसान्यशित्वा विविधानि मर्त्यो यो निर्दयात्मा नरकं प्रयाति ।
निकृत्य शस्त्रेण परैर्निकृष्टैः प्रखाद्यते मांसमसौ स्वकीयम् ॥ ५४३ ॥
निवेद्य सत्वेष्वपदोषभावं येऽश्नन्ति पापाः पिशितानि गृध्राः ।
तैः कारितोऽतीव वधः समस्तस्तेभ्यो बको नास्ति व हिंसको हि ॥५४४॥
शास्त्रेषु येष्वङ्गिवधः प्रवृत्तो बकोक्तशास्त्राणि यथा न तानि ।
प्रमाणमिच्छन्ति विबुद्धतत्त्वाः संसारकान्तारविनिन्दनीयः ॥ ५४५ ॥
यद्रक्तरेतो मलवार्यमङ्गं मांसं तदुद्भूतमनिष्टगन्धम् ।
यद्यश्नुते मेध्यसमं न दोषं तर्हि श्वचण्डालवृका न दुष्टाः ॥ ५४६ ॥
धर्मद्रुमस्यास्तमलस्य मूलं निर्मूलमुन्मूलितमङ्गभाजाम् ।
शिवादिकल्याणफलप्रदस्य मांसाशिना स्यान्न कथं नरेण ॥ ५४७ ॥
दुःखानि यान्यत्र कुयोनिया(जा)नि भवन्ति सर्वाणि नरस्य तानि ।
पलाशनेनेति विचिन्त्य सन्तस्त्यजन्ति मांसं त्रिविधेन नित्यम्॥५४८॥

इति मांसनिषेधनिरूपणम् ॥ २१ ॥

मध्वस्यतः कृपा नास्ति पुण्यं नास्ति कृपां विना ।
विना पुण्यं नरो दुःखी पर्यटेद्भवसागरे ॥ ५४९ ॥
एकैकोऽसंख्यजीवानां घाततो मधुनः कणः ।
निष्पद्यते यतस्तेन मध्वस्यति कथं बुधः ॥ ५५० ॥
ग्रामाणां सप्तको दग्धे यद्भवेत्सर्वथा नृणाम् ।
पापं तदेव निर्दिष्टं भक्षिते मधुनः कणे ॥ ५५१ ॥
एकैकस्य यदादाय पुष्पस्य मधु संचितम् ।
किंचिन्मधुकरीवर्गैस्तदप्यश्नन्ति निर्घृणाः ॥ ५५२ ॥
अनेकजीवघातोत्थं म्लेच्छोच्छिष्टं मलाविलम् ।
मलाक्तपात्रं निक्षिप्तं किं शौचं लिहतो मधु ॥ ५५३ ॥

---

१. सिंहादयः.

वरं हालाहलं पीतं सद्यः प्राणहरं विषम् ।
ना पुनर्भक्षितं शश्वद्दुःखदं मधु देहिनाम् ॥ ५५४ ॥
दुःखानि यानि संसारे विद्यन्तेऽनेकभेदतः ।
सर्वाणि तानि लभ्यन्ते जीवेन मधुभक्षणात् ॥ ५५५ ॥
शमो दमो दया धर्मः संयमः शौचमार्जवम् ।
पुंसस्तस्य न विद्यन्ते यो लेढि मधुलालसः ॥ ५५६ ॥
औषधायापि यो मर्त्यो मध्वस्यति विचेतनः ।
कुयोनौ जायते सोऽपि किं पुनस्तत्र लोलुपः ॥ ५५७ ॥
प्रमादेनापि यत्पीतं भवभ्रमणकारणम् ।
तदश्नाति कथं विद्वान्भीतचित्तो भवान्मधु ॥ ५५८ ॥
एकमप्यत्र यो बिन्दुं भक्षयेन्मधुनो नरः ।
सोऽपि दुःखझषाकीर्णे पतते भवसागरे ॥ ५५९ ॥
ददाति लाति यो भुङ्क्ते निर्दिशत्यनुमन्यते ।
गृह्णाति माक्षिकं पापः षडेते समभागिनः ॥ ५६० ॥
एकत्रापि हते जन्तौ पापं भवति दारुणम् ।
न सूक्ष्मानेकजन्तूनां घातिनो मधुपस्य किम् ॥ ५६१ ॥
योऽश्नाति मधु निस्त्रिंशस्तज्जीवास्तेन मारिताः ।
चेन्नास्ति खादकः कश्चिद्वधकः स्यात्तदा कथम् ॥ ५६२ ॥
एकत्र मधुनो बिन्दौ भक्षितेऽसंख्यदेहिनः ।
यो हि न स्यात्कृपा तस्य तस्मान्मधु न भक्षयेत् ॥ ५६३ ॥
अनेकदोषदुष्टस्य मधुनोपास्तदोषताम् ।
यो ब्रूते तद्रसाशक्तः सोऽसत्यां बुद्धिरस्तधीः ॥ ५६४ ॥
यद्यल्पेऽपि हृते द्रव्ये लभन्ते व्यसनं जनाः ।
निःशेषं मधुकर्यर्थं मुष्णन्तो न कथं व्यधुः ॥ ५६५ ॥
मधुप्रयोगतो वृद्धिर्मदनस्य ततो जनः ।
संचिनोति महत्पापं यात्यतो नरकावनिम् ॥ ५६६ ॥

दीनैर्मधुकरैर्वर्गैः संचितं मधु कृच्छ्रतः ।
यः स्वीकरोति निस्त्रिंशः सोऽन्यत्त्यजति किं नरः ॥ ५६७ ॥
पञ्चाप्येवं महादोषान्यो धत्ते मधुलम्पटः ।
संसारकूपतस्तस्य नोत्तारो जातु जायते ॥ ५६८ ॥
संसारभीरुभिः सद्भिर्जिनाज्ञां परिपालितुम् ।
यावज्जीवं परित्याज्यं सर्वथा मधु मानवैः ॥ ५६९ ॥
विज्ञायेति महादोषं मधुनो बुधसत्तमाः ।
संसारासारतस्त्रस्ता विमुञ्चन्ति मधु त्रिधा ॥ ५७० ॥

इति मधुनिषेधनिरूपणम् ॥ २२ ॥

याति मनस्तनुजातिजनानां सन्ति जगत्त्रितयेऽप्यसुखानि ।
कामपिशाचवशीकृतचेतास्तानि नरो लभते सकलानि ॥ ५७१ ॥
ध्यायति धावति कम्पमियर्ति श्राम्यति ताम्यति नश्यति नित्यम् ।
रोदिति सीदति जल्पति दीनं गायति नृत्यति मूर्छति कामी ॥५७२॥
रुष्यति तुष्यति दास्यमुपैति कर्षति दीव्यति सीव्यति वस्त्रम् ।
किं न करोत्यथवा हतबुद्धिः कामवशो पुरुषो जननिन्द्यम् ॥ ५७३ ॥
वेत्ति न धर्ममधर्ममियर्ति म्लायति शोचति याति कृशत्वम् ।
नीचजनं भजते व्रजतीर्ष्यां मन्मथराजविमर्दितचित्तः ॥ ५७४ ॥
नैति रतिं गृहपत्तनमध्ये ग्रामधनस्वजनान्यजनेषु ।
वर्षसमं क्षणमेकमवैति पुष्पधनुर्वशतामुपयातः ॥ ५७५ ॥
सर्वजनेन विनिन्दितमूर्तिः सर्वविचारबहिर्भवबुद्धिः ।
सर्वजनप्रथितां निजकीर्तिं मुञ्चति कन्तुवशो गतकान्तिः ॥ ५७६ ॥
भोजनशीतिविहाररतानां सज्जन साधुवतां श्रमणानाम् ।
आममयामिव पात्रमपात्रं ध्वस्तसमस्तसुखो मदनार्तः ॥ ५७७ ॥
चारुगुणो विदिताखिलशास्त्रः कर्म करोति कुलीनविनिन्द्यम् ।
मातृपितृस्वजनान्यजनानां नैति वशं मदनस्य वशो ना ॥ ५७८ ॥
तावदशेषविचारसमर्थस्तावदखण्डित मूर्छति मानम् ।
तावदपास्तमलो मननीयो यावदनङ्गवशी न मनुष्यः ॥ ५७९ ॥

शोचति विश्वमभीष्टति द्रष्टुमाश्रयति ज्वरमृच्छति दाहम्।
मुञ्चति भक्तिमुपैति विमोहं माद्यति वेपति याति मृतिं च ॥ ५८० ॥
एवमपास्तमतिः क्रमतोऽत्र पुष्पधनुर्दशवेगविधूतः।
किं न जनो लभते जननिन्द्यो दुःखमसह्यमनन्तमवाच्यम् ॥ ५८१ ॥
चिन्तनकीर्तनभाषणकेलिस्पर्शनदर्शनविभ्रमहास्यैः।
अष्टविधं निगदन्ति मुनीन्द्राः काममपाकृतकामविबाधाः ॥ ५८२ ॥
सर्वजनैः कुलजो जनमान्यः सर्वपदार्थविचारणदक्षः।
मन्मथबाणविभिन्नशरीरः किं न नरः कुरुते जननिन्द्यम् ॥ ५८३ ॥
अह्नि रविर्दहति शुचि वृद्धः पुष्पधनुर्दहति प्रबलोढम्।
रात्रिदिनं पुनरन्तरमन्तः संवृतिरस्ति रवेर्न तु कन्तोः ॥ ५८४ ॥
स्थावरजङ्गमभेदविभिन्नं जीवगणं विनिहन्ति समस्तम्।
निष्करुणं कृतपापकचेष्टः कामवशः पुरुषोऽतिनिकृष्टः ॥ ५८५ ॥
निष्ठुरमश्रवणीयमनिष्टं वाक्यमसह्यमवद्यमहृद्यम्।
जल्पति वक्रमवाच्यमपूज्यं मद्यमदाकुलवन्मदनार्तः ॥ ५८६ ॥
स्वार्थपरः परदुःखमविद्यन्प्राणसमानपरस्य धनानि।
संसृतिदुःखविधावविदित्वा पापमनङ्गवशो हरतेऽङ्गी ॥ ५८७ ॥
यो परिचिन्त्य भवार्णवदुःखमन्यकलत्रमभीप्सति कामी।
साधुजनेन विनिन्द्यमगम्यं तस्य किमत्र परं परिहार्यम् ॥ ५८८ ॥
तापकरं पुरुपातकमूलं दुःखशतार्थमनर्थनिमित्तम्।
लाति वशः पुरुषः कुसुमेषोर्ग्रन्थमनेकविधं बुधनिन्द्यम् ॥ ५८९ ॥
एवमनेकविधं विदधाति यो जननार्णवपातनिमित्तम्।
चेष्टितमङ्गजबाणविभिन्नो नेह सुखी न परत्र सुखी सः ॥ ५९० ॥
दृष्टिचरित्रतपोगुणविद्याशीलदयादमशौचशमाद्यान्।
कामशिखी दहति क्षणतो नुर्वह्निरिवेन्धनमूर्जितमत्र ॥ ५९१ ॥
किं बहुना कथितेन नरस्य कामवशस्य न किंचिदकृत्यम्।
एवमवेत्य सदा मतिमन्तः कामरिपुं क्षयमत्र नयन्ति ॥ ५९२ ॥

नारिरिमं विदधाति नराणां रौद्रमना नृपतिर्न करीन्द्रः ।
दोषमहिर्न न तीव्रविषं वा यं वितनोति मनोभववैरी ॥ ५९३ ॥
एकभवे रिपुपन्नगदुःखं जन्मशतेषु मनोभवदुःखम् ।
चारुधियेति विचिन्त्य महान्तः कामरिपुं क्षणतः क्षपयन्ति ॥ ५९४ ॥
संयमधर्मविबद्धशरीराः साधुभटाः शरवैरिणमुग्रम् ।
शीलतपःशितशस्त्रनिपातैर्दर्शनबोधबलाद्विधुनन्ति ॥ ५९५ ॥

इति कामनिषेधनिरूपणम् ॥ २३ ॥

सत्यशौचशमसंयमविद्याशीलवृत्तगुणसत्कृतिलज्जाः ।
याः क्षिपन्ति पुरुषस्य समस्तास्ता बुधः कथमिहेच्छति वेश्याः ॥ ५९६ ॥
यासु शक्तमनसः क्षयमेति द्रव्यमापदुपयाति समृद्धिम् ।
निन्द्यता भवति नश्यति कीर्तिस्ता भजन्ति गणिकाः किमु मान्याः ॥ ५९७ ॥
धर्ममत्ति तनुते पुरु पापं या निरस्यति गुणं कुरुतेऽन्यम् ।
सौख्यमस्यति ददाति च दुःखं तां धिगस्तु गणिकां बहुदोषाम् ॥ ५९८ ॥
जल्पनं च जघनं च यदीयं निन्द्यलोकमलदिग्धमवाच्यम् ।
पण्ययोषितमनर्थनिमित्तां तां नरस्य भजतः किमु शौचम् ॥ ५९९ ॥
संदधाति हृदयेऽन्यमनुष्यं यान्यमाह्वयति दृष्टिविशेषैः ।
अन्यमर्थिनमतो भजते तां को बुधः श्रयति पण्यपुरंध्रीम् ॥ ६०० ॥
श्रीकृपामतिधृतिद्युतिकीर्तिप्रीतिकान्तिशमतापटुताद्याः ।
योषितः परिहरन्ति रुषेव पण्ययोषिति विषक्तमनस्कान् ॥ ६०१ ॥
या करोति बहुचाटुशतानि द्रव्यदातरि जनेऽप्यकुलेने ।
निर्धनं त्यजति काममपि स्त्रीं तां विशुद्धधिषणा न भजन्ति ॥ ६०२ ॥
उत्तमोऽपि कुलजोऽपि मनुष्यः सर्वलोकमहितोऽपि बुधोऽपि ।
दासतां भजति यां भजमानस्तां भजन्ति गणिकां किमु सन्तः ॥ ६०३ ॥
या विचित्रविटकोटिनिघृष्टा मद्यमांसनिरतातिनिकृष्टा ।
कोमलां वचसि चेतसि दुष्टां तां भजन्ति गणिकां न विशिष्टाः ॥ ६०४ ॥
यार्थसंग्रहपरातिनिघृष्टा सत्यशौचशमधर्मवहिष्टा ।
सर्वदोषनिलयातिनिकृष्टा तां श्रयन्ति गणिकां किमु शिष्टाः ॥ ६०५ ॥

या कुलीनमकुलीनममान्यमन्यमाश्रितगुणं गुणहीनम् ।
वेत्ति नो कपटसंकटचेष्टां तां व्रजन्ति गणिकां किमु शिष्टाः ॥ ६०६ ॥
तावदेव दयितः कुलजोऽपि यावदर्पयति भूरिधनानि ।
येक्षुवत्त्यजति निर्गतसारं तत्र हो किमु सुखं गणिकायाम् ॥ ६०७ ॥
तावदेव पुरुषो जनमान्यस्तावदाश्रयति चारुगुणश्रीः ।
तावदामनति धर्मवचांसि यावदेति न वशं गणिकायाः ॥ ६०८ ॥
मन्यते न धनसौख्यविनाशं नाभ्युपैति गुरुसज्जनवाक्यम् ।
नेक्षते भवसमुद्रमपारं दारिकार्पितमना गतबुद्धिः ॥ ६०९ ॥
वारिराशिसिकतापरिमाणं सर्परात्रिजलमध्यगमार्गः ।
ज्ञायते च निखिलं ग्रहचक्रं नो मनस्तु चपलं गणिकायाः ॥ ६१० ॥
या शुनीव बहुचाटुशतानि दानतो वितनुते मलभक्षा ।
पापकर्मजनिता कपटेष्टा यान्ति पण्यवनितां न बुधास्ताम् ॥ ६११ ॥
मद्यमांसमलदिग्धमशौचं नीचलोकमुखचुम्बनदक्षम् ।
यो हि चुम्बति मुखं गणिकाया नास्ति तस्य सदृशोऽतिनिकृष्टः ॥ ६१२ ॥
या न विश्वसिति जातु नरस्य प्रत्ययं तु कुरुते निकृतज्ञा ।
नोपकारमपि वेत्ति कृतघ्नी दूरतस्त्यजत तां खलु वेश्याम् ॥ ६१३ ॥
रागमीक्षणयुते तनुकम्पं बुद्धिसत्त्वजनवीर्यविनाशम् ।
या करोति कुशला त्रिविधेन तां त्यजन्ति गणिकां मदिरेव ॥ ६१४ ॥
योपतापनपराग्निशिखेव चित्तमोहनकरी मदिरेव ।
देहदारणपटुश्छुरिकेव तां भजन्ति कथमापणयोषाम् ॥ ६१५ ॥
सर्वसौख्यदतपोधनचौरी सर्वदुःखनिपुणा जनमारी ।
मर्त्यमत्तकरिबन्धनवारी निर्मितात्र विधिना परनारी ॥ ६१६ ॥
शुभ्रवर्त्म सुरसद्मकपाटं यात्र मुक्तिसुखकाननवह्निः ।
तत्र दोषवसतौ गुणशत्रौ किं श्रयन्ति सुखमापणनार्याम् ॥ ६१७ ॥
यन्निमित्तमुपयाति मनुष्यो दास्यमस्यति कुलं विदधाति ।
धर्मनिन्दितमनेकमलज्जः सा न पण्यवनिता श्रयणीया ॥ ६१८ ॥

चेन्न पण्यवनिता जगति स्याद्दुःखदाननिपुणाः कथमेते ।
प्राणिनो जननदुःखमपारं प्राप्नुवन्ति गुरु सोढुमशक्यम् ॥ ६१९ ॥
दोषमेवमवगम्य मनुष्यः शुद्धबोधजलधौतमनस्कः ।
तत्त्वतस्त्यजति पण्यपुरंध्रीजन्मसागरनिपातनदक्षम् ॥ ६२० ॥

इति वेश्यासङ्गनिषेधनिरूपणम् ॥ २४ ॥

यानि कानिचिदनर्थवीचिके जन्मसागरजले निमज्जताम् ।
सन्ति दुःखनिलयानि देहिनां तानि चाक्षरमणेन निश्चितम् ॥ ६२१ ॥
तावदत्र पुरुषा विवेकिनस्तावति प्रतिजनेषु पूज्यताम् ।
तावदुत्तमगुणा भवन्ति च यावदक्षरमणं न कुर्वते ॥ ६२२ ॥
सत्यशौचशमशर्मवर्जिता धर्मकामधनतो बहिष्कृताः ।
द्यूतदोषमतिना विचेतनाः कं न दोषमुपचिन्वते जनाः ॥ ६२३ ॥
सत्यमस्यति करोत्यसत्यतां दुर्गतिं नयति हन्ति सद्गतिम् ।
धर्ममत्ति वितनोति पातकं द्यूतमत्र कुरुतेऽथवा न किम् ॥ ६२४ ॥
द्यूततोऽपि कुपितो विकम्पते विग्रहं भजति तन्नरो यतः ।
जायते मरणमारणक्रिया तेन तच्छुभमतिर्न दीव्यति ॥ ६२५ ॥
द्यूतदेवनर तस्य विद्यते देहिनां न करुणा विना तया ।
पापमेति परदुःखकारणं शुभ्रवासमुपयाति तेन सः ॥ ६२६ ॥
पैशुनं कटुकमश्रवासुखं वक्ति वाक्यमनृतं विनिन्दितम् ।
वञ्चनाय कितवो विचेतनस्तेन तिर्यग्गतिमेति तेन सः ॥ ६२७ ॥
अन्यदीयमविचिन्त्य पातकं निर्घृणो हरति जीवितोपमम् ।
द्रव्यमत्र कितवो विचेतनस्तेन गच्छति कदर्थतां चिरम् ॥ ६२८ ॥
शुभ्रदुःखपटुकर्मकारिणीं कामिनीमपि परस्य दुःखदाम् ।
द्यूतदोषमलिनोऽभिलष्यति संसृतावटति तेन दुःखितः ॥ ६२९ ॥
जीवनाशनमनेकधादधद्ग्रन्थमक्षरमणोद्यतो नरः ।
स्वीकरोति बहुदुःखमस्तधीस्तत्प्रयाति भवकाननं यतः ॥ ६३० ॥
साधुबन्धुपितृमातृसज्जनान्मन्यते न तनुते मलं कुले ।
द्यूतरोपितमना निरस्तधीः शुभ्रवासमुपयात्यसौ यतः ॥ ६३१ ॥

द्यूतनाशितधनो गताशयो मातृवस्त्रमपि योऽपकर्षति ।
शीलवृत्तिकुलनीतिदूषणः किं न कर्म कुरुते स मानवः ॥ ६३२ ॥
घ्राणकर्णकरपादकर्तनं यद्वशे न लभते शरीरवान् ।
तत्समस्तसुखधर्मनाशनं द्यूतमाश्रयति कः सचेतनः ॥ ६३३ ॥
धर्मकामधनसौख्यनाशिना वैरिणाक्षरमणेन देहिनाम् ।
सर्वदोषनिलयेन सर्वदा संपदा खलु सहाश्वमाहिषम् ॥ ६३४ ॥
यद्वशाद्वितयजन्मनाशनं युद्धराटि कलहादि कुर्वते ।
तेन शुद्धधिषणा न तन्यते द्यूतमत्र मनसापि मानवाः ॥ ६३५ ॥
द्यूतनाशितसमस्तभूतिको बम्भ्रमीति सकलां भुवं नरः ।
जीर्णवस्त्रकृतदेहसंहतिर्मस्तकाहितभरः क्षुधातुरः ॥ ६३६ ॥
याचते नटति याति दीनतां लज्जते न कुरुते विडम्बनाम् ।
सेवते नमति याति दासतां द्यूतसेवनपरो नरोऽधमः ॥ ६३७ ॥
रुध्यतेऽन्यकितवैर्निषेध्यते वध्यते वचनमुच्यते कटु ।
नोद्यतेऽत्र परिभूयते नरो हन्यते च कितवो विनिन्द्यते ॥ ६३८ ॥
हन्ति ताडयति भाषते वचः कर्कशं रटति विद्यते व्यथाम् ।
संतनोति विदधाति रोधनं द्यूततोऽथ कुरुते न किं नरः ॥ ६३९ ॥
जल्पितेन बहुधा किमत्र भो द्यूततो न परमस्ति दुःखदम् ।
चेतसेति परिचिन्त्य सज्जनाः कुर्वते न रतिमत्र सर्वथा ॥ ६४० ॥
शीलवृत्तगुणधर्मरक्षणं स्वर्गमोक्षसुखदानपेशलम् ।
कुर्वताक्षरमणं न तत्त्वतः सेव्यते सकलदोषकारणम् ॥ ६४१ ॥

इति द्यूतनिषेधनिरूपणम् ॥ २५ ॥

वाञ्छत्यङ्गी समस्तं सुखमनवरतं कर्मविध्वंसतस्त-
च्चारित्रात्स्यात्प्रबोधाद्भवति तदमलं सश्रुतादाप्ततस्तत् ।
निर्दोषात्मा सदोषा जगति निगदिता द्वेषरागादयोऽत्र
ज्ञात्वा मुक्त्यै सदोषान्विकलितविपदे नाश्रयन्त्वस्ततन्द्राः ॥६४२॥
जन्माकूपारमध्यं मृतिजननजरावर्तमत्यन्तभीमं
नानादुःखोग्रनक्रभ्रमणकलुषितं व्याधिसिन्धुप्रवाहम् ।

नीयन्ते प्राणिवर्गाः पुरुदुरितभरं यैर्निरूप्यारसन्त-
स्ते रागद्वेषमोहा रिपुवदसुखदा येन धूताः स आप्तः ॥ ६४३ ॥
देहार्धे येन शंभुर्गिरिपतितनयां नीतवान्ध्वस्तधैर्यो
वक्षोलक्ष्मीं मुरुद्विट् पयसिजनिलयोऽष्टार्धवक्त्रो बभूव ।
गीर्वाणानामधीशो दशशतभगतामस्तबुद्धिः प्रयातः
प्रध्वस्तो येन सोऽपि कुसुमशररिपुर्देवमाप्तं तमाहुः ॥ ६४४ ॥
पृथ्वीमुद्धर्तुमीशाः सलिलधिसलिलं पातुमद्रिं प्रवेष्टुं
ज्योतिश्चक्रं निरोद्धुं प्रचलितमनिलं येऽशितुं सत्त्ववन्तः ।
निर्जेतुं तेऽपि यानि प्रथितपृथुगुणाः शक्नुवन्ति स्म नेन्द्रा
योऽत्रामूनीन्द्रियाणि त्रिजगति जितवानाप्तमाहुस्तमीशम् ॥६४५॥
वर्णोष्टस्यन्दमुक्ता सकृदखिलजनान्बोधयन्ती विबाधा
निर्वाञ्छोच्छ्वासदोषा मनसि विदधती साम्यमानन्दधात्री ।
ध्रौव्योत्पादव्ययात्म्यं त्रिभुवनमखिलं भाष्यते यस्य वाणी
तं मोक्षाय श्रयन्तु स्थिरतरधिषणा देवमाप्तं मुनीन्द्राः ॥ ६४६ ॥
भावाभावस्वरूपं सकलमसकलं द्रव्यपर्यायतत्त्वं
भेदाभेदावलीढं त्रिभुवनभुवनाभ्यन्तरे वर्तमानम् ।
लोकालोकावलोकी गतनिखिलमलं लोकने यस्य बोध-
स्तं देवं मुक्तिकामा भवभवनभिदे भावयन्त्वाप्तमत्र ॥ ६४७ ॥
स्याच्चेन्नित्यं समस्तं परिणतिरहितं कर्तृकर्मव्युदासा-
त्संबन्धस्तत्र दृश्येन्न····फलवतोर्नाप्यनित्ये समस्ते ।
पर्यालोच्येति येन प्रकटितमुभयं ध्वस्तदोषप्रपञ्चं
तत्सेवध्वं विमुक्त्यै जननिगलिता भक्तितो देवमाप्तम् ॥ ६४८ ॥
नो चेत्कर्ता न भोक्ता यदि भवति विभुर्नो वियोगेन दुःखी
स्याच्चेदेकः शरीरी प्रतितनु स तदान्यस्य दुःखेन दुःखी ।
स्याद्विज्ञायेति जन्तुर्गतिनिखिलमलं योऽभ्यधत्तेऽद्धबोधं
तं पूज्याः पूजयन्तु प्रशमितविपदं देवमाप्तं विमुक्त्यै ॥ ६४९ ॥

१. ब्रह्मा.

या रागद्वेषमोहाञ्जनयति हरते चारुचारित्ररत्नं
भित्ते मानोच्चशैलं मलिनयति कुलं कीर्तिवल्लीं लुनीते ।
तस्यां ये यान्ति नार्यामुपहतमनसा शक्तिमत्यन्तमूढा
देवाः कन्दर्पतप्ता ददति तनुमतां ते कथं मोक्षलक्ष्मीम् ॥ ६५० ॥
पीनश्रोणीनितम्बस्तनजघनभराक्रान्तमन्दप्रयाणा-
स्तारुण्योद्रेकरम्या मदनशरहताः कामिनीर्ये भजन्ते ।
स्थूलोपस्थस्थलीनां कुशलकरतलास्फाललीलाकुलास्ते
देवाः स्युश्चेज्जगत्यामिह विदत विदः कीदृशाः सन्त्यसन्तः ॥६५१॥
ये संगृह्यायुधानि क्षतरिपुरुधिरैः पिञ्जराण्यात्तरेखा
वज्रेष्वासासिचक्रक्रकचहलगदाशूलपाशादिकानि ।
रौद्रभ्रूभङ्गवक्राः सकलभवभृतां भीतिमुत्पादयन्ते
ते चेद्देवा भवन्ति प्रणिगदत बुधा लुब्धकाः के भवेयुः ॥ ६५२ ॥
व्याध्याधिव्याधकीर्णे विषयमृगगणे कामकोपादिसर्पे
दुःखक्षोणीरुहाढ्ये भवगहनवने भ्राम्यते येन जीवः ।
ये तत्स्त्रीमद्यमांसत्रयमिदमधिपा निन्दनीयं भजन्ते
देवाश्चेत्तेऽपि पूज्या निगदत सुधियो निन्दिताः के भवेयुः ॥६५३॥
निद्राचिन्ताविषादश्रममदनमदस्वेदखेदप्रमाद-
क्षुद्रागद्वेषतृष्णामृतिजननजराव्याधिशोकस्वरूपाः ।
यस्यैतेऽष्टादशापि त्रिभुवनभवभृद्व्यापिनः सन्ति दोषा-
स्ते देवं नाप्तमाहुर्नयनिपुणधियो मुक्तिमार्गाभिधाने ॥ ६५४ ॥
रक्ताद्रेभेन्द्रकृत्तिं नटति गणवृतो यः श्मशाने गृहीत्वा
निस्त्रिंशो मांसमत्ति त्रिभुवनभविनां दक्षिणो नाननेन ।
गौरीगङ्गाङ्गसङ्गी त्रिपुरदहनकृद्दैत्यविध्वंसदक्ष-
स्तं रुद्रं रौद्ररूपं कथममलधियो निन्द्यमाप्तं वदन्ति ॥ ६५५ ॥
त्यक्त्वा पद्मामनिन्द्यां मदनशरहतो गोपनारीं सिषेवे
निद्राविद्राणचित्तः कपटशतमयो दानवारातिघाती ।

रागद्वेषावधूतो द्युपतिसुतरथे सारथिर्योऽभवत्तं
कुर्वाणं प्रेम नार्या विटवदतिशयं नाप्तमाहुर्मुरारिम् ॥ ६५६ ॥
यः कन्तूत्तप्तचित्तो विकलितचरणोऽष्टार्धवक्त्रत्वमाप-
न्नानानाट्यप्रयोगत्रिदशपतिवधूदत्तवीक्ष्याकुलाक्षः ।
क्रुद्धश्चिच्छेद शंभुर्वितथवचनतः पञ्चमं यस्य वक्त्रं
स ब्रह्माप्नोति दीनः प्रणिगदत कथं कथ्यते तत्त्वबोधैः ॥ ६५७ ॥
यो भ्रान्त्वोदेति कृत्वा प्रतिदिनमसुरैर्विग्रहं व्याधिविद्धो
यो दुर्वारेण दीनो भयचकितमना ग्रस्यते राहुणा च ।
मूढो विध्वस्तबोधः कुसुमशरहतः सेवते कामिनीं यः
सन्तस्तं भानुमाप्तं भवगहनवनच्छित्तये नाश्रयन्ति ॥ ६५८ ॥
मूढः कन्दर्पतप्तो वनचरयुवतौ भग्नवृत्तः षडास्य-
स्तद्भार्याशक्तचित्तस्त्रिदशपतिरभूद्गौतमेनाभिशप्तः ।
वह्निर्निःशेषभक्षी विगतकृपमना लाङ्गली मद्यलोलो
नैकोऽप्येतेषु देवो विगलितकलिलो दृश्यते तत्र रूपम् ॥ ६५९ ॥
रागान्धाः पीनयोनिस्तनजघनभराक्रान्तनारीप्रसङ्गा-
त्कोपादारातिघाताः प्रहरणधरणाद्द्वेषिणो भीतिमन्तः ।
आत्मीयानेकदोषाध्यवसितविरहास्नेहतो दुःखिनश्च
ये देवास्ते कथं वः शमयमनियमान्दातुमीशा विमुक्त्यै ॥ ६६० ॥
पर्यालोच्यैवमत्र स्थिरपरमधियस्तत्त्वतो देहभाजः
संत्यज्यैतान्कुदेवांस्त्रिविधमलभृतो दीर्घसंसारहेतून् ।
विध्वस्ताशेषदोषं जिनपतिमखिलं प्राणिनामापदं तं
ये वन्दन्तेऽनवद्यं मदनमदनुदं ते लभन्ते सुखानि ॥ ६६१ ॥
दृष्टं नम्रेन्द्रमन्दश्लथमुकुटतटीकोटिविश्लिष्टपुष्य-
द्भ्राम्यद्भृङ्गौघघोषैर्जिनपतिनुतये व्याहराख्यैर्जिनस्य ।
पादद्वैतं प्रभूतं प्रसभभवभयाभ्रंसिभक्त्यात्तचित्तै-
स्तैराप्तोक्तं विमुक्त्यै पदमपदमथ व्यापदामाप्तमाप्तम् ॥ ६६२ ॥

नैषां दोषा मयोक्ता वचनपटु तथा द्वेषतो रागतो वा
किं त्वेषोऽत्र प्रयासो मम सकलविदं ज्ञातुमाप्तं त्रिदोषम् ।
शक्तो बोद्धुं न चात्र त्रिभुवनहितकृद्विद्यमाने परत्र
भानुर्नोदेति यावन्निखिलमपि तमो नावधूतं हि तावत् ॥ ६६३॥

इत्याप्तविवेचनम् ॥ २६ ॥

जिनेश्वरक्रमयुगभक्तिभाविता विलोकितत्रिभुवनतत्त्वविस्तराः ।
षड्गुतान् षडिह गुणांश्चरन्ति ये नमामि तान्भवरिपुभित्तयो गुरून् ॥६६४॥
समुद्यतास्तपसि जिनेश्वरोदिते वितन्वते निखिलहितानि निस्पृहाः ।
सदा नये मदनमदैरपाकृताः सुदुर्लभा जगति मुनीशिनोऽत्र ते ॥६६५॥
वचांसि ये शिवसुखदानि तन्वते प्रकुर्वते स्वपरपरिग्रहग्रहम् ।
विवर्जिताः सकलममत्वदूषणैः श्रयामि तानमलपदाप्तये यतीन् ॥ ६६६ ॥
न बान्धवस्वजनसुतप्रियादयो वितन्वते तमिह गुणं शरीरिणाम् ।
विभिन्दतो भवभयभूरिभूभृतां मुनीश्वरा विदधति यं कृपालवः ॥ ६६७॥
शरीरिणः कुलगुणमार्गणादितो विबुद्धये विदधति निर्मलां दयाम् ।
विभीरवो जननदुरन्तदुःखतो भजामि ताञ्जनकसमान्गुरून्सदा ॥ ६६८॥
वदन्ति ये वचनमनिन्दितं बुधैरपीडकं सकलशरीरधारिणाम् ।
मनोहरं रहितकषायदूषणं भवन्तु ते मम गुरवो विमुक्तये ॥ ६६९ ॥
न लाति यः स्थितपतितादिकं धनं पुराकरक्षितिधरकाननादिषु ।
त्रिधा तृणप्रमुखमदत्तमुत्तमो नमामि तं जननविनाशिनं गुरुम् ॥ ६७० ॥
त्रिधा स्त्रियः स्वसृजननीसुतासमा विलोक्यते कथनविलोकनादितः ।
पराङ्मुखाः शमितकषायशत्रवो यजामि तान्विषयविनाशिनो गुरून् ६७१
परिग्रहं''''द्विविधं त्रिधापि ये न गृह्यते च तनुमता विवर्जिताः ।
विनिर्मलस्थिरशिवसौख्यकाङ्क्षिणो भवन्तु ते मम गुरवो भवच्छिदः ॥६७२॥
विजन्तुके दिनकररश्मिभासिते व्रजन्ति ये पथि दिवसे युगेक्षणाः ।
स्वकार्यतः सकलशरीरधारिणां दयालवो ददति सुखानि तेऽङ्गिनाम् ६७३
दिगम्बरा मधुरमपैशुनं वचः श्रुतोदितं स्वपरहितावहं मितम् ।
ब्रुवन्ति ये गृहिजनजल्पनोज्झितं भवारितः शरणमितोऽस्मि तान्गुरून् ६७४

स्वतो मनोवचनशरीरनिर्मितं समाश्रयाः कटुकरसादिकेषु ये ।
न भुञ्जते परमसुखैषिणोऽशनं मुनीश्वरा मम गुरवो भवन्तु ते ॥ ६७५॥
शनैः पुरा विकृतिपुरःसरस्य ते विमोक्षणग्रहणविधिं वितन्वते ।
कृपापरा जगति समस्ति देहिनां धुनन्ति ते जननजराविपर्ययान् ॥६७६॥
सविस्तरे धरणितले विरोधके निरीक्ष्यते परजनता विनाकृते ।
त्यजन्ति ये तनुमलमङ्गिवर्जिते यतीश्वरा मम गुरवो भवन्तु ते ॥ ६७७॥
मनःकरी विषयवनानि लापुको नियम्य यैः शमयमशृङ्खलैर्दृढम् ।
वशीकृतो मननिशिताङ्कुशैः सदा तपोधना मम गुरवो भवन्तु ते ॥६७८॥
न निष्ठुरं कटुमनवद्यवर्धनं वदन्ति ये वचनमनर्थमप्रियम् ।
समुद्यता जिनवचनेषु मौनिनो गुणैर्गुरून्प्रणमत तान्गुरून्सदा ॥ ६७९॥
न कुर्वते कलिलविवर्धकक्रियाः सदोद्यताः शमयमसंयमादिषु ।
रता न ये निखिलजनक्रियाविधौ भवन्तु ते मम हृदये कृतास्पदाः ६८०
शरीरिणामसुखशतस्य कारणं तपोदयाशमगुणशीलनाशनम् ।
जयन्ति ये धृतिबलतोऽक्षवैरिणं भवन्तु ते यतिवृषभा मुदे मम ॥ ६८१॥
वृषं चितं व्रतनियमैरनेकधा विनिर्मलस्थिरसुखहेतुमुत्तमम् ।
विधुन्वते झटिति कषायवैरिणो विनाशकानमलधियः स्तुवे गुरून् ॥ ६८२॥
विनिर्जिता हरिहरवह्निजादयो विभिन्दिता युवतिकटाक्षतोमरैः ।
मनोभुवा परमबलेन येन तं विभिन्दतो नमत गुरूञ्शमेषुभिः ॥ ६८३ ॥
न रागिणः क्वचन न रोषदूषिता न मोहिनो भवभयभेदनोद्यताः ।
गृहीतसन्मननचरित्रदृष्टयो भवन्तु मे मनसि मुदे तपोधनाः ॥ ६८४ ॥
सुखासुखस्वपरवियोगयोगिता प्रियाप्रियव्यपगतजीवितादिभिः ।
भवन्ति ये सममनसस्तपोधना भवन्तु ते मम गुरवो भवच्छिदः ॥६८५॥
जिनोदिते वचसि रता वितन्वते तपांसि ये कलिलकलङ्कमुक्तये ।
विवेचकाः स्वपरमवश्यतत्त्वतो हरन्तु ते मम दुरितं मुमुक्षवः ॥ ६८६ ॥
अवन्ति ये जनकसमा मुनीश्वराश्चतुर्विधं गणमनवद्यवृत्तयः ।
स्वदेहवद्दलितमदाष्टकारयो भवन्तु ते मम गुरवो भवान्तकाः ॥ ६८७ ॥

वदन्ति ये जिनपतिभाषितं वृषं वृषेश्वराः सकलशरीरिणां हितम्।
भवाब्धितस्तरणमनर्थनाशनं नयन्ति ते शिवपदमाश्रितं जनम्॥ ६८८॥
तनूभृतां नियमतपोव्रतानि ये दयान्विता ददति समस्तलब्धये।
चतुर्विधो विनयपरागणे सदा दहन्ति ते दुरितवनानि साधवः॥ ६८९॥

इति गुरुस्वरूपनिरूपणम्॥ २७॥

अवति निखिललोकं यः पितेवादृतात्मा
दहति दुरितराशिं पावकेवेन्धनौघम्।
वितरति शिवसौख्यं हन्ति संसारशत्रुं
विदधति शुभबुद्ध्या तं बुधा धर्ममत्र॥ ६९०॥
जननजलधिमज्जज्जन्तुनिर्व्याजमित्रं
विदधति जिनधर्मं ये नरा नादरेण।
कथमपि नरजन्म प्राप्य पापोप्रशान्ते-
र्विमलमणिमनर्घ्यं प्राप्य ते वर्जयन्ति॥ ६९१॥
वदति निखिललोकः शब्दमात्रेण धर्मं
विरचयति विचारं जातु नो कोऽपि तस्य।
व्रजति विविधभेदं शब्दशाम्येऽपि धर्मो
जगति हि गुणतोयं क्षीरवत्तत्त्वतोऽत्र॥ ६९२॥
सततविषयसेवाविह्वलीभूतचित्तः
शिवसुखफलदातृप्राण्यहिंसां विहाय।
श्रयति पशुवधादिं यो नरो धर्ममज्ञः
प्रपिबति विषमुग्रं सोऽमृतं वै विहाय॥ ६९३॥
पशुवधपरयोपिन्मद्यमांसादिसेवा
वितरति यदि धर्मं सर्वकल्याणमूलम्।
निगदितमतिमन्तो जायते केन पुंसां
विविधजनितदुःखा श्वभ्रभूर्निन्दनीया॥ ६९४॥
विचरति गिरिराजो जायते शीतलोऽग्नि-
स्तरति पयसि शैलः स्याच्छशी तीव्रतेजाः।

उदयति दिशि भानुः पश्चिमायां कदाचि-
न्न तु भवति कदाचिज्जीवघातेन धर्मः ॥ ६९५ ॥

विगलितधिषणोऽसावेकदा हन्ति जीवा-
न्वदति वितथवाक्यं द्रव्यमन्यस्य लाति ।
परयुवतिमपास्थे सङ्गमङ्गीकरोति
भवति न वृषमात्रोऽप्यत्र सन्तो वदन्ति ॥ ६९६ ॥

अपि कुपितमनस्के कोऽपि निष्पत्तिहेतुं
विदधति सति शत्रोर्विक्रियां चित्ररूपाम् ।
वदति वचनमुच्चैर्दुःश्रवं कर्कशादि
कलुषविकलतायां तां क्षमां वर्णयन्ति ॥ ६९७ ॥

व्रतकुलबलजातिज्ञानविज्ञानरूप-
प्रभृतिजमदमुक्तिर्या विनीतस्य साधोः ।
अनुपमगुणराशेः शीलचारित्रभाजः
प्रणिगदति विनीता मार्दवत्वं मुनीन्द्राः ॥ ६९८ ॥

कपटशतनदीष्णैर्वैरिभिर्वञ्चितोऽपि
निकृतिकरणदक्षोऽप्यत्र संसारभीरुः ।
तनुवचनमनोभिर्वक्रतां यो न याति
गतमलमृजु मानं तस्य साधोर्वदन्ति ॥ ६९९ ॥

मदमदनकषायप्रीतिभूत्यादिभूतं
वितथमवितथं च प्राणिवर्गोपतापि ।
श्रवणकटु विमुच्य स्वापदेभ्यो हितं य-
द्वचनमवितथं तत्कथ्यते तथ्यबोधैः ॥ ७०० ॥

दहति झटिति लोभो लाभतो वर्धमान-
स्तृणचयमिव वह्निर्यत्सुखं देहभाजाम् ।
व्रतगुणशमशीलध्वंसिनस्तस्य नाशः
प्रणिगदति मुमुक्षोः साधवः साधुशौचम् ॥ ७०१ ॥

विषयविरतियुक्तिर्याजिताक्षस्य साधो-
निखिलतनुमतां यद्रक्षणं स्यात्त्रिधापि ।
तदुभयमनवद्यं संयमं वर्णयन्ते
मननरविमरीचिध्वस्तमोहान्धकारः ॥ ७०२ ॥

गलितनिखिलसङ्गोऽनङ्गसङ्गे प्रवीणो
विमलमनसि पूतं कर्मनिर्नाशनाय ।
चरति चरितमर्च्यं संयतो यन्मुमुक्षु-
र्मथितसुकृतमाद्यास्तत्तपो वर्णयन्ति ॥ ७०३ ॥

जिनगदितमनर्थध्वंसि शास्त्रं विचित्रं
परममृतसमं यत्सर्वसत्त्वोपकारि ।
प्रकटनमिह तस्य प्राणिनां यद्वृषाय
तमभिदधति शान्तास्त्यागधर्मं यतीन्द्राः ॥ ७०४ ॥

यदिह जहति जीवा जीवजीवोऽत्यभेदा-
त्रिविधमपि मुनीन्द्रा सङ्गमङ्गेऽप्यसङ्गाः ।
जननमरणभीता जन्तुदीक्षानदीष्णा
गतमलमनसस्तत्स्यात्सदार्किंचनत्वम् ॥ ७०५ ॥

वरतनुरतिमुक्तेवार्क्ष्यमाणस्य नारीः
स्वसृदुहितृसवित्रीसंनिभाः सर्वदैव ।
जननमरणभीतेः कूर्मवत्संवृतस्य
गुरुकुलवसतिर्या ब्रह्मचर्यं तदाहुः ॥ ७०६ ॥

जननमरणभीतिध्यानविध्वंसदक्षं
कषितनिखिलदोषं भूषणं देहभाजाम् ।
इति दशविधमेनं धर्ममेनोविमुक्त-
विदितभुवनतत्त्वा वर्णयन्ते जिनेन्द्राः ॥ ७०७ ॥

हरति जननदुःखं मुक्तिसौख्यं विधत्ते
रचयति शुभबुद्धिं पापबुद्धिं धुनीते ।

अवति सकलजन्तून्कर्मशत्रून्निहन्ति
प्रशमयति मनो यस्तं बुधा धर्ममाहुः ॥ ७०८ ॥
विषयरतिविमुक्तिर्यत्र दानानुरक्तिः
शमयमदमशक्तिर्मन्मथारातिभक्तिः ।
जननमरणभीतिर्द्वेषरागावधूति-
र्भजति तमिह धर्मं कर्मनिर्मूलनाय ॥ ७०९ ॥
गुणितनुमतितुष्टिं मित्रतां शत्रुवर्गं
गुरुचरणविनीतिं तत्त्वमार्गप्रणीतिम् ।
जिनपदपद्मभक्तिं दूषणानां तु मुक्तिं
विदधति सति जन्तौ धर्ममुत्कृष्टमाहुः ॥ ७१० ॥
मनति मनसि यः सज्ज्ञानचारित्रदृष्टी
शिवपदसुखहेतून्दीर्घसंसारसेतून् ।
परिहरति च मिथ्याज्ञानचारित्रदृष्टी
भवति विगतदोषस्तस्य मर्त्यस्य धर्मः ॥ ७११ ॥

इति धर्मनिरूपणम् ॥ २८ ॥

पुरुषस्य विनश्यति येन सुखं वपुरेति कृशत्वमुपेत्यचलम् ।
मृतिमिच्छति मूर्च्छति शोकवशस्त्यजतैनमतस्त्रिविधेन बुधाः ॥ ७१२ ॥
वितनोति वचः करुणं विमना विधुनोति करौ चरणौ च भृशम् ।
रमते न गृहे न वने न जने पुरुषः कुरुते न किमत्र शुचा ॥ ७१३ ॥
उदितः समयः श्रयतेऽस्तमयं कृतकः सकलो लभते विलयम् ।
सकलानि फलानि पतन्ति तरोः सकला जलधिं समुपैति नदी ॥ ७१४ ॥
सकलं सरसं सुखमेति यथा सकलः पुरुषो मृतिमेति तथा ।
मनसेति विचिन्त्य बुधो न शुचं विदधाति मनागपि तत्त्वरुचिः ॥ ७१५ ॥
स्वजनोऽन्यजनः कुरुते न सुखं न धनं न वृषो विषयो न भवेत् ।
विमतेः स्वहितस्य शुचा भविनः स्तुतिमस्य न कोऽपि करोति बुधः ॥ ७१६ ॥
स्वकरार्पितवासकपोलतलो विगते च मृते च तनोति शुचम् ।
भुवि यः सदने दहनेन हते खनतीह स कूपमपास्तमतिः ॥ ७१७ ॥

यदि रक्षणमन्यजनस्य भवेद्यदि कोऽपि करोति बुधः स्तवनम् ।
यदि किंचन सौख्यमथ स्वतनोर्यदि कश्चन तस्य गुणो भवति ॥ ७१८॥
यदि वागमनं कुरुतेऽत्र मृतः स्वगुणं तु विशोचनमस्य तदा ।
विगुणं विमना बहु शोचति यो विगुणां सदृशां लभते मनुजः॥ ७१९ ॥
पथि पान्थगणस्य यथा व्रजतो भवति स्थितिरस्थितिरेव तरौ ।
जननाध्वनि जीवगणस्य तथा जननं मरणं च सदैव कुले ॥ ७२० ॥
बहुदेशसमागतपान्थगणः प्लवमेकमिवैति नदीतरणे ।
बहुदेशसमागतजन्तुगणः कुलमेति पुनः सुकृतेन भवे ॥ ७२१ ॥
हरिणस्य यथा भ्रमतो गहने शरणं न हरेः पतितस्य मुखे ।
समवर्तिमुखे पतितस्य तथा शरणं बत कोऽपि न देहवतः ॥ ७२२ ॥
सगुणं विगुणं सधनं विधनं सनृपं विनृपं तरुणं च शिशुम् ।
वनमध्यगताग्निसमोऽकरुणः समवर्तिनृपो न परित्यजति ॥ ७२३ ॥
भुवि यान्ति हयद्विपमर्त्यजना गगने शकुनिग्रहशीतकराः ।
जलजन्तुगणाश्च जले बलवान्समवर्तिविभुर्निखिले भुवने ॥ ७२४ ॥
विषयः स समस्ति न यत्र रविर्न शशी न शिखी पवनं न तथा ।
न स कोऽपि न यत्र कृतान्तनृपः सकलाङ्गिविनाशकरः प्रबलः॥ ७२५ ॥
इति तत्त्वधियः परिचिन्त्य बुधाः सकलस्य जनस्य विनश्वरताम् ।
न मनागपि चेतसि संदधते शुचमङ्ग यशःसुखनाशकरम् ॥ ७२६ ॥
धनपुत्रकलत्रवियोगकरो धनपुत्रकलत्रवियोगमिह ।
लभते मनसेति विचिन्त्य बुधः परिमुञ्चतु शोकमनर्थकरम् ॥ ७२७ ॥
यदि पुण्यशरीरसुखे लभते यदि शोककृतौ पुनरेति मृतः ।
यदि वास्य मृतौ स्वमृतिर्भविता पुरुषस्य शुचात्र तदा सफलम् ॥ ७२८ ॥
अनुशोचनमस्तविचारमना विगतस्य मृतस्य च यः कुरुते ।
स गते सलिले तनुते वरणं भुजगस्य गतस्य गतिं क्षिपति ॥ ७२९ ॥
सुरवर्त्म सुमुष्टिहतं कुरुते सिकतोत्करपीडनमातनुते ।
श्रममात्मगतं न विचिन्त्य नरो भुवि शोचति यो मृतमस्तमतिः ॥ ७३० ॥

त्यजति स्वयमेव शुचं प्रवरः सुवचःश्रवणेन च मध्यमनाः।
निखिलाङ्गिविनाशकशोकहतो मरणं समुपैति जघन्यजनः॥ ७३१ ॥
स्वयमेव विनश्यति शोककलिर्जननस्थितिभङ्गविदो गुणिनः।
नयनोत्थजलेन च मध्यधियो मरणेन जघन्यमतेर्भविनः॥ ७३२ ॥
विनिहन्ति शिरो वपुरार्तमना बहु रोदिति दीनवचाः कुशलः।
कुरुते मरणार्थमनेकविधिं पुरशोकसमाकुलधीररवः॥ ७३३ ॥
बहुरोदनताम्रतराक्षियुगः परिरूक्षशिरोरुहभीमतनुः।
कुरुते सकलस्य जनस्य शुचा पुरुषो भयमत्र पिशाचसमः॥ ७३४ ॥
परिधावति रोदिति पूत्कुरुते पतति स्खलति त्यजते वसनम्।
व्यथते श्लथते लभते न सुखं गुरुशोकपिशाचवशो मनुजः॥ ७३५ ॥
क्व जपः क्व तपः क्व सुखं क्व शमः क्व यमः क्व दमः क्व समाधिविधिः।
क्व धनं क्व बलं क्व गृहं क्व गुणो वन शोकवशस्य नरस्य भवेत्॥ ७३६॥
न धृतिर्न मतिर्न गतिर्न रतिर्न यतिर्न नतिर्न नुतिर्न रुचिः।
पुरुषस्य गतस्य हि शोकवशं व्यपयाति सुखं सकलं सहसा॥ ७३७ ॥
ददाति योऽन्यत्र भवे शरीरिणामनेकधा दुःखमसह्यमायतम्।
इहैव कृत्वा बहु दुःखपद्धतिं स सेव्यते शोकरिपुः कथं बुधैः॥७३८॥

पूर्वोपार्जितपापपाकवशतः शोकः समुत्पद्यते
धर्मात्सर्वसुखाकराज्जिनमतान्नश्यत्ययं तत्त्वतः।
विज्ञायेति समस्तदुःखसकलामूलो भवोर्वीरुहः
संसारस्थितिवेदिभिर्बुधजनैः शोकस्त्रिधा त्यज्यते॥ ७३९ ॥

इति शोकनिरूपणम्॥ २९ ॥

संसारसागरमपारमतीत्य पूतं
मोक्षं यदि व्रजितुमिच्छत मुक्तबाधाम्।
तज्ज्ञानवारिणि विधूतमले मनुष्याः
स्नानं कुरुध्वमपहाय जलाभिषेकम्॥ ७४० ॥
तीर्थेषु शुध्यति जलैः शतशोऽपि धौतं
नान्तर्गतं विविधपापमलावलिप्तम्।

चित्तं विचिन्त्य मनसेति विशुद्धबोधाः
सम्यक्त्वपूतसलिलैः कुरुताभिषेकम् ॥ ७४१ ॥

तीर्थाभिषेककरणाभिरतस्य बाह्यो
नश्यत्ययं सकलदेहमलो नरस्य ।
नान्तर्गतं कलिलमित्यवधार्य सोऽन्त-
श्चारित्रवारिणि निमज्जति शुद्धहेतोः ॥ ७४२ ॥

सज्ज्ञानदर्शनचरित्रजलं क्षमोर्मि
कुज्ञानदर्शनचरित्रमलावमुक्तम् ।
यत्सर्वकर्ममलमुज्जिनवाक्यतीर्थं
स्नानं विदध्वमिह नास्ति जलेन शुद्धिः ॥ ७४३ ॥

तीर्थेषु चेत्क्षयमुपैति समस्तपापं
स्नानेन निष्ठति कथं पुरुषस्य पुण्यम् ।
नैकस्य गन्धमलयोर्धुतयोः शरीरं
दृष्ट्वा स्थितिः सलिलशुद्धिविधौ समाने ॥ ७४४ ॥

तीर्थाभिषेकवशतः सुगतिं जगत्यां
पुण्यैर्विनापि यदि यान्ति नरास्तदेतः ।
नानाविधोदकसमुद्भवजन्तुवर्गा
बालत्वचारुमरणान्न कथं व्रजन्ति ॥ ७४५ ॥

यच्छुक्रशोणितसमुत्थमनिष्टगन्धं
नानाविधक्रमिकुलाकुलितं समन्तात् ।
व्याध्यादिदोषमलसद्म विनिन्दनीयं
तद्वारितः कथमिहर्च्छति शुद्धिमङ्गम् ॥ ७४६ ॥

गर्भेऽशुचौ कृमिकुलैर्निचिते शरीरं
यद्वर्धितं मलरसेन नवेह मासान् ।
वर्चोगृहे कृमिरिवातिमलावलिप्ते
शुद्धिः कथं भवति तस्य जलप्लुतस्य ॥ ७४७ ॥

निन्द्येन वागविषयेण विनिःसृतस्य
न्यूनोन्नतेन कुथितादिभृतस्य गर्भे ।
मासान्नवाशुचिगृहे वपुषः स्थितस्य
शुद्धिं प्लुतस्य न जलैः शतशोऽपि सर्वैः ॥ ७४८ ॥

यन्निर्मितं कुथिततः कुथितेन पूर्णं
श्रोत्रैः सदा क्वथितमेव विमुञ्चतेऽङ्गम् ।
प्रक्षाल्यमानमपि मुञ्चति रोमकूपैः
प्रस्वेदवारि कथमस्य जलेन शुद्धिः ॥ ७४९ ॥

दुःखेन शुध्यति मशीवटिका यथा नो
दुःखं तु जातु मलिनत्वमिति स्वरूपम् ।
नागं विशुध्यति तथा सलिलेन धौतं
पानीयमेति नु मलीमसतां समस्तम् ॥ ७५० ॥

आकाशतः पतितमेत्य नदादिमध्यं
तत्रापि धावनसमुत्थमलावलिप्तम् ।
नानाविधावनिगताशुचिपूर्णमर्णो
यत्तेन शुद्धिमुपयाति कथं शरीरम् ॥ ७५१ ॥

मालाम्बराभरणभोजनमानिनीनां
लोकातिशायिकमनीयगुणान्वितानाम् ।
हानिं गुणाज्झटिति यान्ति यमाश्रितानां
देहस्य तस्य सलिलेन कथं विशुद्धिः ॥ ७५२ ॥

जन्त्विन्द्रियालमिदमत्र जलेन शौचं
केनापि दुष्टमतिना कथितं जनानाम् ।
यद्देहशुद्धिमपि कर्तुमलं जलं नो
तत्पापकर्म विनिहन्ति कथं हि सन्तः ॥ ७५३ ॥

मेरूपमानमधुपव्रजसेवितान्तं
चेज्जायते वियति कञ्जमनन्तपत्रम् ।
कायस्य जातु जलतो मलपूरितस्य
शुद्धिस्तदा भवति निन्द्यमलोद्भवस्य ॥ ७५४ ॥

किं भाषितेन बहुना न जलेन शुद्धि-
र्जन्मान्तरेण भवतीति विचिन्त्य सन्तः।
त्रेधा विमुच्य जलधौतकृताभिमानं
कुर्वन्तु बोधसलिलेन शुचित्वमत्र ॥ ७५५ ॥

दुष्टाष्टकर्ममलशुद्धिविधौ समर्थे
निःशेषलोकभवतापविघातदक्षे।
सज्ज्ञानदर्शनचरित्रजले विशाले
शौचं विदध्वमपि विध्य जलाभिषेकम् ॥ ७५६ ॥

निःशेषपापमलबाधनदक्षमर्च्यं
ज्ञानोदकं विनयशीलतटद्वयाढ्यम्।
चारित्रवीचिनिचयं मुदितामलत्वं
मिथ्यात्वमीनविकलं करुणाद्यगाधम् ॥ ७५७ ॥

सम्यक्त्वशीलमनघं जिनवाक्यतीर्थं
यत्तत्र चारुधिषणाः कुरुताभिषेकम्।
तीर्थाभिषेकवशतो मनसः कदाचि-
न्नान्तर्गतस्य हि मनागपि शुद्धबुद्धिः ॥ ७५८ ॥

चित्तं विशुद्ध्यति जलेन मलावलिप्तं
यो भाषतेऽनृतपरोऽस्ति जनो न यस्मात्।
बाह्यं मलं तनुगतं व्यपहन्ति नीरं
गन्धं शुभेतरमपीति वदन्ति सन्तः ॥ ७५९ ॥

वार्यग्निभस्मरविमन्त्रधरादिभेदा-
च्छुद्धिं वदन्ति बहुधा भुवि किंतु पुंसाम्।
सुज्ञानशीलशमसंयमशुद्धितोऽन्या
नो पापलेपमपहन्तु मलं विशुद्धिः ॥ ७६० ॥

रत्नत्रयामलजलेन करोति शुद्धिं
श्रुत्वा जिनेन्द्रमुखनिर्गतवाक्यतीर्थम्।

योऽन्तर्गतं निखिलकर्ममलं दुरन्तं
प्रक्षाल्य मोक्षसुखमप्रतिमं स याति ॥ ७६१ ॥

इति शौचनिरूपणम् ॥ ३० ॥

श्रीमज्जिनेश्वरं नत्वा सुरासुरनमस्कृतम् ।
श्रुतानुसारतो वक्ष्ये व्रतानि गृहमेधिनाम् ॥ ७६२ ॥
पञ्चधाणुव्रतं त्रेधा गुणव्रतमुदीरितम् ।
शिक्षाव्रतं चतुर्धा स्यादिति द्वादशधा स्मृतम् ॥ ७६३ ॥
शुद्धीन्द्रियाणि भेदेषु चतुर्धात्र सकायकाः ।
विज्ञाय रक्षणं तेषामहिंसाणुव्रतं मतम् ॥ ७६४ ॥
मद्यमांसमधुक्षीरक्षोणीरुहफलाशनम् ।
वर्जनीयं सदा सद्भिस्त्रसरक्षणतत्परैः ॥ ७६५ ॥
हिंस्यन्ते प्राणिनः सूक्ष्म्या यत्राशुच्यभिभक्षति ।
तद्रात्रिभोजनं सन्तो न कुर्वन्ति दयापराः ॥ ७६६ ॥
भेषजातिथिमन्त्रादिनिमित्तेनापि नाङ्गिनः ।
प्रथमाणुव्रताशक्तैर्हिंसनीयाः कदाचन ॥ ७६७ ॥
यतो निःशेषतो हन्ति स्थावरान्परिणामतः ।
त्रसान्पलायते ज्ञेयो विरताविरतस्ततः ॥ ७६८ ॥
क्रोधलोभमदद्वेषरागमोहादिकारणैः ।
असत्यस्य परित्यागः सत्याणुव्रतमुच्यते ॥ ७६९ ॥
प्रवर्तन्ते यतो दोषा हिंसारम्भभया दयाः ।
सत्यमपि न वक्तव्यं तद्वचः सत्यशालिभिः ॥ ७७० ॥
हासकर्कशपैशून्यनिष्ठुरादिवचोमुचः ।
द्वितीयाणुव्रतं पूतं देहिनो लभते स्थितिम् ॥ ७७१ ॥
यद्वदन्ति शठा धर्मं यन्म्लेच्छेष्वपि निन्दितम् ।
वर्जनीयं त्रिधा वाक्यमसत्यं तद्धितोद्यतैः ॥ ७७२ ॥
ग्रामादौ पतितस्याल्पप्रभृतेः परवस्तुनः ।
आदानं न त्रिधा यस्य तृतीयं तदणुव्रतम् ॥ ७७३ ॥

इह दुःखं नृपादिभ्यः परत्र नरकादितः ।
प्राप्नोति स्तेयतस्तेन स्तेयं त्याज्यं सदा बुधैः ॥ ७७४ ॥
जीवन्ति प्राणिनो येन द्रव्यतः सह बन्धुभिः ।
जीवितव्यं ततस्तेषां हरेत्तस्यापहारतः ॥ ७७५ ॥
येऽप्यहिंसादयो धर्मास्तेऽपि नश्यन्ति चौर्यतः ।
मत्वेति न त्रिधा ग्राह्यं परद्रव्यं विचक्षणैः ॥ ७७६ ॥
अर्था बहिश्चराः प्राणाः प्राणिनां येन सर्वथा ।
परद्रव्यं ततः सन्तः पश्यन्ति सदृशं मृदा ॥ ७७७ ॥
मातृस्वसृसुतातुल्या निरीक्ष्य परयोषितः ।
स्वकलत्रेण यस्तोषश्चतुर्थं तदणुव्रतम् ॥ ७७८ ॥
यार्गला स्वर्गमार्गस्य सरणिः श्वभ्रसद्मनि ।
कृष्णाहिदृष्टिवद्द्रोही दुःस्पर्शाग्निशिखेव या ॥ ७७९ ॥
दुःखानां विधिरन्यस्त्री सुखानां प्रलयानलः ।
व्याधिवद्दुःखवत्त्याज्या दूरतः सा नरोत्तमैः ॥ ७८० ॥
स्वभर्तारं परित्यज्य या परं याति निस्त्रपा ।
विश्वासं श्रयते तस्यां कथमन्यः स्वयोषिति ॥ ७८१ ॥
किं सुखं लभते मर्त्यः सेवमानः परस्त्रियम् ।
केवलं कर्म बध्नाति श्वभ्रभूम्यादिकारणम् ॥ ७८२ ॥
वर्चःसदनवत्तस्या जल्पने जघने तथा ।
निक्षिपन्ति मलं निन्द्यं निन्दनीया जनाः सदा ॥ ७८३ ॥
मद्यमांसादिसक्तस्य या विधाय विडम्बनम् ।
नीचस्यापि मुखं न्यस्ते दीना द्रव्यस्य लोभतः ॥ ७८४ ॥
तां वेश्यां सेवमानस्य मन्मथाकुलचेतसः ।
तन्मुखं चुम्बतः पुंसः कथं तस्याप्यणुव्रतम् ॥ ७८५ ॥
ततोऽसौ पण्यरमणी चतुर्थव्रतपालिना ।
यावज्जीवं परित्याज्या जाननिर्घृणमानसा ॥ ७८६ ॥
सद्मस्वर्णधराधान्यधेनुभृत्यादिवस्तुनः ।

या गृहीतिः प्रमाणेन पञ्चमं तदणुव्रतम् ॥ ७८७ ॥
दावानलसमो लोभो वर्धमानो दिवानिशम् ।
विधाप्य श्रावकैः सम्यक्संतोषो(?) ह्लादवारिणा ॥ ७८८ ॥
संतोषाश्लिष्टचित्तस्य यत्सुखं शाश्वतं शुभम् ।
कुतस्तृष्णागृहीतस्य तस्य लेशोऽपि विद्यते ॥ ७८९ ॥
यावत्परिग्रहं लाति तावद्धिंसोपजायते ।
विज्ञायेति विधातव्यं सङ्गः परिमितो बुधैः ॥ ७९० ॥
हिंसातो विरतिः सत्यमदत्तपरिवर्जनम् ।
स्वस्त्रीरतिः प्रमाणं च पञ्चधाणुव्रतं मतम् ॥ ७९१ ॥
यद्विधायावधिं दिक्षु दशस्वपि निजेच्छया ।
नाक्रामति पुनः प्रोक्तं प्रथमं तद्गुणं व्रतम् ॥ ७९२ ॥
वात्येव धावमानस्य निरवस्थस्य चेतसः ।
अवस्थानं कृतं तेन येन सा नियतिः कृता ॥ ७९३ ॥
त्रसस्थावरजीवानां रक्षातः परतस्ततः ।
महाव्रतत्वमित्येवं श्रावकस्यापि तत्त्वतः ॥ ७९४ ॥
चेतो निवारितं येन धावमानमितस्ततः ।
किं न लब्धं सुखं तेन संतोषामृतलाभतः ॥ ७९५ ॥
यदि विज्ञानतः कृत्वा देशावधिमहर्निशम् ।
नोल्लङ्घ्यते पुनः पुंसां द्वितीयं तद्गुणव्रतम् ॥ ७९६ ॥
महाव्रतत्वमत्रापि वाच्यं तत्त्वविधानतः ।
परतो लोभनिर्मुक्तो लाभे सत्यपि तत्त्वतः ॥ ७९७ ॥
शक्यते गदितुं केन सत्यं तस्य महात्मनः ।
तृणवत्त्यज्यते येन लब्धोऽप्यर्थो व्रतार्थिना ॥ ७९८ ॥
लूना तृष्णालतास्तेन वर्धिता धृतिवल्लरी ।
देशतो विरतिर्येन कृता नित्यमखण्डिता ॥ ७९९ ॥
पञ्चधानर्थदण्डस्य परं पापोपकारिणः ।
क्रियते यः परित्यागस्तृतीयं तद्गुणव्रतम् ॥ ८०० ॥

दुष्टश्रुतिरपध्यानं पापकर्मोपदेशनम् ।
प्रमादः शस्त्रदानं च पञ्चानर्था भवन्त्यमी ॥ ८०१ ॥
शारिकाशिखिमार्जारताम्रचूडशुकादयः ।
अनर्थकारिणस्त्याज्या बहुदोषा मनीषिभिः ॥ ८०२ ॥
नीलीमदनलाक्षायःप्रभूताग्निविषादयः ।
अनर्थकारिणस्त्याज्या बहुदोषा मनीषिभिः ॥ ८०३ ॥
दिग्देशानर्थदण्डेभ्यो विरतिर्या विधीयते ।
जिनेश्वरसमाख्यातं त्रिविधं तद्गुणव्रतम् ॥ ८०४ ॥
नमस्कारादिकं ज्ञेयं शरणोत्तममङ्गलम् ।
संध्यानत्रितये शश्वदेकाग्रकृतचेतसा ॥ ८०५ ॥
सर्वारम्भं परित्यज्य कृत्वा द्रव्यादिशोधनम् ।
आवश्यकं विधातव्यं व्रतशुद्ध्यर्थमुत्तमैः ॥ ८०६ ॥
व्यासनद्वादशावर्ताश्चतुर्मस्तकसंनतिः ।
त्रिविशुद्ध्या विधातव्या वन्दना स्वहितोद्यतैः ॥ ८०७ ॥
चत्वारि सन्ति पर्वाणि मासे तेषु विधीयते ।
उपवासः सदा यस्तत्प्रौषधव्रतमीर्यते ॥ ८०८ ॥
त्यक्तभोगोपभोगेऽस्य सर्वारम्भविमोचिनः ।
चतुर्विधाशनत्याग उपवासो मतो जिनैः ॥ ८०९ ॥
अभुक्त्यनुपवासैकभुक्तयो भक्तितत्परैः ।
क्रियन्ते कर्मनाशाय मासे पर्वचतुष्टये ॥ ८१० ॥
कर्मेन्धनं यदज्ञानात्संचितं जन्म कानने ।
उपवासशिखी सर्वं तद्भस्मीकुरुते क्षणात् ॥ ८११ ॥
भोगोपभोगसंख्यानं क्रियते यद्धितात्मना ।
भोगोपभोगसंख्यानं तच्छिक्षया व्रतमुच्यते ॥ ८१२ ॥
आहारपानताम्बूलगन्धमाल्यफलादयः ।
भुज्यन्ते यत्सभोगश्च तन्मतः साधुसत्तमैः ॥ ८१३ ॥
वाहनाशनपल्यङ्कस्त्रीवस्त्राभरणादयः ।

भुज्यन्तेऽनेकधा यस्मादुपभोगाय ते मताः ॥ ८१४ ॥
सन्तो यो भाषितस्तेन वैराग्यमपि दर्शितम् ।
भोगोपभोगसंख्यानं व्रतं येन स धार्यते ॥ ८१५ ॥
चतुर्विधो वराहारो दीयते संयतात्मनाम् ।
शिक्षाव्रतं तदाख्यातं चतुर्थं गृहमेधिनाम् ॥ ८१६ ॥
स्वयमेव गृहं साधुर्योऽत्रात(न्व)तति संयतः ।
अन्वर्थवेदिभिः प्रोक्तः सोऽतिथिर्मुनिपुंगवैः ॥ ८१७ ॥
श्रद्धातुष्टिभक्तिविज्ञानतितिक्षाभक्त्यलुब्धता ।
एते गुणा हितोद्युक्तैर्भ्रियन्तेऽतिथिपूजनैः ॥ ८१८ ॥
प्रतिग्रहोच्चदेशाङ्घ्रिक्षालनं पूजनं नतिः ।
त्रिशुद्धिरन्नशुद्धिश्च पुण्याय नवधा विधिः ॥ ८१९ ॥
सामायिकादिभेदेन शिक्षाव्रतमुदीरितम् ।
चतुर्धेति गृहस्थेन रक्षणीयं हितैषिणा ॥ ८२० ॥
द्वादशाणुव्रतान्येवं कथितानि जिनेश्वरैः ।
गृहस्थैः पालनीयानि भवदुःखं जिहासुभिः ॥ ८२१ ॥
स्वकीयं जीवितं ज्ञात्वा त्यक्त्वा सर्वां मनःक्षितिम् ।
बन्धूनापृच्छ्य निःशेषांस्त्यक्त्वा देहादिमूर्छनाम् ॥ ८२२ ॥
बाह्यमभ्यन्तरं सङ्गं मुक्त्वा सर्वं विधानतः ।
विधायालोचनां शुद्धां हृदि न्यस्य नमस्कृतिम् ॥ ८२३ ॥
जिनेश्वरक्रमाम्भोजभूरिभक्तिभरानतैः ।
सल्लेखना विधातव्या मृत्युतो नरसत्तमैः ॥ ८२४ ॥
दुर्लभं सर्वदुःखानां नाशकं बुधपूजितम् ।
सम्यक्त्वं रत्नवद्धार्यं संसारान्तं यियासुभिः ॥ ८२५ ॥
षड्द्रव्याणि पदार्थांश्च नवतत्त्वादिभेदतः ।
जायते श्रद्दधज्जीवः सम्यग्दृष्टिर्न संशयः ॥ ८२६ ॥
अतीतेऽनन्तशः काले जीवेन भ्रमता भवे ।
कानि दुःखानि नाप्तानि विना जैनेन्द्रशासनम् ॥ ८२७ ॥

निर्ग्रन्थं निर्मलं तथ्यं पूतं जैनेन्द्रशासनम् ।
मोक्षवर्त्मेति कर्तव्या मतिस्तेन विचक्षणैः ॥ ८२८ ॥
ज्योतिर्भावनभौमेषु षट्स्वधः श्वभ्रभूमिषु ।
जायते स्त्रीषु सद्दृष्टिर्न मिथ्या द्वादशाङ्गिषु ॥ ८२९ ॥
एकमपि क्षणं लब्ध्वा सम्यक्त्वं यो विमुञ्चति ।
संसारार्णवमुत्तीर्य लभते सोऽपि निर्वृतिम् ॥ ८३० ॥
रोचते दर्शितं तत्त्वं जीवः सम्यक्त्वभावितः ।
संसारादुद्वेगमापन्नः संवेगादिगुणान्वितः ॥ ८३१ ॥
यत्किंचिद्दृश्यते लोके प्रशस्तं सचराचरम् ।
तत्सर्वं लभते जीवः सम्यक्त्वामलरत्नयः ॥ ८३२ ॥
शङ्कादिदोषनिर्मुक्तं संवेगादिगुणान्वितम् ।
यो धत्ते दर्शनं सोऽत्र दर्शनी कथितो जिनैः ॥ ८३३ ॥
दुरन्तासारसंसारजनितासातसंततेः ।
यो भीतोऽणुव्रतं याति व्रतिनं तं विदुर्बुधाः ॥ ८३४ ॥
आर्तरौद्रपरित्यक्तस्त्रिकालं विदधाति यः ।
सामायिकं विशुद्धात्मा स सामायिकवान्मतः ॥ ८३५ ॥
मासे चत्वारि पर्वाणि तेषु यः कुरुते सदा ।
उपवासं निरारम्भः प्रोषधीः स मतो जिनैः ॥ ८३६ ॥
न भक्षयति योऽपक्कं कन्दमूलफलादिकम् ।
संयमासक्तचेतस्कः सचित्तात्स पराङ्मुखः ॥ ८३७ ॥
मैथुनं भजते मर्त्यो न दिवा यः कदाचन ।
दिवामैथुननिर्मुक्तः स बुधैः परिकीर्तितः ॥ ८३८ ॥
संसारभयमापन्नो मैथुनं भजते न यः ।
सदा वैराग्यमारूढो ब्रह्मचारी स भण्यते ॥ ८३९ ॥
निरारम्भः स विज्ञेयो मुनीन्द्रैर्हतकल्मषैः ।
कृपालुः सर्वजीवानां नारम्भं विदधाति यः ॥ ८४० ॥

संसारद्रुममूलेन किमनेन ममेति यः ।
निःशेषं त्यजति ग्रन्थं निर्ग्रन्थं तं विदुर्जिनाः ॥ ८४१ ॥
सर्वदा पापकार्येषु कुरुते नु मतिं न यः ।
तेनानुमननं युक्तं भण्यते बुद्धिशालिना ॥ ८४२ ॥
स्वनिमित्तं त्रिधा येन कारितोऽनुमतः कृतः ।
नाहारो गृह्यते पुंसा त्यक्तोद्दिष्टः स भण्यते ॥ ८४३ ॥
एकादश गुणानेवं धत्ते यः क्रमतो नरः ।
मर्त्यामरश्रियं भुक्त्वा यात्यसौ मोक्षमव्ययम् ॥ ८४४ ॥
वधो रोधोऽन्नपानस्य गुरुभारातिरोहणम् ।
बन्धच्छेदौ मलाः पंच प्रथमव्रतगोचराः ॥ ८४५ ॥
कूटलेखक्रिया मिथ्या देशनं न्यासलोपनम् ।
पैशून्यं मन्त्रभेदश्च द्वितीयव्रतगा मलाः ॥ ८४६ ॥
स्तेनानीतसमादानं स्तेनानामनुयोजनम् ।
विरुद्धेति क्रमो राज्ये कूटमानादिकल्पनम् ॥ ८४७ ॥
कृत्रिमव्यवहारश्च तृतीयव्रतसंभवाः ।
अतिचारा जिनैः पञ्च गदिता धुतकर्मभिः ॥ ८४८ ॥
अनङ्गसेवनं तीव्रमन्मथाभिनिवेशनम् ।
गमनं पुंश्चलीनार्योः स्वीकृतेतररूपयोः ॥ ८४९ ॥
अन्यदीयविवाहस्य विधानं जिनपुंगवैः ।
अतिचारा मताः पञ्च चतुर्थव्रतसंभवाः ॥ ८५० ॥
हिरण्यस्वर्णयोर्वास्तुक्षेत्रयोर्धनधान्ययोः ।
कुप्यस्य दासदास्योश्च प्रमाणेति क्रमाद्विधा ॥ ८५१ ॥
अतिचारा जिनैः प्रोक्ताः पञ्चामी पञ्चमे व्रते ।
वर्जनीयाः प्रयत्नेन व्रतरक्षाविचक्षणैः ॥ ८५२ ॥
क्षेत्रस्य वर्धनं तिर्यगूर्ध्वाधोव्यतिलङ्घनम् ।
स्मृत्यन्तरविधिः पञ्च मता दिग्विरतेर्मलाः ॥ ८५३ ॥

अनीतिपुद्गलक्षेपाः प्रेक्ष्य लोकानुयोजनम् ।
शब्दरूपानुपातौ च स्युर्देशविरतेर्मलाः ॥ ८५४ ॥
असमीक्षक्रियाभोगोपभोगानर्थकारिता ।
बहुसंबन्धभाषित्वं कौत्कुच्यं मदनार्द्रता ॥ ८५५ ॥
पञ्चैतेऽनर्थदण्डस्य विरतेः कथिता मलाः ।
समस्तवस्तुविस्तारवेदिभिर्जिनपुंगवैः ॥ ८५६ ॥
अस्थिरत्वास्मृतं योगदुष्क्रियानादरा मलाः ।
सामायिकव्रतस्यैते मताः पञ्च जिनेश्वरैः ॥ ८५७ ॥
अदृष्टमार्जितोत्सर्गादानसंस्तरकक्रियाम् ।
अस्मृत्वानादरौ पञ्च प्रोषधस्य मला मताः ॥ ८५८ ॥
सचित्तमिश्रसंबन्धदुष्पक्वामिषवासिता ।
भोगोपभोगसंख्याया मलाः पञ्च निवेदिताः ॥ ८५९ ॥
सचित्ताच्छादनिक्षेपकालातिक्रममत्सराः ।
सहान्यव्यपदेशेन दाने पञ्च मला मताः ॥ ८६० ॥
पञ्चत्वजीविताशंसो मित्ररागसुखाग्रहः ।
निदानं चेति निर्दिष्टं संन्यासे मलपञ्चकम् ॥ ८६१ ॥
शङ्काकाङ्क्षाचिकित्सादिप्रशंसासंस्तवा मलाः ।
पञ्चमे दर्शनस्योक्ता जिनेन्द्रैर्धुतकल्मषैः ॥ ८६२ ॥
इत्येवं सप्ततिः प्रोक्ता मलानाममलाशयैः ।
तस्य व्युदासतो धार्यं श्रावकैर्व्रतमुत्तमम् ॥ ८६३ ॥
यो दधाति नरो पूतं श्रावकव्रतमर्चितम् ।
मर्त्यामरश्रियं प्राप्य यात्यसौ मोक्षमव्ययम् ॥ ८६४ ॥
भ्रूनेत्राङ्गुलिहुंकारशिरःसंख्याद्यपाकृतम् ।
कुर्वद्भिर्भोजनं कार्यं श्रावकैर्मौनमुत्तमम् ॥ ८६५ ॥
शरच्चन्द्रसमां कीर्तिं मैत्रीं सर्वजनानुगाम् ।
कन्दर्पसमरूपत्वं धीरत्वं बुधपूज्यताम् ॥ ८६६ ॥

आदेयत्वमरोगित्वं सर्वसत्त्वानुकम्पिता ।
धनं धान्यं धरा धाम सौख्यं सर्वजनाधिकम् ॥ ८६७ ॥
गम्भीरां मधुरां वाणीं सर्वश्रोत्रमनोहराम् ।
निःशेषशास्त्रनिष्णातां बुद्धिं ध्वस्ततमोमलाम् ॥ ८६८ ॥
घण्टाकाहलभृङ्गारचन्द्रोपकपुरःसरम् ।
विधाय पूजनं देयं भक्तितो जिनसद्मनि ॥ ८६९ ॥
चतुर्विधस्य संघस्य भक्त्यारोपितमानसैः ।
दानं चतुर्विधं देयं संसारोच्छेदमिच्छुभिः ॥ ८७० ॥
यावज्जीवं जनो मौनं विधत्ते चातिभक्तितः ।
नोद्द्योतनं परं कृत्वा निर्वाहात्कथितं जनैः ॥ ८७१ ॥
एवं त्रिधापि यो मौनं विधत्ते विधिवन्नरः ।
न दुर्लभं त्रिलोकेऽपि विद्यते तस्य किंचन ॥ ८७२ ॥
विचित्रशिखराधारं विचित्रध्वजमण्डितम् ।
विधातव्यं जिनेन्द्राणां मन्दिरं मन्दिरोपमम् ॥ ८७३ ॥
येनेह कारितं सौधं जिनभक्तिमता भुवि ।
स्वर्गापवर्गसौख्यानि तेन हस्ते कृतानि वै ॥ ८७४ ॥
यावत्तिष्ठति जैनेन्द्रमन्दिरं धरणीतले ।
धर्मस्थितिः कृता तावज्जैनसौधविधायिना ॥ ८७५ ॥
येनाङ्गुष्ठप्रमाणार्च्या जैनेन्द्री क्रियतेऽङ्गिना ।
तस्याप्यनश्वरी लक्ष्मीर्न दूरे जातु जायते ॥ ८७६ ॥
यः करोति जिनेन्द्राणां पूजनं स्नपनं नरः ।
स पूजामाप्य निःशेषां लभते शाश्वतीं श्रियम् ॥ ८७७ ॥
सम्यक्त्वज्ञानभाजो जिनपतिकथितं ध्वस्तदोषप्रपञ्चं
संसारासारभीता विदधति सुधियो ये व्रतं श्रावकीयम् ।
भुक्त्वा भोगान्नरोगान्वरयुवतियुताः स्वर्गमर्त्येश्वराणां
ते नित्यानन्तसौख्यं शिवपदमपदं व्यापदं यान्ति मर्त्याः ॥ ८७८ ॥

इति श्रावकधर्मनिरूपणम् ॥ ३१ ॥

प्रणम्य सर्वज्ञमनन्तमीश्वरं जिनेन्द्रचन्द्रं धुतकर्मबन्धनम् ।
विनाश्यते येन दुरन्तसंसृतिस्तदुच्यते मोहतमोपहं तमः ॥ ८७९ ॥
विनिर्मलानन्तसुखैककारणं दुरन्तदुःखानलवारिदागमम् ।
द्विधा तपोभ्यन्तरबाह्यभेदतो वदन्ति षोढा पुनरेकशो जिनाः ॥८८०॥
करोति साधुर्निरपेक्षमानसो विमुक्तये मन्मथशत्रुशान्तये ।
तदात्मशक्त्यानशनं तपस्यता विधीयते येन मनःकपिर्वशम् ॥ ८८१ ॥
शमाय रागस्य वशाय चेतसो जयाय निद्रातमसो बलीयसः ।
श्रुताप्तये संयमसाधनाय च तपो विधत्ते मितिभोजनं मुनिः ॥ ८८२ ॥
विचित्रसंकल्पलतां विशालिनीं यतो यतिर्दुःखपरम्पराफलम् ।
लुनाति तृष्णाव्रततिं समूलतस्तदेव वेश्मादिनिरोधनं तपः ॥ ८८३ ॥
विजित्य लोकं निखिलं सुरेश्वरा वशं न नेतुं प्रभवो भवन्ति ये ।
प्रयाति येनाक्षगणः स वश्यतां रसोज्झनं तन्निगदन्ति साधवः ॥८८४॥
विचित्रभेदा तनुबाधनक्रिया विधीयते या श्रुतिसूचितक्रमात् ।
तपस्तनुक्लेशमदः प्रचक्ष्यते मनस्तनुक्लेशविनाशनक्षमम् ॥ ८८५ ॥
यदासनं स्त्रीपशुषण्ढवर्जितो मुनिर्निवासे पठनादिसिद्धये ।
विविक्तशय्यासनसंज्ञिकं तपस्तपोधनस्तद्विदधाति मुक्तये ॥ ८८६ ॥
मनोवचःकायवशादुपागतो विशोध्यते येन मलो मनीषिभिः ।
श्रुतानुरूपं मलशोधनं तपो विधीयते तद्व्रतशुद्धिहेतवे ॥ ८८७ ॥
प्रयाति रत्नत्रयमुज्ज्वलं तपो यतो हिनस्त्यर्जितकर्म सर्वथा ।
यतः सुखं नित्यमुपैति पावनं विधीयतेऽसौ विनयो यतीश्वरैः ॥८८८॥
तपोधनानां व्रतशीलशालिनामनेकरोगादिनिपीडितात्मनाम् ।
शरीरतो प्राशुकभेषजेन च विधीयते व्यापृथिरुज्ज्वलादरात् ॥ ८८९ ॥
नियम्यते येन मनोऽतिचञ्चलं विलीयते येन पुरार्जितं रजः ।
विहीयते येन भवाश्रवोऽखिलः स्वधीयते तज्जिनवाक्यमर्चितम् ॥८९०॥
ददाति यत्सौख्यमनन्तमव्ययं तनोति बोधं भुवनावबोधकम् ।
क्षणेन भस्मीकुरुते च पातकं विधीयते ध्यानमिदं तपोधनैः ॥ ८९१ ॥

यतो जनो भ्राम्यति जन्मकानने यतो न सौख्यं लभते कदाचन ।
यतो व्रतं नश्यति मुक्तिकारणं परिग्रहोऽसौ द्विविधो विमुच्यते ॥ ८९२ ॥
इदं तपो द्वादशभेदमर्चितं प्रशस्तकल्याणपरम्पराकरम् ।
विधीयते यैर्मुनिभिस्तमोपहं न लभ्यते तैः किमु सौख्यमव्ययम् ॥ ८९३ ॥
तपोनुभावो न किमत्र बुध्यते विशुद्धबोधैरियताक्षगोचरैः ।
यदन्यनिःशेषगुणैरपाकृतं तपोधिकश्चेज्जगतापि पूज्यते ॥ ८९४ ॥
विवेकिलोकैस्तपसो दिवानिशं विधीयमानस्य विलोकितां गुणः ।
तपो विधत्ते स्वहिताय मानवः समस्तलोकस्य च जायते प्रियः ॥ ८९५ ॥
तनोति धर्मं विधुनोति कल्मषं हिनस्ति दुःखं विदधाति संमदम् ।
चिनोति सत्त्वं विनिहन्ति तामसं तपोऽथवा किं न करोति देहिनाम् ८९६
अवाप्य नृत्वं भवकोटिदुर्लभं न कुर्वते ये जिनभाषितं तपः ।
महार्घरत्नाकरमेत्य सागरं वजन्ति ते गारमरत्नसंग्रहाः ॥ ८९७ ॥
अपारसंसारसमुद्रतारकं न तन्वते ये विषयाकुलास्तपः ।
विहाय ते हस्तगतामृतं स्फुटं पिबन्ति मूढाः सुखलिप्सया विषम् ॥ ८९८ ॥
जिनेन्द्रचन्द्रोदितमस्तदूषणं कषायमुक्तं विदधाति यस्तपः ।
न दुर्लभं तस्य समस्तविष्टपे प्रजायते वस्तु मनोज्ञमीप्सितम् ॥ ८९९ ॥
अहो दुरन्ताय गतो विमूढतां विलोक्य तां संसृतिदुःखदायिनीम् ।
सुसाध्यमप्यन्नविधानतस्तपो यतो जनो दुःखकरोऽवमन्यते ॥ ९०० ॥
कृतः श्रमश्चेद्विफलो न जायते कृतः श्रमश्चेद्ददतेऽनघं सुखम् ।
कृतः श्रमश्चेद्विवृते फलाय च न स श्रमः संसुजनेन मन्यते ॥ ९०१ ॥
श्रमं विना नास्ति महाफलोदयः श्रमं विना नास्ति सुखं कदाचन ।
यतस्ततः साधुजनैस्तपःश्रमो न मन्यतेऽनन्तसुखो महाफलः ॥ ९०२ ॥
अहर्निशं जागरणोद्यतो जनः श्रमं विधत्ते विषयेच्छया यथा ।
तपःश्रमं चेत्कुरुते तथा क्षणं किमश्नुतेऽनन्तसुखं न पावनम् ॥ ९०३ ॥
समस्तदुःखक्षयकारणं तपो विमुच्य योगी विषयान्निषेवते ।
विहाय सोऽनर्घ्यमणिं सुखावहं विचेतनः स्वीकुरुते बतोपलम् ॥ ९०४ ॥

अनिष्टयोगात्प्रियविप्रयोगतः परापमानाद्धनहीनजीवितात् ।
अनेकजन्मव्यसनप्रबन्धतो बिभेति नो यस्तपसो बिभेति सः ॥ १०५ ॥

न बान्धवा न स्वजना न वल्लभा न भृत्यवर्गाः सुहृदो न चाङ्गजाः ।
शरीरिणस्तद्वितरन्ति सर्वथा तपो जिनोक्तं विदधाति यत्फलम् ॥ १०६ ॥

भुक्त्वा भोगानरोगानमरयुवतिभिर्भ्राजिते स्वर्गवासे
मर्त्यावासेऽप्यनर्घ्याङ्गशशिविशदयशोराशिशुक्लीकृताशः ।
यात्यन्तेऽनन्तसौख्यां विबुधजननुतां मुक्तिकान्तां यतोऽङ्गी
जैनेन्द्रं तत्तपोऽलं धुतकलिलमलं मङ्गलं नस्तनोतु ॥ १०७ ॥

दुःखक्षोणीरुहाढ्यं दहति भववनं यच्छिखीवोद्यदर्चि-
र्यत्पूतं धूतबाधं वितरति परमं शाश्वतं मुक्तिसौख्यम् ।
जन्मारिं हन्तुकामा मदनमदभिदस्त्यक्तनिःशेषसङ्गा-
स्तज्जैनेशं तपो ये विदधति यतयस्ते मनो नः पुनन्तु ॥ १०८ ॥

जीवाजीवादितत्त्वप्रकटनपटवो ध्वस्तकन्दर्पदर्पा
निर्धूतक्रोधयोधा मुदि मदितमदा हृद्यविद्यानवद्या ।
ये तप्यन्तेऽनपेक्षं जिनगदिततपोमुक्तये मुक्तसङ्गा-
स्ते मुक्तिं मुक्तबाधाममितगतिगुणाः साधवो नो दिशन्तु ॥१०९॥

ये विश्वं जन्ममृत्युव्यसनशिखिशिखालीढमालोक्य लोकं
संसारोद्वेगवेगप्रचकितमनसः पुत्रमित्रादिकेषु ।
मोहं मुक्त्वा नितान्तं धृतविपुलशमाः सद्मवासं निरस्य
याताश्चारित्रकृत्यै धृतिविमलधियस्तान्स्तुवे साधुमुख्यान् ॥ ११० ॥

यस्मिञ्शुम्भद्वनोत्थज्वलनकवलनाद्भस्मतां यान्त्यघौघाः
प्रोद्यन्मार्तण्डचण्डस्फुरदुरुकिरणाकीर्णदिक्चक्रवालाः ।
भूमिर्भूत्यां समन्तादुपचिततपनासंयता ग्रीष्मकाले
तस्मिंश्चैलाग्रमुग्रं धृतविततधृतिच्छत्रकाः प्रश्रयन्ते ॥ १११ ॥

चञ्चद्विद्युत्कलत्राः प्रचुरकरविकावर्णधाराः क्षिपन्ते
यत्रेन्द्रेष्वासचित्राबधिरितककुभो मेघसंघा नदन्ति ।

दलितमदनशत्रोर्भव्यनिर्व्याजबन्धोः
शमदमयममूर्तिश्चन्द्रशुभ्रोरुकीर्तिः ।
अमितगतिरभूद्यस्तस्य शिष्यो विपश्चि-
द्विरचितमिदमर्थ्यं तेन शास्त्रं पवित्रम् ॥ ९१९ ॥

यः सुभाषितसंदोहं शास्त्रं पठति भक्तितः ।
केवलज्ञानमासाद्य यात्यसौ मोक्षमक्षयम् ॥ ९२० ॥

यावच्चन्द्रदिवाकरौ दिवि गतौ भिन्नस्तमः शार्वरं
यावन्मेरुतरङ्गिणीपरिदृढौ नो मुञ्चतः स्वस्थितिम् ।
यावद्याति तरङ्गभङ्गुरतनुर्गङ्गा हिमाद्रेर्भुवं
तावच्छास्त्रमिदं करोतु विदुषां पृथ्वीतले संमदम् ॥ ९२१ ॥

समारूढे पूतत्रिदशवसतिं विक्रमनृपे
सहस्रे वर्षाणां प्रभवति हि पञ्चाशदधिके(१०५०) ।
समाप्ते पञ्चम्यामवति धरणीं मुञ्जनृपतौ
सिते पक्षे पौषे बुधहितमिदं शास्त्रमनघम् ॥ ९२२ ॥

इत्यमितगतिविरचितसुभाषितरत्नसंदोहः समाप्तः ।

व्यस्ताशाकाशदेशास्तरुतलमचलाः संश्रयन्ते क्षपासु
  तत्रानेहस्यसङ्गाः सततगतिकृतारावभीमास्वभीताः ॥ ९१२ ॥
यत्र प्रालेयराशिद्रुमनलिनवनोन्मूलनोद्यत्प्रमाणः
  सात्कारं दन्तवीणारुचिकृतिचतुरः प्राणिनां वाति वातः ।
विस्तीर्याङ्गं समग्रं प्रगतधृतिचतुर्वर्त्मगा योगिवर्या-
  स्ते ध्यानासक्तचित्ताः पुरुशिशिरनिशाः शीतलाः प्रेरयन्ति॥९१३॥
चञ्चच्चारित्रचक्रप्रविचितचतुराः प्रोचवो(?)र्वीप्रचर्च्या
  पञ्चाचारे प्रचारः प्रचुररुचिचयाश्चारुचित्रत्रियोगाः ।
वाचामुच्चैः प्रपञ्चै रुचिरविरचनैरर्चनीयैरवर्च्यै
  नित्यर्च्यं प्रार्च्यनानः पदमचलमनूनानकाश्चार्पयन्तु ॥ ९१४ ॥
आशीर्विध्वस्तकन्तोर्विपुलशमभृतः श्रीमतः कान्तकीर्तेः
  सूरेर्यातस्य पारं श्रुतसलिलनिधेर्देवसेनस्य शिष्यः ।
विज्ञाताशेषशास्त्रो व्रतसमितिभृतामग्रणीरस्तकोपः
  श्रीमान्मान्यो मुनीनाममितगतियतिस्त्यक्तनिःशेषसङ्गः ॥ ९१५ ॥

इति द्वादशविधश्रावकधर्मनिरूपणम् ॥ ३२ ॥

अलङ्घ्यमहिमालयो विपुलसत्त्ववाराक्षिति-
  र्वरस्थिरगभीरतो गुणमणिः पयोवारिधिः ।
समस्तजनता सतां श्रियमनश्वरीं देहिनां
  सदा मतजलच्युतो विबुधसेवितो दत्तवान् ॥ ९१६ ॥
तस्य ज्ञानसमस्तशास्त्रसमयः शिष्यः सतामग्रणीः
  श्रीमान्माथुरसंघसाधुतिलकः श्रीनेमिषेणोऽभवत् ।
शिष्यस्तस्य महात्मनः शमयुतो निर्धूतमोहद्विषः
  श्रीमान्माधवसेनसूरिरभवत्क्षोणीतले पूजितः ॥ ९१७ ॥
कोपारातिविघातकोऽपि सकृपः सोमोऽप्यदोषाकरो
  जैनोऽप्युग्रतरस्तपोगतभयो भीतोऽपि संसारतः ।
निष्कामोऽपि समिष्टमुक्तिवनितायुक्तोऽपि यः संयतः
  सत्यारोपितमानसो धृततृषोऽप्यर्च्यप्रियोऽप्यप्रियः ॥ ९१८ ॥

	कि. रु. आ.	
थकृत घण्टापथटीकेसहित … …	२	।·
कुमारसंभव काव्य—कालिदासकृत, मल्लिनाथकृत (१-८ सर्ग) व सीतारामकृत (८-१७ स.) संजीविनी टीकेसहित … …	२	।·
कुवलयानंदकारिका—आशाधरकृत; स्वकृत अलंकारदीपिकाटीकेसहित … … …	।॥·	≈
कृष्णसहस्रनाम … …	≈	॥
गणपतिस्तोत्र … …	।	॥
गणेशाष्टक … …	।	॥
गणेशगीता (सार्था)	≈।	॥
„ (रे. पु.)… …	।·।	॥
गणेशसहस्रनामावलि	॥	॥
गोपालसहस्रनाम, गोपालकवच व गोपालस्तवराज यांसहित	≈।	॥
„ (रेशमी पुट्ठा) … …	।·॥	॥
चतुःश्लोकी भागवत	।	॥
जैनस्तोत्रसंग्रह (यांत भक्तामरस्तोत्र, कल्याणमंदिरस्तोत्र, एकीभावस्तोत्र, विषापहारस्तोत्र व जिनचतुर्विंशतिका इतकीं स्तोत्रें आहेत.) … …	।·	॥
ज्योतिर्लिंगस्तोत्र व शिवमानसपूजा… …	॥	॥
तर्ककौमुदी—लौगाक्षिभास्करकृत … …	≈	॥
तर्कसंग्रह—अन्नंभट्टकृत, स्वकृत दीपिका टीका, व इंग्रजी भाषांतर यांसहित … …	।≈	≈
तुलसीमाहात्म्य …	॥	॥
त्रिकालसंध्या हिरण्यकेशीया (आपस्तंबी)	।॥	॥
„ ऋग्वेदीया	।॥	॥
दत्तात्रेयसहस्रनामावलि	≈	॥
दत्तात्रेयस्तोत्र … …	।	॥
दमयंतीकथा (नलचंपू)—त्रिविक्रमभट्टकृत, चण्डपालकृत विषमपदप्रकाश टीकेसहित	२	।·
दशकुमारचरित—दण्डिकृत, पूर्वपीठिका, उत्तरपीठिका, कवीन्द्रसरस्वतीकृत पदचन्द्रिकाटीका, शिवराभकृत भूषणाटीका, लघुदीपिकाटीका (दशकुमारचरितावर) व पदचन्द्रिकाटीका (पूर्वपीठिकेवर) यांसहित … …	१॥	≈
दुर्गास्तोत्र—नारायणभट्टपर्वणीकरकृत …	≈	॥
देवीसहस्रनामावलि	॥	॥
द्वादशस्तोत्र—भगवत्पादाचार्यकृत … …	≈	॥
धातुरूपावलि … …	≈	॥
श्रीहर्षविरचित नैषधीयचरित—नैषधीयप्रकाशाख्य (नारायणी) टीकेसहित …	६	॥
नर्मदाष्टकस्तोत्र शंकराचार्यकृत … …	।	॥
नारदभक्तिसूत्रें …	≈	॥
नीतिशतक—भर्तृहरिकृत, कृष्णशास्त्री महाबलकृत टीकेसहित …	।	॥

	कि.	ट. ख.
नीति-शृङ्गार-वैराग्य-शतकें-भर्तृहरिकृत, कृष्णशास्त्री महाबलकृत टीकेसहित ...	।।।।	०–
पंचरत्नी गीता (यांत भगवद्गीता, विष्णुसहस्त्रनाम, भीष्मस्तवराज, अनुस्मृति व गजेंद्रमोक्ष इतकीं प्रकरणें आहेत.) (रे. पु.) (स्थूलाक्षर)...	१	०≡
,, ,, (मध्यमाक्षर)	।।।	०–
,, ,, (सूक्ष्माक्षर)	।≡	०–
,, (साधी)	।=	०–
पांडवगीता	०–	०॥
पार्वतीपरिणय नाटक–बाणकृत	।।	०॥
प्रश्नोत्तरपयोनिधि–बलरामदासमुनिकृत ...	।	०॥
प्रसन्नराघव नाटक–जयदेवकृत	।।।।	०–
प्रातःस्मरण	०–	०॥
पुरुषोत्तम सहस्रनाम..	०–	०॥
बृहत्स्तोत्ररत्नाकरः ...	।≡	०–
,, (कापडी)	।।=	०–
ब्रह्मनामावलि–शंकराचार्यकृत	०।	०॥
श्रीमद्भागवत मूळ (रेशमी गुटका) ...	१।।।	०≡॥
भगवद्गीता (रेशमी पुठ्ठा स्थूलाक्षर)	।।।।	०=॥
,, (मध्यमाक्षर रे. पु.)	।=	०॥
,, ,, (सूक्ष्माक्षर)	।–	०॥
साधी (मध्यमाक्षर) ...	०≡	०॥
,, बुकमाइज (म. अ.)	०≡	०॥
,, शंकरानंदसरस्वतीकृत गीतातात्पर्यबो-		

	कि.	ट. ख.
धिनीटीकेसहित ...	५	।≡
भट्टिकाव्य–भट्टिकृत, जयमङ्गलकृत जयमङ्गला टीकेसहित ...	३	।।
भट्टिकाव्याचा १४ वा व १५ वा सर्ग इंग्रजी टीपांसहित. प्रत्येक सर्गास	।।	०॥
पंडितराज जगन्नाथ विरचित भामिनीविलास काव्य अच्युतराव मोडककृत प्रणयप्रकाश टीकेसहित. ...	१	०–
मनुस्मृति–कुल्लुकभट्टकृत मन्वर्थमुक्तावलि टीकेसहित...	३	।।
महालक्ष्म्यष्टक	०।	०॥
महावीरचरितनाटक–भवभूतिकृत, वीरराघवकृत टीकेसहित ...	१।।	०=
मालतीमाधव नाटक–भवभूतिकृत, त्रिपुरारिकृत टीका, नान्यदेवकृत टीका व जगद्धरकृत टीका यांसहित	२	०=॥
मालविकाग्निमित्र नाटक–कालिदासकृत, काटयवेमकृत टीकेसहित	।।।	०–
मालविकाग्निमित्र नाटक–इंग्रजी टीपांसहित	।।।।	०–
विशाखदत्त विरचित मुद्राराक्षस नाटक ढुंढिराजकृत टीकेसहित	१।।=	।।
मेघदूत काव्य–कालिदासकृत, मल्लिनाथकृत संजीविनी टीकेसहित	।=	०–

KÂVYAMÂLÂ. 48.

1718

THE

VÂGBHATÂLAMKÂRA

OF

VÂGBHATA

WITH THE COMMENTARY OF SIMHADEVAGANI.

EDITED BY

PANDIT S'IVADATTA

Head Pandit and Superintendent, Sanskrit Department, Oriental College, Lahore,

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF JÂVAJÎ DÂDÂJÎ'S "NIRNAYA-SÂGAR" PRESS.

BOMBAY.

1895.

Price 8 Annas

काव्यमाला. ४८.

श्रीवाग्भटप्रणीतो

वाग्भटालंकारः।

सिंहदेवगणिविरचितया टीकया समेतः।

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसाददारक-
केदारनाथकृपाङ्गीकृतशोधनकर्मणा शिवदत्तशर्मणा,
मुम्बापुरवासिपरबोपाह्वपाण्डुरङ्गात्मजकाशीनाथ-
शर्मणा च संशोधितः।

स च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतः।

१८९५

मूल्यं रूप्यकार्धः।

काव्यमाला ।

श्रीवाग्भटप्रणीतः

वाग्भटालंकारः ।

सिंहदेवगणिविरचितया टीकया समेतः ।

प्रथमः परिच्छेदः ।

श्रीवर्धमानजिनपतिरनन्तविज्ञानसंततिर्जयति ।
यद्गीःप्रदीपकलिका कलिकालतमः शमं नयति ॥

---

१. अस्यैव वाग्भटस्य **'बाहड'** इति प्राकृतं नामान्तरमस्ति. यतोऽत्रैव ग्रन्थे— 'बंभंडसुत्तिसंपुडमुत्तिअमणिणो पहासमूह व्व । सिरिबाहड त्ति तणओ आसि बुहो तस्स सोमस्स ॥' [ब्रह्माण्डशुक्तिसंपुटमौक्तिकमणेः प्रभासमूह इव । श्रीबाहड इति तनय आसीद्बुधस्तस्य सोमस्य ॥] इति संकरालंकारोदाहरणस्य 'तस्य सोमस्य बाहडनाम्ना तनय आसीत् । किंभूतस्य सोमस्य । ब्रह्माण्डशुक्तिसंपुटमौक्तिकमणेः । क इव । प्रभासमूह इव । किंविशिष्टस्तनयः । बुधो विद्वान् । एतद्ग्रन्थकारेण स्वनामसहितं संकरालंकारस्योदाहरणं भणितम्' इति जिनवर्धनसूरिव्याख्यातः पितुः **'सोम'** इति, स्वस्य **'बाहड'** इति नाम प्रतीयते. 'इदानीं ग्रन्थकार इदमलंकारकर्तृत्वख्यापनाय वाग्भटाभिधस्य महाकवेर्महामात्यस्य तन्नाम गाथयैकया निदर्शयति' इति सिंहदेवगणिव्याख्यातो महाकवित्वं महामात्यत्वं च. '**अणहिल्लपाटकपुर**मवनिपतिः **कर्णदेवनृप**सूनुः । **श्रीकलश**नामधेयः करी च रत्नानि जगतीह ॥' इति समुच्चयालंकारोदाहरणतो नगरी राजा चावगम्यते. 'कर्णदेवनृपसूनुः श्रीजयसिंहः' इति सर्वे व्याख्यातारः. एवं च 'अथास्ति **बाहडो** नाम धनवान्धार्मिकाग्रणीः । गुरुपादान्प्रणम्याथ चक्रे विज्ञापनामसौ ॥ आदिश्यतामतिश्लाघ्यं कृत्यं यत्र धनं व्यये । प्रभुराहाल्ये जैने द्रव्यस्य सफलो व्ययः । आदेशानन्तरं तेनाकार्यत श्रीजिनालयः । हेमाद्रिधवलस्तुङ्गो दीप्यकुम्भमहामणिः । श्रीमाता वर्धमानस्याबीभरद्बिम्बमुत्तमम् । यत्तेजसा जिताश्चन्द्र······कान्तमणिप्रभाः । शतैकादशके साष्टसप्ततौ विक्रमार्कतः । वत्सराणां व्यतिक्रान्ते **श्रीमुनिचन्द्र**सूरयः । आराधनाविधिश्रेष्ठं कृत्वा प्रायोपवेशनम् । शमपीयूषकल्लोलप्लुतास्ते त्रिदिवं ययुः ॥ युग्मम् ॥ वत्सरे तत्र चैकेन पूर्णे श्रीदेवसूरिभिः । श्रीवीरस्य प्रतिष्ठां स **बाहडो**ऽकारयन्मुदा ॥' इति **प्रभा-चन्द्र**मुनीन्द्रविरचित**प्राभाविकचरित्रतो** वाग्भटस्य सत्ता ११७९ विक्रमसंवत्सरे

वाग्भटकवीन्द्ररचितालंकृतिसूत्राणि किमपि विवृणोमि ।
मुग्धजनबोधहेतोः स्वस्य स्मृतिजननवृद्ध्यै च ॥

इह 'शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्तमानाः अभीष्टदेवतानमस्कारपूर्वकमेव प्रवर्तन्ते' इति शिष्टसमयपरिपालनाय, तथा 'श्रेयांसि बहुविघ्नानि भवन्ति महतामपि । अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः ॥' इति वचनान्मा भूदस्य शास्त्रस्य काव्यार्थिनां सम्यग्ज्ञानोपदेशकतया श्रेयोभूतस्य कोऽपि विघ्न इति विघ्नोपशान्तये च शास्त्रारम्भेऽभीष्टदेवतानमस्कारं महाकविः श्रीवाग्भटः प्रकटयति—

श्रियं दिशतु वो देवः श्रीनाभेयजिनः सदा ।
मोक्षमार्गं सतां ब्रूते यदागमपदावली ॥ १ ॥

(1123 A. D.) स्फुटं प्रतीयते. '**अणहिल्लपुरं** प्राप क्ष्मापः प्राप्तजयोदयः । महोत्सवप्रवेशस्य गजारूढसुरेन्द्रवत् । **वाग्भटस्य** विहारं स ददर्श हर्म्यसायनम् । अन्येद्युर्**वाग्भटामात्यं** धर्मात्यन्तिकवासनः । अपृच्छदार्हताचारोपदेष्टारं गुरुं नृपः ॥ श्रीमद्**वाग्भटदेवो**ऽपि जीर्णोद्धारमकारयन् । शिखीन्दुरवि(१२१३)वर्षे च ध्वजारोपं व्यधापयत् ॥' इत्यग्रिमप्राभाविकचरित्रतो वाग्भटस्य सत्ता १२१३ विक्रमसंवत्सरे (1157 A. D.) प्रतीयते. वर्णितस्य जयसिंहमहीपतेः सत्तापि १०९३–११४३ खिस्ताब्देष्विति **हेमाचार्य**प्रणीत**द्व्याश्रयकाव्य**स्य 'इण्डियन् आण्टिक्वेरी' चतुर्थपुस्तकस्य भाषान्तरतोऽवगम्यते. **जुलियस्–एग्जिलिङ्** (Julius Eggeling, Ph. D.)-पण्डितस्तु 'Catalogue of Sanskrit Manuscripts in the Library of the India Office' नाम्नि सूचीपत्रे वाग्भटालंकारप्रकरणे 'जयसिंहनरपतेः सत्ता १०९३–११५४ खिस्ताब्देषु' इति **लेस्सन**पण्डितोक्तिमनुवदति. 'वाग्भटालंकारकर्ता वाग्भटो नेमिकुमारस्य पुत्रः' (Wâgbhata, son of Nemikumâra and Mahâdevî or Wasundharâ) इति वाग्भटालंकारप्रकरणे वदन् जुलियस्-एग्जिलिङ्-पण्डितस्तु प्रागुपदर्शितसंकेतोदाहरणगाथानवलोकनभ्रान्त एव. **नेमिकुमार**स्य पुत्रः **काव्यानुशासन**प्रणेता **वाग्भट**स्त्वस्माद्वाग्भटादन्य एव. यतः काव्यानुशासनग्रन्थे गुणप्रकरणे 'इति **दण्डि-वामन-वाग्भटादि**प्रणीता दश गुणाः । वयं तु माधुर्यौजःप्रसादलक्षणांस्त्रीनेव गुणान्मन्यामहे । शेषास्तेष्वेवान्तर्भवन्ति' इति लेखतः स्फुटमेव वाग्भटालंकारकाव्यानुशासनप्रणेत्रोर्भेदः प्रतीयते. **अष्टाङ्गसंग्रह-अष्टाङ्गहृदयसंहिता**प्रणेता **वाग्भट**स्तु सिंहगुप्तसूनुः. **नेमिनिर्वाण**कर्तुर्**वाग्भट**स्य निर्णयस्तद्ग्रन्थभूमिकातोऽवसेयः.

२. अस्य वाग्भटालंकारस्य—(१) जिनवर्धनसूरिविरचिता, (२) सिंहदेवगणिप्रणीता, (३) क्षेमहंसगणिरचिता, (४) अनन्तभट्टसुतगणेशरचिता, (५) राजहंसोपाध्यायरचिता, इति पञ्च व्याख्यास्तु समुपलब्धाः. तत्र जिनवर्धनसूरिरचितव्याख्यासहितपुस्तकं जयपुरराजगुरुभट्टश्रीनारायणपर्वणीकरैः, सिंहदेवगणिप्रणीतव्याख्यासहितपुस्तकं (क-चिह्नितं) रामनारायणसूनुमोहनलालैः, (ख-चिह्नितं) उक्तटीकायुक्तपुस्तकमेव पण्डितवरज्येष्ठारामशर्मभिः प्रहितमिति तेषामुपकारं महान्तमङ्गीकुर्मः.

श्रियमिति। श्रीनाभेयजिनो वः श्रियं दिशतु इति संटङ्कघटना। नाभेरपत्यं नाभेयः। 'इतोऽनिञः' इत्येयण्। श्रिया युक्तो नाभेयः श्रीनाभेयः। 'मयूरव्यंसकादयः' इति मध्यमपदलोपी समासः। श्रीनाभेयश्चासौ जिनश्चेति कर्मधारयः। दीव्यति दिव्यकेवलज्ञानश्रिया दीप्यत इति देवः। एतेन भगवतो ज्ञानातिशयः सूचयांचक्रे। श्रीनाभेय इत्यत्र श्रिया अष्टमहाप्रातिहार्यादिलक्ष्म्या युक्तत्वप्रतिपादनेन प्रभोः पूजातिशयः प्रत्यपादि। जयति रागद्वेषादिरिपून्पराभवतीति जिनः। अनेन परमेश्वरस्यापायापगमातिशयो ज्ञापितः। मोक्षमार्गमित्यादिनोत्तरार्धेन पुनः स्वामिनो वचनातिशयः ख्यापितः। एवं चत्वारोऽप्यतिशयाः प्रज्ञाप्यन्ते स्म। 'यत्तदोर्नित्यसंबन्धः' इत्युक्तेः स इति गम्यते। ततश्च स श्रीनाभेयजिनो वो युष्माकं श्रियं कल्याणलक्ष्मीं ददात्विति भावः। स क इत्याह—यस्य भगवत आगमपदानां सिद्धान्तवचनानामावली श्रेणिः सतां विदुषामुत्तमानां मोक्षस्य मार्गं सम्यग्रत्नत्रयाराधनरूपं ब्रूते ब्रवीति। प्रकाशयतीत्यर्थः। अथान्यस्यापि कस्यचिदागमस्यागतस्य पदानि पादप्रतिबिम्बानि तेषां पङ्क्तिर्दृष्टा सती सतां पन्थानं प्रकटयतीत्युक्तिलेशः। तथा शास्त्रादौ त्रिविधानां देवतानां स्तुतिः संभवति—समुचितायाः, इष्टायाः, समुचितेष्टायाश्चेति। तत्र समुचिताया देवतायाः स्तुतिर्यथा नीतिशास्त्रारम्भे राजादेः, कामशास्त्रारम्भे स्मरादेः। इष्टायाः स्तुतिर्यथा रघुकाव्ये शिवगौर्योः। समुचितेष्टायाः स्तुतिर्यथा श्रीयोगशास्त्रारम्भे महावीरयोगिनाथस्येति। अत्र पुनः शास्त्रारम्भे श्रीनाभेयनमस्कारेणाभीष्टदेवतास्तुतिं प्रचक्रे वाग्भटः। अथवा श्रियोऽष्टमहाप्रातिहार्यादिलक्ष्म्या इनः स्वामी श्रीनः। 'ञिभीङ् भये'। भीयते इति भेयम्। 'भावे य एव्वातः' इति यः। भयमित्यर्थः। न विद्यते भेयं संसारभ्रमोद्भवं भयं यस्य सोऽभेयः। जिनः श्रुतकेवल्यपि भण्यते, तस्यापि प्रायो रागादिजयात्। तन्निरासार्थमभेयश्चासौ जिनश्चाभेयजिन इति। एवंविधश्च सामान्यकेवल्यपि लभ्यते, तस्य भवभ्रमभयाभावात्। तन्निराकरणार्थं श्रीनश्चासावभेयजिनश्च श्रीनाभेयजिनः इति। एवंविधश्चार्हन्नेव भवतीति सामान्येनार्हतां नमस्कारः कृतो भवति ॥

यद्वा काव्यशास्त्रस्य सर्वेषामपि साधारणोपयोगित्वाद्वैष्णवमतेनापि नमस्कारस्य लेशतो व्याख्या। यथा—श्रीर्विष्णुपत्नी। नाभेरुत्पन्नत्वाद्ब्रह्मापि नाभेयः कथ्यते। 'विष्णोर्नाभिस्थकमले विश्वकर्तुर्निवासः' इति लोकोक्तेः। तथा चाहुः—'नाभिभूःपद्मभूः—' इत्यादि तन्नामानि। जिनो विष्णुः। 'पीताम्बरो मार्जजिनौ कुमोदकः' इति चिन्तामणिवचनात्। ततश्च श्रीश्च नाभेयश्च श्रीनाभेयौ ताभ्यामुपलक्षितो जिनः श्रीनाभेयजिनः स श्रियं दिशतु। वाशब्दोऽव्ययमवधारणे पूरणे वा। किंविशिष्टः। उदेवः 'उरीश्वरः' इत्येकाक्षरनाममालावचनात्—उः शंभुः स एव पूज्यत्वाद्देवो यस्य स तथा। तदुक्तम्—'ब्रह्माच्युताभ्यर्चितपादपद्मो न पूज्यते किं मनुजैर्गिरीशः' इति ॥

ननु नमस्कारस्य विघ्नविघाते कथं सामर्थ्यम्। उच्यते—नमस्कारेण पुण्यमुपजायते, पुण्येन विघ्नाः प्रतिहन्यन्त इति। यत्रापि च नमस्कारमन्तरेणापि निर्विघ्ना शास्त्रपरिसमाप्तिर्दृश्यते, तत्रापि मानसिकः प्रणिधानरूपोऽयं घटत एवेति सफलो नमस्कारव्यापारः ॥ इति प्रथमपद्यार्थः ॥

किं च—

'मङ्गलं चाभिधेयं च संबन्धश्च प्रयोजनम् ।
चत्वारि कथनीयानि शास्त्रस्य धुरि धीमता ॥'

तत्र मङ्गलमभिहितं नमस्कारवचनेन । अभिधेयं चात्र शास्त्रे सम्यक्काव्यस्वरूपम् । संबन्धश्चास्य वाच्यवाचकभावादिः । तथाहि—एतच्छास्त्रं वाचकम्, सम्यक्काव्यस्वरूपं वाच्यम् । उपायोपेयभावो वात्र संबन्धः । वचनरूपापन्नं हीदं शास्त्रमुपायः । तत्परिज्ञानं चोपेयमिति ॥ प्रयोजनं त्वनन्तरं शिष्याणां शास्त्रार्थपरिज्ञानम् । परम्परं तु सम्यक्कवित्व-लब्धिस्फूर्त्या कीर्तिप्रभृति । आचार्यस्य त्वनन्तरं प्रयोजनं शिष्यानुग्रहः । परम्परं तु तदेव । ऐहिकमिदमुक्तम्. पारत्रकं तु परम्परप्रयोजनमुभयेषामपि निःश्रेयसावाप्तिरिति । अतो यदुच्यते केनचित्—'नारब्धव्यमिदं शास्त्रमभिधेयादिरहितत्वात्काकदन्तपरीक्षावत्' इति, तन्न किंचित्, उक्तयुक्त्याभिधेयादिदर्शनात् । अमुमेवार्थं समर्थयितुं वक्ष्यमाणार्थपरिच्छेदक्रमोद्देशगर्भं काव्यफलमाह—

साधुशब्दार्थसंदर्भं गुणालंकारभूषितम् ।
स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ॥ २ ॥

अत्र प्रस्तावाच्छिष्यः कर्ता गम्यते । ततः शिष्यः काव्यं कवेः कर्म काव्यम् । 'पतिराजान्ताद्यण्' इति यणि प्रत्यये साधुः । कुर्वीत विदधीत । कस्यै । कीर्तये यशसे । इति फलनिर्देशः । अत एव 'कुर्वीत' इत्यत्र फलवत्कर्तर्यात्मनेपदविधानम् । काव्यं किंविशिष्टम् । साधुशब्दार्थसंदर्भं वक्ष्यमाणेनानर्थकत्वादिना दोषेण रहितः शब्दः साधुः । अर्थस्तु वक्ष्यमाणेन देशविरुद्धत्वादिना दोषेण विमुक्तः साधुर्भवति । ततश्च साधू निर्दोषौ शब्दार्थौ यस्मिन्संदर्भे स साधुशब्दार्थः संदर्भो रचना यत्र तत्तथा । साधुशब्दार्थयोः संदर्भो यत्रेति विग्रहं कुर्वन्ति । तत्र समासप्राप्तिरुत्सूत्रा ॥ यद्वा—शब्दार्थयोः संदर्भः शब्दार्थसंदर्भः साधुः शब्दार्थसंदर्भो यत्रेति विग्रहः कार्यः ॥ 'साधुशब्दार्थ—' इत्यनेन च शब्दार्थप्रतिपादको द्वितीयः परिच्छेदः सूचितः ॥ तथा—गुणा औदार्यादयः, अलंकाराश्च शब्दाश्चित्रवक्रोक्त्यादयः, आर्थास्तु जात्युपमादयः, तैर्भूषितम् । अलंकृतमित्यर्थः । अनेन च तृतीयो गुणपरिच्छेदः, चतुर्थश्चालंकारपरिच्छेदः सूचितः ॥ तथा—स्फुटाः काव्यानुकूलत्वेन प्रकटा या रीतयो गौडीयाद्याः पदरचनाविशेषाः, रसाश्च शृङ्गारादयो वक्ष्यमाणाः, तैरुपेतमन्वितम् । अनेन चतुर्थपरिच्छेदे रीतिप्रतिपादनं ज्ञापितम्, पञ्चमश्च रसपरिच्छेदः सूचितः । प्रथमः पुनरयं शिक्षापरिच्छेदः॥काव्यस्य चानेकगुणत्वेऽपि कीर्तेरेव ग्रहणं प्राधान्यख्यापनार्थम् । यावता हि कवित्वं धनं, व्यवहारपरिज्ञानं, अशिवोपशमनं, सहृदयानां चाह्लादं करोति । इदमेव च कवित्वं कान्तासंमितभूतं कान्तेव सरसतापादनेनाभिमुखीकृत्य 'रामादिवद्वर्तितव्यं न रावणादिवत्' इत्युपदेशं च विधत्ते इति । तदुक्तं काव्यप्रकाशे राजा-[नक]श्रीमम्मटकवीन्द्रेण—'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यःपरनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥' त्रिविधं हि शास्त्रम् । यथा—प्रभुसंमितं शब्द-

प्रधानं वेदादि। सुहृत्संमितमर्थतात्पर्यवत्पुराणादि। कान्तासंमितं चोक्तलक्षणं विशिष्टकाव्यादि। इति। एतद्विपरीतं काव्यं विपरीतफलमेव स्यादिति व्यतिरेकार्थः॥

अथ कवित्वस्योत्पत्तये सामग्रीमुपदिशन्नाह—

प्रतिभा कारणं तस्य व्युत्पत्तिस्तु विभूषणम्।
भृशोत्पत्तिकृदभ्यास इत्याद्यकविसंकथा॥ ३॥

'सर्वं हि वाक्यं सावधारणमामनन्ति' इति न्यायात् प्रतिभैव तस्य काव्यस्य कारणं हेतुर्भवति। नवनवबोधप्रकारशालिनी बुद्धिः प्रतिभा। 'बुद्धिर्नवनवोन्मेषशालिनी प्रतिभा मता' इति वचनात्। ननु यदि प्रतिभैव काव्योत्पत्तेर्बीजं तदा व्युत्पत्तिः किं करोति। उच्यते—तस्य काव्यस्य प्रतिभया जन्यमानस्य व्युत्पत्तिर्भूषणमलंकारो भवतीत्यर्थः। अभ्यासस्तु पुनःपुनस्तदासेवनलक्षणस्तस्य काव्यस्य भृशमुत्पत्तिं करोति भृशोत्पत्तिकृद्भवति। अभ्यसने हि सतः स्थैर्यादियोगान्निर्विलम्बकाव्योत्पत्तेः। एवं प्रतिभाव्युत्पत्त्यभ्यासानां त्रयाणामपि स्वस्वविषयः। पार्थक्येन प्रदर्शितः। इति पूर्वोक्तप्रकारा पुराणकवीनां संकथोपदेशः॥

अथ ग्रन्थकारः प्रतिभां व्याख्यातुमाह—

प्रसन्नपदनव्यार्थयुक्त्युद्बोधविधायिनी।
स्फुरन्ती सत्कवेर्बुद्धिः प्रतिभा सर्वतोमुखी॥ ४॥

प्रसन्नान्यक्लिष्टानि यानि पदानि। तथा—नव्याभिनवा यार्थयुक्तिः। ततः—प्रसन्नपदानि च नव्यार्थयुक्तिश्च प्रसन्नपदनव्यार्थयुक्तयस्तासामुद्बोध उल्लासस्तं विदधातीत्येवंशीला स्फुरन्ती अस्खलद्रूपा सर्वतो मुखं यस्याः सा तथा। सर्वव्यापिनी सर्वाङ्गीणा चेत्यर्थः। एवंविधोत्तमकवेर्बुद्धिः प्रतिभा प्रोच्यते॥

अथ व्युत्पत्तिं व्याचिख्यासुराह—

शब्दधर्मार्थकामादिशास्त्रेष्वाम्नायपूर्विका।
प्रतिपत्तिरसामान्या व्युत्पत्तिरभिधीयते॥ ५॥

शास्त्रशब्दस्य प्रत्येकं संबन्धात्—शब्दशास्त्रं व्याकरणम्, धर्मशास्त्रमागमः, अर्थशास्त्रं चाणक्यप्रणीतो राजनीतिग्रन्थः, कामशास्त्रं को(कुक्को)कवात्स्यायनादिग्रन्थः। आदिशब्दाच्छन्दोलंकाराभिधानचिन्तामणिगजाश्वरत्नपरीक्षादिशास्त्राणि बौद्धादिदर्शनाभिधायकशास्त्राणि च गृह्यते। अत्र 'शब्द–' इत्यादिद्वन्द्वे कृते शब्दधर्मार्थकामा आदौ येषां ते शब्दधर्मार्थकामादयस्तेषां शास्त्राणीति समासविधिः। एतेषु सर्वेषु—आम्नायः पूर्वो यस्याः साम्नायपूर्वा स्वार्थिककप्रत्यये आम्नायपूर्विका। गुरुपारम्पर्यमूलेत्यर्थः। असामान्या निःसामान्या प्रतिपत्तिः परिज्ञानविशेषो व्युत्पत्तिः प्रोच्यते। शब्दशास्त्रेऽप्रवीणो हि काव्ये क्रियापदविन्यासे निःसंशयो न भवति। धर्मशास्त्रादिपरिज्ञानरहितश्च तत्तत्प्रबन्धेषु धर्मार्थकाममोक्षादिकार्यजातमुदाहर्तुमशक्तः कथं कविर्भवतीति॥

अथाभ्यासमाह—

अनारतं गुरूपान्ते यः काव्ये रचनादरः ।
तमभ्यासं विदुस्तस्य क्रमः कोऽप्युपदिश्यते ॥ ६ ॥

निरन्तरं गुरुपार्श्वे यः काव्यविषये रचनाया आदरो भवति, कवयस्तमभ्यासं विदुर्निश्चितत्वेन जानन्ति। एतेन—यः कदाचिदेकवारमप्यभ्यसनमात्रमभ्यासः, सोऽभ्यास एव न भवति—इति ज्ञापितम् । तस्य पूर्वोक्तस्याभ्यासस्य कोऽपि कियन्मात्रः । न समग्र इति भावः । क्रमः प्रकार उपदिश्यते ॥

तमेवाह—

बिभ्रत्या बन्धचारुत्वं पदावल्यार्थशून्यया ।
वशीकुर्वीत काव्याय च्छन्दांसि निखिलान्यपि ॥ ७ ॥

काव्याय काव्यं निष्पादयितुं शिष्यः सर्वाण्यपि च्छन्दांसि शालिनीमालिनीप्रभृतीनि वशीकुर्वीत अवशान्यपि वशानि कुर्यात् । कया । पदानामावली श्रेणिस्तया । किंविशिष्टया । अर्थशून्यया । अभिधेयरहितयापीत्यर्थः । तथा—बन्धस्य संदर्भस्य चारुत्वं मृदुपद्धतियोगेन मनोज्ञत्वं बिभ्रत्या धारयन्त्या । यादृशो हि प्रथममभ्यासस्तादृशी पुरः कार्यनिष्पत्तिरिति विशिष्टकाव्यार्थिभिरभ्यासोऽपि सुललितपदशय्यामाधुर्यविशिष्ट एव विधेयः ॥ अत्र चोदाहरणमुच्यते—

'देवश्रेणी कीर्तिविस्फारिणी धर्माधर्मप्राप्तये धर्ममानः ।
विश्वाधानं मन्यमानः समानं मातृश्रेणी गेहिणीवप्रदीपा ॥'

इति शालिन्यभ्यासोऽर्थसंबन्धशून्ययापि शब्दश्रेण्या । एवं सर्वाण्यपि च्छन्दांसि सार्थकैर्निरर्थकैर्वा शब्दसंबन्धैरभ्यसनीयानीति ॥

अथ बन्धचारुत्वमेव कथं भवतीत्याह —

पश्चाद्गुरुत्वं संयोगाद्विसर्गाणामलोपनम् ।
विसंधिवर्जनं चेति बन्धचारुत्वहेतवः ॥ ८ ॥

संयोगवशात्पाश्चात्यवर्णस्य गुरुत्वं कार्यम् । एवं हि बन्धस्य दार्ढ्यं भवति । तथा—विसर्गलोपो न कार्यः । यतो विसर्गाणामवस्थानेन काव्य ओजोगुण उपजायते । तथा—विशब्दो विरूपत्वेऽभावे च वर्तते । यथा—'विस्वरोऽयं गायनः, विमदो मुनिरयम्' इति च । ततोऽत्रापि विरूपः संधिर्विसंधिः । यद्वा—न संधिर्विसंधिरिति । विरूपसंधेरसंधेश्च वर्जनं कार्यम् । एवंप्रकारा अन्येऽप्युद्भटत्वश्रादिक्लिष्टपदवर्जनादयो बन्धचारुत्वस्य हेतवो भवन्तीति प्रकारार्थं इतिशब्दः सूचयति । अत्रोदाहरणं यथा—

'निपीय यस्य क्षितिरक्षिणः कथां तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः ॥'

इदमुदाहरणमन्वये उक्तम् ॥

व्यतिरेके तु ग्रन्थकार एवोदाहरति—

शिते कृपाणे विधृते त्वया घोरे रणे कृते।
त्रधीश क्षितिपा भीत्या वन एव गता जवात्॥ ९॥

नृणामधीशो त्रधीशः संबोधने हे त्रधीश नरेन्द्र, त्वया शिते तीक्ष्णे खड्गे धारिते सति। अत एव रणे संग्रामे घोरे रौद्रे त्वया कृते सति क्षितिपाः प्रस्तावाच्छत्रवो नृपा भयेन वने कानने एव गताः। न क्षणमपि युद्धे स्थिता इति भावः। जवाद्वेगात्। अनेन सातिशयं भयं व्यज्यते। अत्र 'विधृते त्वया' इत्यादौ संयोगवशात्पूर्वस्य गुरुत्वं नास्ति, किं तु सहजं विभक्तिकृतम्। 'त्रधीश' इत्यत्र विरूपसंधिः, 'क्षितिपा भीत्या' इत्यत्र विसर्गाणां लोपोऽस्ति। एवमेभिर्दोषैरस्मिन्बन्धे शैथिल्यादिप्राप्तेर्नास्ति बन्धचारुत्वम्। अतो विशिष्टकाव्यार्थिभिरभ्यासोऽपि बन्धचारुत्वेऽप्येतयैव पदावल्या कार्य इति स्थितम्॥

अथार्थविशेषं विनापि पद्यबन्धाभ्यासमाह—

अनुल्लसन्त्यां नव्यार्थयुक्तावभिनवत्वतः।
अर्थसंकलनातत्त्वमभ्यस्येत्संकथास्वपि॥ १०॥

शिष्यः कविरर्थसंकलनातत्त्वमर्थस्याभिधेयस्य संकलनातत्त्वं संघटनारहस्यं पद्यबन्धविधिलक्षणं संकथास्वपि परस्परालापेष्वप्यभ्यस्येत्। कस्यां सत्यामित्याह—नव्यार्थयुक्तावभिनवायामर्थयुक्तावनुल्लसन्त्यावस्फुरन्त्यामित्यर्थः॥ नव्यार्थयुक्तेरनुल्लासः कुत इत्याह—अभिनवत्वतः कवेर्नवीनत्वादित्यर्थः॥

अत्रोदाहरति। यथा—

आगम्यतां सखे गाढमालिङ्ग्यात्र निषीद च।
संदिष्टं यन्निजभ्रातृजायया तन्निवेद्य॥ ११॥

यथेति दृष्टान्तोपदर्शनार्थः। हे मित्र, त्वयागम्यताम्। तथा—प्रस्तावान्मामालिङ्ग्याश्लेषं कृत्वात्र स्थाने त्वं निषीदोपविश। 'आलिङ्गात्र' इति पाठे तु—सखे, त्वं मामालिङ्ग। ममालिङ्गनं कुर्वित्यर्थः। तथा—यन्निजभ्रातुर्मल्लक्षणस्य जायया। अथवा निजया भ्रातृजायया। संदिष्टमस्ति। स्वभ्रातृजायया यः संदेशो मम ज्ञापितोऽस्तीत्यर्थः॥ ननु कथं 'भ्रातृजायया' इति सिध्यति। यतोऽत्र योनिसंबन्धसद्भावात् 'ऋतो विद्यायोनिसंबन्धे' इति सूत्रेण षष्ठ्यलुप्प्राप्तेः 'भ्रातुर्जायया' इत्यलुक्समासः प्राप्नोति 'मातुःष्वसा' इत्यादिवत्। उच्यते—भ्रातेव भ्राता वयस्य इत्यर्थः। ततश्च भ्रातृशब्दस्य मित्रार्थत्वादत्र योनिसंबन्धाभावादलुक्समासस्याप्राप्तिः। तथा च वक्तारो भवन्ति—'ममानेन सह भ्रातृत्वमस्ति'। सखित्वमित्यर्थः॥

ननु यदि नव्यार्थयुक्तिर्नोल्लसति, तदा परकाव्यार्थमादाय किमित्यभ्यासो न विधीयते इत्याशङ्कापनोदार्थमाह—

परार्थबन्धाद्यश्च स्यादभ्यासो वाच्यसंगतौ।
स न श्रेयान्यतोऽनेन कवेर्भवति तस्करः[1]॥ १२॥

---

१. 'उक्तं च—परस्य काव्यं स्वमिति ब्रुवाणो विज्ञायते शैरिह काव्यचौरः। विलोक्य

चशब्दोऽत्र पुनरर्थे । यः पुनरभ्यासः परेषां कवीनां गृहीतस्यार्थस्य बन्धाद्भवेत् । अभ्यासः किंविषय इत्याह—वाच्यसंगतौ वाच्यस्यार्थस्य संगतौ । संघटनायामित्यर्थः । अत्र विषयसप्तमी ज्ञेया । अर्थसंबन्धविषये योऽभ्यासो भवतीति भावः । सोऽभ्यासः श्रेयान्प्रशस्यो न भवति । यस्माद्धेतोरनेन परार्थबन्धेन । अथवा—परार्थबन्धात्क्रियमाणेनार्थविषयाभ्यासेन कविः काव्यकर्ता तस्कर इव तस्करतुल्यो भवति ॥ 'वाच्यसंगतौ' इति प्रतिपादनाच्छब्दसंगतिविषयोऽभ्यासः परतोऽपि गृहीतो न स्तैन्यं सूचयतीति । तथा परार्थबन्धप्रसक्तः कविः सुखममो नाभिनवार्थोत्पत्तये क्लिश्यते । ततश्च परार्पितवर्ण्यविशेषवर्णनायामशक्तः सन्नुपहासः स्यात् । कीर्त्यर्थे च काव्यविधानं विपरीतफलमेव भवेदिति ॥

समस्यायां पुनः परार्थग्रहणं न विरुद्धम् । विशेषतस्तथा वैदुष्यातिशयदर्शनादिति तथैव चाह—

परकाव्यग्रहोऽपि स्यात्समस्यायां गुणः कवेः ।
अर्थं तदर्थानुगतं नवं हि रचयत्यसौ ॥ १२ ॥

समस्यायां परकाव्यग्रहोऽपि विशिष्टबुद्धिप्रकाशलक्षणगुणहेतुत्वाद्गुणः स्यात् कवेः काव्यकर्तुरित्यर्थः ॥ अत्र परकाव्यग्रहणेन परकाव्यस्यैको वा द्वौ वा त्रयो वा पादा ग्राह्याः, न तु संपूर्णं काव्यम् । परकाव्यग्रहणस्य गुणत्वे हेतुमाह—हि यस्माद्धेतोरसौ समस्यापूरकः कविस्तस्य परकाव्यस्य योऽर्थस्तस्यानुगतमनुयायिनमनुकूलमर्थमश्रुतपूर्वं नवं निजप्रतिभाप्रागल्भ्येनाभिनवं रचयति । एवं च समस्यापूरणे परकाव्यार्थमपि निजनिर्मलबुद्धिबलोत्पादिताभिनवार्थेन योजयन्कविश्चमत्कारकारको भवतीति ॥ समस्योदाहरणं यथा—केनाप्येकपादोऽर्पितः—'कज्जलं जयति कुङ्कुमोपमम्' इति । एतदर्थसंगत्यर्थं पादत्रयं नवं विधेयम् । यथा—

'जानती भगवता भवं हतं पार्वती निजपतिभ्रमाद्रुषा ।
रक्तमक्षि विदधे रुचास्य तत्कज्जलं जयति कुङ्कुमोपमम् ॥'

स्वमिदम् ॥ राज्ञार्पितं पादत्रयं कुमारसंभवस्य पृथक्पृथगसं[1] यथा—'चकार मेना विरहातुराङ्गी', 'प्रवालशय्याशयनं शरीरम्', 'हिमालयो नाम नगाधिराजः' इति । तुर्यपादेन पूरणे तु—

'चकार मेना विरहातुराङ्गी प्रवालशय्याशयनं शरीरम् ।
हिमालयो नाम नगाधिराजस्तव प्रतापज्वलनाद्गलन् ॥'

इत्यादि स्वयं ज्ञेयम् ॥

माणिक्यमयोग्यहस्ते प्रत्येति को नाम यदेतदस्य ॥' इति जिनवर्धनसूरिप्रणीतव्याख्यायां संवादान्तरमप्युक्तम्.

१. 'विपर्यैर्वर्णना' क. २. 'पृथक्२ दत्तं' क; 'पृथगसत्वं' ख.

अथ काव्यनिमित्तमर्थोत्पत्तये सामग्रीमाह—

मनःप्रसत्तिः प्रतिभा प्रातःकालोऽभियोगिता ।
अनेकशास्त्रदर्शित्वमित्यर्थालोकहेतवः ॥ १४ ॥

सकलाधिविगमनान्मनसः प्रसन्नता । 'बुद्धिर्नवनवोन्मेषशालिनी प्रतिभा मता'। प्रातःकालस्योपलक्षणत्वादपररात्रादिवेलापि ज्ञेया। तत्र हि मन्दमेधसोऽपि मेधा प्रसीदति । अभियोग उद्यमोऽस्यास्तीति । इन् । तद्भावोऽभियोगिता । नानाशास्त्रदर्शनशीलत्वं च । अत्र समुच्चयार्थश्चशब्दोऽनुक्तोऽपि गम्यते । यथा—'अहरहर्नयमानो गामश्वं पुरुषं पशुम् । वैवस्वतो न तृप्यति सुराया इव दुर्मदी ॥' इति । पूर्वोक्ता अर्थालोकस्यार्थप्रकाशस्य हेतवो भवन्ति ॥

किं च—

वर्ण्यवस्तुपरीवारं दृष्ट्वा बध्नन्विशेषणैः ।
वाक्यैर्वाग्शुकविर्भूयादुत्तरार्धोपमादिभिः ॥

अथ समुत्पन्नस्यार्थस्य निवेशनविषये शिक्षामाह—

समासमिव पूर्वार्धे कुर्यादर्थप्रकाशनम् ।
तत्पुरुषबहुव्रीही न मिथःप्रत्ययावहौ ॥ १५ ॥

कविरर्थस्य प्रकाशनं पूर्वार्धे काव्यस्य समासमिव समासप्रायं विदध्यात् । न तु समासमेव । उत्तरार्धे तूपमार्थान्तरन्यासादिप्रकारैरर्थपूरणं कार्यमित्युक्तपूर्वम् ॥ पुनः शिक्षान्तरमाह—कुर्यादिति क्रियानुवर्तते । तत्पुरुषश्च बहुव्रीहिश्च मिथः प्रत्ययमावहत इति मिथःप्रत्ययावहौ तौ परस्परप्रतीतिकारकौ न कुर्यादित्यर्थः ॥ यथा—'वृत्रशत्रुः' इत्युक्ते—वृत्रः शत्रुर्यस्येति बहुव्रीहौ सत्यपि वृत्रश्चासौ शत्रुश्चेति तत्पुरुषभ्रान्तिः स्यात् । एवं 'वीरपुरुषः' इत्युक्ते—वीरश्चासौ पुरुषश्चेति तत्पुरुषे सत्यपि वीराः पुरुषा यत्र ग्राम इति बहुव्रीहिप्रतीतिः स्यात् । एवं न कार्यम् ॥ ननु 'वृत्रश्चासौ शत्रुश्च' इत्यत्र 'वीरश्चासौ पुरुषश्च' इत्यत्र च कर्मधारयसद्भावात्तत्पुरुषभ्रान्तिरयुक्ता प्रोक्ता, इति चेत्, मैवम् । कर्मधारयसंज्ञाधिकारे तत्पुरुषसंज्ञाया अपि शाब्दिकैः प्रतिपादनात् । ततः कर्मधारयः तत्पुरुषसहचर एवेति तत्पुरुषभ्रान्तिरुक्ता ॥ 'अनुष्टुभि सनौ नाद्यात्' इति वचनान्निषिद्धो नगणपातः 'तत्पुरुषबहुव्रीही' इत्यत्र न विरुद्धः स्यात्, अस्य शिक्षाशास्त्रत्वादिहेतुभिः ॥

१. अयं श्लोकः कास्वपि टीकासु न व्याख्यातः. केवलं प्रकृतटीकायामेव लभ्यते. ख-पुस्तके तु मूले टीकायां चोपलभ्यते. परंतु व्याख्यास्य नोपलभ्यते. परंतु प्रकृतव्याख्यायामेव 'समासमिव पूर्वार्धे—' इति वक्ष्यमाणश्लोकव्याख्यायां 'उत्तरार्धे तूपमार्थान्तरन्यासादिप्रकारैरर्थपूरणं कार्यमित्युक्तपूर्वम्' इति लेखेनास्य पद्यस्योक्तत्वं प्रतीयते. तच्चोक्तत्वं मूले टीकायां वेति संदिग्धम्.

पुनः शिक्षान्तरमाह—

एकस्यैवाभिधेयस्य समासं व्यासमेव च ।
अभ्यस्येत्कर्तुमाधानं निःशेषालंक्रियासु च ॥ १६ ॥

कविः एकस्यैव एकस्याप्यभिधेयस्यार्थस्य समासं लघुनि च्छन्दसि संक्षेपं व्यासमेव च विस्तरमपि च कर्तुं विधातुमभ्यस्येच्छिक्षयेत् । लघुच्छन्दसार्थस्य संक्षेपं कर्तुमभ्यस्येत् । प्रौढच्छन्दसार्थस्य विस्तरमपि कर्तुमभ्यस्येत् । तथा । कविरभ्यस्येत् । किं कर्तुम् । आधानं कर्तुं अर्थस्य स्थापनां कर्तुम् । कासु । निःशेषालंक्रियासु सर्वालंकारेषु । अयं भावः—सर्वेष्वप्यलंकारेषूपमादिष्वेकस्याप्यर्थस्य स्थापनां कर्तुं चाभ्यस्येदित्यर्थः ॥ प्रौढस्यार्थस्य लघुच्छन्दसा समासो यथा—

'ढक्काध्वनिप्रतिध्वानमुलरास्त्वद्रिपून्भयात् ।
लीयमानान्निकुञ्जेषु वारयन्तीव पर्वताः ॥'

अस्यैवार्थस्य व्यासो यथा—

'यात्रारम्भभयानकानकशतध्वानप्रतिध्वानिनः
स्वस्योच्छेदपराभवागममर्मा संभाव्य शङ्काकुलाः ।
त्रासावेशवशाद्वसन्तमधुना त्वद्वैरिराजव्रजं
दूरादेव निराकरिष्णव इव स्वामिन्विभान्त्यद्रयः ॥'

अथवा—

'ज्योत्स्ना गङ्गा परब्रह्म दुग्धधारा सुधाम्बुधिः ।
हाराश्चापि न रोचन्ते रोचते यदि ते यशः ॥'

अयं समासः । अस्यैव व्यासो यथा—

'ज्योत्स्ना स्निग्धा न, नो वा हरति हरशिरोगेहिणी हृत्तरङ्गि-
ण्यानन्दब्रह्म रम्यं न भवति, मधुरा नाप्यसौ दुग्धधारा ।
मुग्धा दुग्धाम्बुधेर्नो विलसति लहरी हारिणो वा न हाराः
प्रत्यग्राः स्वर्गश्रृङ्गाङ्गणरमणचणाः कीर्तयश्चेत्त्वदीयाः ॥'

रवे । तथा निःशेषालंकारेष्वर्थाधानविषयेऽभ्यासो यथा—'मुखमस्याः सुन्दरम्' इत्येतावन्मात्रोऽर्थो 'मुखकमलं सुन्दरम्' इति रूपके आधीयते, 'अस्या मुखे षट्पदावलिः कमलबुद्ध्या निपतति' इति भ्रान्तिमदलंकारे, 'अस्या मुखे घटिते विधात्रा चन्द्रः किमर्थं निष्पादितः' इत्याक्षेपे 'इदमेतस्या मुखमथवा पद्मम्' इति संशयालंकारे, इदं न मुखं किंतु कमलम्' इत्यपह्नुतौ, 'अनलंकृति सुभगमस्याः स्त्रियो मुखम्' इति विभावनायाम्, 'अस्या युवत्या वदनकान्तिभिर्निराकृते विलासभवनतमोभरे न स्मरति प्रदीपं परिजनः' इत्यतिशये । एवमन्येष्वप्यलंकारेषु स एवार्थोऽभ्यसनीयः ॥

अथ काव्यकर्तॄणां विशेषं ज्ञापयति—

स्यादनर्धान्तपादान्तेऽप्यशैथिल्ये लघुर्गुरुः ।
पादादौ न च वक्तव्याश्चादयः प्रायशो बुधैः ॥ १७ ॥

अर्धस्यान्तः अर्धान्तः, पादस्यान्तः पादान्तः, अर्धान्तश्चासौ पादान्तश्च अर्धान्तपादान्तः, न अर्धान्तपादान्तोऽनर्धान्तपादान्तः । अथवा । अनर्धान्तश्चासौ पादान्तश्चेति समासविधिः । आस्तां तावत् । यत् अर्धान्तपादान्ते अर्धान्तरूपे पादान्ते लघुवर्णो गुरुर्भवति । किंतु अनर्धान्तपादप्रान्तेऽपि लघुर्वर्णो गुरुर्भवति । कस्मिन्सति । अशैथिल्ये सति । शिथिलस्य भावः शैथिल्यम्, न शैथिल्यमशैथिल्यम्, तस्मिन्बन्धस्य दृढत्वे सतीत्यर्थः।

'तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ तुभ्यं नमः क्षितितलामलभूषणाय ।
तुभ्यं नमस्त्रिजगतः परमेश्वराय तुभ्यं नमो जिन भवोदधिशोषणाय ॥'

एवंविधेषु वसन्ततिलकेन्द्रवज्रादिषु छन्दःसु बन्धस्य दृढत्वे सति प्रथमतृतीयपादान्तेऽपि लघुर्गुरुः स्यात् । न पुनर्मालिनीप्रभृतिषु, बन्धशैथिल्यसंभवात् । तथा बुधैः पादस्यादौ चादयो न वाच्याः । यथा—'च नौमि नेमिं सुविधिं सुपार्श्वम्' इत्यादि । प्रायोग्रहणात्—रे-धिक्-हा-किं-न-आः-प्रभृतयो न दुष्टाः । यथा—

'रे राक्षसाः कथयत क स रावणो यो रत्नं रवीन्दुकुलयोरपहृत्य नष्टः ।'

'यां चिन्तयामि सततं मयि सा विरक्ता साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते च परितुष्यति काचिदन्या धिक्तां च तं च मदनं च इमां च मां च ॥'

'आः सर्वतः स्फुरति कैरवमाः पिबन्ति ज्योत्स्नां कषायमधुरामधुना चकोराः ।
जातोऽथ सैष चरमाचलचूलचुम्बी पङ्करुहप्रकरजागरणप्रदीपः ॥'

अन्यत्स्वयमप्यूहनीयम् ॥

अथ कविसमयं शिक्षयितुमाह—

भुवनानि निबध्नीयात्त्रीणि सप्त चतुर्दश ।
अप्यदृश्यां सितां कीर्तिमकीर्तिं च ततोऽन्यथा ॥ १८ ॥

कविर्विश्वानि काव्ये त्रीणि निबध्नीयात् । स्वर्गमर्त्यपाताललोकभेदात् । अथवा सप्त । यथा—(१) भूर्लोक-(२) भुवर्लोक-(३) स्वर्लोक-(४) महर्लोक-(५) जनलोक-(६) तपोलोक-(७) सत्यलोक इति । यद्वा चतुर्दश । यथा—सप्त पूर्वाण्येव । (८) तलं (९) वितलं (१०) सुतलं (११) नितलं (१२) तलातलं (१३) रसातलं (१४) पातालमिति । मतान्तरेण भुवनान्येकविंशतिरपि ॥ तथा—यद्यपि शुक्लत्वादयो गुणा मूर्तिमद्द्रव्याश्रयास्तथापि कीर्तिमदृश्यामपि अमूर्तामपि श्वेतां निबध्नीयात् । अदृश्यामप्यकीर्तिं ततः श्वेतकीर्तेरन्यथा अपरप्रकारामसितां कृष्णामित्यर्थः । निबध्नीयात् ॥

वारणं शुभ्रमिन्द्रस्य चतुरः सप्त चाम्बुधीन् ।
चतस्रः कीर्तयेद्वाष्टौ दश वा ककुभः क्वचित् ॥ १९ ॥

यद्यपि हस्तिनां वर्णः कृष्णस्तथापि सुरेन्द्रस्य गजं शुभ्रं कीर्तयेत् ॥ तथाग्ने-स्तुरङ्गाणां लोहितवर्णः, सूर्यतुरङ्गाणां नीलवर्णः, इन्द्रतुरङ्गस्य कडारो वर्णः, स्वयमूहनीयः ॥ अम्बुधीन् वर्णयेत् । कति । चतुःसंख्यान् । पूर्वपश्चिमदक्षिणोत्तरभेदात् । (१) लवण-(२) क्षीर-(३) दधि-(४) आज्य-(५) सुरा-(६) इक्षु-(७) स्वादुवारिसमुद्ररूपान् लोकप्रसिद्धान् ॥ तथा ककुभो दिशः कीर्तयेत् । कति । चतस्रः । अथवाष्टौ । यद्वा दश । न सर्वत्रापि दश किंतु क्वचित्स्थाने काव्योपयोगिनि पूर्वपश्चिमदक्षिणोत्तरभेदाच्चतस्रो दिशः । चतसृणां विदिशां प्रक्षेपादष्ट । ऊर्ध्वदिगधोदिक्प्रक्षेपाद्दशापि दिशः । अत्रोदाहरणानि तेषु तेषु स्थानेषु स्वयं ज्ञेयानि ॥

पुनः शिक्षामाह—

यमकश्लेषचित्रेषु बवयोर्डलयोर्न भित् ।
नानुस्वारविसर्गौ च चित्रभङ्गाय संमतौ ॥ २० ॥

यमकालंकारे श्लेषालंकारे चित्रालंकारे बकारवकारयोर्न भित् न भेदो भवति । पुनः कयोः । डकारलकारयोः । तथा—अनुस्वारश्च विसर्गश्च चित्रस्य हारबन्धच्छत्रबन्धादिरूपस्य भङ्गाय विघाताय न संमतौ कथितावित्यर्थः ॥

अथ क्रमेणोदाहरणानि—

[तत्र] यमके बवयोर्डलयोरभेदो यथा—

शङ्कमानैर्महीपाल कारागारविडम्बनम् ।
त्वद्वैरिभिः सपर्णाकैः श्रितं बहुविडम्बनम् ॥ २१ ॥

हे महीपाल क्षितिपाल, त्वद्वैरिभिर्वनं श्रितम् । किंविशिष्टम् । बहूनि बिलानि बिलानि सर्पादिविवराणि यत्र तत् । सह पर्णैर्वर्तन्त इति सपर्णाकास्तैः । किं कुर्वाणैः । शङ्कन्त इति शङ्कमानास्तैः । किं कर्म । तव कारारूपे आगारे विडम्बनं गुप्तिगृहकदर्थनमित्यर्थः । कारा चासावागारं चेति कर्मधारयः । अत्र श्लोके यमकालंकृते विडम्बनं बहु बिलम्बनमिति बवयोर्डलयोश्चाभेदः ॥

श्लेषे बवयोरभेदो यथा—

त्वया दयार्द्रेण विभो रिपूणां न केवलं संयमिता न बालाः ।
तत्कामिनीभिश्च वियोगिनीभिर्मुहुर्महीपातविधूसराङ्गाः ॥ २२ ॥

हे स्वामिन्, रिपूणां बालाः शिशवो न केवलं त्वया न संयमिताः न केवलं त्वया न बद्धाः । बन्दीकृता इत्यर्थः । किंतु तेषां रिपूणां कामिनीभिरपि बाला न संयमिताः । अत्र वालाः केशा न बद्धा इत्यर्थः । त्वया दयार्द्रेण सता न संयमिताः, तत्कामिनीभिश्च वियोगिनीभिः सतीभिर्न बद्धा इति । बालाः शिशवो वालाश्च केशाः । किंविशिष्टाः । मुहुर्महीपातविधूसराङ्गाः । मुहुर्वारंवारं मह्यां पातेन पतनेन विधूसरं विशेषेण धूलिभिर्धूसरं अङ्गं येषां ते तथा । अत्र बालवालशब्दयोर्बवयोरैक्यम् ॥

श्लेषे डलयोरैक्यं यथा—

देव युष्मद्यशोराशिं स्तोतुमेनं जडात्मकम् ।
उत्कण्ठयति मां भक्तिरिन्दुलेखेव सागरम् ॥ २३ ॥

हे देव राजन् । अनेकार्थनाममालायां देवशब्दो राजार्थोऽप्यस्ति । युष्माकं यशसां राशिं स्तोतुं वर्णयितुं त्वदीया भक्तिर्मामुत्कण्ठयति उत्सुकं करोति । एनं इमं प्रत्यक्षं माम् । किंविशिष्टम् । जड आत्मा यस्य स जडात्मा जडात्मैव जडात्मकः । स्वार्थे कः प्रत्ययः । का इव । यथा इन्दोर्लेखा सागरमुत्कण्ठयति उल्लसितं करोति । सागरमपि किंभूतम् । जडात्मकं जलं नीरं आत्मा स्वरूपं यस्य स जलात्मकस्तं तथा । अत्र जडजलशब्दयोर्डलयोरैक्यम् ॥

अथ चित्रे डलयोरैक्यं यथा—

चन्द्रेडितं चटुलितस्वरधीतसाररत्नासनं रभसकल्पितशोकजातम् ।
पश्यामि पापतिमिरक्षयकारकायमल्पेतरामलतपःकचलोपलोचम् ॥२४॥

अहं देवं पश्यामीति संटङ्कः । चन्द्रेण सकलज्योतिश्चक्रस्वामिना ईडितः स्तुतस्तम् । पुनः किंभूतम् । चटुलितस्वरधीतसाररत्नासनम् । स्वरशब्दोऽव्ययमस्ति । स्वः स्वर्गेऽधीतो विख्यातः । मेरुरित्यर्थः । तस्य सारं रत्नमयं आसनं पाण्डुकम्बलादिशिलास्थितम् । चटुलितं चञ्चलीकृतं स्वरधीतस्य मेरुशैलस्य साररत्नासनं येन स तम् । श्रीवीरेण मेरोः कम्पनात् आसनमपि कम्पते इति । अथवा । स्वः स्वर्गेण स्वर्गवासिदेवजनेन अधीतं पठितं व्यावर्णितं सारं बलं यस्य स स्वरधीतसार इन्द्र इत्यर्थः । चटुलितं कम्पितं स्वरधीतसारस्येन्द्रस्य रत्नासनं येन स तम् । परमेश्वरस्य कल्याणेषु इन्द्राणां सिंहासनानि कम्पन्त इति । रभसेन वेगेन कल्पितं छिन्नं शोकजातं असमाधिसमूहो येन स तम् । पुनः कथंभूतम् । पापान्येव तिमिराणि पापतिमिराणि तेषां क्षयं करोतीति पापतिमिरक्षयकारः पापतिमिरक्षयकारः कायो देहो यस्य स तम् । अल्पेतरं च तत् अमलं चाल्पेतरामलं अल्पेतरामलं च तत्तपश्च तस्मै अल्पेतरामलतपसे कचलोपं कचानां केशानां लोपोऽपनयनं लोचयति दर्शयतीति अल्पेतरामलतपःकचलोपलोचस्तम् । अत्र चन्द्रेडितचटुलितशब्दयोर्डलयोरैक्यम् । इदं काव्यं हारमालिख्य वाचनीयम् ॥

चित्रे बवयोरैक्यं यथा—

प्रचण्डबल निःकाम प्रकाशितमहागम ।
भावतत्त्वनिधे देव भालमत्राद्भुता तव ॥ २५ ॥

प्रचण्डमुत्कटं बलं वीर्यं यस्य स संबोध्यः । निर्गतः कामात्कन्दर्पान्निष्कामस्तस्यामन्त्रणम् । निष्कामेत्यत्र 'निर्दुर्बहिराविःप्रादुश्चतुराम्' इत्यनेन सूत्रेण निर्शब्दस्य रेफः षो भवति, परमत्र चित्रार्थं बाहुलकात्षो न कृतः । तेन विसर्ग एव निःकामेति । महांश्चासावागमश्च प्रकाशितो महागमो येन स संबोध्यः । भावोऽभिप्रायश्चित्तमित्यर्थः । तस्य त-

त्वानि भावतत्त्वानि अन्तरङ्गतत्त्वानि ज्ञानादीनि तेषां निधिरिव निधिस्तस्यामन्त्रणम् । हे देव, तव भा प्रभालमतिशयेन अत्र विश्वत्रयेऽपि अद्भुता आश्चर्यकारिणी । अस्तिक्रियानुक्तापि गम्यते 'यत्रान्यक्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते' इति वृद्धवचनप्रामाण्यात् । अत्र भावबलयोर्बवयोरैक्यम् । तच्च छत्रस्थापनायां स्वयं ज्ञेयम् ॥ तथा—'चन्द्रेडितम्' इत्यत्रानुस्वारेण चित्रभङ्गो न । 'निःकाम–' इत्यत्र विसर्गाभ्यां न चित्रभङ्गः ॥

'भवकाननमत्तेभ भग्नमायातमःप्रभ ।
विनयात्त्वां स्तुवे वीर विनतत्रिदशेश्वर ॥'

इदमपि छत्रकाव्यं क्वचिद्दृश्यते ॥

अथ पूर्वोक्तमेवार्थमुपसंहरन्नाह—

अधीत्य शास्त्राण्यभियोगयोगादभ्यासवश्यार्थपदप्रपञ्चः ।
तं तं विदित्वा समयं कवीनां मनःप्रसत्तौ कवितां विदध्यात् ॥ २९ ॥

अभियोगस्योद्यमस्य योगात् शास्त्राणि धर्मशास्त्रकामशास्त्रार्थशास्त्रशब्दशास्त्रनीतिशास्त्रवैद्यशास्त्रज्योतिःशास्त्रालंकारशास्त्रप्रभृतीन्यध्ययनपूर्वमधीत्य अर्थाश्च पदानि च अर्थपदानि तेषां प्रपञ्चः अभ्यासेन वश्यो वशवर्ती अर्थपदप्रपञ्चः शब्दार्थप्रपञ्चो यस्य स तं तं प्रसिद्धं पूर्वकविप्रयुक्तं कवीनां समयं कविसिद्धान्तं ज्ञात्वा ततो मनसश्चित्तस्य प्रसत्तौ प्रसन्नत्वे सतीत्यर्थः । कवेः कर्म कवित्वं तां विदध्यात्कुर्यात् ॥

इति वाग्भटालंकारव्याख्यायां सिंहदेवगणिकृतायां प्रथमः परिच्छेदः ।

द्वितीयः परिच्छेदः ।

अथ काव्यशरीरं दर्शयन्नाह—

संस्कृतं प्राकृतं तस्यापभ्रंशो भूतभाषितम् ।
इति भाषाश्चतस्रोऽपि यान्ति काव्यस्य कायताम् ॥ १ ॥

तस्य पूर्वप्रस्तुतस्य काव्यस्य एताश्चतस्रोऽपि भाषाः कायतां शरीरत्वं प्राप्नुवन्ति । चतस्रोऽपि भाषाः काव्यस्य शरीरप्राया इत्यर्थः ॥

अथ भाषाचतुष्टयं स्पष्टयति—

संस्कृतं स्वर्गिणां भाषा शब्दशास्त्रेषु निश्चिता ।
प्राकृतं तज्जतत्तुल्यदेश्यादिकमनेकधा ॥ २ ॥

देवानां भाषा संस्कृतं भवति । किंविशिष्टा । शब्दशास्त्रेषु व्याकरणेषु निश्चिता सम्यग्व्युत्पत्त्या निर्णीता । प्रकृतेः संस्कृतादागतं प्राकृतं अनेकधा अनेकप्रकारैर्भवति ।

तज्जं च तत्तुल्यं च देश्यं च तज्जतत्तुल्यदेश्यानि तानि आदौ यस्य तत्तथा। तस्मात्संस्कृता-जायते स्म तज्जम् । यथा—

'सिरिसिद्धराअ सच्चं साहसरसिक त्ति कित्तणं तुज्झ ।
कहमण्णहा मणं मह पडन्तमअणत्थमक्कमसि ॥'

हे श्रीसिद्धराज जयसिंहदेव, तव साहसरसिक इति कीर्तनं सत्यमस्ति तत्तथा । अन्यथा कथं मनो मम आक्रामसि । मनः किंभूतम् । पतन्ति मदनास्त्राणि स्मरबाणा यत्र तत् । अत्र संस्कृतशब्दा एव प्राकृतीभूता इति तज्जम् । तेन संस्कृतेन तुल्यं समसंस्कृतमित्यर्थः । उदाहरणं यथा—'संसारदावानलदाहनीरम्–' इत्यादिस्तुतयः । अत्र प्राकृतेऽपि संस्कृतशब्दा नान्यथा भवन्तीति ॥

देशे भवं देश्यम् । यथा—

'सत्तावीसञ्जोअणकरपसरो जाव अज्ज वि न होइ ।
पडिहत्थबिम्बगहवइवअणे ता वज्ज उज्जाणम् ॥'

अत्र सत्तावीसञ्जोअणशब्दो देश्यश्चन्द्रार्थे, तस्य किरणप्रसरो यावत् अद्यापि न भवति । पडिहत्थशब्दोऽपि देश्यः संपूर्णार्थः । गहवइशब्दो देश्यश्चन्द्रार्थः । ततो हे संपूर्णमण्डल-चन्द्रवदने तावत्त्वं उद्यानं व्रजेति ।

आदिशब्देन शौरसेनी भाषा मागधी च गृह्यते । शौरसेनीमागध्योः प्राकृतादल्प एव भेदः । शौरसेनी यथा—इदानींशब्दे इलोपः–'जं दाणीं दुब्बलो अहयम्' । तद्शब्दस्य ता—'ता पहि' । एवशब्दस्य य्येव—'इह य्येव' । ननुशब्दस्य णम्—'णं भणामि तुमम्' । अम्महेशब्दो हर्षे—'अम्महे, एसो वल्लहो जणो' । विदूषकादीनां हर्षे ही ही भो इति शब्दाः—'ही ही भो, एस नरु जम्पइ' इत्यादि ॥

मागधीभाषायां अकारान्तस्य सौ एर्भवति—'एस वल्लहे' । तथा अहंशब्दस्य हगे भवति—'हगे अगदा' । तिष्ठतेस्तकारस्य चकारः—'चिट तुमम्' । तथा रेफस्य लः, णकारस्य च नः । यथा तरुणस्थाने 'तलुन' इति, रूक्षस्थाने 'लुक्खं' इत्यादि । एवमनेन प्रकारेणानेकधा प्राकृतं ज्ञेयम् ॥

अपभ्रंशभाषामाह—

अपभ्रंशस्तु यच्छुद्धं तत्तद्देशेषु भाषितम् ।

अपभ्रंशः पुनर्भवति । स इति स्वयं गम्यते । यत्तेषु तेषु कर्णाटपञ्चालादिषु शुद्धं अपरभाषाभिरमिश्रितं भाषितं सोऽपभ्रंशो भवतीत्यर्थः । इह क्वचिदभूतोऽपि रेफो भवति । यथा—'चारुड तुहु अइमां डि अउदीसह सव्व पडन्तु । कहि मा कइअहं आविमइ अह्मं के रनु कन्तु ॥'

पैशाचीमाह—

यद्भूतैरुच्यते किंचित्तद्भौतिकमिति स्मृतम् ॥ ३ ॥

यत्किंचिद्भूतैः पिशाचैरुच्यते जल्प्यते तद्भौतिकं पैशाचिकमिति कथितम् । भूताना-

मिदं भौतिकम् । अत्र दकारस्य तः । यथा—'माउतेवं तवं नमह' मारुदेवं देवं नमत । यूयमित्यर्थः । हृदयस्य यकारः पकारो भवति । यथा—'हि तपं पंके इ' । रस्य लः । यथा 'लुद्दो' रौद्र इत्यर्थ इत्यादि ॥

अथ वाङ्मयस्य द्विप्रकारत्वमाह—

छन्दोनिबद्धमच्छन्द इति तद्वाङ्मयं द्विधा ।
पद्यमाद्यं तदन्यच्च गद्यं मिश्रं च तद्द्वयम् ॥ ४ ॥

तत्प्रसिद्धं वाचां विकारो वाङ्मयं द्विधा द्विप्रकारं भवति । एकं मात्रागणबन्धाच्छन्दसा निबद्धम् । अपरं चाच्छन्दश्छन्दोरहितम् । आद्यं छन्दोनिबद्धं पद्यं कथ्यते । तदन्यत् ततोऽन्यच्छन्दोविहीनं गद्यं कथ्यते । तयोर्द्वयं तद्द्वयं छन्दोनिबद्धाछन्दसोर्द्वयं मिश्रं कथ्यते । गद्यपद्यरूपम् । तच्च चम्पूरिति मिश्रम् । 'गद्यपद्यमयी चम्पूः' इति वचनात् । मिश्रं च नाटकादिषु चम्पूग्रन्थेषु च भवति ॥

काव्ये दोषपरिहारार्थमाह—

अदुष्टमेव तत्कीर्त्यै स्वर्गसोपानपङ्क्तये ।
परिहार्यानतो दोषांस्तानेवादौ प्रचक्ष्महे ॥ ५ ॥

तत्काव्यमदुष्टमेव दोषरहितमेव कीर्तिनिमित्तं भवति । किंविशिष्टायै कीर्त्यै । स्वर्गस्य स्वर्गरूपस्य आवासस्य सोपानपङ्क्तिरिव स्वर्गसोपानपङ्क्तिस्तस्यै । यथा सोपानपङ्क्त्या उच्चैस्तरे प्रासादे आरुह्यते कीर्तिरूपसोपानश्रेण्या कवयः काव्यकरणेन स्वर्गलक्षणतुङ्गप्रासादमारोहन्ति । कविकीर्तेः स्वर्गेऽपि निर्मीयमाणत्वात् । अतः कारणात्परिहार्यान्दोषान्प्रसिद्धानादौ धुरि प्रचक्ष्महे कथयामो वयम् ॥

तत्र काव्ये दोषास्त्रिविधा भवन्ति । पददोषा वाक्यदोषा वाक्यार्थदोषाश्च तत्र प्रथमं पदविषयानष्टौ दोषानाह—

अनर्थकं श्रुतिकटु व्याहतार्थमलक्षणम् ।
स्वसंकेतप्रकॢप्तार्थमप्रसिद्धमसंमतम् ॥ ६ ॥
ग्राम्यं यच्च प्रजायेत पदं तन्न प्रयुज्यते ।
क्वचिदिष्टा च विद्वद्भिरेषामप्यपदोषता ॥ ७ ॥ (युग्मम्)

न विद्यतेऽर्थः प्रयोजनं यस्य तदनर्थकम् । निष्प्रयोजनमित्यर्थः । श्रुतौ श्रवणे कटु श्रुतिकटु यत् श्रवणे कर्कशमित्यर्थः । व्याहतो विरुद्धोऽर्थो यस्य तद्व्याहतार्थं विरुद्धार्थमित्यर्थः । न विद्यते लक्षणं शब्दशास्त्रव्युत्पत्तिर्यस्य तत्तथा । व्याकरणहीनमित्यर्थः । स्वसंकेतेनैव न परसंकेतेन प्रकल्पितोऽर्थो यस्य तत्तथा । स्वाभिप्रायकल्पितमित्यर्थः । शास्त्रे क्वचित्प्रोक्तमपि यन्न प्रसिद्धं विख्यातं तत् अप्रसिद्धम् । असंमतं नाभिमतमित्यर्थः ॥ ग्रामे प्रत्यन्तपुरे भवं ग्राम्यं ग्रामीणजनवचनतुल्यमित्यर्थः । एवंविधं यत्पदं प्रजायेत प्रादुर्भवेत् त-

त्पदं शब्दरूपं न प्रयुज्यते, काव्येषु तादृशस्य पदस्य दुष्टत्वात् । अत्रापवादमाह—क्वचिदिष्टा चेत्यादि । क्वचित्केषुचिदनुवादोपहासार्थेषु विद्वद्भिः पूर्वाचार्यैरेषामपि पूर्वोक्तदुष्टपदानामपि अपदोषता निर्दोषता इष्टा प्रतिपादितेत्यर्थः ॥ यथा—

'मुखं चन्द्रश्रियं धत्ते श्वेतश्मश्रुकराङ्कुरः ।
अत्र हास्यरसोद्देशे ग्राम्यत्वं गुणतां गतम् ॥'

हास्यरसावतारादिहेतवे ग्राम्यादिपदान्यपि गुणाय भवन्तीति भावः ॥

तत्र प्रथममनर्थकमाह—

प्रस्तुतेऽनुपयुक्तं यत्तदनर्थकमुच्यते ।
यथा विनायकं वन्दे लम्बोदरमहं हि तु ॥ ८ ॥

प्रस्तुते प्रारब्धेऽर्थे यदनुपयुक्तं नोपयुक्तं अनुपयोगि भवति तत्पदमनर्थकमुच्यते । उदाहरणमाह—यथेति । यथाशब्दो दृष्टान्तोपन्यासार्थः । अत्र लम्बोदरपदं हि तु इति च सर्वमनर्थकम् । यतः यत्स्वरूपमात्रवाचकं पादपूरणमात्रं च यत् तद्वयमपि अनर्थकं ज्ञेयम् । लम्बोदरपदं हि स्वरूपमात्रवाचकम् । हितुपदे तु पादपूरणमात्रार्थके । अतोऽनर्थकानि । तथा वन्दे इत्यत्र वर्तमानाया एकवचनस्य प्रयोगादहमित्यपि स्वयं लभ्यते । अतोऽहमिति पदमपि पुनरुक्तत्वादनर्थकं ज्ञेयम् । प्रयोजनविवक्षायां तु अहमितिपदं प्रयुक्तं नानर्थकमिति । अत्र शिष्य आह—'ननु लम्बोदरपदं गणेशार्थप्रतिपादकं ततः कथमनर्थकम् । न च वाच्यं विनायकशब्देनैवोक्तार्थत्वात् पुनरुक्तदोषः स्यादिति । पुनरुक्तदोषस्यात्रानिषिद्धत्वात्'[1] । अत्र उच्यते—पुनरुक्तदोषा अनर्थकदोषेऽन्तर्भवन्ति । ये तु पुनरुक्तदोषान्पृथङ्निषेधन्ति, तेऽपि पदार्थप्रतिपत्तौ जातायां पदान्तरप्रयोगमनुपयोगिनं मन्यन्त एव । न चेह प्रस्तुते वन्दे इत्यर्थे लम्बोदरपदं कंचिदुत्कर्षं पुष्णाति । तेन पुनरुक्तदोषोऽनर्थकदोषेऽन्तर्भवतीति सिद्धम् । यत्तु वक्ता हर्षभयादिवशात् पदं द्विस्त्रिर्वा प्रयुङ्क्ते, तत्र नायं दोषः । तेन विना हि कथं हर्षभयादिप्रतीतिः स्यात् । तदुक्तं श्रीआवश्यके—

'सज्झायज्झाण तवो स हेसु उवएसथुइपयाणेसु ।
संत गुणकित्तणेसु अ न हुन्ति पुनरुत्तदोसाओ ॥'

यथा—

'जयजय चक्वराजण्णो विण्णोरवतार भूप जयसिंह ।
अतिकेशहस्तहस्तव्याकृतदुर्वारवीर भुवनेऽस्मिन ॥'

अत्र जयजयशब्दं विना हर्षो न गम्यते । हस्तशब्दयोस्तु पुनरुक्ताभासत्वमेव । भिन्नार्थत्वात् भये यथा अहिरहिः । एवं वीप्सानुवादादिष्वपि द्रष्टव्यम् ॥

अथ श्रुतिकटु आह—

निष्ठुराक्षरमत्यन्तं बुधैः श्रुतिकटु स्मृतम् ।
एकाग्रमनसा मन्ये स्रष्ट्रेयं निर्मिता यथा ॥ ९ ॥

---

१. एषा तुरीयचरणे स्फुटार्था, पादत्रयेऽस्फुटार्था.

विद्वद्भिर्भृशं कठोराक्षराणि यत्र तत्पदं 'श्रुतिकटु' इति पठितम् । उदाहरणमाह—एकेति । यथाब्दो निर्देशनोपदर्शनार्थः । इयं युवती स्रष्ट्रा विधात्रा घटिता । किंभूतेन । एकाग्रं सावधानं मनो यस्य स एकाग्रमनास्तेन । मन्ये इति वितर्के । एवंविधाद्भुतरूपस्यान्यथानुपपत्तेरिति । अत्र स्रष्ट्रा इति कठोरम् ॥

व्याहतार्थमाह—

व्याहतार्थं यदिष्टार्थबाधकार्थान्तराश्रयम् ।
रतस्त्वमेव भूपाल भूतलोपकृतौ यथा ॥ १० ॥

तत्पदं व्याहतार्थं भवति, यदभीष्टार्थस्य बाधकं अर्थान्तरमन्यार्थमाश्रयति । एकस्मादर्थादन्योऽर्थः अर्थान्तरं इष्टार्थबाधकं च तदर्थान्तरं च इष्टार्थबाधकार्थान्तरं आश्रयो यस्येति समासविधिः । उदाहरणं यथा—भूतलस्योपकृतिरुपकारस्तस्यां त्वं रतः आसक्त इतीष्टोऽर्थः । तस्य बाधकं भूतानां प्राणिनां लोपकरणे रतस्त्वमित्येवंविधमर्थान्तरमाश्रयति भूतलोपकृतिशब्दः ॥

अथालक्षणं लक्षयति—

शब्दशास्त्रविरुद्धं यत्तदलक्षणमुच्यते ।
मानिनीमानदलनो यथेन्दुर्विजयत्यसौ ॥ ११ ॥

यत्पदं शब्दानां शास्त्रेण व्याकरणेन विरुद्धं तदलक्षणं कथ्यते । उदाहरति—यथेत्युदाहरणार्थम् । मानवतीनां तरुणीनां मानस्याहंकारस्य दलयतीति दलनो विदारकः इन्दुश्चन्द्रो विजयति विशेषेण जयति । चन्द्रोदये मन्मथोन्मादेन पतिषु साहंकारा अपि युवतयो मानं मुञ्चन्तीति । अत्र 'परावेर्जः' इति सूत्रेणात्मनेपदप्राप्तौ विजयतीति परस्मैपदं दुष्टम् । विजयते इत्येव भव्यम् ॥

स्वसंकेतप्रक्रमार्थमाह—

स्वसंकेतप्रक्रमार्थं नेयार्थान्तरवाचकम् ।
यथा विभाति शैलोऽयं पुष्पितैर्वानरध्वजैः ॥ १२ ॥

नीयत इति नेयं ग्राह्यं न तु गम्यम् । नेयं च तदर्थान्तरं च नेयार्थान्तरं तस्य वाचकं पदं स्वसंकेतप्रक्रमार्थं भवतीत्यर्थः । उदाहरति—यथेति । अत्र वानरध्वजैरिति ककुभाख्यैरर्जुनवृक्षैरित्यर्थः । वानरध्वजशब्देनार्जुननामा पाण्डवः कथ्यते तस्य कपिध्वजत्वात् । ननु अर्जुननाम्ना सादृश्येन ककुभवृक्षास्तेन वानरध्वजपदं नेयार्थम् । वानरध्वजशब्देन हि ककुभवृक्षा न कथ्यन्ते, ततः स्वसंकेतप्रक्रमार्थं वानरध्वजपदम् । यत्तु समस्तकविसंकेतनं तत्र न दोषः । यथा रथाङ्गशब्दश्चक्रनाम्नि पक्षिणि, द्विरेफशब्दो भ्रमरे । द्विकशब्दः काके ॥

अथाप्रसिद्धमाह—

यस्य नास्ति प्रसिद्धिस्तदप्रसिद्धं विदुर्यथा ।
राजेन्द्र भवतः कीर्तिश्चतुरो हन्ति वारिधीन् ॥ १३ ॥

यस्य पदस्य प्रसिद्धिः कविरूढिर्नास्ति तदप्रसिद्धं विदुः तथात्वे न जानन्ति । धातूनामनेकार्थत्वात्कथयन्ति वा । उदाहरणं यथा—हे भूपेन्द्र तव कीर्तिश्चतुःसंख्यान् पूर्वपश्चिमदक्षिणोत्तरान् समुद्रान् हन्ति गच्छति भ्राम्यतीति भावः । अत्र 'हनङ् हिंसागत्योः' इति धातुपाठे गत्यर्थः पठितोऽपि हन्तिधातुर्न कविपरम्परायां प्रसिद्धः । प्रयोजनविशेषे तु गत्यर्थप्रयोगोऽप्यदुष्ट एव । यथा विशेषे श्लेषादिषु ॥

असंमतमाह—

शक्तमप्यर्थमाख्यातुं यन्न सर्वत्र संमतम् ।
असंमतं तमोम्भोजं क्षालयन्त्यंशवो रवेः ॥ १४ ॥

यत्पदमर्थमाख्यातुमभिधेयं वक्तुं शक्तमपि समर्थमपि सर्वत्र महाकविशास्त्रेषु न संमतं कवीनां नाभिमतं तदसंमतं कथ्यते । यत्तदोर्नित्यसंबन्धत्वात् तच्छब्दस्य स्वयं गम्यमानत्वात् । अत्रोदाहरणमाह—रवेः सूर्यस्यांशवः किरणास्तम एवाम्भोजः कर्दमस्तं तमोम्भोजं ध्वान्तरूपमम्भोजं कर्दमं क्षालयन्तीत्यर्थः । अत्राम्भोजशब्दोऽम्भसो जातोऽम्भोज इति व्युत्पत्त्या कर्दमं वाचयितुं समर्थोऽपि कमलादन्यत्र कवीनां न संमतः कमले एव तस्य रूढत्वात् ॥ तथा—प्रपूर्वः स्मृधातुर्विस्मरणार्थे एव प्रसिद्धो न तु प्रकृष्टस्मरणार्थे । तथा चोक्तं नैषधकाव्ये—

'नाक्षराणि पठता किमपाठि प्रस्मृतः किमथवा पठितोऽपि ।
इत्थमर्थिचयसंशयदोलाखेलनं खलु चकार नकारः ॥'

तथा—प्रपूर्वः स्थाधातुर्गमनार्थे प्रसिद्धो न तु प्रकृष्टस्थानार्थे । यथा—'असौ नगरं प्रति प्रस्थितः' । गत इत्यर्थः । तथा आङ्पूर्वो वहतिः करणे, न तु समन्ताद्वहने । यथा—'महिमा विस्मयावहा' । विस्मयकरीत्यर्थः । एवं कविसंमतमेव पदं प्रयोज्यं काव्ये नान्यत् ॥

अथ ग्राम्यमाह—

यद्यत्रानुचितं तद्धि तत्र ग्राम्यं स्मृतं यथा ।
छादयित्वा सुरान्पुष्पैः पुरो धान्यं क्षिपाम्यहम् ॥ १५ ॥

यदिति । यत्पदं यत्र देशेऽनुचितं वक्तुमयोग्यं भवति हि निश्चितं तत्पदं तत्र देशे ग्राम्यं स्मृतं कविभिस्तदश्लीलं कथितमित्यर्थः । यथेत्युदाहरणार्थम् । अहं पुष्पैः सुरानभ्यर्च्य बलिं ढौकयामीत्येवं वक्तुं योग्यं भवति । अत्र तु अहं देवान्पुष्पैश्छादयित्वाभे धान्यं क्षिपामीति ग्रामीणलोकतुल्यवचनं प्रोक्तं तत्तादृशं पदं ग्राम्यं ज्ञेयमिति । तथा—श्री-

ढाजुगुप्सा अमङ्गलप्रीतिकरा ये शब्दास्तेऽपि सभानुचितत्वाद्ग्राम्या एव । व्रीडाहेतुर्यथा—'साधनं सुमहद्यस्य—' इत्यत्र साधनशब्दः पुंश्चिह्नेऽपि शङ्क्येत । जुगुप्सावाचको यथा—'वायुः प्रसरति' । वायुशब्दोऽपानपवनशङ्काकारी । अमङ्गलप्रतीतिकरो यथा—'संस्थितोऽयम्' । संस्थितशब्दोऽत्र मृतार्थशङ्काकारी । तथा—

'अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठः ।

परमार्थतः सहृदयं वहति पुनः कालकूटघटितमिव ॥'

अत्र पेलवशब्दोऽसभ्यत्वाद्ग्राम्य एव । याभ्यांसाभिरित्यादयस्तु क्वचिद्देशेऽसभ्यत्वाद्ग्राम्याः न तु सर्वत्र । भगवतीभगिनीशवलिङ्गप्रभृतयस्तु लोकेऽविरुद्धत्वाददुष्टाः । उक्तं च—

'लोकवत्प्रतिपत्तव्यो लौकिकोऽर्थः परीक्षकैः ।

प्रतिलोकव्यवहारसदृशौ बालपण्डितौ ॥' इति ।

क्वचिदेषामप्यनर्थकादीनामपदोषता ।

'ववयस्यास्मि दादामी ततवाहं ससवदा ।

ततमानय मन्दोक्तिमेनामभ्येत्यवं शुकः ॥'

वकारादयोऽनर्थका अलक्षणाश्च तथाप्यत्रानुकरणार्थत्वात्तेषां न दोषः ।

युगपत्स्तुतिनिन्दयोर्वाच्ययोर्व्याहतार्थमपि न दुष्टम् । यथा—

'रतस्त्वमेव भूपाल भूतलोपकृतौ सदा ।

अत एव यशः स्वैरं तवापूर्वाश्च कीर्तयः ॥'

स्वैरं स्वेच्छाचारी मन्दं च । अपूर्वा अद्भुता अकारपूर्वाश्च अकीर्तय इत्यर्थः ।

प्रहेलिकायां स्वसंकेतप्रक्रमार्थमपि न दुष्टम् । यथा—

'भवणो इउण सामन्च अणं रइ थाम दाग्बो जाओ ।

रवितणय मण्डलोकय इत्थिपमुण कुमगाम्म ॥'

अत्र रवितनयः कर्णस्तच्छब्दवाच्यः ।

संप्रत्यष्टौ वाक्यदोषान्क्रमेणाह—

पदात्मकत्वाद्वाक्यस्य तद्दोषाः सन्ति तत्र हि ।

अपदस्थास्तु ये वाक्ये दोषास्तान्ब्रूमहेऽधुना ॥ १६ ॥

उक्ताः पददोषाः । यस्मिन्वाक्ये सदोषं पदं प्रयुज्यते तद्वाक्यमपि सदोषपदयोगात्सदोषमेवेत्याह—तद्दोषाः पदगतदोषाः अनर्थकादिकाः हि निश्चितं तत्र वाक्ये सन्ति । वाक्यस्य पदात्मकत्वात्पदरूपत्वात् । सदोषपदनिष्पन्नं वाक्यमपि सदोषम् । निर्दोषैः पदैर्वाक्यमपि निर्दोषम् । यथा—

'गजेन्द्र भवतः कीर्तिश्चतुरो हन्ति वारिधीन् ।'

इत्यत्र हन्तीति सदोषक्रियया समग्रदोषं वाक्यं सदोषं जातम्। एतावता ये पददोषा भवन्ति, ये अपदस्था वाक्यदोषाः, ये पदे न सन्ति किंतु वाक्ये सन्ति, तानधुना वच्मः॥

खण्डितं व्यस्तसंबद्धमसंमितमपक्रमम्।
छन्दोरीतियतिभ्रष्टं दुष्टं वाक्यमसत्क्रियम्॥ १७॥

एवंविधं वाक्यं दुष्टं सदोषम्। छन्दोभ्रष्टं रीतिभ्रष्टं यतिभ्रष्टम्॥

अथानुक्रमेण सर्वानाह—

वाक्यान्तरप्रवेशेन विच्छिन्नं खण्डितं मतम्।
यथा पातु सदा स्वामी यमिन्द्रः स्तौति वो जिनः॥ १८॥

यद्वाक्यं वचनान्तरन्यासेन विच्छिन्नं त्रुटितं तत् खण्डितम्। जिनः स्वामी वो युष्मान्पातु इति वाक्यं यमिन्द्रः स्तौतीति वाक्यान्तरेण विच्छिन्नत्वात्खण्डितम्॥

संबन्धिपददूरत्वे व्यस्तसंबन्धमुच्यते।
यथाद्यः संपदं ज्ञाता देयात्तत्वानि वोऽर्हताम्॥ १९॥

एकस्मिन्नेव वाक्ये संबन्धिपदादूरत्वे सति यस्य पदस्य यत्पदं संबन्धि तत्तत्रैव योज्यम्। तद्दूरत्वे सति व्यस्तसंबन्धमुच्यते। यथात्रार्हतामाद्यस्तत्वानि ज्ञाता वः संपदं देयादितिसंबन्धिपदानां यद्दूरे स्थापनं तत् व्यस्तसंबन्धं ज्ञेयम्॥

शब्दार्थौ यत्र न तुलाविधृताविव संमितौ।
तदसंमितमित्याहुर्वाक्यं वाक्यविदो यथा॥ २०॥

यत्र बन्धे शब्दार्थौ तुलाविधृताविव न संमितौ। यथा तुलाविधृतौ द्रव्यौ द्वयोः पार्श्वयोर्न न समौ, तदा संमितौ। यत्र शब्दा बहवोऽर्थोऽल्पः, वाक्यविदस्तद्वाक्यमसंमितमाहुः॥

उदाहरणमाह—

मानसौकःपतद्यानदेवासनविलोचनः।
तमोरिपुविपक्षारिप्रियां दिशतु वो जिनः॥ २१॥

मानसे ओको गृहं यस्य पततः पक्षिणः स मानसौकः पतन् हंसः, स एव यानं यस्य स चासौ देवश्च मानसौकःपतद्यानदेवो ब्रह्मा तस्यासनं कमलं तद्वत्तत्सदृशे विशिष्टे लोचने यस्य स जिनो वो युष्माकं तमोरिपुविपक्षारिप्रियां दिशतु। तमोरिपुः सूर्यस्तस्य विपक्षो राहुस्तस्यारिर्विष्णुस्तस्य प्रिया लक्ष्मीस्तां दद्यात्। अत्र शब्दबाहुल्येऽर्थस्तोकत्वमेव दोषः॥ 'अल्पाक्षरं महार्थं' एवं न दोषः। शब्दाल्पत्वेऽर्थे बहुलता गुणाय भवति।

१. 'मसंमत' ख. २. 'संमतौ' ख.

अपक्रमं भवेद्यत्र प्रसिद्धक्रमलङ्घनम् ।

यथा भुक्त्वा कृतस्नानो गुरून्देवांश्च वन्दते ॥ २२ ॥

यत्र वाक्ये प्रसिद्धक्रमलङ्घनं भवेत् तदपक्रममुच्यते । अपगतः क्रमो यस्मात्तदपक्रममुच्यते। तथादौ स्नानं ततो देववन्दनं ततो गुरुनमस्करणं ततो भोजनमित्यादिक्रमोऽत्र भग्नः॥

छन्दःशास्त्रविरुद्धं यच्छन्दोभ्रष्टं हि तद्यथा ।

स जयतु जिनपतिः परब्रह्ममहानिधिः ॥ २३ ॥

यद्वाक्यं छन्दःशास्त्रविरुद्धं तच्छन्दोभ्रष्टं कथ्यते । तद्यथेत्युदाहरणे स जिनपतिर्जयतु विजयतां परब्रह्मणो महानिधानं स जयतु इत्यत्र छन्दोभङ्गः । आद्यादक्षरान्नगणस्य पतनादनुष्टुब्लक्षणं नास्ति । तथा चोक्तम्—'वक्त्रं नाद्यान्नसौ स्याताम्' इत्यादि । अधिकारस्तु तत्र वृत्तरत्नाकरछन्दसि विलोकनीय इति ॥

रीतिभ्रष्टमनिर्वाहो यत्र रीतेर्भवेद्यथा ।

जिनो जयति स श्रीमानिन्द्राद्यमरवन्दितः ॥ २४ ॥

एवं वाली रीतिः समासा.................... ॥

पदान्तर्विरतिप्रोक्तं यतिभ्रष्टमिदं यथा ।

नमस्तस्मै जिनस्वामिने सदा नेमयेऽर्हते ॥ २५ ॥

यद्वाक्यं पदान्तर्विरत्या पदमध्ये विरतिर्यतिस्तया प्रोक्तं तद्यतिभ्रष्टं कथ्यते । पदान्ते सर्वत्र विरतिः कार्या न तु पदमध्ये पदमध्यविरतिप्रोक्तं तत् यतिभ्रष्टमुच्यते । यतिविरती एकार्थौ । 'नमस्तस्मै जिनस्वामि' इत्यत्र वर्णपूर्णत्वात्पदान्तर्यतिः कृता । 'ने' इत्यक्षरं चतुर्थपादे पतितम् । नैवं भवेत् । भवेच्च क्वापि, संध्यादिविशेषभावात् ॥

सत्क्रियापदहीनं यत्तदसत्क्रियमुच्यते ।

यथा सरस्वतीं पुष्पैः श्रीखण्डैर्घुसृणैः स्तवैः ॥ २६ ॥

असती क्रिया यत्र वाक्ये तत्क्रियापदविहीनमसत्क्रियमुच्यते । यथाहं सरस्वतीं पुष्पै रचयामि श्रीखण्डैर्घुसृणैर्विलिम्पामि स्तवैः स्तौमीत्यादिक्रियाणामभावादसत्क्रियत्वम् । तथा न विद्यते सती मङ्गलार्था क्रिया यत्रेत्यन्वयार्थाश्रयणाद्मङ्गलार्थक्रियाहीनत्वे कचिन्न दोषः । यथा—

---

१. पुस्तकद्वयेऽपि समान इयानेव पाठः. 'अत्र प्रथमपादेऽसमस्तपदत्वाद्वैदर्भी रीतिः, द्वितीयपदे भूयःसमासवत्त्वाद्गौडीया रीतिः' इति जिनवर्धनसूरिव्याख्या.

'मा भुजंगास्तरङ्गिण्यो मृगेन्द्राः क्रूरदन्तिनः ।
भवन्तं वत्स संप्राप्तं पन्थानः सन्तु ते शिवाः ॥'

अत्र हे वत्स भुजंगा मा दांक्षुः, तरङ्गिण्यो मा नैषुः, मृगेन्द्रा मा दार्षुः, क्रूरदन्तिनो दुष्टगजाः पथि त्वां मा भैत्सुरित्याद्यमङ्गलार्थक्रियाहीनत्वेनापि न दोषः । यदि प्रान्ते 'हे वत्स ते तव पन्थानः शिवाः सन्तु कल्याणा भवन्तु' इति मङ्गलार्थक्रिया प्रयुक्ता । क्रियागमेषु पुनरसत्क्रियाभासत्वमेव, गुप्तायाः क्रियायाः सद्भावात् । यथा—

'राजेन्द्र करवालोऽयं कीर्तिपण्याङ्गनारतः ।
भुजंगवत्तमासिस्ते द्विपक्षोहितकुङ्कुमैः ॥'

इत्यत्र भुजंगतीति क्रियापदं नष्टप्रायम् ॥

उक्ता अष्टावपि वाक्यदोषाः । अथ वाक्यस्यार्थदोषानाह—

देशकालागमावस्था द्रव्यादिषु विरोधिनम् ।
वाक्येष्वर्थं न बध्नीयाद्विशिष्टं कारणं विना ॥ २७ ॥

वाक्यार्थविदः पुरुषा वाक्येषु देशविरोधिनोऽर्थांस्तथा कालविरोधिन आगमविरोधिनोऽवस्थाविरोधिन आदिशब्दाल्लोकविरोधिनोऽप्यर्थान् विशिष्टं कारणं विना न रचयेयुः ॥

सर्वेषामुदाहरणान्येकस्मिन्काव्ये प्रदर्श्यन्ते—

प्रवेशे चैत्रस्य स्फुटकुटजराजीस्मितदिशि
प्रचण्डे मार्तण्डे हिमकणसमानोष्मसहसि ।
जलक्रीडायातं मरुसरसि बालद्विपकुलं
मदेनान्धं विध्यन्त्यसमशरपातैः प्रशमिनः ॥ २८ ॥

यथा प्रशमिनः क्षमापराश्चैत्रस्य चैत्रमासस्य प्रवेशे मार्तण्डे सूर्ये प्रचण्डे सति मरुसरसि मरुस्थलीसरोवरे जलक्रीडायातं पानीयक्रीडार्थमागतं मदेनान्धं बालद्विपकुलं कलभसमूहं असमशरपातैर्विषमबाणप्रहारैर्विध्यन्ति । किंभूते चैत्रप्रवेशे । स्फुटकुटजराजीस्मितदिशि स्फुटाः प्रकटाः कुटजास्तेषां राजी श्रेणिस्तया स्मिता हसिता दिशो यत्र प्रवेशे । किंभूते मार्तण्डे । हिमकणसमानमूष्मणां महो यस्य स तस्मिन् । तथा विरोधमाह—वर्षाकाले कुटजा भवन्ति, न वसन्ते इति कालविरुद्धम् । मार्तण्डे हिमशीतलता इति द्रव्यविरुद्धम् । मरुसरसि जलक्रीडा इति देशविरुद्धम् । बालद्विपानां मदान्धतेत्यवस्थाविरुद्धम् । प्रशमिनो विध्यन्तीत्यागमविरुद्धम् ॥

यत्र तु विशिष्टं कारणं तत्र न दोषः । यथा—

'त्वद्वैरिनारीनयनाश्रुवारिभिर्नरेन्द्र निर्मूलितपत्रवल्लिभिः ।
सरांसि सत्कज्जलकर्दमाविलान्युच्चैरजायन्त मरुस्थलीष्वपि ॥'

---

१. 'बध्नीयुर्विशि' इति पाठो भवेत्.

इत्यादि अदोषः । एवं सर्वत्र भावनीयम् ॥

इति दोषविषनिषेकैरकलङ्कितमुज्ज्वलं सदा विबुधैः ।
कविहृदयसागरोत्थितममृतमिवास्वाद्यते काव्यम् ॥ २९ ॥

विबुधैः सदा कविहृदयसागरोत्थितममृतं देवैरास्वाद्यते इत्युक्तिलेशः ॥

इति वाग्भटालंकारटीकायां सिंहदेवगणिकृतायां द्वितीयः परिच्छेदः ।

तृतीयः परिच्छेदः ।

अदोषावपि शब्दार्थौ प्रशस्येते न यैर्विना ।
तानिदानीं यथाशक्ति ब्रूमोऽभिव्यक्तये गुणान् ॥ १ ॥

औदार्यं समता कान्तिरर्थव्यक्तिः प्रसन्नता ।
समाधिः श्लेष ओजोऽथ माधुर्यं सुकुमारता ॥ २ ॥

दोषरहितावपि शब्दार्थौ यैर्गुणैर्विना न प्रशस्येते । इदानीं तान् गुणान्यथाशक्ति शक्तिमनतिक्रम्य यथा भवति तथा अभिव्यक्तये स्फुटतानिमित्तं वदामः । कविवरम्यौदार्यादयो दश वक्ष्यमाणा गुणा भवन्ति । नामान्यपि दशानां सुगमानि । तथा अभिव्यक्तये इत्यत्र तादर्थ्ये चतुर्थी तेन यद्यपि दोषाणामभावो गुणान्साधयति तथापि कानि ते गुणाः किंनामानः किंस्वरूपा इत्यभिव्यक्तिर्न स्यात् । अतोऽभिव्यक्तिनिमित्तं वदामः ॥

प्रत्येकं सोदाहरणान्याह—

पदानामर्थचारुत्वप्रत्यायकपदान्तरैः ।
मिलितानां यदाधानं तदौदार्यं स्मृतं यथा ॥ ३ ॥

यदर्थचारुत्वप्रत्यायकपदान्तरैर्मिलितानामर्थरम्यत्वोत्पादकापरपदैः संयोजितानां पदानामाधानं करणं तदौदार्यं स्मृतम् ॥

उदाहरणमाह—

गन्धेभविभ्राजितधाम लक्ष्मीलीलाम्बुजच्छत्रमपास्य राज्यम् ।
क्रीडागिरौ रैवतके तपांसि श्रीनेमिनाथोऽत्र चिरं चकार ॥ ४ ॥

श्रीनेमिनाथोऽत्र क्रीडागिरौ रैवतके चिरं तपांसि चकार । राज्यमपास्य त्यक्त्वा । कथंभूतं राज्यम् । गन्धेभैर्गन्धहस्तिभिर्विभ्राजितं शोभितं धाम गेहं यस्मिंस्तत् । लक्ष्मीलीलाम्बुजं लीलाकमलं यादृग्भवति एवंविधं छत्रं यस्मिन्राज्ये तल्लक्ष्मीलीलाम्बुजच्छत्रम् ।

अत्रेभकमलगिरिशब्दानां गन्धलीलाक्रीडापदैर्मिलितानां सतामर्थरम्यत्वोत्पादकत्वादौदार्यम् । इभकमलगिरिशब्दानां केवलानां तादृशी न शोभा यादृशी गन्धलीलाक्रीडा पदान्तरैः संयोजितानां भवति । एतदौदार्यमुच्यते ॥

समतां कान्तिं चैकश्लोकेनाह—

> बन्धस्य यदवैषम्यं समता सोच्यते बुधैः ।
> यदुज्ज्वलत्वं तस्यैव सा कान्तिरुदिता यथा ॥ ५ ॥

बन्धस्य यदवैषम्यमविषमता सुकुमारता सा समता मता । तस्यैव बन्धस्य यदुज्ज्वलत्वं निर्मलता सा कान्तिरुच्यते ॥

उदाहरणमाह—

> कुचकलशविसारिस्फारलावण्यधारा-
> मनुवदति यदङ्गासङ्गिनी हारवल्लिः ।
> असदृशमहिमानं तामनन्योपमेयां
> कथय कथमहं ते चेतसि व्यञ्जयामि ॥ ६ ॥

सा कीदृशी विद्यते इति केनापि कोऽपि पृष्टः सन्नुवाच—भोः, कथय । अहं तां ते तव चेतसि कथं व्यञ्जयामि कथं प्रकटीकरोमि । अनन्योपमेयां अन्याभिर्नोपमीयते इत्यनन्योपमेया ताम् । सर्वोत्तमरूपामित्यर्थः । असदृशमहिमानं सर्वोत्कृष्टमाहात्म्याम् । यदङ्गासङ्गिनी हारवल्लिः यस्या अङ्गलग्ना हारलता कुचकलशविसारिस्फारलावण्यधारामनुवदत्यनुकरोति । कुचकलशाभ्यां स्तनकुम्भाभ्यां विसारिणी प्रसरणशीला स्फारोदारा लावण्यधारा तामनुकरोति । एवंविधरूपां तां कथं व्याख्यानयित्वा ते चेतसि प्रकटयामि । अत्रोत्कटपदाभावादुत्तमपदाभावाच्च समबन्धत्वात् समता कथिता । एष समतागुणो द्वितीयः ॥

> फलैः कृताहारः प्रथममपि निर्गत्य सदना-
> दनासक्तः सौख्ये क्वचिदपि पुरा जन्मनि कृती ।
> तपस्यन्नश्रान्तं ननु वनभुवि श्रीफलदलै-
> रखण्डैः खण्डेन्दोश्चिरमकृत पादार्चनमसौ ॥ ७ ॥

कस्यापि धनिनो वर्णनमेतत् । असावनिर्दिष्टनामा कृती पुरा जन्मनि पूर्वभवे क्वचित्कुत्रापि ननु निश्चितं वनभुवि काननभूमौ श्रीफलदलैर्बिल्वदलैः खण्डेन्दोर्हरस्य पादार्चनमकृत चकार । कथंभूतोऽसौ । सदनाद्गेहान्निर्गत्य प्रथममपि फलैः कृताहारो रचितभोजनः । अत एव—सौख्येऽनासक्तः । अश्रान्तमखेदं यथा भवति तथा तपस्यन् तपः कुर्वन् । ततोऽनेनेदृशी लक्ष्मीः प्राप्ता । अत्र विसंधिरूपसंधिविसर्गलोपप्रभृतिबन्धाग्लानिकारणाभावादौज्ज्वल्यं तृतीयो गुणः ॥

यदज्ञेयत्वमर्थस्य सार्थव्यक्तिः स्मृता यथा।
त्वत्सैन्यरजसा सूर्ये लुप्ते रात्रिरभूद्दिवा॥ ८॥

यदर्थस्याज्ञेयत्वं तत्तच्छब्दसत्तया साक्षादर्थप्रतिपादनेन बलात्कारादर्थाप्राप्यत्वं अर्थस्य सुखेन गम्यत्वम्। अल्पबन्धेनापि तादृशाः शब्दाः प्रयुज्यन्ते यादृशैः साक्षादर्थो लभ्यते सा अर्थव्यक्तिर्ज्ञेया। हे नरेन्द्र, त्वत्सैन्यरजसा सूर्ये लुप्ते दिवसे रात्रिरभूत्। अत्र रात्रेर्हेतुः सूर्यलोपः सूर्यलोपस्य हेतू रजः रजसो हेतुः सैन्यमित्यर्थस्य सुखलभ्यत्वादज्ञेयत्वम्॥

व्यतिरेकमाह—यत्रार्थस्य ज्ञेयता तत्र दोषः। यथा—

चतुरङ्गे भवत्सैन्ये प्रसर्पति दिशः क्रमात्।
नरेन्द्र बहुलध्वान्ता दिवाप्याविरभून्निशा॥ ९॥

अत्र रात्रेर्हेतुः सूर्यलोपः सूर्यलोपस्य हेतू रजः रजसो हेतुः सैन्यमित्यादिहेतोरभावादर्थस्य ज्ञेयत्वम्। एवं सदोषता(याम्)। चतुर्थ एष गुणः॥

झटित्यर्थार्पकत्वं यत्प्रसत्तिः सोच्यते बुधैः।
कल्पद्रुम इवाभाति वाञ्छितार्थप्रदो जिनः॥ १०॥

यत् झटिति शीघ्रमर्थार्पकत्वं सा प्रसत्तिरुच्यते। यथा कल्पद्रुमादिपदानामुच्चारणमात्रेणैवार्थार्पकत्वात्प्रसत्तिरुच्यते। एष पञ्चमो गुणः॥

स समाधिर्यदन्यस्य गुणोऽन्यत्र निवेश्यते।
यथाश्रुभिररिस्त्रीणां राज्ञः पल्लवितं यशः॥ ११॥

यदन्यस्य पदार्थस्य गुणोऽन्यपदार्थे निवेश्यते स्थाप्यते स समाधिगुणः। यथारिस्त्रीणामश्रुभी राज्ञो यशः पल्लवितमित्यत्र पल्लवगुणो वृक्षसंबन्धी स यशस्यारोपितः। एष समाधिगुणः षष्ठः॥

अथ श्लेषौजोगुणद्वयमेकश्लोकेनैवाह—

श्लेषो यत्र पदानि स्युः स्यूतानीव परस्परम्।
ओजः समासभूयस्त्वं तद्गद्येष्वतिसुन्दरम्॥ १२॥

पृथग्भूतान्यपि पदानि यत्र स्यूतानीवैकश्रेणिप्रोतानीव समस्तानीव परस्परं भवन्ति स श्लेषगुणः। यत्समासभूयस्त्वं समासप्राचुर्यं भवति स ओजो गुणः। तत्समासभूयस्त्वं गद्येषु गद्यबन्धेष्वतिसुन्दरं भवति॥

श्लेषोदाहरणमाह—

मुदा यस्योद्गीतं सह सहचरीभिर्वनचरै-
र्मुहुः श्रुत्वा हेलोद्धृतधरणिभारं भुजबलम्।

दरोद्गच्छद्दर्भाङ्कुरनिकरदम्भात्पुलकिता-
श्चमत्कारोद्रेकं कुलशिखरिणस्तेऽपि दधिरे ॥ १३ ॥

तेऽपि कुलशिखरिणः कुलाचला यस्य राज्ञो भुजबलं सह सहचरीभिः सह पत्नीभिर्वनचरैर्भिल्लैर्मुहुर्वारंवारं मुदा हर्षेणोद्गीतं व्याख्यातं श्रुत्वा चमत्कारोद्रेकं चमत्कारबाहुल्यं दधिरे । कथंभूताः पर्वताः । दरोद्गच्छद्दर्भाङ्कुरनिकरदम्भात्पुलकिताः । ईषदुत्पद्यमानकुशाङ्कुरसमूहमिषाद्रोमाञ्चिताः । एष श्लेषगुणः सप्तमो भवति ॥

अथ गद्यबन्धेन ओजोगुणमाह—

समराजिरस्फुरदरिनरेशकरिनिकरशिरःसरससिन्दूरपूरपरिचयेनेवारुणितकरतलो देव ॥ १४ ॥

हे देव, त्वमरुणितकरतलो रक्तीकृतहस्ततलो विभासि । उत्प्रेक्षते—समराजिरे संग्रामाङ्गणे स्फुरन्तो येऽरिनरेशानां करिनिकरा हस्तिसमूहास्तेषां शिरःसरससिन्दूरपूरस्तस्य परिचयेनेवारुणितकरतलः ॥

अथ माधुर्यसौकुमार्यगुणावाह—

सरसार्थपदत्वं यत्तन्माधुर्यमुदाहृतम् ।
अनिष्ठुराक्षरत्वं यत्सौकुमार्यमिदं यथा ॥ १५ ॥

यत्सरसार्थपदत्वं तदिदं माधुर्यं कथितम् । अर्थाश्च पदानि चार्थपदानि रससहितान्यर्थपदानि यत्र तद्भावः । अथवा सरसार्थानि पदानि तद्भावः सरसार्थपदत्वम् ॥

उदाहरणमाह—

फणमणिकिरणालीस्यूतचञ्चन्निचोलः
कुचकलशनिधानस्येव रक्षाधिकारी ।
उरसि विशदहारस्फारतामुज्जिहानः
किमिति करसरोजे कुण्डली कुण्डलिन्याः ॥ १६ ॥

किमितीति वितर्के । किमयं कुण्डलिन्याः पद्मावत्याः करसरोजे करकमले कुण्डली सर्पः कुचकलशनिधानस्य रक्षाधिकारीवास्ति । अन्यत्रापि निधानस्य[1] सर्पो रक्षां करोति । अत्रापि स्तनकुम्भा एव निधानानि तद्रक्षाकर्तास्ति । फणमणीनां किरणाल्या स्यूतो निबद्धश्च चञ्चन्दीप्यमानो निचोलः कञ्चुको यस्य सर्पस्य सः । उरसि विशदहारतां प्राप्नुवन् । तत्तुल्यतां दधान इत्यर्थः ॥

सौकुमार्यमाहोदाहरणं चाह—

प्रतापदीपाञ्जनराजिरेव देव त्वदीयः करवाल एषः ।
नो चेदनेन द्विषतां मुखानि श्यामायमानानि कथं कृतानि ॥ १७ ॥

१. 'निधीनां' क.

हे देव, एष त्वदीयः करवालः प्रतापदीपाञ्जनराजिरेव वर्तते। प्रताप एव दीपो दीप्यमानत्वात्तस्य प्रतापदीपस्य खड्गोऽञ्जनराजिरञ्जनश्रेणिरतिकृष्णत्वात्खड्गस्य। यद्येवं पूर्वोक्तं न स्यादनेन खड्गेन द्विषतां मुखानि श्यामायमानानि श्यामभावमाचरन्ति कथं कृतानि। अत्रानिष्ठुरसमासवत्त्वात्सौकुमार्यम्॥

गुणैरमीभिः परितोऽनुविद्धं मुक्ताफलानामिव दाम रम्यम्।
देवी सरस्वत्यपि कण्ठपीठे करोत्यलंकारतया कवित्वम्॥ १८॥

इति वाग्भटालंकारे तृतीयः परिच्छेदः।

अमीभिरौदार्यादिभिर्गुणैः परितः समन्ततोऽनुविद्धं व्याप्तं कवित्वं देवी सरस्वत्यपि अलंकारतया करोति मुक्ताफलानां दामेव। यथा मुक्ताफलानां मालालंकारतया कण्ठपीठे योषया क्रियते सा परितो गुणैरनुविद्धा भवति तथा कवित्वमलंकारतया कण्ठपीठे क्रियते। अतोऽलंकारावसरस्ततस्तानेव नामतः प्राह॥

इति वाग्भटालंकारटीकायां सिंहदेवगणिकृतायां तृतीयः परिच्छेदः।

चतुर्थः परिच्छेदः।

दोषैर्मुक्तं गुणैर्युक्तमपि येनोज्झितं वचः।
स्त्रीरूपमिव नो भाति तं ब्रुवेऽलंक्रियोच्चयम्॥ १॥

येनालंक्रियोच्चयेनालंकारसमुदायेनोज्झितं त्यक्तं वचो नो भाति। यथा स्त्रीरूपमलंक्रियोच्चयं विना नो भाति। काव्यविषये चित्रवक्रोक्त्यादयोऽलंकाराः। स्त्रीरूपविषयेऽलंकाराः कटककेयूरतिलकादयः॥

चित्रादयोऽलंक्रिया अलंकारा द्विविधाः—शब्दालंकारा अर्थालंकाराश्च। ततः प्रथमं शब्दालंकारांस्ततोऽर्थालंकारान्प्राह्ननामसाङ्गतः पश्चाद्विस्तरतः सोदाहरणानाह—

चित्रं वक्रोक्त्यनुप्रासौ यमकं ध्वन्यलंक्रियाः।
अर्थालंकृतयो जातिरुपमा रूपकं तथा॥ २॥
प्रतिवस्तूपमा भ्रान्तिमानाक्षेपोऽथ संशयः।
दृष्टान्तव्यतिरेकौ चापह्नुतिस्तुल्ययोगिता॥ ३॥
उत्प्रेक्षार्थान्तरन्यासः समासोक्तिर्विभावना।
दीपकातिशयौ हेतुः पर्यायोक्तिः समाहितम्॥ ४॥
परावृत्तिर्यथासंख्यं विषमः स सहोक्तिकः।
विरोधोऽवसरः सारं स श्लेषश्च समुच्चयः॥ ५॥

> अप्रस्तुतप्रशंसा स्यादेकावल्यनुमापि च ।
> परिसंख्या तथा प्रश्नोत्तरं संकर एव च ॥ ६ ॥

प्रागमीषां नामानि प्रत्येकमाह—चित्रमित्यादिश्लोकपञ्चकेन । तथा चित्रादयश्चत्वारोऽपि शब्दालंकारा अवगन्तव्याः । अर्थालंकारा जात्युपमारूपकादयः ॥

अथ चित्रादीनामलंकाराणां सोदाहरणानि लक्षणान्याह—

> यत्राङ्गसंधितद्रूपैरक्षरैर्वस्तुकल्पना ।
> सत्यां प्रसत्तौ तच्चित्रं तच्चित्रं चित्रकृच्च यत् ॥ ७ ॥

यत्र बन्धे वस्तुकल्पना पदार्थघटना अङ्गसंधितद्रूपैरक्षरैर्भवति । वस्तुनः कमलछत्रचामरबन्धादेर्घटना वस्तुनोऽङ्गानां ये संधयस्तेषु तद्रूपाणि तान्येवाक्षराणि वस्तुकमलबन्धछत्रबन्धादिनद्धानि कमलाङ्गानि दलादीनि । छत्राङ्गानि दण्डपट्टिकादीनि । तेषामङ्गानां ये संधयस्तत्र सदृशाक्षराणि कार्याणीत्यर्थः । तच्चित्रमुच्यते । यच्च चित्रकृदाश्चर्यकारि दुष्करत्वेन कविप्रशक्तिशयख्यापकं भवति एकस्वरादिकमेकव्यञ्जनादिकं वा तदपि चित्रमुच्यते । परमपि सर्वचित्रं प्रसत्तौ सत्यां प्रसत्त्यैव कार्यं विधेयम् । अप्रसत्तेस्तु कार्यैः को नाम चित्रकर्ता न भवेत् । चित्रमाकारगतिस्वरव्यञ्जनभेदाच्चतुर्विधं भवति । आकारचित्रं पद्मछत्रचामरस्वस्तिककलशहलमुसलादिबन्धैरनेकधा । गतिचित्रं गोमूत्रिकातुरगगजपदादिभिर्भवति । स्वरेण स्वराभ्यां स्वरैर्वा चित्रं स्वरचित्रम् । स्वरचतुष्कं यावच्चित्रकस्य दुष्करत्वं संभवति । स्वरत्रयादूर्ध्वं किं चित्रम् । तथा मात्राच्युतकबिन्दुच्युतकावपि स्वरचित्रभेदः । तथा व्यञ्जनचित्रं एकव्यञ्जनाद्विव्यञ्जनत्रिव्यञ्जनचतुर्व्यञ्जनबन्धम् यावद्व्यञ्जनचित्रम्, न ततरं सुकरत्वात् । अक्षरच्युतकं व्यञ्जनचित्रभेदः ॥

आकारचित्रमाह—

> जनस्य नयनस्थानध्यान एनश्छिनत्त्विनः ।
> पुनः पुनर्जिनः पीनज्ञानध्यानघनः स नः ॥ ८ ॥

स जिन इनः स्वामी नोऽस्माकमेनः पापं पुनः पुनश्छिनत्तु । किंभूतो जिनः । जनस्य नयनस्थानध्यानः । जनस्य लोकस्य नयनस्थाने ध्वानो ध्वनिर्यस्य स तथा । जिनध्वनिना आगमरूपेण नयनेनैव जनः परलोकं पश्यतीत्यर्थः । तथा पीनं स्फारतरं ज्ञानध्याने एव घनं यस्य स तथा । षोडशदलं कमलं गोमूत्रिकाचित्रम् ॥

एकस्वरचित्रमाह—

> गणनरगणवरकरतरचरण
> परपद शरणगजनपथकथक ।

अमदन गतमद गजकरयमल

शममय जय भयघनवनदहन ॥ ९ ॥

हे गणनरगणवरकरतरचरण । गणा ऋषयो नरा मनुष्याश्च क्रियासु देवादयः । गणनराणां गणाः समूहास्तेषां वरस्य कल्याणस्य करतरौ प्रकृष्टं कल्याणकरौ चरणौ यस्य स तत्संबोधनम् । तथा परं पदं यस्य सः । हे शरणगजनपथकथक हे शरणागतलोकमार्गनिर्देशक । हे अमदन निष्काम । हे गतमद निर्मद । हे गजकरयमल गजकरो हस्तिशुण्डादण्डस्तद्वत्करयमलं यस्य सः । एककारशब्दस्य लोपः । हे शममय । हे भयघनवनदहन । भयमेव घनं वनं पानीयं तस्य दहन इव दहनस्तत्संबोधनम् । अत्र मणिगुणनिकरं छन्दः । चित्रत्वादन्ते गुरूणामभावोऽपीह न दोषाय । एकस्वराचित्रम् ॥

मात्राच्युतकमपि स्वरचित्रम् । अतस्तदेवाह—

मूलस्थितिमधः कुर्वन्पात्रैर्जुष्टो गताक्षरैः ।

विटः सेव्यः कुलीनस्य तिष्ठतः पथिकस्य सः ॥ १० ॥

स दासीसुतो विटः पथि न्यायमार्गे तिष्ठतः कस्य कुलीनस्य सेव्यः स्यात् । न कस्यापीत्यर्थः । कीदृशः । मूलस्थितिं मूलकुलाचारमधः कुर्वन् । तथा गताक्षरैर्मूर्खैः पात्रैर्जुष्टः । अथ विटशब्दस्य इकाररहितस्यार्थभेदः । स इति प्रसिद्धो वटः पथिकस्य पान्थस्य तिष्ठतो निवर्तमानगतेः कुलीनस्य तदधोभूमण्डलावस्थितस्येत्यर्थः । सेव्यः स्यात् । पान्थस्य गच्छतोऽनुपविष्टस्य कथं वटः सेव्यः स्यात् । नतस्तिष्ठतः कुलीनस्येति विशेषणद्वयस्य साफल्यं जातम् । कीदृशो वटः । मूलानां जटानामधः स्थितिं कुर्वन् । तथा—गताक्षरैः पात्रैर्जुष्टः । एवं गतमासमन्ताक्षरं क्षरणं येभ्यस्तैर्गताक्षरैः पात्रैः पर्णैर्जुष्टः । विटपदादिकारमात्राच्युतकं वट इति ॥

तथा बिन्दुच्युतकमपि स्वरचित्रम् । तदाह—

धर्माधर्मविदः साधुपक्षपातसमुद्यताः ।

गुरूणां वचने निष्ठा नरके यान्ति दुःखिताम् ॥ ११ ॥

एवंविधा नरा नरके दुःखितां यान्ति दुःस्वभावं प्राप्नुवन्ति । धर्ममेवाधर्मं कृत्वा विदन्तीति धर्माधर्मविदः । साधुपक्षः सतां पक्षस्तस्य पाते पतने नाशने समुद्यताः । गुरूणां पूज्यानां वचने निष्ठा आदृताः । अथ वचनशब्दाद्बिन्दुच्युतावर्थान्यत्वम् । तथा हे नरोत्तम, गुरूणां पित्रादीनां वचने निदेशे निष्ठास्तत्पराः के दुःखितां यान्ति । न

---

१. 'गतम्' 'आ' इत्यक्षरं येभ्यस्तादृशैः पात्रैः (पत्रैरिति यावत्) इत्यर्थः । इति जिनवर्धनसूरिः.

केऽपीत्यर्थः। कीदृशाः। धर्माधर्मविदः पुण्यपापव्यक्तिज्ञातारः। साधूनां यः पक्षपातः पक्षस्वीकारस्तत्र समुद्यता आसक्ताः। वचनपदाद्बिन्दुच्युतकं वचन इति॥

ककाकुकङ्ककेकाङ्ककेकिकोकैककुः ककः।
अकुकौकःकाककाकऋक्काकुकुककाङ्ककुः॥ १२॥

ककाकु इत्येष श्लोक एकव्यञ्जनो नेमिनिर्वाणमहाकाव्ये राजीमतीपरित्यागाधिकारे समुद्रवर्णनरूपो ज्ञेयः। तथा ककः समुद्रो वर्तते। केन जलेनोपलक्षितः को वायुर्यत्र स ककः। यद्वा केन वायुना प्रेरितं कं जलं यत्र स ककः। अथवा कमेव कमात्मा यस्य स ककः। समुद्रः कीदृशः। ककाकुकंककेकांककेकिकोकैककुः। कं सुखं यथा भवति काकुर्ध्वनिर्येषां ते ककाकवः। अथवा केन सुखेन जलेन वा काकवो ध्वनिविशेषा येषां ते ककाकवः। ककाकवश्च ते कङ्काश्च कङ्का जलपक्षिणः। तथा केका केकारवोऽङ्कश्चिह्नं येषां ते केकाङ्काः केकिनो मयूराः। तथा कोकाश्चक्रवाकाः। कथं मिथो मेलकः। ककाकुकङ्काः केकाङ्केकिनः कोका एवैका अद्वितीया कुर्भूमिर्यस्य स तथा। तथा—अकुकौकःकाककाकः। कवः कुत्सिताः न कवोऽकवः शोभनाः कौकसो जलवासिनः काकाः। शोभनजलवायसा इत्यर्थः। तेषां समूहः काकं काकमेव काककम्। स्वार्थे कः। तस्य अक्का माता यः समुद्रः स एव पालकत्वान्माता। तथा—ऋक्काकुकुककाङ्ककुः। ऋक्को वेदास्तदर्थानि तेषां काकवो वक्रोक्तयस्तासां कुक उच्चारकः को ब्रह्मा सोऽङ्के उत्सङ्गे यस्यासौ अर्थादेव विष्णुस्तस्य कुः स्थानं समुद्रः। जलशयनत्वादस्येति॥

वर्णैकव्यञ्जनच्युतकमपि व्यञ्जनचित्रं तन्नदैवाह—

कुर्वन्दिवाकराश्लेषं दधच्चरणडम्बरम्।
देव यौष्माकसेनायाः करेणुः प्रसरत्यसौ॥ १३॥

हे देव, यौष्माकसेनाया असौ करेणुर्गजः प्रसरति। कीदृशः। दिवा आकाशेन सह कराश्लेषं कुर्वन्। तथा चरणडम्बरं दधत्। पक्षे वर्णच्युतकत्वात्ककारलोपे असौ रेणुः प्रसरति। कीदृशः। दिवाकरेण सूर्येण महाश्लेषं कुर्वन् सूर्यं यावद्गच्छन्नित्यर्थः। च समुच्चये। रणडम्बरं संग्रामडम्बरं दधत्। करेणुपदात्ककारच्युतकम्॥

प्रस्तुतादपरं वाच्यमुपादायोत्तरप्रदः।
भङ्गश्लेषमुखेनाह यत्र वक्रोक्तिरेव सा॥ १४॥

यत्र बन्धे उत्तरप्रदः पुमान्प्रस्तुतादर्थादपरं वाच्यमर्थमुपादाय भङ्गश्लेषपदेन वाह वदति सा वक्रोक्तिरेव॥

भङ्गपदोदाहरणमाह—

नाथ मयूरो नृत्यति तुरगाननवक्षसः कुतो नृत्यम्।
ननु कथयामि कलापिनमिह सुखलापी प्रिये कोऽस्ति॥ १५॥

प्रस्तुतो मयूरः केकी । वक्रोक्तौ तु तुरङ्गवदनो मयुः किंनरस्तस्योरो वक्षस्तन्नृत्यति भर्त्रोक्तम् । तुरगाननस्य वक्षसो नृत्यं कुतः । हे नाथ, अहं कलापिनं कथयामि इति पत्न्योक्तः । इह कलापी सुखवक्ता । हे प्रिये, कोऽस्ति । भङ्गपदं प्रस्तुतशब्दस्य खण्डना यथा । मयूरस्य कलापिनो वा ॥

श्लेषपदस्योदाहरणमाह—

भर्तुः पार्वति नाम कीर्तय न चेत्त्वां ताडयिष्याम्यहं
क्रीडाब्जेन शिवेति सत्यमनघे किं ते शृगालः पतिः ।
नो स्थाणुः किमु कीलको नहि पशुस्वामी नु गोप्ता गवां
दोलाखेलनकर्मणीति विजयागौर्योर्गिरः पान्तु वः ॥ १६ ॥

खेलनकर्मणि क्रीडाकर्मणि इत्येवंभूता विजयागौर्योर्गिरो वो युष्मान्पान्तु । विजया गौरीं पृच्छति—हे पार्वति, भर्तुर्नाम कीर्तय कथय नो चेदनेन क्रीडाकमलेन त्वां ताडयिष्याम्यहम् । पार्वत्योक्तम्—स्फुटं प्रकटमिदमेतन्मे पतिः शिवः । विजयोवाच—तव पतिः शृगालः । नो नो सखि, मे पतिः स्थाणुः । किं कीलकस्तव भर्ता । नहि नहि भगिनि, मम पतिः पशुस्वामी । तव पतिः किं गवां गोप्ता पशुपतिः पशुपालो गोपालकः । इत्याद्या विजयागौर्योर्दोलाखेलनकर्मणि वाचः पान्तु । प्रस्तुतादर्थाच्छिवादपरं शृगालादिकमर्थमादाय श्लेषेण विजया गौरीं प्रति वदति । इत्येषा श्लेषपदवक्रोक्तिः ॥

अनुप्रासमाह—

तुल्यश्रुत्यक्षरावृत्तिरनुप्रासः स्फुरद्गुणः ।
अतत्पदः स्याच्छेकानां लाटानां तत्पदश्च सः ॥ १७ ॥

तुल्या समाना श्रुतिः श्रवणं येषामक्षराणां तानि तुल्यश्रुत्यक्षराणि तेषामावृत्तिः पुनः पुनरुपादानमनुप्रासः कथ्यते । कीदृशः । स्फुरद्गुणः स्फुरन्तोऽबाधिता औदार्यादयो गुणा येन स तथा । सोऽनुप्रासो द्विधा—छेकानुप्रासो लाटानुप्रासश्च । छेका विदग्धाः छेकजनवल्लभत्वाच्छेकानुप्रासः । लाटजनवल्लभत्वाल्लाटानुप्रासः । तथा छेकानामनुप्रासोऽतत्पदः । तान्येव पदानि यत्र स तत्पदः । न तत्पदोऽतत्पदः । अन्यैरन्यैः पदैरुत्पन्न इत्यर्थः । लाटानां तत्पदस्तैस्तैरेव पदैर्निष्पन्न इत्यर्थः ॥

छेकानुप्रासोदाहरणमाह—

अलं कलङ्कशृङ्गार करप्रसरहेलया ।
चन्द्र चण्डीशनिर्माल्यमसि न स्पर्शमर्हसि ॥ १८ ॥

काचिद्विरहिणी चन्द्रमसं प्रत्याह—हे कलङ्कशृङ्गार, करप्रसरहेलया अलं पूर्यताम् । हे चन्द्र, त्वं चण्डीशनिर्माल्यमसि स्पर्शं नार्हसि निर्माल्यस्पर्शो न युज्यते सताम् । अत्रालं कलङ्कशृङ्गारकरप्रसरचन्द्रचण्डीशेत्याद्यतत्पदैश्छेकानुप्रास इति ॥

रणे रणविदो हत्वा दानवान्दानवद्विषा ।
नीतिनिष्ठेन भूपाल भूरियं भूस्त्वया कृता ॥ १९ ॥

हे भूपाल, दानवद्विषा वासुदेवेन रणे संग्रामे रणविदः संग्रामनिपुणान्दानवान्हत्वा इयं भूर्भूः कृता । त्वया नीतिनिष्ठेन न्यायनिपुणेन सता इयं भूर्भूः कृता, इदं पुरं पुरमद्य जातम्, तथेयं भूर्भूः कृता । अत्र रणे रणविदः, दानवान्दानवद्विषा, भूरियं भूरित्यादितत्पदत्वेनैवानुप्रासकरणाल्लाटानुप्रासः ॥

त्वं प्रिया चेच्चकोराक्षि स्वर्गलोकसुखेन किम् ।
त्वं प्रिया यदि न स्यान्मे स्वर्गलोकसुखेन किम् ॥ २० ॥

हे चकोराक्षि, यदि त्वं मम प्रिया जाता तदा स्वर्गलोकसुखेन नाकलोकसुखेन मम किम् । यदि च त्वं प्रिया न स्याः मम तथापि त्वां विना स्वर्गलोकसुखेन किं मम । अत्र द्वितीयचतुर्थपादेन लाटानुप्रासो भवति ॥

अत्र कठोरता लाटानुप्रासेऽपि दोषाय । तदाह—

एकत्रपात्रे स्वकलत्रवक्त्रं नेत्रामृतं बिम्बितमीक्षमाणः ।
पश्चात्पपौ सीधुरसं पुरस्तान्ममाद कश्चिद्यदुभूमिपालः ॥ २१ ॥

कश्चिद्यदुभूमिपाल एकत्रपात्रे एकस्मिन्मदिराकल्लोलके स्वकलत्रवक्त्रं बिम्बितमीक्षमाणः पुरस्तात्प्रथमं ममाद । पश्चात्सीधुरसं मदिरारसं पपौ । अन्यो मद्यं पीत्वा पश्चान्माद्यति । असौ (प्राग्) ममाद । अत्र बहुतरवर्णावृत्तौ सौकुमार्यबाधा । एवमन्येषामपि गुणानां बाधा अनुप्रासरसिकेन कविना रक्ष्या ॥

अथ यमकमाह—

स्यात्पादपदवर्णानामावृत्तिः संयुता युता ।
यमकं भिन्नवाच्यानामादिमध्यान्तगोचरम् ॥ २२ ॥

पादो वृत्तचतुर्थो भागः । पदं विभक्त्यन्तम् । वर्णोऽक्षरम् । अमीषां भिन्नवाच्यानां भिन्नार्थानामावृत्तिः पुनः पुनर्वर्णनं यमकं स्यात् । सा आवृत्तिर्द्विधा—संयुता अयुता च । संयुता अन्तराले अपरपदरहिता । अयुता अन्तरालपदसहिता । तथा संयुतावृत्तौ तद्यमकं त्रिधा—आदिमध्यान्तगोचरम् आदिगोचरमादियमकम्, मध्यगोचरं मध्ययमकम्, अन्तगोचरमन्तयमकम् । अयुतावृत्तौ त्वन्यथापि व्याख्या । आदिमध्यगोचरम् मध्यान्तगोचरम् । काकाक्षिगोलकन्यायेन मध्यशब्द उभयत्रापि संबध्यते । तथा मध्यस्यान्तोऽर्थात्पद्यान्त एवोच्यते । तेनाद्यन्तगोचरं यमकं स्यादिति सिद्धम् । आवृत्तिर्यथाशक्ति क्रियते । तेन श्लोकान्तगामिन्यप्यावृत्तिः संभवति । निषेधाभावेनैकाकारं चतुष्पदं महायमकमुच्यते, इत्यपि सिद्धम् ॥

---

१. 'एतेषु सर्वेषु पूर्वोक्तेषु सर्वथा तुल्यानामेव वर्णानामावृत्तिरुक्ता, संप्रति किंचिद्भेदेऽपि तुल्यश्रुतित्वादनुप्रासः स्यादिति दर्शयति' इत्यवतरणिकां जिनवर्धनसूरिराह.

संयुतावृत्तौ पादयमकमाह—

दयां चक्रे दयांचक्रे ।
सतां तस्माद्भवान्वित्तम् ॥ २३ ॥

हे राजन्, यस्माद्धेतोर्भवान् दयां चक्रे करुणां चकार तस्मात्कारणाद्भवान् सतां साधूनां वित्तं दयांचक्रे दत्तवान् । व्रीडा छन्दश्छन्दश्चूडामणौ ॥

मध्यपादयमकमाह—

यशस्ते समुद्रान्सदारोरगारेः ।
सदा रोरगारेः समानाङ्गकान्तेः ॥ २४ ॥

तथा हे राजन्, सत् शोभनं ते यशः समुद्रानार गतम् । कीदृशस्योरगारेर्गरुडस्य । समानाङ्गकान्तेः । स्वर्णवर्णस्येत्यर्थः । सदा रोरगारेः सदा सर्वदा रोरगा दारिद्र्यं गता अरयो यस्य तस्य रोरगारेः । 'रोरं दारिद्र्यमुच्यते' । सोमराजी छन्दः ॥

पादान्तयमकमाह—

द्विषामुद्धतानां निहंसि त्वमिन्द्रः ।
मुदं भो धराणामुदम्भोधराणाम् ॥ २५ ॥

भो राजन्, इन्द्रो धराणां पर्वतानाम् मुदं हर्षं हन्ति । कीदृशानाम् । उदम्भोधराणाम् । उदुपरि अम्भोधरा मेघा येषां तेषाम् । त्वं च उद्धतानां द्विषां मुदं निहंसि । त्वमिद्रश्च समानौ बलेनेत्यर्थः । छन्दस्तदेव ॥

अथादिमध्यगोचरं मध्यान्तगोचरं यमकमेकवृत्तेनाह—

विभातिरामा परमा रणस्य विभाति रामा परमारणस्य ।
सदेव तेऽजोर्जित राजमान सदैवतेजोर्जितराजमान ॥ २६ ॥

पादद्वयेनादिमध्ययमकम् । अग्रेतनपादद्वयेन मध्यान्तयमकम् । हे अजोर्जित अजो वासुदेवस्तद्वद्बलिष्ठ हे राजमान शोभमान हे नृप, सदैवतेजोर्जितराजमान सदैवं कर्मसहितं यत्तेजस्तेनार्जितो राजसु भूपेषु मानो महत्त्वं येन स तथा तत्संबोधनम् । ते तव रणस्य विभा विभाति । कीदृशी । अतिक्रान्तो रामो दाशरथिर्यया सा । रामा रम्या परमा प्रकृष्टा । कीदृशस्य । परमारणस्य शत्रुघातकस्य ॥

अथायुतावृत्तावादिमध्यगोचरं यमकमाह—

सारं गवयसांनिध्यराजि काननमग्रतः ।
सारङ्गवयसां निध्यदारुणं शिखरे गिरेः ॥ २७ ॥

हे प्रिय, अग्रतो गिरेः शिखरे सारङ्गवयसां मृगपक्षिणां काननं पश्य । की-

दृशम्। निध्यदारुणं निधिभिरदारुणमभीकम्। तथा सारं प्रधानम्। तथा गवयसांनिध्ये-नारण्यशब्दनिकटत्वेन राजि शोभमानम्॥

अमरनगरस्मेराक्षीणां प्रपञ्चयति स्फुर-
त्सुरतरुचये कुर्वाणानां वलक्षम रंहसम्।
इह सह सुरैरायान्तीनां नरेश नगेऽन्वहं
सुरतरुचये कुर्वाणानां वलक्षमरं हसम्॥ २८॥

हे वलक्षम्, नरेश, इह नगेऽन्वहं नित्यं सुरतरुचये सुरद्रुमगणे वाणानां वृक्षाणां कु-र्भूमिरमरनगरस्मेराक्षीणां देवाङ्गनानां रंहसं वेगं प्रपञ्चयति। रम्या वाणाः, अतो देव्यो वेगेन क्रीडार्थे आयान्तीत्यर्थः। कीदृशीनाम्। स्फुरत्सुरतरुचये सुरतसुखनिमित्तं सुरैः सहायान्तीनाम्। तथारमत्यर्थं वलक्षं धवलं हसं हास्यं कुर्वाणानाम्। अत्र पर्वते कुर्भूमिः शोभते॥

अथाद्यन्तयमकमाह—

आसन्नदेवा न रराज राजिरुच्चैस्तटानामियमत्र नाद्रौ।
क्रीडाकृतो यत्र दिगन्तनागा आसन्नदे वानरराजराजि॥ २९॥

अत्राद्राविय़ं तटानां राजिः श्रेणिर्न [न] रराज। अपि तु रराजैव। कीदृशी। आसन्न-देवा समीपस्थसुरा। तथोच्चैर्गुर्वी। यत्र यस्यां तटराजौ नदे ह्रदे दिगन्तनागा दिग्गजाः क्रीडाकृत आसन् क्रीडाकारिणोऽभवन्। कीदृशे। वानरराजराजि वानरराजा मुख्यवान-रास्तैं राजतीत्येवंशीलो वानरराजराट् तस्मिन्वानरराजराजि॥

श्लोकावसानगावृत्तिर्महायमकम्, तदाह—

रम्भारामा कुरबककमलारं भारामा कुरबककमला-।
रम्भा रामाकुरबक कमलारम्भारामाकुरबककमला॥ ३०॥

अत्र पर्वते कुर्भूमिः शोभते इति संबन्धः। कीदृशी भूमिः। रम्भारामा रम्भाभिः कदलीभिर्मिश्रा आरामा यस्यां सा तथा। अबककमला अबकं बकरहितं कं पानीयं म-लते धारयतीत्यबककमला। तथा अरमत्यर्थं भारा मा भैर्नक्षत्रैरा ईषद्रामा कर्बुरेत्यर्थः। तथा—कुरबककमलारम्भा कुरबका वृक्षविशेषाः कमलानि पद्मानि तेषामारम्भा उत्पत्तयो यस्यां सा कुरबककमलारम्भा। तथा रामा रम्या। अथवा—कुरबककमलारम्भारामा कुरबककमलानामारम्भेणोद्गमेन आ ईषद्रामा मनोज्ञा। हे अकुर वक न विद्यते कुत्सितो रवः शब्दो यस्य सोऽकुरवः, अकुरव एवाकुरवकः। शेषाद्वा कः। हे अकुरवक हे कोमलध्वान। नेमेः संबोधननाम तत्। पुनः कीदृशी कुः। कमलारम्भारामा, कमला लक्ष्मी रम्भा अप्सरसः ता एव रामाः स्त्रियो यस्यां सा। गिरिभूमौ रामाः क्रीडार्थ-

१. द्वितीयतृतीयपादस्थपदसमासो न कविसंप्रदायसिद्धः. पद्यगन्धिगद्यं वा स्यात्.

मायान्ति। अत्र कमलारम्भा एव रामा ज्ञेयाः। तथा—अकुरवककमला, कुत्सितं राजन्त इति कुरा न कुरा अकुराः शोभमाना वका वृक्षविशेषाः कमला हरिणविशेषांश्च यस्यां सा अकुरवककमला। रम्भारामेत्यत्र श्लोके द्वितीयतृतीयपदयोरन्तरा न यतिः। इदं संशयाय यदि पुनर्महायमकत्वात्कविना कृतम्, तथापि विलोक्यम्। रम्भाकुरवकेत्यस्य विशेषवती अवचूरिः। हे अकुरवककमल, अत्र पर्वते कुर्भूमिः शोभते। अकुत्सितः शोभनो रवो यस्याश्चिदानन्दादिशब्दवाच्यत्वात्। एवंविधा कस्य सुखस्य कमला यस्य नेमेः संबोधनम्। रम्भारामा तथैव। तथा—आरम्भारामा अर्थः पश्चाद्वत्। तथा कुर्भूमिरवककमला। तथा रम्भारामा रम्भा एव रामा यस्यां सा रम्भारामा। तथा अकुरवककमला। एवं व्याख्याने पदद्वयस्यान्तरं भवति। 'म्भौ न्लौ गः स्याद्भ्रमरविलसितम्' छन्दः॥

इदानीं तेनैव प्रकारेण पदयमकोदाहरणानि। तत्र संयुतावृत्तौ आदिपदयमकमाह—

हारीतहारी ततमेष धत्ते सेवालसेवालसहंसमम्भः।
जम्बालजं बालमलं दधानं मन्दारमन्दारववायुरद्रिः॥ ३१॥

एषोऽद्रिस्ततं विस्तीर्णमम्भो धत्ते। कीदृशोऽद्रिः। हारीतहारी, हारीताः पक्षिणस्तैर्हारी मनोहरः। तथा मन्दारमन्दारववायुः, मन्दारेषु कल्पवृक्षेषु मन्दारवो मन्दशब्दो वायुर्यत्र सः। सुरभिवायुरद्रावस्तीत्यर्थः। कीदृशम्। सेवालसेवालसहंसम्, सेवालसेवायामलसा राजहंसा यत्राम्भसि तत्तथा। अलमत्यर्थं बालं नूतनं जम्बालजं कमलं दधानम्॥

नेमिर्विशालनयनो नयनोदितश्री-
रभ्रान्तबुद्धिविभवो विभवोऽथ भूयः[1]।
प्राप्तस्तदाजनगरान्नगराजि तत्र
सूतेन चारु जगदे जगदेकनाथः॥ ३२॥

सूतेन सारथिना जगदेकनाथो नेमिश्चारु यथा भवति तथा जगदे। कीदृशः। नयनोदितश्रीः नयेन न्यायेनोदिता प्रेरिता श्रीर्यस्य सः। न्यायाधिकशोभ इत्यर्थः। तथा अभ्रान्तः सत्यो बुद्धिरूपो विभवो यस्य स तथा। विगतो भवो यस्य स तथा। तदाजनगरात् नारायणपुरात्तत्र नगराजि गिरीश्वरे रैवतके प्राप्तः॥

अन्तयमकमाह—

यदुपान्तिकेषु सरलाः सरला यदनूच्चलन्ति हरिणा हरिणा।
तदिदं विभाति कमलं कमलं मदमेत्य यत्र परमाप रमा॥ ३३॥

यदुपान्तिकेषु यस्य जलस्योपान्तिकेषु पार्श्वेषु सरला अवक्राः सरला देव-

1. 'भूयो वारंवारम्' इति जिनवर्धनसूरिः.

दारवो वर्तन्ते । यज्जलमनुलक्षीकृत्य हरिणा मृगा हरिणा वायुना सहोच्चलन्ति । अलमत्यर्थं तदिदं कं जलं विभाति । यत्र जले रमा लक्ष्मीः कमलमेत्य परं प्रधानं मदमाप ॥

आदियमकमाह—

कान्तारभूमौ पिककामिनीनां कां तारवाचं क्षमते स्म सोढुम् ।
कान्ता रतेशेऽध्वनि वर्तमाने कांतारविन्दस्य मधोः प्रवेशे ॥ ३४ ॥

कान्ता भार्या रतेशे भर्तरि अध्वनि पथि वर्तमाने। विदेशस्थे सतीत्यर्थः । मधोर्वसन्तस्य प्रवेशे कान्तारभूमौ पिककामिनीनां कां तारवाचं विस्तारिणीं वाणीं सोढुं क्षमते स्म । अपि तु कामपि न क्षमते स्म । कीदृशस्य मधोः । कान्तारविन्दस्य कमनीयपद्मस्य ॥

मध्ययमकमाह—

चकार साहसं युद्धे धृतोल्लासा हसं च या ।
दैन्यं त्वां साह संप्राप्ता द्विषां सोत्साह संततिः ॥ ३५ ॥

हे सोत्साह हे सोद्यम हे श्रीनेमे, या द्विषां संततिः शत्रूणां श्रेणिर्युद्धे साहसं चकार । धृतोल्लासा च सती हसं हास्यं चकार । अपरान्प्राप्येत्यध्याहार्यम् । सा द्विषां संततिः त्वां संप्राप्ता सती दैन्यं चकारेत्यर्थः । अथवा दैन्यं संप्राप्ता सती त्वामाह । त्वदग्रतो दीनवाक्यान्यभाषिष्टेत्यर्थः ॥

अन्तयमकमाह—

गिरां श्रूयते कोकिला कोविदारं यतस्तद्वनं विस्फुरत्कोविदारम् ।
मुनीनां वसत्यत्र लोको विदारं न च व्याधचक्रं कृतौको विदारम् ॥ ३६ ॥

गिरां विषये वचनकोमलताविषये अरमत्यर्थं कोविदा पण्डिता । यतो यस्मात्कारणात्कोकिला श्रूयते तत्तस्मादेतद्वनं वर्तते । कीदृशम् । विस्फुरत्कोविदारं विस्फुरन्तो झलझलायमानाः कोविदाराः काञ्चनारवृक्षा येन तत् । अत्र वने मुनीनां लोको मुनिजनो विदारं विगतकलत्रं यथा भवति तथा वसति । दाररहितो मुनिजनस्तपसे वसतीत्यर्थः । अत्र वने व्याधचक्रमाखेटकृत्समूहः कृतौको विहितगेहं न वर्तते। कीदृशम् । विदारं वीन्पक्षिणो दृणाति दारयतीति विदारम् । यतः कोकिला श्रूयते तत एतद्वनं किमपि वर्तते इति कोऽपि कस्यापि कथयामासेत्युक्तिलेशः ॥

अतः पादद्वयेऽपि आदिमध्यमध्यान्तयमकान्युदाह्रियन्ते—

सिन्धुरोचितलताग्रसल्लकीसिन्धुरोचितमुपेत्य किन्नरैः ।
कन्दराजितमदस्तटं गिरेः कन्दराजितगृहश्रि गीयते ॥ ३७ ॥

किन्नरैर्गिरेरदः शिखरमुपेत्य गीयते । कीदृशं शिखरम् । सिन्धुरोचितलताग्रसल्लकीसिन्धुरोचितं सिन्धुराणां गजानामुचिता योग्या लताग्राः सल्लक्यश्च ताभिर्युताः सिन्धवो नद्यस्ताभी रोचितं शोभितम् । तथा—कन्दराजितं कन्दैः शोभितम् । तथा—कन्दराजितगृहश्रि कन्दराभिर्जिता गृहशोभा येन शिखरेण तत् । इदं पादद्वये आदियमकं कथितम् ॥

पादद्वयमध्ययमकं यथा—

वसन्सरोगोऽत्र जनो न कश्चित्परं सरोगो यदि राजहंसः।

गीतं कलं को न करोति सिद्धः शैले कलङ्कोज्झितकाननेऽस्मिन् ॥३८॥

अत्र शैले पर्वते कलङ्कोज्झितकानने निर्दोषे वने वसन् सन् जनो लोकः कश्चिन्न सरोगो न सव्याधिः। परं यदि सरोगः सरोवरगतो राजहंस इत्यर्थः। अत्र शैले कः सिद्धः किन्नरः कलं मनोज्ञं गीतं न करोति। अपि तु सर्वोऽपि करोतीत्यर्थः॥

पादद्वयान्त्ययमकं यथा—

जहुर्वसन्ते सरसीं न वारणा बभुः पिकानां मधुरा नवारणाः।

रसं च का मोहनकोविदार कं विलोकयन्ती बकुलान्विदारकम् ॥ ३९ ॥

वारणा गजेन्द्रा वसन्तमासे सरसीं महासरोवरं न जहुर्नात्याक्षुः। पिकानां कोकिलानां नवा मधुरा रणाः शब्दा वसन्ते बभुः। का च स्त्री मोहनकोविदा सुरतपण्डिता बकुलान्वृक्षविशेषान्विलोकयन्ती मर्ता कं रसं नार। अपि तु सर्वमपि रसं प्रापैव। कथं विदारकं निष्पुत्रं यथा भवति तथा। निष्पुत्रायाः संभोगक्षमत्वात्॥

आद्यन्तयमकं यथा—

वरणाः प्रसूननिकरावरणा मलिनां वहन्ति पटलीमलिनाम्।

तरवः सदात्र शिखिजातरवः सरसश्च भाति निकटे सरसः॥ ४० ॥

अत्र गिरौ सदा वरणास्तरवो वरणा वृक्षविशेषा अलिनां भ्रमराणां मलिनां नीलां पटलीं श्रेणिं वहन्ति। कीदृशाः। प्रसूननिकरावरणाः प्रसूननिकरा एव पुष्पसमूहा एवावरणमाच्छादनं येषां ते तथा। अत्राद्रौ शिखिजातरवो मयूरजातध्वनिश्च सरसो निकटे तटाकस्यान्तिके सरसो मधुरो भाति॥

द्वितीयपादचतुर्थपादान्तयमकमाह—

यथा यथा द्विजिह्वस्य विभवः स्यान्महत्तमः।

तथा तथास्य जायेत स्पर्धयेव महत्तमः॥ ४१ ॥

द्विजिह्वस्य दुर्जनस्य यथा यथा विभवः स्याद्धनं भवेत्। कीदृशो विभवः। प्रकृष्टो महान् महत्तमः। बहुतर इत्यर्थः। तथा तथास्य दुर्जनस्य महत् घनं तमः पापं स्पर्धयेव जायेत॥

संयुतासंयुतावृत्तौ यमकमाह—

दास्यति दास्यतिकोपादास्यति सति कर्कराञ्शापम्।

भवति भवति ह्यनर्थो भव तिमितस्तेन वटुक त्वम् ॥ ४२ ॥

हे वटुक, भवति त्वयि आसमन्तात्कर्करानस्यति क्षिपति सति दासी अतिकोपाच्छापं दास्यति। हि यस्मात्कारणादनर्थो भवति। ततस्त्वं तिमितो भव स्थिरो भव चापलं मा कृथाः॥

कुलं तिमिभयादत्र करेणूनां न दीव्यति ।
न दीव्यति करेणूनां प्राणिनां गणनापि का ॥ ४३ ॥

अत्र नदीसमीपे करेणूनां कुलं तिमिभयान्मत्स्यभयान्न दीव्यति न क्रीडा... । अणूनां सूक्ष्माणां प्राणिनां गणनापि का ॥

इदानीं वर्णावृत्तिरुदाह्रियते—

गङ्गाम्बुधवलाङ्गाभो मुमुक्षुध्यानतत्परः ।
पापार्तिहरणायास्तु स सज्ज्ञानो जिनः सताम् ॥ ४४ ॥

गङ्गाजलवद्धवला अङ्गस्याभा कान्तिर्यस्य स तथा । मुमुक्षूणां ध्यानस्य गोचरः । अत्र पादे पादे आदौ वर्णद्वयद्वयसादृश्याद्वर्णयमकमुच्यते ॥

असंयुतावृत्तौ वर्णयमकमाह—

जगदात्मकीर्तिशुभ्रं जनयन्नुद्दामधामदोःपरिघः ।
जयति प्रतापपूषा जयसिंहः क्ष्माभृदधिनाथः ॥ ४५ ॥

उद्दामावनिवारौ धाम तेजस्तद्युक्तौ भुजरूपौ परिघौ यस्य सः । अधिको नाथोऽधिनाथः । अत्र प्रतिपदं जग्रहणादयुतावृत्तौ यमकम् । वर्णावृत्तिः पूर्ववद्भेदा द्रष्टव्याः ॥

संयुतासंयुतावृत्तिर्यथा—

मामाकारयते रामा सा सा मुदितमानसा ।
या या मदारुणच्छाया नानाहेलामयानना ॥ ४६ ॥

सा सा रामा मामाकारयते आह्वयति । या या मदारुणच्छाया मदेनारुणा आरक्ता छाया शोभा यस्याः सा मदारुणच्छाया । या या मुदितमानसा हृष्टचित्ता च । तथा नानाहेलामया[illegible]ना नानाविधमनेकप्रकारं हेलामयं लीलामयमाननं यस्याः सा । अत्र मामा सासा इत्या[illegible] संयुतायमकम् । पदान्ते च मासेत्याद्ययुतायमकम् । समाप्ताश्चत्वारोऽपि शब्दा[illegible]ङ्काराः ॥

अ[illegible]र्थालंकारा उच्यन्ते—

स्वभावोक्तिः पदार्थस्य सक्रियस्याक्रियस्य वा ।
जातिर्विशेषतो रम्या हीनत्रस्तार्भकादिषु ॥ ४७ ॥

पदार्थ[illegible] सक्रियस्य क्रियासहितस्य अक्रियस्य वा क्रियारहितस्य वा स्वभावोक्तिर्या सा जातिरुच्यते [illegible]ीनत्रस्तार्भकादिषु स्वभावोक्तिः सहजकथनं विशेषतः सा जातिरुच्यते । हीनो दीनस्त्रस्तो [illegible]तः, अर्भका बालका, इत्यादिषु स्वभावोक्तिर्विशेषतो रम्या जातिः । कोऽर्थः । यस्य पदार्थस्य यादृशः स्वभावस्तस्यैव स्वभावस्य यत्कथनं सा जातिरवगन्तव्या । हीने हीनस्वभाववर्णनम्, त्रस्ते त्रस्तलक्षणम् । अर्भकादिषु तान्येव लक्षणानि वर्ण्यन्ते । न तु उपमाद्यलंकारेणार्थापरत्याद्यानयनं क्रियते सा जातिरिति ॥

उदाहरणमाह—

बर्हावलीबहुलकान्तिरुचो विचित्र-
भूर्जत्वचा रचितचारुदुकूललीलाः ।
गुञ्जाफलग्रथितहारलताः सहेलं
खेलन्ति खेलगतयोऽत्र वने शबर्यः ॥ ४८ ॥

खेलगतयः सविलासगतयः शबर्योऽत्र वने सहेलं सलीलं खेलन्ति दीव्यन्ति । बर्हाव-लीभिर्मयूरपिच्छश्रेणिभिर्बहुला महीया कान्तिस्तया रोचन्ते यास्तास्तथा । शेषं सुगमम् । अत्र शबरीणां हीनत्वाद्धीनाभरणादिवर्णना । स क्रियोदाहरणमिदम् । खेलन्तीति क्रिया ॥

अक्रियोदाहरणमाह—

आरत्तनित्तघोरणि भीसणवअणुक्करो कुरङ्गच्छि ।
उल्लसिअवीसभुअवणविणिवेसो दसमुहो एसो ॥ ४९ ॥

[आरक्तनेत्रश्रेणि भीषणवदनोत्करो कुरङ्गाक्षि ।
उल्लसितविंशतिभुजवनविनिवेशो दशमुख एषः ॥]

हे कुरङ्गाक्षि, एष दशमुखो रावणः । कीदृशः । आरक्तनेत्रश्रेणि भीषणवदनोत्करः उल्लसितविंशतिभुजवनविनिवेशः उल्लसितं विंशतिभुजा एव वनं काननं तस्य विनिवेशः स्थानम् । अत्रापि यादृशो रावणस्तादृगेवोक्तत्वात्स्वभावोक्तिः । एषा जातिः । त्रस्ते इदमुदाहृतम् । यथा [वा]—

'यमालोक्य स्वप्ने करकलितनिस्त्रिंशफलकं
भयाद्द्रागुन्निद्राः कृतनिजबलाङ्का न विधयः ।
भुजामध्याद्बुद्धैः किमिदमिति दारैरभिहिताः
कति व्रीडामौनव्रतमिह न भेजुः क्षितिभुजः ॥'

अर्भके यथा—

'शिक्षया प्रणमन्वृद्धांस्तदाशिषमनुच्चरन् ।
निजच्छायासमाश्लिष्टं धावन्क्रीडति बालकः ॥'

आदिशब्दान्मत्तकुपितादिष्वेवमुदाहार्यम् ।

संप्रत्युपमामाह—

उपमानेन सादृश्यमुपमेयस्य यत्र सा ।
प्रत्ययाव्ययतुल्यार्थसमासैरुपमा मता ॥ ५० ॥

यत्रोपमेयस्य मुख्यवस्तुनोपमानेन दृष्टान्तेन सादृश्यं समानता । सादृश्यं द्विधा—अभिधीयमानं प्रतीयमानं च । सा प्रत्ययाव्ययतुल्यार्थसमासैर्वक्ष्यमाणैरुपमोक्ता विशे-षानुपादानात् ॥

तत्राभिधीयमानसादृश्ये उदाहरणमाह—

गत्या विभ्रममन्दया प्रतिपदं या राजहंसायते
यस्याः पूर्णमृगाङ्कमण्डलमिव श्रीमत्सदैवाननम् ।
यस्याश्चानुकरोति नेत्रयुगलं नीलोत्पलानि श्रिया
तां कुन्दार्हदतीं त्यजञ्जिनपती राजीमतीं पातु वः ॥ ९१ ॥

या राजीमती विभ्रममन्दया गत्या प्रतिपदं राजहंस इवाचरति राजहंसायते। अत्र प्रत्ययेनोपमा। यस्या आननं पूर्णमृगाङ्कमण्डलमिव श्रीमत्। श्रीर्लक्ष्मीः शोभा वा। अत्रेवशब्देनाव्ययेनोपमा। यस्या राजीमत्या नेत्रद्वयं श्रिया नीलोत्पलान्यनुकरोति। अत्रानुकरोतिक्रियातुल्यार्थवाचिका ततस्तुल्यार्थेनोपमा एषा। कुन्दानर्हति कुन्दार्हा दन्ता यस्यां सा तां कुन्दार्हदतीम्। कुन्दसमानरदनामित्यर्थः। अत्र बहुव्रीहिसमासेनोपमा। अत्र प्रत्ययाव्ययतुल्यार्थभेदैश्चतुर्भेदोपमायां गत्यादिसादृश्यमभिधीयमानमस्ति। नास्ति गम्यं बलात्कारेण किमपि। राजहंसायते गत्या, नेत्रयुगलमनुकरोति श्रिया, इत्यादिकारणानि सर्वाणि काव्यमध्ये एवाभिहितानि सन्तीतीदमभिधीयमानमुच्यते। यत्र कारणानि काव्यमध्ये नोक्तानि, किंतु स्वयमेवानुमानेन ज्ञायन्ते तत्प्रतीयमानमुच्यते॥

प्रतीयमानोदाहरणं यथा—

चन्द्रवद्वदनं तस्या नेत्रे नीलोत्पले इव ।
पक्वबिम्बं हसत्योष्ठः पुष्पधन्वधनुर्भ्रुवौ ॥ ९२ ॥

यस्या राजीमत्या वदनं चन्द्रवत्। नेत्रे नीलोत्पले इव वर्तते। ओष्ठः पक्वबिम्बं हसति। यस्या भ्रुवौ पुष्पधन्वधनुः पुष्पधन्वा कामदेवस्तस्य धनुः। अत्र तावत्केन गुणेन मुखं चन्द्रवत्स गुणो नोक्तः। ओष्ठः पक्वबिम्बं केन हसति स गुणः स्वमत्या अवतार्यः। अत एव तत्प्रतीयमानमुच्यते। अत्र चतुर्षु प्रत्ययाव्ययतुल्यार्थसमासोपमाः क्रमात् ज्ञेयाः। इत्यादि सर्वत्रावगन्तव्यम्॥

मअभरिअमाणसस्स वि णिच्चं दोसाअरस्स ससिण व्व ।
तुह विरहे तीइ मुहं संकुइअं सुहअ कुमुअं च ॥ ९३ ॥

[मदभरितमानसस्यापि नित्यं दोषाकरस्य शशिन इव ।
तव विरहे तस्या मुखं संकुचितं सुभग कुमुदं च ॥]

हे सुभग, तव विरहे तस्या मुखं संकुचितम्। यथा—शशिनो विरहे कुमुदं संकोचं प्राप्नोति। कीदृशस्य दोषाकरस्य। उभयोर्विशेषणमेतत्। यथा—मदभरितमानसस्यापि। चन्द्रपक्षे—मृगभरितमानसस्यापि। मानसमत्र मध्यं ज्ञेयम्। शशिन इवेति द्रव्योपमा। कुमुदं संकुचितमिति क्रियोपमा॥

अन्योन्योपमालंकारमाह—

तं णमह वीअराअं जिणिन्दमुद्दलिअदिढअरकसाअम् ।
जस्स मणं व सरीरं मणं सरीरं व सुपसन्नम् ॥ ९४ ॥

[तं नमत वीतरागं जिनेन्द्रमुद्दलितदृढतरकषायम् ।
यस्य मन इव शरीरं मनः शरीरमिव सुप्रसन्नम् ॥]

तं वीतरागं जिनेन्द्रं नमत । खण्डितदृढतरकषायम् । यस्य मन इव शरीरं सुप्रसन्नं शरीरमिव मनः सुप्रसन्नम् ॥

क्रियाभेदानामन्योपमालंकारो यथा—

ये देव भवतः पादौ भवत्पादाविवाश्रिताः ।
ते लभन्तेऽद्भुतां भव्याः श्रियं त एव शाश्वतीम् ॥ ९५ ॥

हे देव, ये भव्या भवत्पादाविव भवत्पादाविवाश्रिताः । यथा भवत्पादावाश्रीयेते तथा भवत्पादाश्रिताः । यथा हे राजन्, यथा त्वं सेव्यसे तथा त्वां सेविष्येऽहम् । तथात्रापि ये भवत्पादाविव भवतः पादावाश्रितास्ते भव्यास्त एवाद्भुतां श्रियं लभन्ते ॥

उपमेयप्रचुरोपमालंकारमाह—

आलोकनं च वचनं च निगूहनं च
यासां स्मरन्नमृतवत्सरसं कृशस्त्वम् ।
तासां किमङ्ग पिशितास्रपुरीषपात्रं
गात्रं विचिन्त्य सुदृशां न निराकुलोऽसि ॥ ९६ ॥

हे सखे, यासां स्त्रीणामालोकनं वचनं च निगूहनमालिङ्गनं चामृतवत्सरसं स्मरंस्त्वं कृशो जातः । हे सखे, अङ्ग कोमलामन्त्रणे । तासां सुदृशां पिशितास्रपुरीषपात्रं मांसरुधिरामेध्यस्थानं गात्रं देहं विचिन्त्य किं न निराकुलोऽसि न समभावज्ञोऽसि ॥

उपमानप्रचुरोपमालंकारमाह—

कलेव चन्द्रस्य कलङ्कमुक्ता मुक्तावलीवोरुगुणप्रपन्ना ।
जगत्रयस्याभिमतं ददाना जैनेश्वरी कल्पलतेव मूर्तिः ॥ ९७ ॥

जैनेश्वरी मूर्तिश्चन्द्रस्य कलेव कलङ्कमुक्ता मुक्तावलीवोरुगुणप्रपन्ना गुणयुक्ता कल्पलतेव जगत्रयस्याभिमतं ददाना ॥

अथोपमालंकारदूषणान्याह—

विभिन्नलिङ्गवचनां नातिहीनाधिकां च ताम् ।
निबध्नन्ति बुधाः क्वापि लिङ्गभेदं तु मेनिरे ॥ ९८ ॥

विभिन्नलिङ्गां विभिन्नवचनां चोपमां न निबध्नन्ति । तथा अतिहीनाधिकामिति । अतिहीनामत्यधिकां चोपमां न निबध्नन्ति । विशेषमाह—बुधाः क्वापि लिङ्गभेदं मेनिरे ॥

उदाहरणमाह—

हिममिव कीर्तिर्धवला चन्द्रकलेवातिनिर्मला वाचः ।
ध्वाङ्क्षस्येव च दाक्ष्यं नभ इव वक्षश्च ते विपुलम् ॥ ५९ ॥

हे सुभग, तव कीर्तिर्हिममिव धवलेत्यत्र कीर्तेः स्त्रीलिङ्गत्वम्, हिममिवेति नपुंसकम्। अत उपमानोपमेययोर्लिङ्गभेदः । तव वाचश्चन्द्रकलेवातिनिर्मलाः । वाच इत्यत्र बहुवचनम्, चन्द्रकलेत्यत्रैकवचनम्, अतो वचनभेदः । तव दाक्ष्यं दक्षता ध्वाङ्क्षस्येव वर्तते । हीनोपमैषा । तव वक्षो नभ इव विपुलम् । अधिकोपमैषा । अमी उपमादोषा कविना चिन्तनीयाः ॥

शुनीयं गृहदेवीव प्रत्यक्षा प्रतिभासते ।
खद्योत इव सर्वत्र प्रतापश्च विराजते ॥ ६० ॥

इयं शुनी गृहदेवीवेत्यत्राधिकोपमा । तव प्रतापः खद्योत इवेत्यत्र हीनोपमा च सदोषा । हिममिव कीर्तिर्धवलेत्यत्र क्रियारहितोपमा सदोषा । शुनीयं गृहदेवीवेत्यत्र हीनाधिकोपमा सदोषा ॥

अथ हीनविशेषणैरुपमेयोपमामुपमानोपमामाह—

सफेनपिण्डः प्रौढोर्मिरब्धिः शार्ङ्गीव शङ्खभृत् ।
श्चोतन्मदः करी वर्षन्विद्युत्वानिव वारिदः ॥ ६१ ॥

अब्धिः समुद्रः शार्ङ्गी विष्णुरिव वर्तते । शङ्खभृदुभयोर्विशेषणमेतल्लगति । परं सफेन-पिण्डः प्रौढोर्मिरिति विशेषणद्वयं समुद्रे लगति न तु विष्णौ । अत उपमेयविशेषणानि सर्वाण्युपमाने न लगन्ति ततः सदोषमेतत् इत्थं न कार्यम् । श्चोतन्मदः करी गजो वर्ष-न्वारिद इव वर्तत इत्यत्र विद्युत्वानिति विशेषणमुपमेये करिणि न लगति, किं तु वारिदे उपमानरूपे लगतीत्यतः सदोषमेवमपि न कार्यम् ॥

क्वापि लिङ्गभेदं च मेनिरे कवय इत्याह—

मुखं चन्द्रमिवालोक्य देवाह्लादकरं तव ।
कुमुदन्ति मुदाक्षीणि क्षीणमिथ्यात्वसंपदाम् ॥ ६२ ॥

हे देव जिन, क्षीणमिथ्यात्वसंपदामक्षीणि मुदा तव मुखं चन्द्रमिवाह्लादकरमालोक्य कुमुदन्तीत्येवं निन्दापि ॥

अथ समासमध्यस्थोपमेयोपमालिङ्गभेदमाह—

निजजीवितेशकरजाग्रकृतक्षतपङ्क्तयः शुशुभिरे सुरते ।
कुपितस्मरप्रहितबाणगणव्रणजर्जरा इव सरोजदृशः ॥ ६३ ॥

सरोजदृशः स्त्रियः सुरते निजजीवितेशकरजाग्रकृतक्षतपङ्क्तयः कुपितस्मरप्रहितबाण-गणव्रणजर्जरा इव शुशुभिरे । सरोजदृश इत्यत्र सरोजशब्दो नपुंसको दृश इति स्त्रीलिङ्ग एवं न दोषाय ॥

अथ रूपके लिङ्गभेदं दर्शयति—

हस्ताग्रविन्यस्तकपोलदेशा मिथो मिलत्कङ्कणकुण्डलश्रीः ।
सिषेच नेत्रस्रवदश्रुवारा दोःकन्दलीं काचिदवश्यनाथा ॥ ६४ ॥

काचिदवश्यनाथा नायिका दोःकन्दलीं भुजादण्डलतां नेत्रस्रवदश्रुवारा लोचननिर्गच्छदश्रुजलेन सिषेच । कीदृशी । हस्ताग्रे विन्यस्तः कपोलदेशो यया सा । तथा—मिथो मिलन्ती कङ्कणकुण्डलयोः श्रीर्यस्याः सा । रूपकेऽत्र लिङ्गभेदो दोःकदलीमिति दोरिति पुल्लिङ्गशब्दः कन्दलीशब्द स्त्रीलिङ्गोऽवगन्तव्यः । रूपकलक्षणान्यग्रतः ॥

अथ प्रतिवस्तूपमायां वक्ष्यमाणायां लिङ्गभेदं दर्शयति—

बहुवीरेऽप्यसावेको यदुवंशेऽद्भुतोऽभवत् ।
किं केतक्यां दलानि स्युः सुरभीण्यखिलान्यपि ॥ ६५ ॥

बहुवीरेऽपि यदुवंशेऽसावेको नेमीश्वरोऽद्भुतोऽभवत् । केतक्यां निखिलान्यपि दलानि किं सुरभीणि भवन्ति । अत्र केतक्यामिति लिङ्गभेदः । समाप्त उपमालंकारः ॥

अथ रूपकालंकार उच्यते—

रूपकं यत्र साधर्म्यादर्थयोरभिदा भवेत् ।
समस्तं वासमस्तं वा खण्डं वाखण्डमेव वा ॥ ६६ ॥

यत्र द्वयोरर्थयोः साधर्म्यात्सादृश्यादभिदा अभेदो भवति तद्रूपकालंकारो भवति । तद्रूपकं चतुर्धा—समस्तं समस्यन्त(मानम्) असमस्तमसमस्यन्त(मानम्) खण्डं वा । यद्रूपकं विशेषणेषु खण्डं जायते, तत्खण्डमेव । अखण्डमेव वस्तु रूपके अवतार्यते तदखण्डम् ॥

अथ यथाक्रममुदाहरणानि ज्ञेयानि । समस्यन्त(मानं) रूपकमाह—

कीर्णान्धकारालकशालमाना निबद्धतारास्थिमणिः कुतोऽपि ।
निशापिशाची व्यचरद्दधाना महन्त्युलूकध्वनिफेत्कृतानि ॥ ६७ ॥

निशापिशाची निशैव पिशाची निशापिशाची महान्ति उलूकध्वनिफेत्कृतानि दधाना कुतोऽपि व्यचरत् विचचार । उलूकध्वनय एव फेत्कृतानि उलूकध्वनिफेत्कृतानि । कीदृशी सा । कीर्णं विक्षिप्तमन्धकारं तदेवालकाः कुटिलकेशास्तैः शालमाना शोभमाना । तथा—निबद्धास्तारा एवास्थिमणयो यया सा तथा । अत्र निशापिशाची उलूकध्वनय एव फेत्कृतानि कीर्णान्धकारमेवालकास्तारा एवास्थिमणय इत्येषां द्वयोरभेदाद्रूपकं समासकरणात्समस्यन्त(मान)म् । तथा—निशा पिशाचीव उलूकध्वनयः फेत्कृतानीवेत्यादीवशब्देनापि सादृश्यमेव ॥

असमस्तं पृथग्विभक्त्या ज्ञेयम् । यथा—

संसार एष कूपः सलिलानि विपत्तिजन्मदुःखानि ।
इह धर्म एव रज्जुस्तस्मादुद्धरति निर्मग्नान् ॥ ६८ ॥

एष संसारः कूपः। विपत्तिजन्मदुःखानि सलिलानि। धर्म एव रज्जुस्तस्मात्संसारकूपान्निर्मग्नान्प्राणिन उद्धरति। अत्र पृथक् पृथक् विभक्तिभावादसमस्तो रूपकालंकारः॥

एतत्समस्तासमस्तमुभयमपि द्विधा खण्डमखण्डं च। तदेवाह—

अधरं मुखेन नयनेन रुचिं सुरभित्वमाब्जमिव नासिकया।
नववर्णिनीवदनचन्द्रमसस्तरुणा रसेन युगपन्निपपुः॥ ६९॥

तरुणा नववर्णिनीवदनचन्द्रमसो नवरमणीमुखचन्द्रस्य रसेन युगपन्मुखेनाधरं निपपुः। नयनेन रुचिं निपपुः। नासिकया सुरभित्वं निपपुः। उत्प्रेक्षते—आब्जमिव। यथा नासिकया आब्जं सुरभित्वं निपीयत इत्यर्थः। अत्र वदनचन्द्रमसो मुखेनाधरं नयनेन रुचिमित्यादिखण्डकरणात्खण्डरूपकमिदम्। आब्जमिवेति। पद्मिनी स्त्री कमलगन्धा भवत्येव॥

अखण्डमाह—

ज्योत्स्नया धवलीकुर्वन्नुर्वीं सकुलपर्वताम्।
निशाविलासकमलमुदेति स निशाकरः॥ ७०॥

निशाकर उदेति स्म। कीदृशः। ज्योत्स्नया सकुलपर्वतां कुलाचलसहितामुर्वीं पृथ्वीं धवलीकुर्वन्। तथा—निशाया विलासकमलम्। अखण्ड एव चन्द्रो निशाया विलासकमले स्यादतोऽखण्डं रूपकमेतत्। समासो रूपकालंकारः॥

अथ प्रतिवस्तूपमालंकारमाह—

अनुपात्ताविवादीनां वस्तुनः प्रतिवस्तुना।
यत्र प्रतीयते साम्यं प्रतिवस्तूपमा तु सा॥ ७१॥

इवादीनां शब्दानामनुपात्तौ अकथने यत्र वस्तुनः प्रतिवस्तुना साम्यं समता प्रतीयते सा प्रतिवस्तूपमा ज्ञेया॥

बहुवीरेऽप्यमावेको यदुवंशेऽच्युतोऽभवत्॥ ७२॥

यथा बहुवीरेत्यत्र स्पर्धमावधारणेन। उक्तः प्रतिवस्तूपमालंकारः॥

अथ भ्रान्तिमन्तमलंकारमाह—

वस्तुन्यन्यत्र कुत्रापि तत्तुल्यस्यान्यवस्तुनः।
निश्चयो यत्र जायेत भ्रान्तिमान्स स्मृतो यथा॥ ७३॥

यत्र तुल्यस्यान्यवस्तुनोऽन्यत्र कुत्रापि वस्तुनि निश्चयो जायते निश्चयः संभवति स भ्रान्तिमानलंकारः कविभिरलंकारवेदिभिः॥

उदाहरणमाह—

हेमकमलं ति वअणे णअणे णीलुप्पलं ति पसयच्छि।
कुसुमं ति तुज्झ हसिए णिवडइ भमराण रिञ्छोली॥ ७४॥

[हेमकमलमिति वदने नयने नीलोत्पलमिति प्रसृताक्षि ।
कुसुममिति तव हसिते निपतति भ्रमराणां श्रेणिः ॥]

हे प्रसृताक्षि, भ्रमराणां श्रेणिस्तव वदने इदं हेमकमलमिति भ्रान्त्या निपतति। तव नयने इदं नीलोत्पलमिति भ्रान्त्या निपतति । तव हसिते इदं कुसुममिति भ्रान्त्या निपतति । अत्र भ्रान्तिमदलंकारे अन्त्यक्रियादीपकं ज्ञेयम् । उक्तो भ्रान्तिमदलंकारः ॥

अथाक्षेपालंकारस्यावसरस्ततस्तस्य लक्षणमाह—

उक्तिर्यत्र प्रतीतिर्वा प्रतिषेधस्य जायते ।
आचक्षते तमाक्षेपालंकारं विबुधा यथा ॥ ७५ ॥

यत्रोक्तिरथवा प्रतीतिः प्रतिषेधस्य जायते । विबुधास्तमाक्षेपालंकारमाचक्षते वदन्ति। यथेत्युदाहरणे ॥

इन्द्रेण किं यदि स कर्णनरेन्द्रसूनु-
रैरावणेन किमहो यदि तद्द्विपेन्द्रः ।
दम्भोलिनाप्यलमलं यदि तत्प्रतापः
स्वर्गोऽप्ययं ननु मुधा यदि तत्पुरी सा ॥ ७६ ॥

यदि स कर्णनरेन्द्रसूनुर्जयसिंहदेवो राजाभूत्तदा इन्द्रेण किम् । यदि तस्य द्विपेन्द्रः पट्टगजेन्द्रो दृश्यते तदा ऐरावणेन किम् । यदि तस्य प्रतापोऽलमत्यर्थं तपति दम्भोलिना वज्रेणालं पूर्यताम् । यदि सा तत्पुरी लेभे तदा स्वर्गोऽप्ययं मुधा । एतदुदाहरणमुक्तिविषयम् । उक्तिः साक्षादर्थप्रकाशनम् । अत्र यदि कर्णनरेन्द्रसूनुस्तदेन्द्रेण किमित्यादि साक्षादर्थप्रकाशनं सर्वमप्यस्ति । प्रतीतावाक्षेपोदाहरणं द्विधा—विधिपूर्वको निषेधो निषेधपूर्वो विधिश्च । प्राग्विधिपूर्वनिषेधे उदाहरणं यथा—

यस्यास्ति नरकक्रोडनिवासे रसिकं मनः ।
सोऽस्तु हिंसानृतस्तेयतत्परः सुतरां जनः ॥ ७७ ॥

यस्य जनस्य मनो नरकक्रोडनिवासे रसिकं भवति । 'क्रोड उत्सङ्ग उच्यते' । स जनः सुतरामत्यर्थं हिंसानृतस्तेयतत्परोऽस्तु भवतात् । अत्र तावत्प्रतीतिः कथम् । अत्र यो नरके गन्ता स हिंसादिकं करोत्विति विधिमालोक्यैतावता हिंसादि केनापि न कर्तव्यमिति प्रतीयमानो निषेधोऽस्ति, परं साक्षात्पाश्चात्यवत्र दृश्यमानोऽस्त्यर्थोऽत एषा विधिपूर्वकनिषेधात्मिका प्रतीतिरवगन्तव्या ॥

अथ निषेधपूर्वकविधौ प्रतीतिरुच्यते—

इच्छन्ति जे ण कित्तिं कुणन्ति करुणं खणं पि जे नेव्व ।
ते धणजक्ख व्व णरा दिन्ति धणं मरणसमए वि ॥ ७८ ॥

[इच्छन्ति ये न कीर्तिं कुर्वन्ति करुणां क्षणमपि ये नैव ।
ते धनयक्षा इव नरा ददति धनं मरणसमयेऽपि ॥]

ये कीर्तिं नेच्छन्ति । ये च क्षणमपि करुणां नैव कुर्वन्ति । ते किं मरणसमयेऽपि धनयक्षा इव धनं ददतीत्यर्थः । एतावता कीर्तिमभिलषद्भिः करुणां च कुर्वद्भिर्धनमवसरे देयमित्यर्थः । अत्र निषेधपूर्वको विधिरवगन्तव्यः । देयमिति प्रतीयमानोऽर्थश्चातोऽत्रापि प्रतीतिर्घटते । एषा अवचूरिः स्वमत्या कल्पितास्ति । वृत्तौ तु न किमपि विद्यते तथा ॥

संशयालंकारमाह—

इदमेतदिदं वेति साम्याद्बुद्धिर्हि संशयः ।
हेतुभिर्निश्चयः सोऽपि निश्चयान्तः स्मृतो यथा ॥ ७९ ॥

साम्यात्समानभवात् । एतदिदं वेत्येवं बुद्धिर्हि निश्चितं संशयालंकार उच्यते । यदा तु संशयं मुक्त्वा एभिर्निश्चयो जातः सोऽपि निश्चयान्तः संशयालंकार उच्यते । संशयनिश्चयालंकार इत्यर्थः ॥

उदाहरणमाह—

किं केशपाशः प्रतिपक्षलक्ष्म्याः किं वा प्रतापानलधूम एषः ।
दृष्ट्वा भवत्पाणिगतं कृपाणमेवं कवीनां मतयः स्फुरन्ति ॥ ८० ॥

हे जयसिंहदेव राजन्, भवत्पाणिगतं कृपाणं दृष्ट्वा कवीनां मतय एवं स्फुरन्ति । एवं संशयं विदधतीत्यर्थः । किमेष प्रतिपक्षलक्ष्म्याः केशपाशो न तु खड्गः । अथवा किमेष प्रतापानलधूमः । केशपाशोऽपि कृष्णः धूमोऽपि कृष्णः खड्गोऽपि कृष्णः । अतः संशयालंकारः ॥

संशयनिश्चयालंकारोदाहरणमाह—

इन्द्रः स एष यदि किं न सहस्रमक्ष्णां
　लक्ष्मीपतिर्यदि कथं न चतुर्भुजोऽसौ ।
आः स्यन्दनध्वजधृतोद्धुरताम्रचूडः
　श्रीकर्णदेवनृपसूनुरयं रणाग्रे ॥ ८१ ॥

स एष यदि इन्द्र इति संशयः । तर्हि अक्ष्णां नेत्राणां सहस्रं नास्ति तदा न भवतीन्द्र इति निश्चयः । यदि लक्ष्मीपतिस्तदा कथं नासौ चतुर्भुजः । आः ज्ञातम्—अयं रणाग्रे कर्णदेवनृपसूनुर्जयसिंहदेवः । कीदृशः । स्यन्दनस्य रथस्य ध्वजे धृत उद्धुर उत्कटस्ताम्रचूडः कुक्कुटो येन स तथा ॥ समाप्तः संशयालंकारः संशयनिश्चयालंकारश्च ॥

अथ दृष्टान्तालंकारमाह—

अन्वयख्यापनं यत्र क्रियया स्वतदर्थयोः ।
दृष्टान्तं तमिति प्राहुरलंकारं मनीषिणः ॥ ८२ ॥

यत्र क्रियया स्वतदर्थयोः स्वार्थतदर्थयोरन्वयख्यापनं क्रियते । अन्वयः परस्परं योग्यगुणसंबन्धस्तस्य ख्यापनं कथनं विधीयते तं दृष्टान्तमलंकारमिति मनीषिणो बुधाः प्राहुः ॥

उदाहरणमाह—

पतितानां संसर्गं त्यजन्ति दूरेण निर्मला गुणिनः ।
इति कथयञ्जरतीनां हारः परिहरति कुचयुगलम् ॥ ८३ ॥

हारो गुणी निर्मलश्च जरतीनां वृद्धस्त्रीणां कुचयुगलमिति कथयन्परिहरति । निर्मला गुणिनः पतितानां संसर्गं दूरेण त्यजन्ति । यथा ये ये गुणिनो निर्मलाश्च ते ते पतितसंसर्गं त्यजन्ति तथा हार इत्येषोऽन्वयख्याप्त्या दृष्टान्तः । अन्वयख्यापनं च सादृश्यमिति च परं कयोः स्वार्थतदर्थयोरित्यर्थः ॥

व्यतिरेकमाह—

केनचिद्यत्र धर्मेण द्वयोः संसिद्धसाम्ययोः ।
भवत्येकतराधिक्यं व्यतिरेकः स उच्यते ॥ ८४ ॥

अत्र द्वयोः संसिद्धसाम्ययोः संसिद्धं साम्यं समानता ययोस्तौ तयोः संसिद्धसाम्ययोः केनचिद्धर्मेण केनचिद्गुणेनैकतराधिक्यं एकतरस्याधिकता भवति स व्यतिरेकालंकारः ॥

उदाहरणमाह—

अस्त्वस्तु पौरुषगुणाज्जयसिंहदेव-
पृथ्वीपतेर्मृगपतेश्च समानभावः ।
किं त्वेकतः प्रतिभटाः समरं विहाय
सद्यो विशन्ति वनमन्यमशङ्कमानाः ॥ ८५ ॥

जयसिंहदेवपृथ्वीपतेर्मृगपतेश्च पौरुषगुणात्समानभावोऽस्त्वस्तु । एकतो जयसिंहदेवात्समरं त्यक्त्वा प्रतिभटा वैरिणः सद्यो वनं विशन्ति । अन्यं सिंहमशङ्कमानाः । एतावता सिंहभयादपि राज्ञो भीरधिका तत्र एकतराधिक्यम् ॥

अपह्नुतिमाह—

नैतदेतदिदं ह्येनदित्यपह्नवपूर्वकम् ।
उच्यते यत्र सादृश्यादपह्नुतिरियं यथा ॥ ८६ ॥

यत्र सादृश्यात्समानभावान्नैतद्धि निश्चितमिदमेतदिति अपह्नवपूर्वकमपलपनपूर्वकमुच्यते । इयमपह्नुतिरवगन्तव्या ॥

उदाहरणमाह—

नैतन्निशायां शितमूच्छमेचमन्धीकृतालोकनमन्धकारम् ।
निशागमप्रस्थितपञ्चबाणसेनासमुत्थापित एष रेणुः ॥ ८७ ॥

अत्रान्धकारस्यापह्नवं विधाय रेणुस्थापना एषा अपह्नुतिः ॥

तुल्ययोगितालंकारमाह—

उपमेयं समीकर्तुमुपमानेन योज्यते।
तुल्यैककालक्रियया यत्र सा तुल्ययोगिता ॥ ८८ ॥

यत्र तुल्यैककालक्रिययोपमानेन सहोपमेयं समीकर्तुं योज्यते सा तुल्ययोगिता भवति। तुल्या समाना एककालिकी क्रिया तुल्यैककालक्रिया तया करणभूतया ॥

उदाहरणमाह—

तमसा लुप्यमानानां लोकेऽस्मिन्साधुवर्त्मनाम्।
प्रकाशनाय प्रभुता भानोस्तव च दृश्यते ॥ ८९ ॥

हे जिन, तमसा पापेन पक्षेऽन्धकारेण लुप्यमानानां साधुवर्त्मनां प्रकाशनाय प्रभुता तवास्ति। अथवा भानोरस्ति। अत्रोपमेयं जिनः। उपमानं भानुः उपमेयमुपमानेन समीकृतं दृश्यते। क्रिया द्वयोरपि तुल्या एककालिकी च। अत्र कर्मण्युक्ते वर्तमानकालोऽस्ति ॥

उत्प्रेक्षालंकारमाह—

कल्पना काचिदौचित्याद्यत्रार्थस्य सतोऽन्यथा।
द्योतितेवादिभिः शब्दैरुत्प्रेक्षा सा स्मृता यथा ॥ ९० ॥

यत्र सतो विद्यमानस्यार्थस्यौचित्यायोग्यत्वादन्या काचिदिवादिभिः शब्दैर्द्योतिता कल्पना रचिता सा उत्प्रेक्षा स्मृता ॥

यथेत्युदाहरणमाह—

नभस्तले किंचिदिव प्रविष्टाश्चकाशिरे चन्द्ररुचिप्ररोहाः।
जगद्गलित्वा हसतः प्रमोदाद्दन्ता इव ध्वान्तनिशाचरस्य ॥ ९१ ॥

चन्द्ररुचिप्ररोहाश्चन्द्रकिरणाङ्कुराः। नभस्तले किंचिदिवाल्पमात्रं यथा भवति प्रविष्टा रेजिरे नवोदयत्वात्। उत्प्रेक्षते—प्रमोदाज्जगद्गलित्वा हसतो हास्यं कुर्वतो ध्वान्तनिशाचरस्यान्धकाररक्षसो दन्ता इव। इवादिभिः शब्दैरत्रादिशब्दाद्यथा शङ्के ध्रुवं मन्ये नूनं प्राय इत्यादयो ग्राह्याः। यथा—'जाने शङ्के ध्रुवं मन्ये यथा खलु वतैव वा। नन्विवार्थानि तु प्राज्ञा उत्प्रेक्षारूपकं विदुः ॥'

अर्थान्तरन्यासालंकारमाह—

उक्तसिद्ध्यर्थमन्यार्थन्यासो व्याप्तिपुरःसरः।
कथ्यतेऽर्थान्तरन्यासः श्लिष्टोऽश्लिष्टश्च स द्विधा ॥ ९२ ॥

यत्र उक्तसिद्ध्यर्थे व्याप्तिपुरःसरोऽन्यार्थन्यासो विधीयते सोऽर्थान्तरन्यासः कथ्यते। स द्विधा—श्लिष्टश्चाश्लिष्टः। श्लेषसहितः श्लेषरहितः ॥

शोणत्वमक्ष्णामसिताब्जभासां गिरां प्रचारस्त्वपरप्रकारः।
बभूव पानान्मधुनो वधूनामचिन्तनीयो हि सुरानुभावः ॥ ९३ ॥

वधूनां मधुनो मद्यस्य पानादसिताब्जभासां नीलोत्पलभासामक्ष्णां नेत्राणां शोणत्वं रक्तता बभूव। तु पुनर्गिरां प्रचारो परप्रकारो बभूव। विपरीतो जात इत्यर्थः। अत्र मद्यपानान्नेत्राणां रक्तत्वमुक्तं तस्योक्तस्य सिद्ध्यर्थं स्थापनार्थं पुनरर्थान्तरन्यासः। सुरानुभावो हि निश्चितमचिन्तनीयः। सुरा देवा मदिरा वा। तथा केनापि पृष्टं मद्यपानान्नेत्ररक्तत्वं किं जायेत। तथा अचिन्तनीयो हि सुरानुभाव इत्यर्थान्तरन्यासेन रक्तत्वसिद्धिः। एष श्लिष्टार्थान्तरन्यासालंकारः॥

अश्लिष्टमाह—

शुण्डादण्डैः कम्पिताः कुञ्जराणां पुष्पोत्सर्गं पादपाश्चारु चक्रुः।
स्तब्धाकाराः किं प्रयच्छन्ति किंचित्कान्ता यावन्नोद्धतैर्नीतशङ्कम् ॥ ९४ ॥

पादपा वृक्षाः कुञ्जराणां शुण्डादण्डैः कम्पिताः सन्तश्चारु पुष्पोत्सर्गं चक्रुः। स्तब्धाकारा उद्धतैर्नैर्नीतशङ्कं निःशङ्कं यथा भवति यावन्न कान्तास्तावत्किंचित्प्रयच्छन्ति किम्। अत्र प्राक्तनपदद्वयोक्तस्याग्रेतनपदद्वयेनान्यार्थन्यासरूपेण सिद्धिः कथिता॥

समासोक्तिमाह—

उच्यते वक्तुमिष्टस्य प्रतीतिजनने क्षमम्।
सधर्मं यत्र वस्त्वन्यत्समासोक्तिरियं यथा ॥ ९५ ॥

वक्तुमिष्टस्य भणितुमारब्धस्यार्थस्य प्रतीतिजनने क्षमं प्रतीतिरुत्पादसमर्थं सधर्मं सदृशमन्यद्वस्तु यत्रोच्यते, इयं समासोक्तिर्भवति॥

उदाहरणमाह—

मधुकर मा कुरु शोकं विचर करीरद्रुमस्य कुसुमेषु।
घनतुहिनपातदलिता कथं नु सा मालती मिलति ॥ ९६ ॥

हे मधुकर, शोकं मा कुरु। करीरद्रुमस्य कुसुमेषु विचर इति वक्तुमिष्टोऽर्थः। अस्य प्रतीतिजनने क्षमं सदृशमन्यद्वस्तु इदं नु वितर्के कथं सा मालती मिलति। एतावता मालती नास्ति करीरकुसुमेषु शोकाभावेन हे भ्रमर विचर। अत्र द्वयोरपि सादृश्यं पुष्पत्वात्। विभेदत्वादन्यत्वम्। कीदृशी मालती। घनतुहिनपातेन दलिता ज्वलिता। यदि सा मालती घनतुहिनपातदलिता जाता तदा किं मिलति॥

विभावनालक्षणमाह—

विना कारणसद्भावं यत्र कार्यस्य दर्शनम्।
नैसर्गिकगुणोत्कर्षभावनात्सा विभावना ॥ ९७ ॥

यत्र कारणसद्भावं विना नैसर्गिकगुणोत्कर्षभावनात्कार्यस्य दर्शनं दृश्यते सा विभावना मता ॥

उदाहरणम्—

अनध्ययनविद्वांसो निर्द्रव्यपरमेश्वराः ।
अनलंकारसुभगाः पान्तु युष्माञ्जिनेश्वराः ॥ ९८ ॥

अत्र विद्वत्ता कार्यं कारणं त्वध्ययनम् । कार्यं कारणं विनापि सहजगुणेनैव जातम् । एवं पादद्वयेऽपि भावनीयम् । उक्तो विभावनालंकारः ॥

दीपकलक्षणमाह—

आदिमध्यान्तवर्त्येकपदार्थेनार्थसंगतिः ।
वाक्यस्य यत्र जायेत तदुक्तं दीपकं यथा ॥ ९९ ॥

यत्रादिमध्यान्तवर्त्येकपदार्थेन क्रियारूपेण वा वाक्यार्थसंगतिर्जायेत तद्दीपकमुक्तम् ॥

उदाहरणान्याह—

जगुस्तव दिवि स्वामिन्गन्धर्वाः पावनं यशः ।
किन्नराश्च कुलाद्रीणां कन्दरेषु मुहुर्मुदा ॥ १०० ॥

हे स्वामिन्, दिव्याकाशे गन्धर्वास्तव पावनं यशो जगुः । किंनराः कुलाचलकन्दरेषु जगुः । मुदा हर्षेण मुहुर्वारंवारम् । अत्राप्येकपदार्थेन जगुरितिरूपेण वाक्यार्थसंगतिर्जाता ॥

एवं मध्यान्तयोरपि । सर्वत्र यथा—

विराजन्ति तमिस्राणि द्योतन्ते दिवि तारकाः ।
विभान्ति कुमुदश्रेण्यः शोभन्ते निशि दीपकाः ॥ १०१ ॥

अत्र पृथक् पृथक् क्रियातिरेक एव पदार्थ एक एवार्थो नार्थभेदः । निशीत्येतत्कारकं दीपकम् ॥

अतिशयालंकारमाह—

वस्तुनो वक्तुमुत्कर्षमसंभाव्यं यदुच्यते ।
वदन्त्यतिशयाख्यं तमलंकारं बुधा यथा ॥ १०२ ॥

यद्वस्तुन उत्कर्षं वक्तुमसंभाव्यमुच्यते सोऽतिशयालंकारः ।

उदाहरति—

त्वद्दारितारितरुणीश्वसितानिलेन
संमूर्छितोर्मिषु महोदधिषु क्षितीश ।
अन्तर्लुठद्गिरिपरस्परशृङ्गसङ्ग-
घोरारवैर्मुररिपोरपयाति निद्रा ॥ १०३ ॥

हे क्षितीश, त्वद्धारितारितरुणीश्वसितानिलेन श्वासवायुना महोदधिषु समुद्रेषु संमूर्छितोर्मिषूत्पन्नकल्लोलेषु सत्सु अन्तर्मध्ये लुठन्तो घोलन्तो वलन्तो गिरयस्तेषां परस्परं शृङ्गसङ्गस्तस्य घोरैरारवैर्मुरारेर्निद्रा अपयाति। अत्र रिपुस्त्रीणां श्वासानिलस्यातिशयवर्णनादतिशयालंकारः॥

यदि योगेऽतिशयालंकारमाह—

एकदण्डानि सप्त स्युर्यदि च्छत्राणि पर्वते।
तदोपमीयते पार्श्वमूर्ध्नि सप्तफणः फणी॥ १०४॥

यदि पर्वते पर्वतशिरसि एकदण्डानि सप्त च्छत्राणि भवन्ति। तदा सप्तफणः फणी पार्श्वमूर्ध्नि उपमीयते। अत्र फणिनोऽतिशय उक्तः। एको दण्डो येषु तान्येकदण्डानि॥

हेत्वलंकारमाह—

यत्रोत्पादयतः किंचिदर्थं कर्तुः प्रकाश्यते।
तद्योग्यतायुक्तिरसौ हेतुरुक्तो बुधैर्यथा॥ १०५॥

कर्तुः पुरुषस्य किंचिदर्थमुत्पादयतो यत्र तद्योग्यतायुक्तिस्तस्यार्थस्य योग्यतायुक्तिः प्रकाश्यते स हेतुरलंकारः॥

उदाहरति—

जुव्वणसमउम्मत्ता तत्ता विरहेण कुणइ णाहस्स।
कण्ठब्भन्तरघोलिरमहुरसरं वालिआ गीअम्॥ १०६॥

[यौवनसमयोन्मत्ता तप्ता विरहेण करोति नाथस्य।
कण्ठाभ्यन्तरघोलितमधुरस्वरं बालिका गीतम्॥]

बालिका यौवनसमयोन्मत्ता सती नाथस्य भर्तुर्विरहेण तप्ता सती कण्ठाभ्यन्तरघोलन्मधुरस्वरं गीतं करोति। कण्ठाभ्यन्तर एव घोलते गीतं लज्जया बहिर्न प्रकटतीत्यर्थः। अत्र कर्तुः किंचिदर्थमुत्पादयत इति कर्तृरूपाया बालिकाया गीतमिति इत्यादिनोऽर्थस्य योग्यता युक्तिः। नाथस्य विरहः। यौवनसमयोन्मत्ता च गीतस्य हेतुः कारणमेतदिति गाथार्थः॥

विससोअरो मिअङ्को कअन्तआसाइ आगओ पवणो।
जाइपलासो सिहरी पहिए मारन्ति ते दाणिम्॥ १०७॥

[विषसोदरो मृगाङ्कः कृतान्तदिशात आगतः पवनः।
जातिपलाशः शिखरी पथिकान्मारयन्त्येत इदानीम्॥]

मृगाङ्को विषसोदरः। चन्द्रविषयोरेकस्रोतपन्नत्वात्। कृतान्तदिश आगतः पवनः। शिखरी वृक्षो जातिपलाशः, एते त्रयोऽपि पथिकानिदानीं मारयन्ति। अत्र मरणस्य हेतुरमी। एको विषसोदरः, अन्यो यमाशानिवासी। अपरस्तु पलाशः पक्षे वृक्षः॥

पर्यायोक्तिलक्षणमाह—

अतत्परतया यत्र जल्प(ल्प्य)मानेन वस्तुना।
विवक्षितं प्रतीयेत पर्यायोक्तिरियं यथा ॥ १०८ ॥

पर्यायेणान्यवचनेन वचनमुक्तिः पर्यायोक्तिः। यत्र विवक्षितं वक्तुमिष्टं अतत्परतया न विवक्षितपरतया जल्प(ल्प्य)मानेन वस्तुनार्थेन प्रतीयेत इयं पर्यायोक्तिः ॥

पर्यायोक्तिमुदाहरति—

त्वत्सैन्यवाहनिवहस्य महाहवेषु
द्वेषः प्रभो रिपुपुरन्ध्रिजनस्य चासीत्।
एकः खुरैर्बहुलरेणुततिं चकार
तां संजहार पुनरश्रुजलैर्यदन्यः ॥ १०९ ॥

हे प्रभो, रणेषु त्वत्सैन्यवाहनिवहस्य रिपुपुरन्ध्रिजनस्य च द्वेष आसीत्। एको वाहसमूहः खुरैर्बहुलरेणुततिं चकार। अन्यो योषाजनो यत्पुनरश्रुजलैस्तां रेणुततिं संजहार। अत्र विवक्षितोऽर्थो द्वेषः। अस्य जल्प(ल्प्य)मानेनार्थेन रेणुना अश्रुजलेन च प्रतीतिर्न विवक्षितपरतया यतो भवता रिपवो मारिता इत्येतद्येन प्रतीयेत सा अतत्परा ॥

समाहितं लक्षयति—

कारणान्तरसंपत्तिर्दैवादारम्भ एव हि।
यत्र कार्यस्य जायेत तज्जायेत समाहितम् ॥ ११० ॥

यत्र कार्यस्यारम्भ एव दैवात्कारणान्तरसंपत्तिर्जायेत तत्समाहितं जायेत ॥

उदाहरति—

मनस्विनी वल्लभवेश्म गन्तुमुत्कण्ठिता यावदभून्निशायाम्।
तावन्नवाम्भोधरधीरनादप्रबोधितः सौधशिखी चुकूज ॥ १११ ॥

यावन्मनस्विनी निशायां वल्लभवेश्म गन्तुमुत्कण्ठिताभूत्। तावन्नवाम्भोधरधीरनादप्रबोधितः सौधशिखी गृहक्रीडामयूरश्चुकूज केकां चकार। कान्तगृहे गमनकार्यारम्भः पुनस्तत्प्रेरकः शिखिशब्दः कारणान्तरसंपत्तिः ॥

परिवृत्तिं लक्षयति—

परिवर्तनमर्थेन सदृशासदृशेन वा।
जायतेऽर्थस्य यत्रासौ परिवृत्तिर्मता यथा ॥ ११२ ॥

यत्रार्थस्य सदृशेनासदृशेन वा अर्थेन परिवर्तनं परिवर्तो जायते असौ परिवृत्तिर्मता। यथेत्युदाहरणे ॥

अन्तर्गतव्यालफणामणीनां प्रभाभिरुद्भासितभूषु भर्तः।
स्फुरत्प्रदीपानि गृहाणि मुक्त्वा गुहासु शेते त्वदरातिवर्गः ॥ ११३ ॥

हे भर्तः, त्वदरातिवर्गस्तव वैरिसमूहः स्फुरत्प्रदीपानि गृहाणि मुक्त्वा गुहासु शेते। कीदृशीषु गुहासु। अन्तर्गतव्यालफणामणीनां मध्यस्थसर्पफणामणीनां प्रभाभिरुद्भासितभूमिषु दीप्तभूमिषु॥

अत्रासदृशार्थेनार्थस्य परावर्तमाह—

दत्त्वा प्रहारं रिपुपार्थिवानां जग्राह यः संयति जीवितव्यम्।
शृङ्गारभङ्गीं च तदङ्गनानामादाय दुःखानि ददौ सदैव॥११४॥

प्रहारं दत्त्वा जीवितव्यं जग्राह। अत्र दत्तः प्रहारः, गृहीतं च जीवितव्यम्, गृहीता शृङ्गारभङ्गी, दत्तं च तासां दुःखम्, इत्यसदृशेनार्थेनार्थस्य परावर्तो जनितः॥

यथासंख्यं लक्षयति—

यत्रोक्तानां पदार्थानामर्थाः संबन्धिनः पुनः।
क्रमेण तेन बध्यन्ते तद्यथासंख्यमुच्यते॥ ११५॥

यत्रोक्तानां पदार्थानां संबन्धिनोऽर्थाः पुनस्तेन क्रमेण बध्यन्ते योज्यन्ते तद् यथासंख्यमुच्यते॥

उदाहरति—

मृदुभुजलतिकाभ्यां शोणिमानं दधत्या
चरणकमलभासा चारुणा चाननेन।
बिसकिसलयपद्मान्यात्तलक्ष्माणि मन्ये
विरहविपदि वैरात्तन्वते तापमङ्गे॥ ११६॥

अहमेवं मन्ये—मृदुभुजलतिकाभ्यां शोणिमानं दधत्या रक्तत्वं बिभ्रत्या चरणकमलभासा चारुणा चाननेन यथाक्रमं बिसकिसलयपद्मानि आत्तलक्ष्माणि कृतानि। अत एव तानि वैरादङ्गे तापं विरहविपदि तन्वते। विरहिणीवर्णनमेतत्। एष यथासंख्यालंकारः॥

सहोक्तिं लक्षयति—

वस्तुनो यत्र संबन्धमनौचित्येन केनचित्।
असंभाव्यं वदेद्वक्ता तमाहुर्विषमं यथा॥ ११७॥

यत्र केनचिदनौचित्येनानवसरतया वस्तुनः पदार्थस्य संबन्धमसंभाव्यं वक्ता वदेत्, कवयस्तं विषमालंकारमाहुः। यथोदाहरणार्थः॥

क्वेदं तव वपुर्वत्से कदलीगर्भकोमलम्।
क्वायं राजीमति क्लेशदायी व्रतपरिग्रहः॥ ११८॥

हे वत्से, राजीमति कदलीगर्भकोमलं तव वपुः क्वायं च क्लेशदायी व्रतपरिग्रहः।

अत्र सुकोमलस्य तव वपुषो दीक्षानुचिता । दीक्षा संबन्धः । तथासंभाव्यं कथं वदसि ग्रहीष्यामि दीक्षामिति । विषमालंकारोऽयम् ॥

सहोक्तिं लक्षयति—

सहोक्तिः सा भवेद्यत्र कार्यकारणयोः सह ।
समुत्पत्तिकथा हेतोर्वक्तुं तज्जन्मशक्तताम् ॥ ११९ ॥

यत्र हेतोः कारणस्य तज्जन्मशक्ततां कार्योत्पत्तिशक्ततां वक्तुं कार्यकारणयोः सह समुत्पत्तिकथा समकालमुत्पादनवार्ता भवति सा सहोक्तिर्भवेत् ॥

उदाहरति—

आदत्ते सह यशसा नमयति सार्धं मदेन संग्रामे ।
सह विद्विषां श्रियासौ कोदण्डं कर्षति श्रीमान् ॥ १२० ॥

असौ श्रीमान्वीरः कोदण्डं धनुर्विद्विषां मदेन सह नमयति । विद्विषां श्रिया लक्ष्म्या शोभया वा सह कोदण्डं कर्षति । अत्र यश आदत्त इति कार्यम् । कोदण्डग्रहणं तु यशोग्रहणकारणम् । कारणस्य कोदण्डस्य तज्जन्मनि कार्योत्पत्तौ यशोग्रहणरूपायां शक्तिर्नास्ति । एवं सर्वत्र योजना स्वमत्या कर्तव्येति ॥

अथ विरोधलक्षणमाह—

आपाते हि विरुद्धत्वं यत्र वाक्ये न तत्त्वतः ।
शब्दार्थकृतमाभाति स विरोधः स्मृतो यथा ॥ १२१ ॥

यत्र वाक्ये आपाते आरम्भे शब्दार्थकृतं विरुद्धत्वं आभाति परं तत्त्वतो नाभाति स विरोधः स्मृतः ॥

उदाहरणमाह—

दुर्वारवाणनिवहेन सुवर्मणापि
लोकोत्तरान्वयभुवापि च धीवरेण ।
प्रत्यर्थिषु प्रतिरणं स्खलितेषु तेन
संग्राममाप्य युयुधे पुनरेव जिष्णुः ॥ १२२ ॥

कोऽपि जिष्णुर्जयनशीलस्तेन केनचित्पुरुषेण प्रत्यर्थिषु वैरिषु प्रतिरणं स्खलितेषु रणं रणं प्रति स्खलितेषु संग्राममवाप्य पुनरेव युयुधे युद्धं चकार । कीदृशेन तेन । सुवर्मणापि दुर्वारवाणनिवहेन । वारवाणः कवच उच्यते । वर्मापि कवच एव । सुष्टु वर्म यस्य स सुवर्मा । दुष्टो वारवाणनिवहः कवचसमूहो यस्य स दुर्वारवाणनिवहः । यः सुवर्मा स दुर्वारवाणनिवहः कथं भवति इति विरोधं दर्शयित्वा न तत्त्वत इत्याह—दुर्वारवाणनिव-

---

१. 'विभवेन' इति जिनवर्धनसंमतः पाठः.

हेन दुर्वारो वाणनिवहो यस्य स तेन। एतेन तत्र .... । लोकोत्तरान्वयभुवापि धीवरेण। यो लोकोत्तरान्वयभूः स कथं धीवरः। धीवरो मतिप्रधान इत्यर्थः। एष शब्दकृतोऽपि विरोधालंकारः॥

अथार्थकृतं विरोधमाह—

येनाक्रान्तं सिंहासनमरिभूभृच्छिरांसि विनतानि।
क्षिप्ता युधि शरपङ्क्तिः कीर्तिर्याता दिगन्तेषु॥ १२३॥

येन राज्ञा आक्रान्तं सिंहासनम्। विनतान्यरिभूपालशिरांसि। अहो विरोधः आक्रान्तमन्यत् विनतमन्यत्। तथा—क्षिप्ता युधि शरपङ्क्तिः, दिगन्तेषु कीर्तिर्याता॥

समाप्तो द्विधापि विरोधालंकारः।

अथावसरलक्षणमाह—

यत्रार्थान्तरमुत्कृष्टं संभवत्युपलक्षणम्।
प्रस्तुतार्थस्य स प्रोक्तो बुधैरवसरो यथा॥ १२४॥

यत्र प्रस्तुतार्थस्योत्कृष्टमर्थान्तरमुपलक्षणं चिह्नं संभवति बुधैः सोऽवसरालंकारः प्रोक्तः॥

अथावसरोदाहरणमाह—

स एष निश्चयानन्दः स्वच्छन्दनमविक्रमः।
येन नक्तंचरः सोऽपि युद्धे बर्बरको जितः॥ १२५॥

स एष निश्चयानन्दो येन सोऽपि बर्बरको राक्षसो युद्धे जितः॥

अथ सारलक्षणमाह—

यत्र निर्धारितात्सारात्सारं सारं ततस्ततः।
निर्धार्यते यथाशक्ति तत्सारमिति कथ्यते॥ १२६॥

यत्र निर्धारितात्सारात्ततस्ततः सारं सारं निर्धार्यते। यथाशक्ति यथाशक्त्या(?) स सारालंकारः॥

सारमुदाहरति—

संसारे मानुष्यं सारं मानुष्यके च कौलीन्यम्।
कौलीन्ये धर्मित्वं धर्मित्वे चापि सदयत्वम्॥ १२७॥

अथ श्लेषलक्षणमाह—

पदैस्तैरेव भिन्नैर्वा वाक्यं वक्त्येकमेव हि।
अनेकमर्थं यत्रासौ श्लेष इत्युच्यते यथा॥ १२८॥

यत्रैकमेव वाक्यं तैरेव पदैर्भिन्नैर्वा पदैरनेकमर्थं वक्ति असौ श्लेषालंकार उच्यते॥

आनन्दमुल्लासयतः समन्तात्करैरसंतापकरैः प्रजानाम् ।
यस्योदये क्षोभमवाप्य राज्ञो जग्राह वेलां किल सिन्धुनाथः ॥ १२९ ॥

यस्य राज्ञो नृपस्योदये क्षोभमवाप्य किलेति श्रूयते । सिन्धुनाथः सिन्धुदेशाधिपो वेलामङ्गुलिच्छेदादिकां जग्राह । तदाज्ञां गृहीतवानित्यर्थः । कीदृशस्य । असंतापकरैः करैः प्रजानां समन्तादानन्दमुल्लासयतो वर्धयतः । अथ श्लेषः—यस्य राज्ञश्चन्द्रस्योदये क्षोभमवाप्य सिन्धुनाथः समुद्रो वेलां मर्यादां जग्राह । शीतकरैः करैः किरणैर्लोकानां समन्तात् हर्षमुत्पादयतः । एष श्लेषालंकारः ॥

कुर्वन्कुवलयोल्लासं रम्याम्भोजश्रियं हरन् ।
रेजे राजापि तच्चित्रं निशान्ते कान्तिमत्तया ॥ १३० ॥

चित्रं यो राजा चन्द्रो निशान्ते प्रभाते कान्तिमत्तया कान्तिमत्त्वेन रराज । कुवलयोल्लासं भूवलयोल्लासं कुर्वन् रम्यां शोभनां भोजश्रियं भोजराजलक्ष्मीं हरन् गृह्णन् । एष भिन्नपदः श्लेषालंकारः ॥

अत्युत्कृष्टसमुच्चयालंकारमाह—

एकत्र यत्र वस्तूनामनेकेषां निबन्धनम् ।
अत्युत्कृष्टापकृष्टानां तं वदन्ति समुच्चयम् ॥ १३१ ॥

यत्र कस्मिन्वे अनेकेषामत्युत्कृष्टानामत्युत्तमानां अत्यपकृष्टानामतिमध्यमानां वा वस्तूनां पदार्थानामेकत्र निबन्धनं गुम्फनं ग्रन्थनं योजनमित्येकार्थाः । तं समुच्चयं वदन्ति ॥

(अत्युकृष्टसमुच्चयोदाहरणमाह—)

अणहिल्लपाटकं पुरमवनिपतिः कर्णदेवनृपसूनुः ।
श्रीकलशनामधेयः करी च रत्नानि जगतीह ॥ १३२ ॥

सर्वोत्तममणहिल्लपाटकं पुरम् । तस्मिन्नवनिपतिः कर्णदेवनृपसूनुः श्रीजयसिंहदेवः सोऽपि सर्वोत्तमो भूपालेषु । तस्य श्रीकलशनामधेयः करी गजः । एतानीह जगति त्रीणि रत्नानि ॥

अत्यपकृष्टालंकारमाह[1]—

ग्रामे वासो नायको निर्विवेकः कौटिल्यानामेकपात्रं कलत्रम् ।
नित्यं रोगः पारवश्यं च पुंसामेतत्सर्वं जीवतामेव मृत्युः ॥ १३३ ॥

सुगमम् । भावना स्वयमेव विचारणीया[2] । एषोऽत्यपकृष्टसमुच्चयालंकारः ॥

(अथाप्रस्तुतप्रशंसामाह—)

प्रशंसा क्रियते यत्राप्रस्तुतस्यापि वस्तुनः ।
अप्रस्तुतप्रशंसा तामाहुः कृतधियो यथा ॥ १३४ ॥

---

१. अत्र 'अत्युत्कृष्ट' इति पदं वृथैव पतितम्. २. 'विशेषणीया' क.

यत्राप्रस्तुतस्यापि वस्तुनः प्रशंसा क्रियते कृतधियस्तामप्रस्तुतप्रशंसामाहुः ॥

(अप्रस्तुतप्रशंसोदाहरणमाह—)

स्वैरं विहरति स्वैरं शेते स्वैरं च जल्पति।
भिक्षुरेकः सुखी लोके राजचोरभयोज्झितः ॥ १३५ ॥

कोऽपि दुःखी चिन्तार्तः सन् यतिं संतोषसारं दृष्ट्वैवमुवाच। अत्र तेन दुःखिना भिक्षुप्रशंसा तावत्प्रारब्धा। कोऽपि नास्ति परं दुःखदग्ध एवं विचारयामास इति अप्रस्तुतप्रशंसा ज्ञेया ॥

(अथैकावलीलक्षणमाह—)

पूर्वपूर्वार्थवैशिष्ट्यनिष्ठानामुत्तरोत्तरम्।
अर्थानां या विरचना बुधैरेकावली मता ॥ १३६ ॥

पूर्वपूर्वार्थवैशिष्ट्यनिष्ठानां पाश्चात्यार्थविशिष्टतायां तत्पराणामर्थानां या रचना उत्तरोत्तरं सा एकावली मता कथिता ॥

(एकावल्युदाहरणमाह—)

देशः समृद्धनगरो नगराणि च सप्त भूमिनिलयानि।
निलयाः सलीलललना ललनाश्चात्यन्तकमनीयाः ॥ १३७ ॥

देशः समृद्धनगर इत्याद्युदाहरणम् ॥

(अथानुमानलक्षणमाह—)

प्रत्यक्षाल्लिङ्गतो यत्र कालत्रितयवर्तिनः।
लिङ्गिनो भवति ज्ञानमनुमानं तदुच्यते ॥ १३८ ॥

यत्र प्रत्यक्षाल्लिङ्गतः कालत्रितयवर्तिनो लिङ्गिनो ज्ञानं भवति तदनुमानमुच्यते। यथा—धूमो लिङ्गं लिङ्गी चाग्निः। लिङ्गस्य धूमस्य दर्शनाल्लिङ्गी अग्निरनुमीयते। अनया रीत्या सर्वत्र ज्ञातव्यम्। एतदनुमानं भवति ॥

(अनुमानोदाहरणमाह—)

नूनं नद्यस्तदाभूवन्नभिषेकाम्भसा विभोः।
अन्यथा कथमेतासु जनः स्नानेन शुध्यति ॥ १३९ ॥

नूनं विभोर्जिनस्याभिषेकाम्भसा नद्यस्तदाभूवन्। अन्यथा एतासु नदीषु जनः स्नानेन कथं शुध्यति। नदीस्नानेन शुद्धिरेतल्लिङ्गं लिङ्गी च विभोरभिषेकाम्भसा तदाभवन्निति। एषोऽतीतानुमानालंकारः ॥

जम्भभित्ककुभि ज्योतिर्यथा शुभ्रं विजृम्भते।
उदेष्यति तथा मन्ये खलः सखि निशाकरः ॥ १४० ॥

जम्भभिदिन्द्रस्तस्य ककुब् दिक् पूर्वा तस्यां ज्योतिस्तेजो यथा शुभ्रं श्वेतं विजृम्भते। अहमेवं मन्ये। हे सखि, खलः संतापकारी निशाकर उदेष्यतीत्येतद्विरहिण्या सख्युरग्र उक्तम्। एष भविष्यानुमानालंकारः॥

मुखप्रभाबाधितकान्तिरस्या दोषाकरः किङ्करतां बिभर्ति।

तल्लोचनश्रीहृति सापराधान्यब्जानि नो चेत्किमयं क्षणोति॥ १४१॥

दोषाकरश्चन्द्रोऽस्या नायिकायाः किङ्करतां बिभर्ति कर्मकरतां याति। कीदृशः। मुखप्रभाबाधितकान्तिः। नो चेद्यदि नैवम् अयं चन्द्रस्तल्लोचनश्रीहृति सापराधानि तासां लोचनशोभाहरणेन सापराधानि कमलानि किं क्षणोति संकोचयति। अन्योऽपि सेवको निजाधिपतेरपराधकारिणमन्यं शक्तौ सत्यां न सहत इत्यर्थः। एष वर्तमानानुमानालंकारो ज्ञातव्यः॥

(अथ परिसंख्यामाह—)

यत्र साधारणं किंचिदेकत्र प्रतिपाद्यते।

अन्यत्र तन्निवृत्त्यै सा परिसंख्योच्यते यथा॥ १४२॥

यत्र कविना किंचित्साधारणं वस्तु एकत्रान्यत्र तन्निवृत्त्यै प्रतिपाद्यते। यद्वस्तु एकत्र एकस्मिन्स्थाने भवति अन्यत्र तन्निवृत्तिर्भवति सा परिसंख्या समुच्यते॥

(परिसंख्योदाहरति—)

यत्र वायुः परं चौरः पौरसौरभसंपदाम्।

युवानश्च कृतक्रोधादेव बिभ्युर्वधूजनात्॥ १४३॥

यत्र पुरे वायुः परं केवलं पौरसौरभसंपदां चौरः। अन्यत्र चौरिका नास्ति। यत्र युवानः कृतरोषाद्वधूजनाद्बिभ्युः। नान्यत्र भयं कस्यापीत्यर्थः॥

(अथ प्रश्नोत्तरालंकारं संकरोदाहरणं चाह—)

प्रश्ने यत्रोत्तरं व्यक्तं गूढं वाप्यथवोभयम्।

प्रश्नोत्तरं तथोक्तानां संसर्गः संकरं विदुः॥ १४४॥

यत्र प्रश्ने उत्तरं व्यक्तं गूढं वापि। अथवा उभयं व्यक्तगूढात्मकम् एतत् प्रश्नोत्तरं ज्ञेयम्। यत्र यथोक्तानां शब्दार्थानामलंकाराणामुक्तानामेकत्र एकद्व्यादिसंसर्गो भणनं स संकरालंकारः॥

प्रश्नोत्तरोदाहरणमाह—

अस्मिन्नपारसंसारसागरे मज्जतां सताम्।

किं समालम्बनं साधो रागद्वेषपरिक्षयः॥ १४५॥

हे साधो, अस्मिन्नपारसंसारसागरे निमज्जतां समालम्बनं किमिति प्रश्ने व्यक्तमुत्तरम्—रागद्वेषपरिक्षयः। एष व्यक्तप्रश्नोत्तरालंकारः॥

क्क वसन्ति श्रियो नित्यं भूभृतां वद कोविद।
असावतिशयः कोऽपि यदुक्तमपि नोह्यते ॥ १४६ ॥

हे कोविद, वद भूभृतां राज्ञां श्रियो नित्यं क्क वसन्ति। असौ अतिशयः कोऽपि यत् उक्तमपि न ज्ञायते। असौ खड्गे—इत्युत्तरम्। एष गूढ प्रश्नोत्तरालंकारः॥

किमैभं श्लाघ्यमाख्याति पक्षिणं कः कुतो यशः।
गरुडः कीदृशो नित्यं दानवारिविराजितः ॥ १४७ ॥

ऐभं श्लाघ्यं किम्, दानवारि मदजलम्। पक्षिणं क आख्याति, विः पक्षी। यशः कुतो भवति, आजितः संग्रामात्। गरुडो नित्यं कीदृग्भवति, दानवारिविराजितो दानवारिर्वासुदेवस्तेन विराजितः शोभितः। अत्र प्राग्गूढत्वात्पश्चात्प्रकटत्वाद्गूढव्यक्तप्रश्नोत्तरालंकारः॥

इदानीं ग्रन्थकार इदमलंकारकर्तृत्वख्यापनाय वाग्भटाभिधस्य महाकवेर्महामात्यस्य तन्नाम गाथयैकया निदर्शयति—

बम्भण्डसुत्तिसंपुडमुक्तिअमणिणो पहासमूह व्व।
सिरिवाहडत्ति तणओ आसि बुहो तस्स सोमस्स ॥ १४८ ॥

[ब्रह्माण्डशुक्तिसंपुटमौक्तिकमणेः प्रभासमूह इव।
श्रीवाहड इति तनय आसीद्बुधस्तस्य सोमस्य ॥]

तस्याप्यत्र गाथायामनिर्दिष्टस्य श्रीवाग्भटः श्रीवाहड इति तनय आसीत्। कीदृशः। सूरोऽपि, बुधः। विरोधालंकारोऽत्र समवगन्तव्यः। उत्प्रेक्षते—ब्रह्माण्डशुक्तिसंपुटमौक्तिकमणेः प्रभासमूह इव तथा॥

द्वारश्लोकेषु येऽलंकारा यथानामानः कथितास्ते सर्वे व्याख्याताः। अन्येषु ग्रन्थेष्वन्ये बहवोऽलंकाराः श्रूयन्ते, तेऽत्र नोक्ता इत्याह—

अचमत्कारिता वा स्यादुक्तान्तर्भाव एव च।
अलंक्रियाणामन्यासामनिबन्धे निबन्धनम् ॥ १४९ ॥

अन्यासामलंक्रियाणामनिबन्धने अभणने निबन्धनं कारणम्। अचमत्कारिता स्यात्। उक्तेभ्योऽन्येषां मध्ये न कोऽपि तादृक्चमत्कारः। चमत्कारं विना क-

---

१. 'तस्य सोमस्य वाहड इति नाम्ना तनय आसीत्' इति जिनवर्धनसूरिः; 'तस्य सोमस्य वाहड इति तनय आसीत्' इति क्षेमहंसगणिः; 'ब्रह्माण्डशुक्तिसंपुटमौक्तिकमणेरित्यत्र रूपकम्, प्रभासमूह इवेत्युत्प्रेक्षा, युक्तोऽयमर्थस्तस्य सोमस्य चन्द्रस्य बुधोऽङ्गजो भवतीति श्लेषालंकारः, श्रीवाहड इत्यादि शेषं जातिः। इति चतुर्णां योगे संकरः' इति जिनवर्धनसूरिः.

थनप्रयास एव स्यान्न फलं किमपि । अथवा उक्तान्तर्भाव एव। अनुक्ता उक्तान्तरन्तर्भवन्तीत्यर्थः ।

अथ रीतिद्वारमाह—

द्वित्रिपदा पाञ्चाली लाटीया पञ्च सप्त वा यावत् ।
शब्दाः समासवन्तो भवति यथासंख्यगौडीया ॥ १९० ॥
द्वे एव रीती गौडीया वैदर्भी चेति सान्तरे ।
एका भूयःसमासा स्यादसमस्तपदापरा ॥ १९१ ॥

अत्र द्वे एव रीती भवतः । गौडीया वैदर्भी चेति । यतस्ते द्वे सान्तरे अन्तरसहिते पृथक्पृथक्लक्षणे । तद्दर्शयति—एका गौडीया बहुसमासा स्यात् । द्वितीया वैदर्भी असमस्तपदा अल्पसमासा भवेत् ॥

(अथ गौडीयोदाहरणमाह—)

दर्पोत्पाटिततुङ्गपर्वतशतग्रावप्रपाताहति-
क्रूराक्रन्ददतुच्छकच्छपकुलक्रेङ्कारवोरीकृतः ।
विश्वं वर्वरवध्यमानपयसः शिप्रापगायाः स्फुर-
न्नाक्रामत्ययमक्रमेण बहुलः कल्लोलकोलाहलः ॥ १९२ ॥

अयं शिप्रापगायाः शिप्रानद्या बहुलः कल्लोलकोलाहलो विश्वमक्रमेणाक्रामति । कीदृशः । दर्पोत्पाटितं तुङ्गपर्वतशतग्रावप्रपातस्य आहत्या आहननेन क्रूरं यथा भवति तथाक्रन्दन्ते यानि अतुच्छकच्छपकुलानि तेषां क्रेङ्कारशब्दैर्घोरीकृतः । कीदृश्या नद्याः । वर्वरवध्यमानपयसः वर्वरो राक्षसः कोऽपि, अन्यो वा कोऽपि महान्, तेन वध्यमानं पयो यस्यास्तस्याः । एषा बहुसमासा गौडीया रीतिः ॥

(अथ वैदर्भीमुदाहरति—)

विप्राः प्रकृत्यैव भवन्ति लोला लोकोक्तिरेषा न मृषा कदाचित् ।
यच्चुम्ब्यमानां मधुपैर्द्विजेशः श्लिष्यत्ययं कैरविणीं कराग्रैः ॥ १९३ ॥

यद्यस्मात्कारणाद्द्विजेशो विप्रश्चन्द्रो वा मधुपैर्मद्यपैर्भ्रमरैश्च चुम्ब्यमानां कैरविणीं कुमुदिनीं कराग्रैः श्लिष्यति । श्लेषालंकारः । एषा द्वितीया वैदर्भी रीतिः ॥

उपसंहारमाह—

अर्थेन येनातिचमत्करोति प्रायः कवित्वं कृतिनां मनःसु ।
अलंक्रियात्वेन स एव तस्मिन्नभ्यूह्यतां हन्त दिशानयैव ॥ १९४ ॥

---

१. अयं श्लोकः क्षेमहंसगणि-जिनवर्धनसूरिविरचितव्याख्ययोर्नोपलभ्यते. २—४. 'सिप्रा' क. जिनवर्धनश्च

कृतिनां मनःसु येनार्थेन कवित्वमतिचमत्करोति अतिचमत्कारमुत्पादयति । हन्त इति विचारे । स एवार्थस्तस्मिन्कवित्वेऽनयैव पूर्वोक्तदिशालंक्रियात्वेनालंकारत्वेनाभ्यूह्यतां विचार्यताम् ॥ समाप्ता रीतयः ॥

इति वाग्भटालंकारटीकायां चतुर्थः परिच्छेदः ।

पञ्चमः परिच्छेदः ।

'स्फुटरीतिरसोपेतम्' इति (रीतयो व्याख्याताः । अधुना) रसानाह—

साधुपाकेऽप्यनास्वाद्यं भोज्यं निर्लवणं यथा ।
तथैव नीरसं काव्यमिति ब्रूमो रसानिह ॥ १ ॥

यथा साधुपाकेऽपि भोज्यं निर्लवणं लवणरहितमनास्वाद्यं भवति, तथा काव्यमपि नीरसं रसरहितमनास्वाद्यं भवति । इत्येतस्मात्कारणाद्रसान्ब्रूमः ॥

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
आरोप्यमाण उत्कर्षं स्थायी भावो रसः स्मृतः ॥ २ ॥
शृङ्गारवीरकरुणाहास्याद्भुतभयानकाः ।
रौद्रबीभत्सशान्ताश्च नवैते निश्चिता बुधैः ॥ ३ ॥

एते नव रसाः शृङ्गारादयः । नवानां रसानामेकैकः स्थायीभावः पृथक्पृथक् । ते चामी—

रतिर्हासश्च शोकश्च क्रोधोत्साहभयं तथा ।
जुगुप्सा विस्मयशमाः स्थायिभावाः प्रकीर्तिताः ॥ ४ ॥

अमी क्रमेण नव स्थायिनो भावाः । 'शृङ्गारहास्यकरुणारौद्रवीरभयानकबीभत्साद्भुतशान्ताः क्रमेण नव रसा ज्ञेयाः ॥ विशेषेण भावयन्त्युत्पादयन्ति रसमिति विभावाः श्रीवसन्तोद्यानादयः उत्पत्तिकारणानि । एभ्यः शृङ्गारोत्पत्तिरित्यर्थः । विभावो रसकारणम् ।

१. क्षेमहंसगणिस्त्वयं श्लोकः—'यथा—शृङ्गारहास्यकरुणारौद्रवीरभयानकाः । बीभत्साद्भुतशान्ताश्च' इति क्रमेणैव पपाठ. २. 'शान्ताश्चेति नवरसाः क्रमेण ज्ञेयाः' ख. ३. 'अथ स्थायिभावलक्षणमाह—' इत्यधिकमादर्शद्वयेऽपि; क्षेमहंसगणिस्तु 'रतिर्हासश्च—' इति श्लोकम् 'एते जुगुप्सा(त्सा)दयः स्थायिभावाः प्रकीर्तिताः' इति व्याख्याय 'निर्वेदग्लानिशङ्काख्या तथासूयामदश्रमाः । आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥ व्रीडा चपलता हर्ष आवेगो जडता तथा । गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ सुप्तिः प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता । मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः । त्रयस्त्रिंशदमी भावाः समाख्याताः स्वनामतः ॥ स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रुप्रलया इत्यष्टौ सात्त्विका गुणाः ॥' इत्येतान्श्लोकानधिकान्व्याचख्यौ.

तथा—अनुभूयते लक्ष्यते रस एभिरित्यनुभावाः कम्पस्वेदमुखविकारनेत्रोल्लासादयः। रसोत्पत्तौ सत्यां पश्चाद्ये भावा जायन्ते तेऽनुभावा ज्ञेयाः। तथा सात्त्विकभावाः स्तम्भस्वेदरोमाञ्चाद्योऽष्टौ समवगन्तव्याः। तथा व्यभिचारिणः सहचारिणो भावा धृतिस्मृतिमत्यादयः। एभिर्विभावैरनुभावैः सात्त्विकैर्व्यभिचारिभिरुत्कर्षमारोप्यमाणः स्थायीभावो रसः स्यात्। स्थायीभावः शृङ्गारादिरसरूपेण भवति। पूर्वोक्ताः स्थायिनो भावा रत्यादयो विभावादिभिर्व्यक्तीकृताः सन्तो रसाः शृङ्गारादयो नवापि भवन्तीत्यर्थः॥

शृङ्गारस्वरूपमाह—

जायापत्योर्मिथो रत्यां वृत्तिः शृङ्गार उच्यते।
संयोगो विप्रयोगश्चेत्येष तु द्विविधो मतः॥ ५॥

जायापत्योः कलत्रभर्त्रोः रत्यां प्रीत्यां मिथो वृत्तिः परस्परवर्णनं शृङ्गार उच्यते। एष शृङ्गारो द्विविधो मतः। कथम्। संयोगो विप्रयोगश्च। संयुक्तयोर्दम्पत्योः संभो(यो)गात्मकः शृङ्गारः। वियुक्तयोस्तु विप्रलम्भात्मकः शृङ्गारः॥

तौ तयोर्भवतो वाच्यौ बुधैर्युक्तवियुक्तयोः।
प्रच्छन्नश्च प्रकाशश्च पुनरेष द्विधा मतः॥ ६॥

तौ संयोगविप्रलम्भौ तयोर्जायापत्योः क्रमाद्युक्तवियुक्तयोर्बुधैर्वाच्यौ भवतः। पुनरेष शृङ्गाररसो द्विधा मतः। प्रच्छन्नश्च प्रकाशश्च। विशेषमग्रतो ज्ञापयिष्यामः॥

अथ शृङ्गाररसनायकमाह—

रूपसौभाग्यसंपन्नः कुलीनः कुशलो युवा।
अनुद्धतः सूनृतगीः ख्यातो नेतात्र सद्गुणः॥ ७॥

अत्र शृङ्गारे नेता नायकः कथितः। कीदृशः। रूपसौभाग्ययुक्तः। रूपशब्देन लावण्यम्। कुलीनः सुकुलोद्भवः। कुशलः सकलकलाकोविदः। युवा यौवने वर्तमानः। अनुद्धतः सौम्याकृतिक्रियः। सूनृतगीः सत्यवाक्। सद्गुणः॥

अयं च विबुधैरुक्तोऽनुकूलो दक्षिणः शठः।
धृष्टश्चेति चतुर्धा स्यान्नायिका स्याच्चतुर्विधा॥ ८॥

अयं च नायको विबुधैश्चतुर्धा उक्तः। अनुकूलो दक्षिणः शठो धृष्टश्चेति। अस्य नायकस्य नायिका चतुर्विधा स्यात्॥

अथानुकूलादीनां लक्षणान्याह—अनुकूललक्षणं प्रागाह—

नीलीरागोऽनुकूलः स्यादनन्यरमणीरतः।
दक्षिणश्चान्यचित्तोऽपि यः स्यादविकृतः स्त्रियाम्॥ ९॥

नीलीरागोऽनुकूलो भवति। यथा—नीली गुली तस्या रागो नोत्तरति। सोऽनुकूलो नायकः परं सोऽन्यरमणीरतो न स्यात्। अन्यस्यां चित्तं यस्य सोऽन्यचित्तः स दक्षिणो

भवति । कीदृक् । स्त्रियामविकृतः सपत्न्यां विकारं मारणत्यजनकुट्टनादिकं न दर्शयतीत्यर्थः ॥

प्रियं वक्त्यप्रियं तस्याः कुर्वन्यो विकृतः शठः ।
धृष्टो ज्ञातापराधोऽपि न विलक्षोऽवमानितः ॥ १० ॥

तथा यो विकृतो विकारमापन्नस्तस्याः स्वपत्न्या अप्रियं कुर्वन् प्रियं वक्ति स शठनायकः । यो ज्ञातापराधोऽपि अवमानितोऽपि विलक्षो न भवति स धृष्टनायकः ॥

अथ सामान्येन चतुर्विधां स्त्रियमभिधत्ते—यथा शृङ्गाररसस्य नायको युवा पुमान्प्राक्थितस्तस्य नायकस्य पुरुषरूपस्य नायिकापि चतुर्विधा भवति । तामाह—

अनूढा च स्वकीया च परकीया पणाङ्गना ।
त्रिवर्गिणः स्वकीया स्यादन्याः केवलकामिनः ॥ ११ ॥

स्त्रियश्चतुर्विधाः । अनूढा स्वकीया परकीया पण्याङ्गना च । त्रिवर्गिणो धर्मार्थकामयुक्तस्य स्वकीया परिणीता स्यात् । अन्या अनूढाद्यास्तिस्रः केवलकामिनो भवन्ति ॥

आसां लक्षणमाह—

अनुरक्तानुरक्तेन स्वयं या स्वीकृता भवेत् ।
सानूढेति यथा राज्ञो दुष्यन्तस्य शकुन्तला ॥ १२ ॥

यानुरक्तेन नरेणानुरक्ता सती या स्वीकृता भवति सानूढोच्यते । यथा—दुष्यन्तस्य राज्ञः शकुन्तला नायिका ॥

देवतागुरुसाक्ष्येण स्वीकृता स्वीयनायिका ।
क्षमावत्यतिगम्भीरप्रकृतिः सच्चरित्रभृत् ॥ १३ ॥

देवतागुरुसाक्ष्येण स्वीकृता स्वीयनायिका स्वकीया समवगन्तव्या । सा क्षमावती अतिगम्भीरप्रकृतिः सच्चरित्रभृत्प्रधानचरित्रवती ॥

परकीयाप्यनूढेव वाच्यभेदोऽस्ति चानयोः ।
स्वयमप्यतिकामैका सख्यैवैका प्रियं वदेत् ॥ १४ ॥

परकीयापि स्त्री अनूढेव वाच्या । परमनयोः परकीयानूढयोर्वाच्यभेदोऽस्ति न तादृग्विशेषः कोऽपि । तथापि विशेषमाह—एका परकीया अतिकामाकुला सती स्वयमपि प्रियं वदेत् । एका द्वितीया अनूढा लज्जया स्वयं न वदेत् । परं कामाकुला सती सख्यैव कृत्वा प्रियं वदेत् ॥

सामान्यवनिता वेश्या भवेत्कपटपण्डिता ।
न हि कश्चित्प्रियस्तस्या दातारं नायकं विना ॥ १५ ॥

अथ सामान्यवनिता कपटपण्डिता वेश्या पण्याङ्गना भवेत् । तस्या दातारं विना नायकं न हि कश्चित्प्रियो भवति । यो दाता स एव नायकस्तासां नान्यः प्रिय इति ॥

अथ शृङ्गारस्य प्रकाशप्रच्छन्नभेदद्वयमाह—

सर्वप्रकाशमेवैषा याति नायकमुद्धता ।
वाच्यः प्रच्छन्न एवान्यस्त्रीणां प्रियसमागमः ॥ १६ ॥

एषा पण्याङ्गनोद्धता सती सर्वप्रकटमेव नायकं पतिं याति । प्रकाशो रसः । अन्यस्त्रीणां प्रियसमागमः प्रच्छन्न एव भवति । एष प्रच्छन्नः शृङ्गाररसः । समाप्तः संभोगशृङ्गारः ॥

विप्रलम्भशृङ्गारमाह—

पूर्वानुरागमानात्मप्रवासकरुणात्मकः ।
विप्रलम्भश्चतुर्धा स्यात्पूर्वपूर्वो ह्ययं गुरुः ॥ १७ ॥

पूर्वानुरागात्मको विप्रलम्भो मानात्मको विप्रलम्भः प्रवासात्मको विप्रलम्भः करुणात्मको विप्रलम्भ इति विप्रलम्भश्चतुर्धा । अयं विप्रलम्भः पूर्वः पूर्वो गुरुः । मानात्पूर्वानुरागो गुरुरित्यर्थः ॥

अथ क्रमेणैतेषां लक्षणान्याह—

स्त्रीपुंसयोर्नवालोकादेवोल्लसितरागयोः ।
ज्ञेयः पूर्वानुरागोऽयमपूर्णस्पृहयोर्दशा ॥ १८ ॥

स्त्रीपुंसयोर्नवालोकादेव नवदर्शनादेवोल्लसितरागयोः परमपूर्णस्पृहयोर्दशावस्था । अयं पूर्वानुरागविप्रलम्भः शृङ्गारः ॥

मानोऽन्यवनितासङ्गादीर्ष्याविकृतिरुच्यते ।
प्रवासः परदेशस्थे प्रिये विरहसंभवः ॥ १९ ॥

तथा पत्युरन्यवनितासङ्गात्पत्न्याया ईर्ष्याविकृतिरीर्ष्यया विकारो भवति स मानात्मको विप्रलम्भशृङ्गारः । तथा परदेशस्थे भर्तरि पत्न्या विरहसंभवः प्रवासात्मको विप्रलम्भशृङ्गारः ॥

स्यादेकतरपञ्चत्वे दम्पत्योरनुरक्तयोः ।
शृङ्गारः करुणाख्योऽयं वृत्तवर्णन एव सः ॥ २० ॥

अनुकूलयोर्दम्पत्योर्जायापत्योरेकतरपञ्चत्वे द्वयोरेकतरविनाशे करुणात्मको विप्रलम्भशृङ्गारः । स वृत्तवर्णन एव भवति । अन्ये हास्याद्भुतादयो रसा वृत्ते श्लोके वा संपूर्यन्ते । अयं तु शृङ्गारकरुणाख्यो वृत्तवर्णने संपूर्णे प्रबन्धे भवति । यथा रतिविलापे कुमारसंभवे ॥

शृङ्गाररसं तत्संबन्धि चान्यदपि सर्वमुक्त्वा वीरादीन्रसानाह—

(तत्र वीरमाह—)

उत्साहात्मा भवेद्वीरस्त्रिधा धर्माजिदानतः।
नायकोऽत्र भवेत्सर्वैः श्लाघ्यैरधिगतो गुणैः॥ २१॥

वीरो रस उत्साहात्मा भवति। स त्रिधा—धर्माजिदानतः। धर्मवीरः संग्रामवीरो दानवीर इति। अत्र वीररसे सर्वैः श्लाघनीयगुणैरधिगतो नायको भवति॥

(करुणमाह—)

शोकोत्थः करुणो ज्ञेयस्तत्र भूपातरोदने।
वैवर्ण्यमोहनिर्वेदप्रलापाश्रूणि कीर्तयेत्॥ २२॥

करुणो नाम रसः शोकोत्थः शोकात्मको ज्ञातव्यः। तत्र रसे भूपातरोदने वैवर्ण्यमोहनिर्वेदप्रलापाश्रूणि कीर्तयेत्। भूपातो भूमौ लुठनं तथा रोदनम्, वैवर्ण्यं विवर्णभावः, मोहो मौढ्यम्, निर्वेदो विषादः, प्रलापः प्रकृष्टं लपनम्, अश्रूणि अश्रुपातः। करुणारस एते भवन्ति भावाः। अतोऽत्र रसे एते भावा वर्ण्यन्ते॥

(हास्यमाह—)

हासमूलः समाख्यातो हास्यनामा रसो बुधैः।
चेष्टाङ्गवेषवैकृत्याद्वाच्यो हास्यस्य चोद्भवः॥ २३॥

हास्यनामा रसो बुधैर्हासमूलः समाख्यातः। तस्य हास्यरसस्य संभव उत्पत्तिश्चेष्टाङ्गवेषवैकृत्याद्भवति॥

अथोत्तममध्यमाधमभेदेन हास्यरसस्वरूपमाह—

कपोलाक्षिकृतोल्लासमोष्ठे तिष्ठन्स उत्तमः।
मध्यमानां विदीर्णास्यः सोऽवराणां सशब्दकः॥ २४॥

कपोलाक्षिकृतोल्लासमोष्ठे तिष्ठन्नोष्ठमात्राश्रयश्च भवति स उत्तमः। मध्यमानां विदीर्णास्यः प्रसताननो भवति। स च हास्यरसोऽवराणां नीचानां सशब्दको महाशब्दसहितो भवति॥

(अद्भुतमाह—)

विस्मयात्माद्भुतो ज्ञेयः स चासंभाव्यवस्तुनः।
दर्शनाच्छ्रवणाद्वापि प्राणिनामुपजायते॥ २५॥

अद्भुतो रसो विस्मयस्थायिभावात्मकः। स च प्राणिनामसंभाव्यवस्तुनो दर्शनाच्छ्रवणाद्वा समुपजायते। एतेनास्य द्विधोत्पत्तिरभिहिता॥

अस्य रसस्य विभावादीन्दर्शयति—

तत्र नेत्रविकासः स्यात्पुलकः स्वेद एव च।
निःस्पन्दनेत्रता साधुसाधुवाग्गद्गदा च गीः॥ २६॥

तत्राद्भुतरसे जाते नेत्रयोर्विकासः स्यात् । रोमाञ्चस्वेदौ भवतः । निःस्पन्दनेत्रता भवति नेत्राणि निःस्पन्दानि भवन्ति । साधुसाधुवाग्भवति । गीर्गद्गदा च स्यात् ॥

(भयानकमाह—)

भयानको भवेद्भीतिप्रकृतिर्घोरवस्तुनः ।

स च प्रायेण वनिता नीचबालेषु शस्यते ॥ २७ ॥

भयानको रसो घोरवस्तुदर्शनाद्भवेत् । भीतिप्रकृतिर्भयस्वभावः । स भयानको रसः प्रायेण स्त्रीषु नीचेषु बालेषु प्रशस्यते । भयरसो व्यावर्ण्यमानो नूनमेतेष्वेव शोभते नान्यत्रास्य दीप्तिः ॥

इदानीमस्य विभावादीन्दर्शयति—

दिगालोकास्यशोषाङ्गकम्पगद्गदसंभ्रमाः ।

त्रासवैवर्ण्यमोहाश्च वर्ण्यन्ते विबुधैरिह ॥ २८ ॥

अस्माद्भयानकादेते पदार्था उत्पद्यन्ते । अतोऽत्र रसे एते व्यावर्ण्यन्ते । एते के । दिगालोको दिग्दर्शनम्, मुखशोषः, शरीरकम्पः, गद्गदा वाणी, संभ्रमः, तथा त्रासः, वैवर्ण्यं विवर्णभावः, मोहो मूढता । सर्वत्र मुह्यति भयेन । इहामी वर्ण्यन्ते बुधैर्भावाः ॥

(रौद्ररसमाह—)

क्रोधात्मको भवेद्रौद्रः क्रोधश्चारिपराभवात् ।

भीष्मवृत्तिर्भवेदुग्रः सामर्षस्तत्र नायकः ॥ २९ ॥

स्वांसाघातस्वशंसास्त्रोत्क्षेपभ्रकुटयस्तथा ।

अत्रारातिजनाक्षेपोद्दलनं चोपवर्ण्यते ॥ ३० ॥[1]

रौद्ररसः क्रोधात्मको भवति । क्रोधश्चारिपराजयाद्भवति । अरिकृतपराजयात्क्रोधः । यदा योऽरिणा पराजीयते तदा तस्य क्रोधो जायत इत्यर्थः । तथा रौद्रे भीष्मवृत्तिरुग्रः सामर्षो नरो नायको भवेत् ॥

(बीभत्समाह—)

बीभत्सः स्याज्जुगुप्सातः सोऽहृद्यश्रवणे क्षणात् ।

निष्ठीवनास्यभङ्गादि स्यादत्र महतां न च ॥ ३१ ॥

बीभत्सो रसो जुगुप्साभावप्रभवः स्यात् । विभावादीनस्योद्दिशति स चाहृद्यश्रवणात् विरूपपदार्थाकर्णनात् विरूपवस्तुनो दर्शनाच्च । निष्ठीवनमकुत्सितास्यभङ्गादि स्यात् तद्भावसंपन्नः स्यात् । परं महतामुत्तमानां निष्ठीवनादयो भावा न प्रयोक्तव्याः ॥

---

१. 'अत्र रौद्रे स्वस्कन्धप्रहतिः स्वस्य श्लाघा शस्त्रक्षेपणं भ्रुकुटयोऽनुभावाः । उपलक्षणात्—नेत्ररागदन्तोष्ठग्रहणरुधिराकर्षणादीन्यपि भवन्ति । तथा विपक्षपक्षाक्षेपो दलनं वैरिमर्दनम् । उपलक्षणादाधमवेगामर्षाद्यपि च व्यभिचारितयोपवर्ण्यन्ते ॥' इति जिनवर्धनसूरिरिमं श्लोकं व्याचख्यौ.

(शान्तमाह—)

सम्यग्ज्ञानसमुत्थानः शान्तो निःस्पृहनायकः।
रागद्वेषपरित्यागात्सम्यग्ज्ञानस्य चोद्भवः॥ ३२॥

शान्तो रसः सम्यग्ज्ञानसमुत्थानो भवति। अस्य शान्तरसस्य निःस्पृहो नायको भवति। शान्तरसवान्निःस्पृहो भवति। स शान्तरसो रागद्वेषपरित्यागात्सम्यग्ज्ञानस्य संभव उत्पत्तिकारणम्॥

दोषैरुज्झितमाश्रितं गुणगणैश्चेतश्चमत्कारिणं
नानालंकृतिभिः परीतमभितो रीत्या स्फुरन्त्या मताम्।
तैस्तैस्तन्मयतां गतं नवरसैराकल्पकालं कवि-
स्रष्टारो घटयन्तु काव्यपुरुषं सारस्वताध्यायिनः॥ ३३॥

सारस्वताध्यायिनः कविस्रष्टार आकल्पकालं कल्पकालं यावत् काव्यपुरुषं घटयन्तु चरयन्तु। कीदृक्। विशेषणानि सुगमानि॥

लाटी हास्यरसे प्रयोगनिपुणं रीतिः प्रबन्धे कृता
पाञ्चाली करुणा भयानकरसे शान्ते रसे मागधी।
गौडी वीररसे च रौद्रजरसे वत्सोमदेशोद्भवा
बीभत्साद्भुतयोर्विदर्भविषया शृङ्गारभूते रसे॥
द्वित्रिपदा पाञ्चाली लाटीया पञ्चसप्त वा यावत्।
शब्दाः समासवन्तो भवति यथाशक्ति गौडीया॥
प्रथमपदा वत्सोमी त्रिपदसमा च मागधी भवति।
उभयोरपि वैदर्भी मुहुर्मुहुर्भाषणं कुरुते॥

समाप्तेयं श्रीवाग्भटालंकारटीका।

	किं.	ट. ख.
,, इंग्रजी टीपांसहित	।॥।	८-॥
यमुनाष्टक-शंकराचार्यकृत	८।	८॥
रघुवंश काव्य-कालिदासकृत, मल्लिनाथकृत संजीविनी टीकेसहित	२	८≡॥
,, (सूक्ष्माक्षर) ...	१	८=
रत्नसमुच्चय	८=	८॥
रत्नावली नाटिका-श्रीहर्षदेवकृत...	।=	८-
,, इंग्रजी टीपांसहित	।॥।	८-
रसिकाष्टक काव्य-नारायणभट्टपर्वणीकरकृत	८॥	८॥
रामगीता व रामगीतामाहात्म्य	८॥।	८॥
रामचंद्रिका (गुंजीकरकृत संस्कृत शब्दरूपावलि)...	।।	८॥
रामरक्षास्तोत्र	८॥	८॥
रामस्तवराजस्तोत्र ...	८-	८॥
रामायण-वाल्मीकिकृत, रामकृत तिलकटीकेसहित	८	।॥=
रुद्र...	८॥।	८॥
लघुकौमुदी-वरदराजकृत	८≡	८-
लघुयोगवासिष्ट, आत्मसुखकृत वासिष्ठचंद्रिका टीकेसहित	५	।॥।
लक्ष्मीस्तोत्र अगस्त्यकृत	८॥	८॥
वेदांतसार-हें नृसिंहसरस्वति स्वामिकृत सुबोधिनी टीका व रामतीर्थविरचित विद्वन्मनोरंजनी टीका या दोन टीकांसहित कर्नल जे. इ. जेकब यांनीं पाठांतरें व इंग्लिश नोट्स देऊन तपासलें आहे.	१॥	८=॥
विक्रमोर्वशी नाटक-कालिदासकृत, रंगनाथकृत प्रकाशिका टीकेसहित...	।॥।	८-
विदुरनीति, सटीक ...	।=	८॥
श्रीविष्णोर्नामसहस्रम्	।=	८-
विष्णुसहस्रनाम (सा.)	८-	८॥
,, (रेशमी पुठा)...	८=॥	८॥
,, मोठ्या अक्षराचें	८-॥	८॥
विष्णुसहस्रनामावलि...	८-।	८॥
,, (रेशमी पु०) ...	८=॥	८॥
वृत्तरत्नाकर-केदारभट्टकृत, नारायणपण्डितकृत टीकेसहित, श्रुतबोध-कालिदासकृत, व छन्दोमञ्जरी-गङ्गादासकृत... ...	।॥।	८-
वैदिककोश-भट्टभास्करकृत, निघंटु व चार परिशिष्टें यांसुद्धां ...	।॥।	८-
वैराग्यशतक-भर्तृहरिकृत, कृष्णशास्त्री महाबलकृत टीकेसहित	।-॥	८॥
शब्दरूपावलि (गुंजीकरकृत)...	८-	८॥
शिवसहस्रनामावलि (साधी)	८-॥	८॥
,, (रेशमी पुठा)	८≡	८॥
शिवकवच	८॥।	८॥
शुक्लयजुर्वेदीयरुद्राष्टाध्यायी (स्थूलाक्षर)	८≡	८॥
शिवगीता (साधी) ...	।-।	८-
शिवगीता (रेश० पु०)	।=।	८-
,, लक्ष्मीनरहरिसूनुकृत बालानंदिनी		

	कि.	ट. ख.
टीका व शंकराचार्यकृत कालभैरवाष्टक यांसहित … …	१	०=
शिवतांडवस्तोत्र-दशकंठकृत, माधवानंदकृत टीकेसहित … …	०-	०॥
शिवमहिम्नस्तोत्र-पुष्पदंतकृत … … …	०।॥	०॥
शिवापराधक्षमापनस्तोत्र-शंकराचार्यकृत	०॥	०॥
शिशुपालवध काव्य-माघकृत, मल्लिनाथकृत सर्वंकषाटीकेसहित	३	।-
शितलाष्टक … …	०।	०॥
शृङ्गारशतक-भर्तृहरिकृत, कृष्णशास्त्री महाबळकृत टीकेसहित	०=॥	०॥
सत्यनारायण पूजा व कथा … … …	०-	०॥
सारस्वतव्याकरणपूर्वार्ध (कापडी बाइंडिंग)	।-	०-
,,(कागदी बाइंडिंग)	।	०॥
सप्तशती (चंडीपाठ), देवीसूक्त व तीन रहस्यें यांसहित (स्थूलाक्षर रेशमी पुट्ठा)	।॥	०=॥
सप्तशती (रे. पु. म. अ.) … … …	।=	०-
,, (साधी कागदी)	।	०-
,, (सूक्ष्माक्षर रे. पु.) … … …	।-	०॥
,, (स्थूलाक्षर सुटी प्रत) … … …	॥=	०=
समयोचितपद्यमालिका	।=	०-
समासचक्र … …	०।॥	०॥
सर्वपूजा … … …	०-	०॥
सिद्धांतकौमुदी-भट्टोजी दीक्षितकृत, अष्टाध्यायीसूत्रपाठ, गणपाठ, धातुपाठ, लिंगानुशासन व शिक्षा आणि सूत्रानुक्रमणी यांसहित … …	२	।-
सुभाषितरत्नभांडागार	२॥	।=
सूर्यसहस्रनामावलि	०॥	०॥
,, (रे. पुट्ठा) …	०=	०॥
सौर … …	०॥	०॥
स्वानुभवाष्टक-गोपीनाथ दाधीचकृत, स्वकृत सारबोधिनीटीकेसहित … …	०-	०॥
स्वात्मनिरूपण …	।	०॥
हर्षचरित-बाणभट्टकृत, शंकरकृत संकेतटीकेसहित … … …	२	०=
हितोपदेश-नारायणपंडितकृत	॥	०-
(इंग्रजी टीपांसहित)	१	०-॥
हिरण्यकेशीय (आपस्तंबीय) नित्यविधि	०=	०-

नामलिंगानुशासन.

(अमरकोश.)

हें पुस्तक आजपर्यंत बहुतेकांनीं सटीक व मूळ असें छापून प्रसिद्ध केलें व करीतही आहेत, त्यावरून, केवळ याचें नांव ऐकून लोकांस महत्त्व वाटणार नाहीं; परंतु हें तसें नसून केवळ मूळ मात्रच आहे खरें, तथापि याच्या प्रतिश्लोकांत येणारीं ज्या ज्या वस्तूंचीं नांवें असतील तीं दरपृष्ठांत त्या त्या ओळीच्या बाजूस मराठींत दिलीं आहेत. व कोणच्या वस्तूचीं किती हें समजण्याकरितां बाजूस अंकही दिला आहे. लवकर ध्यानांत येण्याकरितां विशेषनांवें तेवढीं जाड ठेवून बाकी

KÂVYAMÂLÂ. 34.

THE

PRÂCHÎNA-LEKHA-MÂLÂ

OR

A COLLECTION OF

Ancient Historical Records.

Vol. I.

EDITED BY

MAHÂMAHOPÂDHYÂYA PANDIT DURGÂPRASÂD

AND

KÂSÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

TUKARAM JAVAJI

PROPRIETOR OF "JAVAJI DADAJI'S NIRNAYA-SAGARA" PRESS

BOMBAY.

1892.

Price 1½ Rupee.

काव्यमाला ३४.

प्राचीनलेखमाला ।

(प्रथमो भागः ।)

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना
महामहोपाध्यायपण्डितदुर्गाप्रसादेन,
परवोपाह्वेन पाण्डुरङ्गतनूभुवा
काशीनाथशर्मणा च
संशोधिता ।

सा च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीता ।

१८९२

मूल्यं १।। रूप्यकः ।

प्राचीनलेखमालाया अनुक्रमणी।

काव्यमाला।

प्राचीनलेखमाला।

भोः काव्यमालानुग्राहका विद्वन्मुकुटमणयः, अस्तु वः संविदितम्, यथा किल बहुविधविद्यापारगमैराधुनिकैः पण्डितवरैः प्राचीनमहीपतीनां दानपत्राणि प्रशस्तयः शिलालेखाश्च नानादेशेषु भूयसा परिश्रमेण राजाश्रयेण चान्विष्यान्विष्य 'इण्डियन् आण्टिक्वेरी', 'एशियाटिक् रिसर्चेस्', 'आर्कियालॉजिकल् सर्वे', 'रॉयल् एशियाटिक् सोसायटीज् जर्नल्', 'अमेरिकन् ओरिएण्टल् सोसायटीज् जर्नल', 'बेङ्गॉल् एशियाटिक् सोसायटीज जर्नल्', 'बॉम्बे ब्राञ्च् आव् धी रॉयल् एशियाटिक् सोसायटीज जर्नल्', इत्यादिपुस्तकेषु नानाविध'रिपोर्ट'पुस्तकेषु च प्रतिदिनं प्राकाश्यं नीयन्ते। तेषु कचित्कचिदतिरुचिरं कवित्वमुपलभ्यत इति तत्परिशीलनेन कविताचातुरी प्राचीनेतिहासज्ञानं च युगपदेव समुत्पद्यते। अतस्तत्तत्पुस्तकेभ्यस्तादृशलेखानामयं संग्रह आरब्धः। भविष्यति चायमावयोर्यत्नो युष्माकं संतोषावह इति दृढं संभावयावः।

काव्यमालासंपादकौ

दुर्गाप्रसाद-काशिनाथौ।

---

(१)

धारानगराधिपसुप्रसिद्धभोजमहीपतेः पितामहस्य वाक्पतिराजस्य दानपत्रम्।

याः स्फूर्जत्फणभृद्विषानलमिलद्धूमप्रभाः प्रोल्लस-
न्मूर्धाबद्धशशाङ्ककोटिघटिता याः सैंहिकेयोपमाः।
याश्चाद्रिगिरिजाकपोलललिताः कस्तूरिकाविभ्रमा-
स्ताः श्रीकण्ठकठोरकण्ठरुचयः श्रेयांसि पुष्णन्तु वः॥

यल्लक्ष्मीवदनेन्दुना न सुखितं यन्नार्द्रितं वारिधे-
र्वारा यन्न निजेन नाभिसरसीपद्मेन शान्तिं गतम्।
यच्छेषाहिफणासहस्रमधुरश्वासैर्न चाश्वासितं
तद्राधाविरहातुरं मुररिपोर्वेल्लद्वपुः पातु वः॥

परमभट्टारकमहाराजाधिराजपरमेश्वर**श्रीकृष्णराजदेव**पादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वर**श्रीवैरिसिंहदेव**पादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वर**श्रीसीयकदेव**पादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमदमोघवर्षदेवापराभिधान**श्रीमद्वाक्पतिराजदेव**पृथ्वीवल्लभश्रीवल्लभनरेन्द्रदेवः कुशली श्रीनर्मदातटे गर्दभपानीयभोगे गर्दभपानीयसंबन्धिनि उत्तरस्यां दिशि पिप्परिकानाम्ना तडागे समुपगतान्समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिवासिपट्टकिलजनपदादींश्च बोधयति—अस्तु वः संविदितम्, यथा तडागेऽयमस्माभिः आघाटाः पूर्वस्यां दिशि

---

१. 'विवेकात्त्यक्तराज्येन राज्ञेयं रत्नमालिका । रचितामोघवर्षेण सुधियां सदलंकृतिः ॥' इति प्रश्नोत्तररत्नमालाकर्तायमेवामोघवर्षः कश्चिदन्यो वेति संदेहः. २. वाक्पतिराज इति मुञ्जस्यैव नामान्तरं भाति. दशरूपावलोके चतुर्थपरिच्छेदे 'प्रणयकुपितां दृष्ट्वा देवीं—' इत्यादिश्लोकः श्रीवाक्पतिराजदेवनाम्ना समुद्धृतः तत्रैव च पुनरयमेव श्लोकः श्रीमुञ्जनाम्ना समुद्धृतः. एवं पिङ्गलसूत्रवृत्तौ हलायुधेन 'ब्रह्मक्षत्रकुलीनः प्रलीनसामन्तचक्रनुतचरणः । सकलसुकृतैकपुञ्जः श्रीमान्मुञ्जश्चिरं जयति ॥', 'जयति भुवनैकवीरः सीरायुधतुलितविपुलबलविभवः । अनवरतवित्तवितरणनिर्जितचम्पाधिपो मुञ्जः ॥', 'स जयति वाक्पतिराजः सकलार्थिमनोरथैककल्पतरुः । प्रत्यर्थिभूतपार्थिवलक्ष्मीहठहरणदुर्ललितः ॥' एतासूदाहृतास्वार्यास्वार्याद्वये मुञ्ज इति, तृतीयार्यायां च वाक्पतिराज इति नामास्ति. अथ चैतद्दानपत्रस्य संवत्सरे (१०३१), सुभाषितरत्नसंदोहाख्यग्रन्थान्ते जैनेनामितगतियतिना 'समारूढे पूतत्रिदिववसतिं विक्रमनृपे सहस्रे वर्षाणां प्रभवति हि पञ्चाशदधिके (१०५०)। समाप्तं पञ्चम्यामवति धरणिं मुञ्जनृपतौ सिते पक्षे पौषे बुधहितमिदं शास्त्रमनघम् ॥' इत्युक्ते मुञ्जमहीपतिराज्यसमये च स्वल्पमेवान्तरमस्ति, तस्मादस्ति वाक्पतिराज इति मुञ्जस्य नामान्तरमिति भाति. मुञ्जो भोजस्य पितृव्य आसीदिति भोजप्रबन्धोक्तिस्तु प्रमाणान्तराभावान्नातिश्रद्धेया. वाक्पतिराजसमये उज्जयिन्येव राजधान्यासीदित्यस्माद्दानपत्रात्, 'अस्ति क्षितावुज्जयिनीति नाम्ना पुरी विहायस्यमरावतीव । बबन्ध यस्यां पदमिन्द्रकल्पो महीपतिर्वाक्पतिराजदेवः ॥' इत्यस्मात्परिमलकविप्रणीतनवसाहसाङ्कचरितकाव्य(१।१७)श्लोकाच्च प्रतीयते. धारानगरी तु भोजदेवेनैव राजधानीत्वं नीता. 'कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः । जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम् ॥' (४।१४४) इति राजतरङ्गिण्यां वर्णितो गौडवधाख्यप्राकृतकाव्यकर्ता श्रीकमलायुधशिष्यः कान्यकुब्जाधीशयशोवर्मनरेन्द्राश्रितो वाक्पतिराजकविः खिस्ताब्दसप्तमशतकोत्तरार्धसमुद्भूत इत्यस्माद्भिन्नः. ३. 'यथा' इत्यारभ्य 'लक्षिताभिः' एतावत्पर्यन्तमनन्वित इवायं लेखः.

अगारवाहला मर्यादा, तथोत्तरस्यां दिशि चिखिल्लिकासत्कगर्तायासमायता मर्यादा, तथा पश्चिमदिशि गर्दभनदीमर्यादा, तथा दक्षिणस्यां दिशि श्रीपिशाचदेवतीर्थमर्यादा, एवं चतुराघाटोपलक्षिताभिरेकत्रिंशसाहस्रिकसंवत्सरेऽस्मिन् भाद्रपदशुक्लचतुर्दश्यां पवित्रकपर्वणि श्रीमदुज्जयिनीसमावासितैः शिवतडागाम्भसि स्नात्वा चराचरगुरुं भगवन्तं भवानीपतिमभ्यर्च्य संसारस्यासारतां दृष्ट्वा

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
　　मापातमात्रमधुरो विषयोपभोगः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
　　धर्मः सखा परमहो परलोकयाने ॥
भ्रमत्संसारचक्राग्रधाराधारामिमां श्रियम् ।
प्राप्य ये न ददुस्तेषां पश्चात्तापः परं फलम् ॥'

इति जगतो विनश्वरं सकलमिदमाकलय्य उपरिलिखिततडारः स्वसीमतृणकाष्ठयूतिगोचरपर्यन्तः सवृक्षमालाकुलः सहिरण्यभागभोगः सोपरिकरः सर्वादायसमेतः अहिच्छत्रविनिर्गताय धामदक्षिणप्रपन्नाय ज्ञानविज्ञानसंपन्नाय श्रीमद्वसन्ताचार्याय श्रीधनिकपण्डितसूनवे मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये अदृष्टफलमङ्गीकृत्य आचन्द्रार्कार्णवक्षितिसमकालं परया भक्त्या शासनेनोदकपूर्वं प्रतिपादित इति मत्वा तन्निवासिजनपदैर्यथादीयमानभागभोगकरहिरण्यादिकं सर्वमाज्ञाश्रवणविधेयैर्भूत्वा सर्वदास्मै समुपनेतव्यम् । सामान्यं चैतत्पुण्यफलं बुद्ध्वास्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मादायोऽयमनुमन्तव्यः पालनीयश्च । उक्तं च—

'बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
अस्मत्कुलक्रममुदारमुदाहरद्भि-
　　रन्यैश्च दानमिदमभ्यनुमोदनीयम् ।

---

१. दशरूपावलोककर्ता अयमेव धनिकपण्डितः स्यादिति भाति.

लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयशःपरिपालनं च ॥
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयोभूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः ॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥'

इति ॥ सं० १०३१ भाद्रपदसुदि १४ स्वयमाज्ञादायकश्चात्र श्रीकण्हपैकः । स्वहस्तोऽयं[1] श्रीवाकपतिराजदेवस्य ॥

(इण्डियन् आण्टिक्वेरी ६ । ५१-५२)

---

(२)

धारानगराधिपतेः सुप्रसिद्धस्य भोजनरेन्द्रस्य दानपत्रम् ।

जयति व्योमकेशोऽसौ यः सर्गाय बिभर्ति ताम् ।
ऐन्दवीं शिरसा लेखां जगद्बीजाङ्कुराकृतिम् ॥
तन्वन्तु वः स्मरारातेः कल्याणमनिशं जटाः ।
कल्पान्तसमयोद्दामतडिद्वलयपिङ्गलाः ॥

परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीसीयकदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवाक्पतिराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्री[2]सिन्धुराजदेवपादानुध्यातपरमभट्टारकम-

---

१. हस्ताक्षराणि वाकपतिराजदेवस्येति तात्पर्यम्. २. सिन्धुराजपर्यन्तमप्युज्जयिन्येव राजधान्यासीत्. 'अस्ति क्षितावुज्जयिनीति नाम्ना' इत्यादि प्रथमलेखटिप्पणलिखितश्लोकानन्तरं नवसाहसाङ्कचरिते चत्वारिंशच्छ्लोकैरुज्जयिनी वर्णिता. तदनन्तरम् 'राजास्ति तस्यां स कुलाचलेन्द्रनिकुञ्जविश्रान्तयशस्तरङ्गः । भास्वान्ग्रहाणामिव भूभृतीनामवाप्तसौख्यो धुरि सिन्धुराजः ॥ (१ । ५८)', 'दोश्चन्दनानोकहमाप्य यस्य समुल्लसत्सान्द्रयशःप्रसूना । गतातिवृद्धिं लवलीलतेव निबद्धमूला परमारलक्ष्मीः ॥ (१ । ७७)' इत्युज्जयिन्यामेव सिन्धुराजोऽपि वर्णितः. सिन्धुलः, सिन्धुलकः, इति नामद्वयेनापि क्वचित्सिन्धुराजनिर्देशः. नवसाहसाङ्कचरितं च परिमलेन सिन्धुराजसमय एव निर्मितम्.

हाराजाधिराजपरमेश्वरश्रीभोजदेवः कुशली नागहृदपश्चिमपथकान्तःपाति वीराणके समुपगतान्समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिनिवासिपट्टकिल[1]-जनपदादींश्च समादिशाति—अस्तु वः संविदितम्, यथा अतीताष्टसप्तत्यधिकसाहस्त्रिकसंवत्सरे माघासिततृतीयायां रवावुदगयनपर्वणि कल्पितहलानां लेख्ये श्रीमद्धारायाम[2]वस्थितैरस्माभिः स्नात्वा चराचरगुरुं भगवन्तं भवानीपतिं समभ्यर्च्य संसारस्यासारतां दृष्ट्वा

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने॥
भ्रमत्संसारचक्राग्रधाराधारामिमां श्रियम्।
प्राप्य ये न ददुस्तेषां पश्चात्तापः परं फलम्॥'

इति जगतो विनश्वरं स्वरूपमाकलय्य उपरिलिखितग्रामः स्वसीमातृणागोचरयूतिपर्यन्तः सहिरण्यभागभोगः सोपरिकरः सर्वादायसमेतः ब्राह्मणधनपतिभट्टाय भट्टगोविन्दसुताय बह्वृचाश्वलायनशाखाय त्रिप्रवराय वेल्लवल्लप्रतिबद्धश्रीवादाविनिर्गतराधसुरसङ्गकर्णाटाय मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये अदृष्टफलमङ्गीकृत्य आचन्द्रार्कार्णवक्षितिसमकालं यावत्परया भक्त्या शासनेनोदकपूर्वं प्रतिपादित इति मत्वा यथादीयमानभागभोगकरहिरण्यादिकमाज्ञाश्रवणविधेयैर्भूत्वा सर्वमस्मै समुपनेतव्यम्। सामान्यं चैतत्पुण्यफलं बुद्ध्वास्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मादायोऽयमनुमन्तव्यः पालनीयश्च। उक्तं च—

'बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत॥

१. अधुना येषां 'पटैल' इति नाम्ना व्यवहारः. २. धारानगर्याम्.

अस्मत्कुलक्रममुदारमुदाहरद्भि-
रन्यैश्च दानमिदमभ्यनुमोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयशःपरिपालनं च ॥
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयोभूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः ॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥'
इति ॥ संवत् १०७८ चैत्रसुदि १४ स्वयमाज्ञामङ्गलं महाश्रीः । स्वहस्तोऽयं श्रीभोजदेवस्य ॥

(इण्डियन् आण्टिक्वेरी ६ । ५३–५४)

(३)

धारानगराधिपतिसुप्रसिद्धभोजमहीपतेर्वंश्यस्यार्जुनवर्मदेवस्य दानपत्रम् ।

ॐ नमः पुरुषार्थचूडामणये धर्माय ।

प्रतिबिम्बनिभाद्भूमेः कृत्वा साक्षात्परिग्रहम् ।
जगदाह्लादयन्दिश्याद्द्विजेन्द्रो मङ्गलानि वः ॥
जीयात्परशुरामोऽसौ क्षत्रैः क्षुण्णं रणाहतैः ।
संध्यार्कबिम्बमेवोर्वीदातुर्यस्यैति ताम्रताम् ॥
येन मन्दोदरीबाष्पवारिभिः शमितो मृधे ।
प्राणेश्वरीवियोगाग्निः स रामः श्रेयसेऽस्तु वः ॥
भीमेनापि धृता मूर्ध्नि यत्पादाः स युधिष्ठिरः ।
वंशाद्येनेन्दुना जीयात्स्वतुल्य इव निर्मितः ॥

---

१. दानवीराणां परशुरामरामयुधिष्ठिराणां वर्णनं दानपत्रारम्भे समुचितमेव. प्रथमश्लोके च प्रतिग्रहीतुर्द्विजराजस्य वर्णनम्. २. ताम्रपत्रत्वम्. ३. शंभुना, वृकोदरेण च. ४. रश्मयश्चरणाश्च.

परमारकुलोत्तंसः कंसजिन्महिमा नृपः ।
श्रीभोजदेव इत्यासीन्नासीराक्रान्तभूतलः ॥
यद्यशश्चन्द्रिकोद्द्योते दिगुत्सङ्गतराङ्गिते ।
द्विषन्नृपयशःपुञ्जपुण्डरीकैर्निमीलितम् ॥
ततोऽभूदुदयादित्यो नित्योत्साहैककौतुकी ।
असाधारणवीरश्रीरश्रीहेतुविरोधिनाम् ॥
महाकलहकल्पान्ते यस्योद्दामभिराशुगैः ।
कति नोन्मूलितास्तुङ्गा भूभृतः कटकोल्बणाः ॥
तस्माच्छिन्नद्विषन्मर्मा नरवर्मा नराधिपः ।
धर्माभ्युद्धरणे धीमानभूत्सीमा महीभुजाम् ॥
प्रतिप्रभातं विप्रेभ्यो दत्तैर्ग्रामपदैः स्वयम् ।
अनेकपदतां निन्ये धर्मो येनैकपादपि ॥
तस्याजनि यशोवर्मा पुत्रः क्षत्रियशेखरः ।
तस्मादजयवर्माभूज्जयश्रीविश्रुतः सुतः ॥
तत्सूनुर्वीरमूर्धन्यो धन्योत्पत्तिरजायत ।
गुर्जरोच्छेदनिर्बन्धी विन्ध्यवर्मा महाभुजः ॥
धारयोद्धृतया सार्धं दधाति स्म त्रिधारताम् ।
सांयुगीनस्य यस्यासिस्त्रातुं लोकत्रयीमिव ॥
तस्यामुष्यायणः पुत्रः सुत्रामश्रीरथाशिषत् ।
भूपः सुभटवर्मेति धर्मे तिष्ठन्महीतलम् ॥
यस्य ज्वलति दिग्जेतुः प्रतापस्तपनद्युतेः ।
दावाग्निच्छद्मनाद्यापि गर्जन्गुर्जरपत्तने ॥

१. बाणैः, पवनैश्च. २. राजानः, पर्वताश्च. ३. सैन्यम्, नितम्बश्च. ४. धारया नगर्या उद्धृतया उन्नतिं नीतया. ५. धाराद्वयं खड्गस्य, तृतीया च धारानगरी. ६. ख्यातवंशोद्भवः.

देवभूयं गते तस्मिन्नन्दनोऽर्जुनभूपतिः ।
दोष्णा धत्तेऽधुना धात्रीवलयं वलयं यथा ॥
बाललीलाहवे यस्य जैयसिंहे पलायिते ।
दिक्पालहासव्याजेन यशो दिक्षु विजृम्भितम् ॥
काव्यगान्धर्वसर्वस्वनिधिना येन सांप्रतम् ।
भारावतरणं देव्याश्चक्रे पुस्तकवीणयोः ॥
येन त्रिविधवीरेण त्रिधा पल्लवितं यशः ।
धवलत्वं दधुस्त्रीणि जगन्ति कथमन्यथा ॥

स एष नरनायकः सर्वाभ्युदयी पगाराप्रतिजागरणके नर्मदातटकूले हथिणावरग्रामे पूर्वराजदत्तावशिष्टायां भूमौ समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिनिवासिपट्टकिलजनपदादींश्च बोधयति—अस्तु वः संविदितम्, यथा श्रीमदमरेश्वरतीर्थावस्थितैरस्माभिर्द्विसप्तत्यधिकद्वादशशतसंवत्सरे भाद्रपदपौर्णमास्यां चन्द्रोपरागपर्वणि रेवाकपिलयोः संगमे स्नात्वा भगवन्तं भवानीपतिमोंकारं लक्ष्मीपतिं चक्रस्वामिनं चाभ्यर्च्य संसारस्यासारतां दृष्ट्वा तथा हि—

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने ॥'

इति सर्वं विमृश्यादृष्टफलमङ्गीकृत्य मुक्तावस्थस्थानविनिर्गताय वाजसनेयशाखाध्यायिने काश्यपगोत्राय काश्यपावत्सारनैध्रुवेति त्रिप्रवराय आवस-

---

१. अनेनैवार्जुनभूपतिना रसिकसंजीवनीसमाख्या अमरुशतकटीका प्रणीतास्ति. 'क्षिप्ताशुभः सुभटवर्मनरेन्द्रसूनुर्वीरव्रती जगति भोजकुलप्रदीपः । प्रज्ञानवानमरुकस्य कवेः प्रसारःश्लोकाञ्शतं (?) विवृणुतेऽर्जुनवर्मदेवः ॥' अयं श्लोकस्तत्प्रारम्भे वर्तते. २. अयं गुजरातदेशाधिपतेः सिद्धराजजयसिंहादन्य एव कश्चिद्भाति. यतः सिद्धराजजयसिंहराज्यं ११९९ विक्रमसंवत्सरपर्यन्तमासीत्. एतद्दानपत्रं त्वस्मात्संवत्सरात्रिसप्ततिवर्षानन्तरं लिखितम्. ३. 'वीणापुस्तकधारिणीमभयदां' इत्यादि सरस्वत्या वीणापुस्तकधारणं प्रसिद्धमेव. ४. दयावीरेण, दानवीरेण, युद्धवीरेण च.

थिकदेल्हपौत्राय पण्डितसोमदेवपौत्राय पण्डितजैत्रसिंहपुत्राय पुरोहितप-ण्डितश्रीगोविन्दशर्मणे ब्राह्मणाय भूमिरियं चतुःकण्टकविशुद्धा सवृक्षमाला-कुला सहिरण्यभागभोगा सोपरिकरघट्टादायलवणादायेत्यादिसर्वादायम-मेता सनिधिनिक्षेपा मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये चन्द्रार्का-र्णवक्षितिसमकालं यावत्परया भक्त्या शासनेनोदकपूर्वं प्रदत्ता। तन्मत्वा तन्निवासिपट्टकिलजनपदैर्यथादीयमानभागभोगकरहिरण्यादिकमाज्ञाविधे-यैर्भूत्वा सर्वममुष्मै दातव्यम्। सामान्यं चैतत्पुण्यफलं बुद्धास्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मादायोऽयमनुमन्तव्यः पालनीयश्च। उक्तं च—

'बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
स विष्टायां कृमिर्भूत्वा पितृभिः सह मज्जति॥
सर्वानेवं भाविनः पार्थिवेन्द्रान्भूयोभूयो याचते रामभद्रः।
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः॥'

इति॥ संवत् १२७२ भाद्रपदसुदि १५ बुधे। दू। श्रीमु ३। रचित-मिदं महासांधि० राजासल्खणसंमतेन राजगुरुणा मदनेन। स्वहस्तोऽयं महाराजश्रीअर्जुनवर्मदेवस्य। उत्कीर्णं प० बाप्पदेवेन॥

(अमेरिकन् ओरिएण्टल् सोसायटीज जर्नल ७ भागे)

(४)

श्रीमदकालवर्षदेवसूनोः श्रीध्रुवराजदेवस्य दानपत्रम्।

ॐ स्वस्ति।

स वोऽव्याद्वेधसा धाम यन्नाभिकमलं कृतम्।
हरश्च यस्य कान्तेन्दुकलया कमलंकृतम्॥

१. वेधसा ब्रह्मणा यन्नाभिकमलं धाम कृतं सः, अर्थाद्विष्णुः, वोऽव्यात् युष्मान् रक्षतु. हरः शिवश्च वोऽव्यात्. यस्य कान्तेन्दुकलया कं शिरः अलंकृतं भूषितम्.

आसीद्द्विषत्तिमिरमुद्यतमण्डलाग्रो
ध्वस्तिं नयन्नभिमुखो रणशर्वरीषु ।
भूपः शुचिर्विधुरिवास्तदिगन्तकीर्ति-
र्गोविन्दराज इति राजसु राजसिंहः ॥
दृष्ट्वा चमूमभिमुखीं सुभटाट्टहासा-
मुन्नामितं सपदि येन रणेषु नित्यम् ।
दष्टाधरेण दधता भ्रुकुटीं ललाटे
खड्गं कुलं च हृदयं च निजं च सत्त्वम् ॥
खड्गं कराग्रान्मुखतश्च शोभा मानो मनस्तः सममेव यस्य ।
महाहवे नाम निशम्य सद्यस्त्रयं रिपूणां विगलत्यकाण्डे ॥
तस्यात्मजो जगति विश्रुतशुभ्रकीर्ति-
रार्तार्त्तिहारिहरिविक्रमनामधारी ।
भूपस्त्रिविष्टपनृपानुकृतिः कृतज्ञः
श्रीकर्कराज इति गोत्रमणिर्बभूव ॥
तस्य प्रभिन्नकरटच्युतदानदन्ति-
दन्तप्रहाररुचिरोल्लिखितांसपीठः ।
क्ष्मापः क्षितौ क्षपितशत्रुरभूत्तनूजः
सद्राष्ट्रकूटकनकाद्रिरिवेन्द्रराजः ॥
तस्योपार्जितमहसस्तनयश्चतुरुदधिवलयमालिन्याः ।
भोक्ता भुवः शतक्रतुसदृशः **श्रीदन्तिदुर्गराजो**ऽभूत् ॥
काञ्चीशकेरलनराधिपचोलपाण्ड्य-
श्रीहर्षवज्रटविभेदविधानदक्षम् ।
कर्णाटकं बलमचिन्त्यमजेयमन्यै-
र्भृत्यैः कियद्भिरपि यः सहसा जिगाय ॥
आ सेतोर्विपुलोपलावलिलसल्लोलोर्मिमालाजला-
दा प्रालेयकलङ्कितामलशिलाजालात्तुषाराचलात् ।

---

१. मण्डलाग्रः खड्गः; (पक्षे) बिम्बाग्रभागः.

आ पूर्वापरवारिराशिपुलिनप्रान्तप्रसिद्धावधे-
येनेयं जगती स्वविक्रमबलेनैकातपत्रीकृता ॥

तस्मिन्दिवं प्रयाते वल्लभराजे[1]ऽकृतप्रजाबाधः।
श्रीकक्कराजसूनुर्महीपतिः **कृष्णराजो**ऽभूत् ॥

यस्य स्वभुजपराक्रमनिःशेषोत्सादितारिदिक्चक्रम्।
कृष्णस्येवाकृष्णं चरितं श्रीकृष्णराजस्य ॥

शुभतुङ्गतुङ्गतुरगप्रवृद्धरेणूर्ध्वरुद्धरविकिरणम्[2]।
ग्रीष्मेऽपि नभो निखिलं प्रावृट्कालायते स्पष्टम् ॥

राहप्पमात्मभुजजातबलावलेप-[3]
माजौ विजित्य निशितासिलताप्रहारैः।
पालिध्वजावलिशुभामचिरेण यो हि
राजाधिराजपरमेश्वरतां ततान ॥

पाता यश्चतुरम्बुराशिरशनालंकारभाजो भुव-
स्त्रय्याश्चापि कृतद्विजामरगुरुप्राज्याज्यपूजादरः।
दाता मानभृदग्रणीर्गुणवतां योऽसौ श्रियो वल्लभो
भोक्तुं स्वर्गफलानि भूरितपसा स्थानं जगामामरम् ॥

येन श्वेतातपत्रप्रहतरविकरव्रातताषात्सलीलं
जग्मे नासीरधूलीधवलितशिरसा वल्लभाख्यः[4] सदाजौ।
श्रीमद्गोविन्दराजो जितजगदहितस्त्रैणवैधव्यदक्ष-
स्तस्यासीत्सूनुरेकः क्षणरणदलितारातिमत्तेभकुम्भः ॥

तस्यानुजः **श्रीध्रुवराजनामा** महानुभावोऽप्रहतप्रतापः।
प्रसाधिताशेषनरेन्द्रचक्रः क्रमेण बालार्कवपुर्बभूव ॥

---

१. वल्लभराज इति दन्तिदुर्गस्य नामान्तरम्. २. शुभतुङ्ग इति कृष्णराजस्य नामान्तरम्. ३. राहप्पो नाम कश्चिन्महीपतिरासीत्. स च कुत्रत्य इत्यधुनापि न ज्ञायत इति स्वकीये दक्षिणेतिहासे भाण्डारकरोपाह्वपण्डितवरश्रीरामकृष्णशर्माणः. ४. वल्लभ इति गोविन्दराजस्य नामान्तरम्.

जाते यत्र च राष्ट्रकूटतिलके सद्भूपचूडामणौ
गुर्वी तुष्टिरथाखिलस्य जगतः सुस्वामिनि प्रत्यहम् ।
सत्यं सत्यमिति प्रशासति सति क्ष्मामासमुद्रान्तिका-
मासीद्धर्मपरे गुणामृतनिधौ सत्यव्रताधिष्ठिते ॥
रक्षता येन निःशेषं चतुरम्भोधिसंयुतम् ।
राज्यं धर्मेण लोकानां कृता तुष्टिः परा हृदि ॥
तस्यात्मजो जगति सत्प्रथितोरुकीर्ति-
गोविन्दराज इति गोत्रललामभूतः ।
त्यागी पराक्रमधनः प्रकटप्रताप-
संतापिताहितजनो जनवल्लभोऽभूत् ॥
पृथ्वीवल्लभ इति च प्रथितं यस्यापरं जगति नाम ।
यश्चतुरुदधिसीमामेको वसुधां वशे चक्रे ॥
एकोऽनेकनरेन्द्रवृन्दसहितान्यस्तान्समस्तानपि
प्रोत्खातासिलताप्रहारविधुरान्बद्ध्वा महासंयुगे ।
लक्ष्मीमप्यचलां चकार विलसत्सच्चामरग्राहिणीं
संसीदद्गुरुविप्रसज्जनसुहृद्बन्धूपभोग्यां भुवि ॥
तत्पुत्रोऽत्र गते नाकमाकम्पितरिपुव्रजे ।
श्रीमहाराजशर्वा[3]ख्यः ख्यातो राजाभवद्गुणैः ॥
अर्थिषु यथार्थतां यः समभीष्टफलाप्तिलब्धतोषेषु ।
वृद्धिं निनाय परमाममोघवर्षाभिधानस्य ॥
राजाभूत्तत्पितृव्यो रिपुभवविभवोद्भूत्यभावैकहेतु-
र्लक्ष्मीवानिन्द्रराजो गुणिनृपनिकरान्तश्चमत्कारकारी ।
रागादन्यान्व्युदस्य प्रकटितविषया यं नृपान्सेवमाना
राज्यश्रीरेव चक्रे सकलकविजनोद्गीततथ्यस्वभावम् ॥

१. ध्रुवराजस्य. २. छन्दोभङ्गदूषितोऽयं पाठः. 'यश्चतुरम्बुधिसीमा' इत्युचितः पाठः. ३. शर्वस्य वंशो दक्षिणदेशे राज्यं कृतवान्. तद्वर्णनं दक्षिणेतिहासे द्रष्टव्यम्. ४. अमोघवर्ष इति शर्वस्य नामान्तरम्. ५. अग्रे वर्ण्यमान इन्द्रराजवंशो गुर्जरातदेशे राज्यं लब्धवान्.

निर्वाणावाप्तिबाणामहितहितजना यस्य मानाः सुवृत्तं
वृत्तं जित्वान्यराज्ञां चरितमुदयवान्सर्वतोदिक्स केभ्यः।
एकाकी दृप्तवैरिस्खलनकृतिमहप्रातिराज्ये सशङ्को
लाटीयं मण्डलं यस्तपन इव निजस्वामिदत्तं ररक्ष॥

सूनुर्बभूव खलु तस्य महानुभावः
शास्त्रार्थबोधसुखलालितचित्तवृत्तिः।
यो गौणनामपरिवारमुवाह पूर्वं
श्रीकक्कराजसुभगव्यपदेशमुच्चैः॥

श्रीकक्कराज इति रक्षितराज्यभारः
मारं कुलस्य तनयो नयशालिशौर्यः।
तस्याभवद्विभवनन्दितबन्धुसार्थः
पार्थः सदैव धनुषि प्रथमः शुचीनाम्॥

दानेन मानेन सदाज्ञया वा वीर्येण शौर्येण च कोऽपि भूपः।
एतेन तुल्योऽस्ति नवेति कीर्तिः सकौतुका भ्राम्यति यस्य लोके॥

स्वेच्छागृहीतविषयान्दृढसंघभाजः
प्रोद्वृत्तदृप्ततरशुल्किकराष्ट्रकूटान्।
उत्खातखड्गनिजबाहुबलेन जित्वा
योऽमोघवर्ष इति राज्यपदे व्यधत्त॥

पुत्रीयतस्तस्य महानुभावः कृती कृतज्ञः कृतवीर्यवीर्यः।
वशीकृताशेषनरेन्द्रवृन्दो बभूव सूनुर्ध्रुवराजनामा॥

चन्द्रो जडो हिमगिरिः सहिमः प्रकृत्या
वातश्चलश्च तपनस्तपनस्वभावः।
क्षारः पयोधिरिति तैः सममस्य नास्ति
येनोपमा निरुपमस्तत एव गीतः॥

---

१ अस्फुटार्थोऽयं श्लोकः. २. कक्कराजस्य सूनुरपि कक्कराजनामेति संदिग्धम्. ३. अमोघवर्ष इति कक्कराजस्य नामान्तरम्. ४. निरुपम इति ध्रुवराजस्य नामान्तरम्.

रणशिरसि खड्गघातैर्वल्लभदण्डं पराङ्मुखीकृत्य ।
शस्त्रशतशुद्धदेहः स्वर्गमगादेक एवासौ ॥

तस्याशेषनराधिपहृतयशसः स्वर्गलोकगतकीर्तेः ।
श्रीमानकालवर्षस्तनयः समभूत्कुलालम्बः ॥

वल्लभदण्डाक्रान्तं विघटितदुष्टानुजीविवर्गेण ।
पितृपर्यागतमचिरान्मण्डलमध्यासितं येन ॥

प्रियवादी सत्यधनः श्रीमाननुजीविवत्सलो मानी ।
प्रतिपक्षक्षोभकरः शुभतुङ्गः शुभकरः सुहृदाम् ॥

तस्मिन्स्वर्गीभूते गुणवति गुणवान्गुणाधिकप्रीतिः ।
समभूद्ध्रुवराजसमो ध्रुवराजस्तुष्टिकल्लोके ॥

इतोऽभिमुखमापतत्प्रबलगूर्जराणां बल-
मितो विमुखवल्लभो विकृतिमागता बान्धवाः ।
इतोऽनुजविकुर्वितं शममगात्समस्तं भया-
दहो स्फुरणमद्भुतं निरुपमेन्द्र खड्गस्य ते ॥

गुर्जरबलमतिबलवत्समुद्यतं बृंहितं च कुल्येन ।
एकाकिनैव विहितं पराङ्मुखं लीलया येन ॥

यश्चाभिषिक्तमात्रः परं यशस्त्यागशौर्यतोऽवाप ।
शुभतुङ्गजोऽतितुङ्गः पदं यदाप्नोति नो चित्रम् ॥

यश्च स्वभुजबलार्जितमपीह राज्यं विभज्य भृत्यानाम् ।
भयमपि विद्वेषिजने धनं ददावर्थिने कामम् ॥

धारावर्षसमुन्नतिं गुरुतरामालोक्य लक्ष्म्या युतो
धामव्याप्तदिगन्तरोऽपि मिहिरः सद्दश्यवाहान्वितः ।
यातः सोऽपि शमं पराभवतमोव्याप्ताननः किं पुन-
र्येऽतीवामलतेजसा विरहिता हीनाश्च दीना भुवि ॥

१. शुभतुङ्ग इत्यकालवर्षस्य नामान्तरम्. २. निरुपम इति तृतीयध्रुवराजस्या नामान्तरम्. ३. धारावर्ष इत्यपि तृतीयध्रुवराजस्य नामान्तरम्.

यं प्राप्य विजितपूर्वजसकलगुणं पालितापि सगराद्यैः ।
प्रियनाथलाभतुष्टा वसुधापि सकामतामाप ॥
तेनेदमनिलविद्युच्चञ्चलमवलोक्य जीवितमसारम् ।
क्षितिदानपरमपुण्यः प्रवर्तितो धर्मदायोऽयम् ॥

स च समधिगताशेषमहाशब्दमहासामन्ताधिपतिधारावर्षश्रीध्रुवराजदेवः सर्वानेव यथासंबध्यमानान्राष्ट्रपतिविषयपतिग्रामकूटायुक्तनियुक्तकाधिकारिकवासापकमहत्तरादीन्समनुदर्शयति—अस्तु वः संविदितम् । यथा मया मातापित्रोरात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृद्धये

विप्रोऽभूद्भद्रपल्ल्यां बहुधनजनतासंकुलायां धरायां
ख्यातः श्रीढोड्डिनामा जनितजनसुखोऽध्वर्युसब्रह्मचारी ।
यस्मिन्नर्थिजना ददत्यविरतं प्राज्यं कृतान्नादिकं
निश्चिन्तोदरपूरणाः समभवन्दुर्भिक्षकालेष्वपि ॥
तन्नाम स लब्ध्वा ध्रुवराजदेवात्सत्रं ददौ सर्वजनोपकारि ।
दिने दिने यस्य गृहे नरेन्द्राः सहस्रशो भुञ्जते भूसुराश्च ॥

तस्य सुतः सत्रपतिर्नेनप्पनामा । तत्पुत्राय लाक्षायणसगोत्राय जोजिभाअभिधानाय कर्मान्तपुरप्रतिबद्धषोडशोत्तरग्रामशतान्तःपाती पाराहणकं ग्रामः । यस्याघाटनानि—पूर्वस्यां दिशि कुण्डीरवल्लिकानाम ग्रामः । दक्षिणतः तन्नाहारान्तःपाती खौराच्छकं नाम ग्रामः । तथा दक्षिणत एव जोणन्धानामग्रामः । पश्चिमतो मोत्तकाभिधानं ब्राह्मणस्थानम् । उत्तरतो मोड्डवासकं नाम ग्रामः । एवमयं चतुराघाटनोपलक्षितः सोद्रङ्गः सपरिकरः सवृक्षमालाकुलः ससीमापर्यन्तः सदण्डदशापराधः सोत्पद्यमानविष्टिकः सधान्यहिरण्यादेयोऽचाटभटप्रवेश्यः सर्वराजकीयानामहस्तप्रक्षेपणीयः भूमिच्छिद्रन्यायेन आचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनः पुत्रपौत्रान्वयक्रमोपभोग्यः पूर्वदत्तदेवदायब्रह्मदायरहितः अभ्यन्तरसिद्ध्या

१. अस्मिन्पद्ये स्रग्धराशार्दूलविक्रीडितच्छन्दोनिबद्धौ पूर्वोत्तरार्धौ. तेनेयमुपजातिः. नैतादृश्युपजातिः सत्कविभिः प्रयुज्यते. 'रामं लक्ष्मणपूर्वजं' इत्यादि पौराणिकश्लोकेषु क्वचिदुपलभ्यते.

शकनृपकालातीतसंवत्सरशतेषु सप्तस्वेकोननवत्यधिकेष्वङ्कतः ७८९ ज्येष्ठामावास्यायामादित्यग्रहणपर्वणि श्रीभृगुकच्छे नर्मदायां मूलस्थानतीर्थे स्नात्वा सत्रप्रवर्तनार्थं बलिचरुवैश्वदेवाग्निहोत्रादिक्रियोपसर्पणार्थं च उदकातिमर्गेण दत्तः । अतोऽस्योचितया ब्रह्मदायस्थित्या भुञ्जतो भोजयतः कृषतः कर्षापयतः प्रतिदिशतो वा न केनचित्परिपन्थना कार्या । तथागामिनृपतिभोगपतिभिरस्मद्वंश्यैरन्यैर्वा सामान्यभूदानफलमवेत्य विद्युल्लोलान्यनित्यान्यैश्वर्याणि तृणाग्रलग्नजलबिन्दुचञ्चलं च जीवितमाकलय्य स्वदायनिर्विशेषोऽयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्च । यश्चाज्ञानतिमिरपटलावृतमतिराच्छिन्द्यादाच्छिद्यमानं वानुमोदेत स पञ्चभिर्महापातकैरुपपातकैश्च संयुक्तः स्यादित्युक्तं भगवता वेदव्यासेन व्यासेन—

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये ॥

अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकत्रयं तेन भवेद्धि दत्तं यः काञ्चनं गां च महीं च दद्यात् ॥

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥

स्वदत्तां परदत्तां वा यत्नाद्रक्ष नराधिप ।
महीं महिमतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥
नायमत्यन्तसंवासः कस्यचित्केनचित्सह ।
अस्ति स्वेन शरीरेण किमुतान्यैः पृथग्जनैः ॥
प्राणेन धार्यते कायः स च प्राणः समीरणात् ।
समीरश्चातिचपलः कृतमप्यायुरद्भुतम् ॥

समस्तलोकैकनाथस्य विष्णोरपि महात्मनः।
नेयं नियतवासा श्रीः किमुतान्यस्य कस्यचित् ॥
सामान्योऽयं धर्मसेतुः सर्वेषामिह भूभुजाम्।
यतोऽतः पालनीयोऽयं काले काले महात्मभिः ॥
कोटिश्च वाजपेयानां लक्षं विश्वजितां तथा।
सहस्रमश्वमेधानां स्वहस्तश्चैव तत्समम् ॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च।
अतिविमलमनोभिरात्मनीनैर्नहि पुरुषैः परकीर्तयो विलोप्याः ॥
श्रीमच्छुभतुङ्गसुतो धारावर्षानुजो रणे येन।
निर्जित्य वैरिवर्गं राज्यं विहितं स्थिरं भ्रातुः ॥
भस्मीकृत्यारिसेनां हयगजबहुलामप्यसंतुष्टभावो
ब्रह्माण्डं व्याप्तुकामः पृथुचटुलशिखाभासुरः क्रोधवह्निः।
दृष्टः पद्मासनाद्यैर्गगनतलगतैर्यस्य गीर्वाणवृन्दैः
श्रीमद्गोविन्दराजो निरुपमविहितः शासने दूतकोऽत्र ॥
लिखितं चेदं सांधिविग्रहिकश्रीकल्याणेनेति। स्वहस्तोऽयं मम श्रीध्रुवराजदेवस्य श्रीमदकालवर्षदेवसूनोः ॥

(इण्डिअन् आण्टिक्वेरी १२।१८१)

(९)

राष्ट्रकूटवंशोद्भवलाटदेशाधीश्वरकर्कराजमहीपतेर्दानपत्रम्।

स वोऽव्याद्वेधसा धाम यन्नाभिकमलं कृतम्।
हरश्च यस्य कान्तेन्दुकलया कमलंकृतम् ॥
स्वस्ति स्वकीयान्वयवंशकर्ता श्रीराष्ट्रकूटामलवंशजन्मा।
प्रदानशूरः समरैकवीरो गोविन्दराजः[1] क्षितिपो बभूव ॥
यस्याङ्गमात्रजयिनः प्रियसाहसस्य
क्ष्मापालवेषफलमेव बभूव सैन्यम्।

---

१. अयं गोविन्दराजो दानकर्तुर्ध्रुवराजदेवस्यानुजः.

मुक्त्वा च शंकरमधीश्वरमीश्वराणां
नावन्दतान्यममरेष्वपि यो मनस्वी ॥
पुत्रीयतश्च खलु तस्य भवप्रसादा-
त्सूनुर्बभूव गुणराशिरुदारकीर्तिः ।
यो गौणनामपरिवारमुवाह मुख्यं
श्रीकर्कराजसुभगव्यपदेशमुच्चैः ॥
सौराज्यजल्पे पतिते प्रसङ्गान्निदर्शनं विश्वजनीनसंपत् ।
राज्यं बलेः पूर्वमहो बभूव क्षिताविदानीं तु नृपस्य यस्य ॥
अत्यद्भुतं चेदममंस्त लोकः कलिप्रसङ्गेन यदेकपादम् ।
जातं वृषं यः कृतवानिदानीं भूयश्चतुष्पादमविघ्नचारम् ॥
चित्रं न चेदं यदसौ यथावच्चक्रे प्रजापालनमेतदेव ।
विष्णौ जगत्त्राणपरे मनःस्थे तस्योचितं तन्मयमानसस्य ॥
धर्मात्मनस्तस्य नृपस्य जज्ञे सुतः सुधर्मा खलु कृष्णराजः ।
यो वंश्यमुन्मूल्य विमार्गभाजं राज्यं स्वयं गोत्रहिताय चक्रे ॥
ब्रह्मण्यता तस्य च कापि साभूद्विप्रा यया केवलजातयोऽपि ।
श्रेष्ठद्विजन्मोचितदानलुब्धाः कर्माण्यनूचानकृतानि चक्रुः ॥
इच्छातिरेकेण कृषीवलानां पयो यथा मुञ्चति जातु मेघे ।
भवेन्मनस्तद्विरतौ तथाभूद्यस्मिन्धनं वर्षति सेवकानाम् ॥
यो युद्धकण्डूतिगृहीतमुच्चैः शौर्योष्मसंदीपितमापतन्तम् ।
महावराहं हरिणीचकार प्राज्यप्रभावः खलु राजसिंहः ॥
एलापुराचलगताद्भुतसंनिवेशं
यद्वीक्ष्य विस्मितविमानचरामरेन्द्राः ।
एतत्स्वयंभु शिवधाम न कृत्रिमे श्री-
र्दृष्टेदृशीति सततं बहु चर्चयन्ति ॥

---

१. आत्मनः पुत्रमिच्छतः. २. अनूचानः साङ्गवेदविचक्षणः. ३. नृपविशेषम्. ४. दक्षिणहैदराबादराज्यान्तर्गतदौलताबादनगरसमीपे 'एलोरा' नाम्नाधुना प्रसिद्धोऽयमेलापुराचलः. तत्र चातिसुन्दराणि सुरमन्दिराणि पर्वतमुत्कीर्य निर्मितान्यद्यापि विद्यन्ते.

भूयस्तथाविधकृतौ व्यवसायहानि-
स्तन्मया कथमहो कृतमित्यकस्मात्।
कर्तापि यस्य खलु विस्मयमाप शिल्पी
तन्नामकीर्तनमकार्यत येन राज्ञा॥

गङ्गाप्रवाहहिमदीधितिकालकूटै-
रत्यद्भुताभरणकैः कृतमण्डनोऽपि।
माणिक्यकाञ्चनपुरःसरसर्वभूत्या
तत्र स्थितः पुनरभूष्यत येन शंभुः॥

नृपस्य तस्य ध्रुवराजनामा महानुभावस्तनयो बभूव।
तृणीकृतान्यस्य पराक्रमेण प्रतापवह्निर्द्विषतो ददाह॥

लक्ष्मीप्रसाधनविधावुपयोगि कृत्यं
यश्चिन्तयन्स्वयमभूदनिशं कृतार्थः।
किं वात्र चित्रमनपेक्ष्य सहायमीशः
सर्वः पुमान्निजवधूं स्ववशां विधातुम्॥

यो गङ्गायमुने तरङ्गसुभगे गृह्णन्परेभ्यः समं
साक्षाच्चिह्ननिभेन चोत्तमपदं तत्प्राप्तवानैश्वरम्।
देहासंमितवैभवैरिव गुणैर्यस्य भ्रमद्भिर्दिशो
व्याप्तास्तस्य बभूव कीर्तिपुरुषो **गोविन्दराजः** सुतः॥

प्रदेशवृत्तिव्यवसायभाजं पुरातनानामपि पार्थिवानाम्।
यशांसि यो नाम जहार भूपो भग्नप्रचण्डाखिलवैरिवीरः॥
उन्मूलितोत्तुङ्गनरेन्द्रवंशो महानरेन्द्रीकृततुच्छभृत्यः।
स्वेच्छाविधायी चरितानुकारं चकार यो नाम विधेः क्षितीशः॥

हिञ्जीरशिञ्जितरणच्चरणानराती-
न्कुर्वन्क्षणेन विदधेऽद्भुतकर्म यश्च।

---

१. यस्य पराक्रमेण तुच्छीकृतान्; (पक्षे) तृणत्वं प्रापितान्. २. समर्थः. ३. हिञ्जीरो लोहशृङ्खला. निगड इति यावत्.

चक्रे तथाहि न तथाशु वधं परेषां
पार्थोऽपि नाम भुवनत्रितयैकवीरः ॥
कल्पक्षयक्षणसमुद्धतवातहेला-
दोलायमानकुलशैलकुलानुकारम् ।
यन्मुक्तचण्डशरजालजवप्रणुन्ना
युद्धागता रिपुगजेन्द्रघटा चकार ॥
भ्राता तु तस्येन्द्रसमानवीर्यः श्रीमान्भुवि क्ष्मापतिरिन्द्रराजः ।
शास्ता बभूवाद्भुतकीर्तिमूर्तिस्तद्दत्तलाटेश्वरमण्डलस्य ॥
अद्यापि यस्य सुरकिंनरसिद्धसाध्य-
विद्याधराधिपतयो गुणपक्षपातात् ।
गायन्ति कुन्दकुसुमश्रि यशो यथास्वं
धामस्थिताः सहचरीकुचदत्तहस्ताः ॥
येनैकेन च गुर्जरेश्वरपतिर्योद्धुं समभ्यागतः
शौर्यप्रोद्भटकंधरो मृग इव क्षिप्रं दिशो ग्राहितः ।
भीतासंहतदक्षिणापथमहासामन्तचक्रं यतो
रक्षामाप विलुण्ठ्यमानविभवं श्रीवल्लभेनादरात् ॥
तस्यात्मजः प्रथितविक्रमवैरिवर्ग-
लक्ष्मीहठाहरणसंततलब्धकीर्तिः ।
श्रीकर्कराज इति संश्रितपूरिताशः
शास्त्रार्थबोधपरिपालितसर्वलोकः ॥
राज्ये यस्य न तस्करस्य वसतिर्व्याधेः प्रसूतिर्मृता
दुर्भिक्षं न च विभ्रमस्य महिमा नैवोपसर्गोद्भवः ।
क्षीणो दोषगणः प्रतापविनतोऽशेषोऽरिवर्गस्तथा
नो विद्वत्परिपन्थिनी प्रभवति क्रूरा खलानां मतिः ॥
गौडेन्द्रवङ्गपतिनिर्जयदुर्विदग्ध-
सद्गूर्जरेश्वरदिगर्गलतां च यस्य ।

नीत्वा भुजं विहतमालवरक्षणार्थं
स्वामी तथान्यमपि राज्यफलानि भुङ्क्ते ॥

तेनेदं विद्युच्चञ्चलमालोक्य जीवितं क्षितिदानं च परमपुण्यं प्रवर्तितोऽयं धर्मदायः । स च लाटेश्वरः समधिगताशेषमहाशब्दमहासामन्ताधिपतिसुवर्णवर्षश्रीकर्कराजदेवो यथासंबध्यमानकान्राष्ट्रपतिविषयपतिग्रामकूटाधिकारिकमहत्तरादीन्समनुबोधयति—अस्तु वः संविदितम्—यथा मया सिद्धशमीसमावासितेन मातापित्रोरात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृद्धये श्रीवलभीविनिर्गततच्चातुर्विद्यसामान्यवात्स्यायनसगोत्रमाध्यंदिनसब्रह्मचारिब्राह्मणभानवे भट्टसोमादित्यपुत्राय आङ्कोट्टकचतुरशीत्यन्तर्गतवडपद्रकाभिधानग्रामः, यस्याघाटनानि—पूर्वतो जम्बूवाविकाग्रामः, तथा दक्षिणतो महामिनकाख्यं तडागम्, तथा पश्चिमतोऽङ्कोट्टकम्, तथोत्तरतो वग्घाच्छग्रामः, एवममौ चतुराघाटनोपलक्षितः सोद्रङ्गः सोपरिकरः सभूतवातप्रत्यायः सदण्डदशापराधः सोत्पद्यमानविष्टिकः सधान्यहिरण्यादेयः सर्वराजकीयानामहस्तप्रक्षेपणीयः आ चन्द्रार्कार्णवसरित्पर्वतसमकलीनः पुत्रपौत्रान्वयभोग्यः पूर्वप्रदत्तदेवदायब्रह्मदायरहितो भूमिच्छिद्रन्यायेन शकनृपकालातीतसंवत्सरशतेषु सप्तसु चतुस्त्रिंशदधिकेषु महावैशाख्यां स्नात्वोदकातिसर्गेण बलिचरुवैश्वदेवाग्निहोत्रातिथिपञ्चमहायज्ञक्रतुक्रियाद्युत्सर्पणार्थं प्रतिपादितः । अतोऽस्योचितया ब्रह्मदायस्थित्या भुञ्जतो भोजयतः प्रतिदिशतो वा कृषतः कर्षयतश्च न केनचित्परिपन्थना कार्या । तथागामिभिरस्मद्वंश्यैरन्यैर्वा सामान्यं भूमिदानमवगच्छद्भिर्विद्युल्लोलान्यनित्यान्यैश्वर्याणि तृणाग्रलग्नजलबिन्दुचञ्चलं च जीवितमाकलय्य स्वदायनिर्विशेषोऽयमस्मद्दायोऽनुमन्तव्यः पालनीयश्च । यश्चाज्ञानातिमिरपटलावृतमतिराच्छिद्यादाच्छिद्यमानं चानुमोदेत स पञ्चभिर्महापातकैरुपपातकैश्च युक्तः स्यादिति । उक्तं च भगवता वेदव्यासेन व्यासेन—

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदायापहारिणः ॥
अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकत्रयं तेन भवेच्च दत्तं यः काञ्चनं गां च महीं च दद्यात् ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष नराधिप ।
महीं महीभृतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
अतिविमलमनोभिरात्मनीनैर्नहि पुरुषैः परकीर्तयो विलोप्याः ॥

उक्तं च भगवता रामभद्रेण—

सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥

दूतकश्चात्र राजपुत्रश्रीदन्तिवर्मा । स्वहस्तोऽयं मम श्रीकक्कराजस्य श्रीमदिन्द्रराजसुतस्य । लिखितं चैतन्मया महासंधिविग्रहाधिकृतकुलपुत्रकदुर्गभटसूनुना नेमादित्येनेति । अयं च ग्रामोऽतीतनरपतिपरीक्षणाङ्कोट्टकश्रीचातुर्विद्याय दत्तोऽभूत् । तेनापि कुराजजनितविलोपविच्छिन्नपरिभोगं विज्ञानवर्मान्यस्य वा विशिष्टस्य कस्यचिद्भवतु द्विजन्मन इति निश्चित्य सुवर्णवर्षदीयमानं वटपुरवासिने भानुभट्टायानुमोदितः । शालाताप्यं गृहीत्वा तालावारिकादिगणं चोद्दिश्य ताम्बूलप्रदानपूर्वकं यथालोभसेवनं चाभाष्य आदिश्य प्राक्तातिकमपि पुरामिति । तथा त्रियागेश्वरपरमाधीशपादमूलं जानातीति ॥

(इण्डियन् आण्टिकेरी १२ । १५८–१६२)

---

१ इत उत्तरमस्फुटार्थोऽयं लेखः.

(६)

राष्ट्रकूटवंशोद्भवस्य चतुर्थगोविन्दनृपतेर्दानपत्रम्।

ओम् ॥

जयन्ति ब्रह्मणः सर्गनिष्पत्तिमुदितात्मनः।
सरस्वतीकृतानन्दा मधुराः सामगीतयः ॥

तारचक्राब्जषण्डावृतगगनसरःपद्मिनीराजहंसा-
त्त्रैलोक्यैकाधिपत्यस्थितमदनमहाराजशुभ्रातपत्रात्।
लावण्यक्षीरसिन्धोर्द्युतिरजतगिरेर्दिग्वधूदन्तपत्रा-
द्वंशः सोमादयं यस्त्रिभुवनकमलावाससौधार्द्रुपेतः ॥

तस्माच्छ्रियः कुलगृहं भवनं महिम्नः
क्रीडास्पदं स्थितिमहर्द्धिगभीरतानाम्।
आपन्नसत्त्वपरिपालनलब्धकीर्ति-
र्वंशो बभूव भुवि सिन्धुनिभो यदूनाम् ॥

परिणतपरमण्डलः कलावान्प्रविततबहलयशोंशुपूरिताशः।
शशधर इव दन्तिदुर्गराजो यदुकुलविमलवियत्यथोदियाय ॥

तस्याद्यं नृपतेः पितृव्यमुदयी श्रीवीरसिंहासनं
मेरोः शृङ्गमिवाधिरुह्य रविवच्छ्रीकृष्णराजस्ततः।
ध्वस्तोद्रिक्तचलुक्यवंशतिमिरः पृथ्वीभृतां मस्तके
न्यस्ताङ्घ्रिः सकलं जगत्प्रविततैस्तेजोभिराक्रान्तवान् ॥

तस्माद्गोविन्दराजोऽभूदिन्दुबिम्बशिलातले।
यस्यारिलोपधूम्रोऽङ्कः प्रशस्तिरिव लक्ष्यते ॥

तस्याभवद्भुवनपालनवीरबुद्धि-
रुद्धूतशत्रुकुलसंततिरिद्धतेजाः।
राजानुजो निरुपमापरनामधेयो
यन्मुद्रयाम्बुधिरपि प्रथितः समुद्रः ॥

---

१ 'उदीतः' इति माधोयान्पाठः.

तदनु जगत्तुङ्गोऽजनि परिहृतनिजसकलमण्डलाभोगः ।
गतयौवनवनिताजनकुचसदृशा यस्य वैरिनृपाः ॥

तस्माच्चामोघवर्षोऽभवदतुलबलो येन कोपादपूर्व-
श्चालुक्याभ्यूषखाद्यैर्जनितरतियमः प्रीणितो विङ्गवल्ल्याम् ।
वैरिब्रह्माण्डोदरान्तर्बहिरुपरि तले यत्र लब्धावकाशं
तोयव्याजाद्विशुद्धं यश इव निहितं तज्जगत्तुङ्गसिन्धौ ॥

तस्मादकालवर्षो नृपतिरभूद्यत्पराक्रमत्रस्तैः ।
सद्यः समण्डलाग्रं खेटकमहितैः परित्यक्तम् ॥

सहस्रार्जुनवंशस्य भूषणं कोक्कलात्मजा ।
तस्याभवन्महादेवी जगत्तुङ्गस्ततोऽजनि ॥

गम्भीराद्रत्ननिधेर्भूभृत्प्रतिपक्षरक्षणक्षमतः ।
कोक्कलसुतरणविग्रहजलधेर्लक्ष्मीः समुत्पन्ना ॥

सा जायाजायताजातशत्रोस्तस्य महीभुजः ।
भीमसेनार्जुनोपात्तयशोभूषणशालिनः ॥

तत्र जगत्तुङ्गोदयधरणीधरतः प्रतापकलितात्मा ।
लक्ष्म्या नन्दन उदितोऽजनि विजयी राजमार्तण्डः ॥

स्थितिचालितसकलभूभृत्पक्षच्छेदाभिमुक्तभुजवज्रः ।
अनिमिषदर्शनयोग्यो यः सत्यमिहेन्द्रराज इति ॥

१ चालुक्या एव अभ्यूषखाद्याः 'पोलो' इति ख्याता भक्ष्यविशेषास्तैर्जनिता रतिः प्रीतिर्यस्य तादृशो यम इत्यर्थः. 'आपक्वं पौलिरभ्यूषः' इत्यमरः. वात्स्यायनीयकामसूत्रटीकाकारो यशोधरस्तु 'अभ्यूषखादिका, विटपस्थानामसां ग्रोथितानां फलानां खादनं यत्र' इति व्याख्यातवान्. इण्डियन् आंण्टिक्केरीमध्ये एतल्लेखप्रकाशकः क्लीटपण्डितस्तु 'चालुक्य-अभ्यूषख-आदैर्' इति पदच्छेदं विधाय भाषान्तरे 'Chalukyas, Abhyúshakhas and others' इत्याद्युक्तवान्. २. मण्डलाग्रः खड्गो मण्डलं देशश्च. ३. खेटकं चर्म, मान्यखेटनाम्ना प्रसिद्धा राष्ट्रकूटमहीपतीनां राजधानी च. ४. 'नदीनां मेकलसुता नृपाणां रणविग्रहः । कवीनां च सुरानन्दश्चेदिमण्डलमण्डनम् ॥' इति राजशेखरकविना वर्णितो रणविग्रहोऽप्ययमेव स्यात्.

यस्तस्मिन्दशकण्ठदर्पदलने श्रीहैहयानां कुले
कोक्कल्लः प्रतिपादितोऽस्य च गुणज्येष्ठोऽर्जुनोऽभूत्सुतः।
तत्पुत्रोऽम्मणदेव इत्यतिबलस्तस्माद्विजाम्बाभव-
त्पद्मेवाम्बुनिधेरुमेव हिमवन्नाम्नः क्षमाभृत्प्रभोः॥
श्रीन्द्रनरेन्द्रात्तस्यां सूनुरभूद्भूपतिर्द्विजाम्बायाम्।
गोविन्दराजनामा कामाधिकरूपसौन्दर्यः॥
सामर्थ्ये सति निन्दिता प्रविहिता नैवाग्रजे क्रूरता
बन्धुस्त्रीगमनादिभिः कुचरितैरावर्जितं नायशः।
शौचाशौचपराङ्मुखं न च भिया पैशाच्यमङ्गीकृतं
त्यागेनासमसाहसैश्च भुवने यः साहसाङ्कोऽभवत्॥
वर्षन्सुवर्णवर्षः प्रभूतवर्षोऽपि कनकधाराभिः।
जगदखिलमेककाञ्चनमयमकरोदिति जनैरुक्तः॥
यदभिदिग्विजयावसरे सति प्रसभसंभ्रमभावनयेव भूः।
सपदि नृत्यति पालिमहाध्वजोच्छ्रितकरान्यकुनाथविवर्जिता॥
सहते नहि मण्डलाधिपं परमेषोऽभ्युदयी समुद्धतम्।
इति जातभिया धियाग्रतो रविचन्द्रावपि यस्य धावतः॥
अवनतपरमण्डलेश्वरं सह विजयांशुभिवेश्म शोभितम्।
समहिमकरतोरणं चिरं निजतेजस्तति यस्य राजते॥
सहते समवाहिनीमयं न परेषां सविशेषशालिनीम्।
यदनिन्दितराजमन्दिरं ननु गङ्गा यमुना च सेवते॥
यस्मिन्राजनि सौराज्यं निर्जितारि वितन्वति।
विमानस्थितिरित्यासीन्न भोगेषु कदाचन॥
यस्योद्दामप्रतापानलबहलशिखाकज्जलं नीलमेघा
वि[1]स्फूर्जत्खड्गधारास्फुरणविसरणान्येव विद्युद्विलासाः।
दुर्वारारीभकुम्भस्थलदलनगलन्मौक्तिकान्येव तारा-
श्चन्द्रक्षीराब्धिशेषा भृतभुवनयशोराशिनिष्यन्दितानि॥

---

१. 'विस्फूर्जन्' इति 'इण्डियन् आण्टिक्केरी'मुद्रितः पाठः.

यस्मिन्कण्टकशोधनोत्सुकमनस्यम्भोजनालैर्भिये-
वोन्मग्नं न पयःसु कोशवसतिर्लक्ष्मीः कृतोपायनम् ।
केतक्या पवनोल्लसन्निजरजःपुञ्जान्धकारोदरे
भूगर्भे पनसेन वेत्रलतया ह्यात्मशुद्ध्यै स्थितम् ॥

यश्च समुपहसितहरनयनदहनो विहितानित्यकंदर्परूपसौन्दर्यदर्पः श्रीनित्यकंदर्पः प्रभुमन्त्रशक्त्युपबृंहितोत्साहशक्तिसमाक्षिप्तशातमन्युमुग्धचाणक्यचतुर्मुखः प्रथितैकविक्रमाक्रान्तवसुंधराहितकरणपरायणः श्रीविक्रान्तनारायणः स्वकरकलितहेतिहल्लदलितविपक्षवक्षःस्थलक्षेत्रः श्रीनृपतित्रिनेत्रः समभवत् । स च परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमन्नित्यवर्षदेवपादानुध्यातः परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमत्सुवर्णवर्षदेवपृथ्वीवल्लभश्रीमद्वल्लभनरेन्द्रदेवः कुशली सर्वानेव यथासंबध्यमानकान्राष्ट्रपतिविषयपतिग्रामकूटमहत्तरायुक्तकोपयुक्तकाधिकारिकानस्मादिशति—अस्तु वः संविदितम्—यथा मान्यखेटराजधानीस्थिरतरावस्थानेन मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये पूर्वक्लृप्तानपि देवभोगाग्रहारान्प्रतिपालयता प्रतिदिनं च निरवधिनमस्यग्रामशासनानि शतशः प्रयच्छता [मया] शकनृपकालातीतसंवत्सरशतेष्वष्टसु पञ्चपञ्चाशदधिकेष्वङ्कतोऽपि संवत्सराणां ८५५ प्रवर्तमानविजयसंवत्सरान्तर्गतश्रावणपौर्णमास्यां वारे गुरोः पूर्वाभद्रपदानक्षत्रे प्रथमकरोदकातिसर्गेण पुण्ड्रवर्धननगरविनिर्गतकौशिकगोत्रवाजिकाण्वसब्रह्मचारिदामोदरभट्टसुताय केशवदीक्षिताय रामपुरीसप्तशतान्तर्गतलोहग्रामः सवृक्षमालाकुलः सधान्यहिरण्यादेयः सदण्डदोषदशापराधः सभूतोपात्तप्रत्ययः अचाटभटप्रवेशः शतोत्तरीयो ब्रह्मदायन्यायेनाचन्द्रार्कं नमस्यो दत्तः । यस्य च आघाटाः पूर्वतः थोडेग्रामः, दक्षिणतः वञ्जुलीनामा ग्रामः, पश्चिमतः विश्वविहरञ्ज नामा ग्रामः, उत्तरतः सोन्नहीनामा ग्रामः । एवं चतुराघाटविशुद्धं लोहग्रामं केशवदीक्षितस्य कृषतः कर्षयतो भुञ्जतो भोजयतो वा न केनचिद्व्याघातः कार्यः । मन्दानिलान्दोलितजलतरङ्गतरलमैश्वर्यं शा-

१. दक्षिणहैदराबादराज्यान्तर्गतोऽधुना 'मालखेड'नाम्ना प्रसिद्धो ग्राम एव मान्यखेटः.

रदभ्रविभ्रमं जीवितं सामान्यं च भूमिदानफलमवगच्छद्भिरागामिनृपतिभिरस्मद्वंश्यैरन्यैर्वायमस्मद्धर्मदायः समनुमन्तव्यः प्रतिपालनीयश्च। उक्तं च रामभद्रेण—

'सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः।
सर्वानेवं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः॥'

षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥
स्वदत्तां परदत्तां वा यो हरेत्तु वसुंधराम्।
श्वविष्टायां कृमिर्भूत्वा पितृभिः सह पच्यते॥
प्रसूत्या संप्रदानेन दत्तस्याहरणेन च।
जन्मप्रभृति यद्दत्तं तत्सर्वं निष्फलं भवेत्॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
निवसेद्ब्रह्मणो लोके भूमिदानं ददाति यः॥

शिवमस्तु सर्वजगतः। ॐ नमः शिवाय॥

(इण्डियन् आण्टिक्वेरी १२। २४९-२५२)

(७)

चौलुक्यवंशोद्भवस्य लाटदेशाधिपतेस्त्रिलोचनपालस्य दानपत्रम्।

ॐ नमो विनायकाय। स्वस्ति जयोऽभ्युदयश्च।

बाणं वीणाक्षमाले कमलमहिमथो बीजपूरं त्रिशूलं
खट्वाङ्गं दानहस्ताभयकरसहिताः पाणयो धारयन्तः।
रक्षन्तु व्यञ्जयन्तः सकलरसमयं देवदेवस्य चित्तं
नो चेदेवं कथं वा त्रिभुवनमखिलं पालितं दानवेभ्यः॥
दधाति पद्मामथ चक्रकौस्तुभे गदामथो शङ्खमिहैव पङ्कजम्।
हरिः स पातु त्रिदशाधिपो भुवं रसेषु सर्वेषु निषण्णमानसः॥

---

१. अस्य लेखस्य प्रणेता पण्डितस्तत्त्वपरिणतकवित्व एव कश्चिदासीत्.

कमण्डलुं दण्डमथ स्रुचं विभुर्बिभर्ति मालां जपदत्तमानसः ।
सृजत्यजो लोकमपाहितुं रिपून्रसैश्च सर्वं रसितो विशेषतः ॥

कदाचिद्दैत्यखेदोत्थचिन्तामन्दग्मन्थनात् ।
विरिञ्चेश्चुलुकाम्भोधे राजरत्नं पुमानभूत् ॥

देव किं करवाणीति नत्वा प्राह तमेव सः ।
समादिष्टार्थसंसिद्धौ तुष्टः स्रष्टाब्रवीच्च तम् ॥

कन्याकुब्जे महाराज राष्ट्रकूटस्य कन्यकाम् ।
लब्ध्वा सुखाय तस्यां त्वं चौलुक्याप्नुहि संततिम् ॥

इत्थमत्र भवेत्क्षत्रसंततिर्विततता किल ।
चौलुक्यात्प्रथिता नद्याः स्रोतांसीव महीधरात् ॥

तत्रान्वये दयितकीर्तिरकीर्तिनारी
संस्पर्शभीत इव वर्जितवान्परस्य ।
वारप्पराज इति विश्रुतनामधेयो
राजा बभूव भुवि नाशितलोकशोकः ॥

श्रीलाटदेशमधिगम्य कृतानि येन
सत्यानि नीतिवचनानि मुदे जनानाम् ।
तत्रानुरज्य जनमाशु निहत्य शत्रू-
न्कोशस्य वृद्धिफलमाप निरन्तरं यः ॥

तस्माज्जातो विजयवसतिर्**गोङ्गिराजः** क्षितीशो
यस्मादन्ये मनुजपतयः शिक्षिता राजधर्मम् ।
यो गोत्रस्य प्रथमनिलयो पालको यः प्रजानां
यः शत्रूणाममितमहसां मूर्ध्नि पादं व्यधत्त ॥

आत्मभूरुद्धृता येन विष्णुनेव महीयसा ।
बलिभिः सा समाक्रान्ता दानवैरिव वैरिभिः ॥

---

१. 'पुरंदरेण प्रतिपाद्यमानमेवं समाकर्ण्य वचो विरिञ्चिः । संध्याम्बुपूर्णं चुलुकं मुमोच ध्यानानुविद्धानि विलोचनानि ॥' इत्युपक्रम्य 'अथाविरासीत्सुभटस्त्रिलोकत्रासप्रवीणश्चुलकाद्विधातुः' इत्यन्तं विक्रमाङ्कदेवचरितस्य प्रथमे सर्गे द्रष्टव्यम्. अस्फुटार्थाः श्लोकाश्चात्र कतिचन सन्ति.

प्रद्युम्नवन्मदनरूपधरोऽच्युतस्य
श्रीकीर्तिराजनृपतिः स बभूव तस्मात् ।
यो लाटभूपपदवीमधिगम्य चक्रे
धर्मेण कीर्तिधवलानि दिगन्तराणि ॥
संतानतन्तुषु प्रोताश्चौलुक्यमणयो नृपाः ।
तस्यां तु मणिमालायां नायकः कीर्तिभूपतिः ॥
गोः पिण्डे भौतिके भूरिपदार्थायतने गुरौ ।
मृते क्षीरं शिरा कापि माता स्त्रीषु तथैव तम् ॥
आजन्मदृष्टया(?)तिमनोहरस्य मुदा तथापूर्यत सर्वलोकः ।
यथामृतापूर्णत्रटीसमानं नारिच्यतापि स्तुतिबिन्दुपातैः ॥
समेऽपि स्पृहणीयत्वे पक्वान्नस्येव योषिताम् ।
भोगस्तेन परस्त्रीणामुच्छिष्टस्येव वर्जितः ॥
लग्नं तथा क्ष्मापतिपाणिपादे स्थितं यथा वक्षसि रत्नसा(हा)रैः ।
गौणं त्यजद्भिः श्रुतिकुण्डलाभ्यां कृत्वा पदं मुख्यमथास्थितं तैः ॥
आलम्बनीभूतमहीधरांस्तानुल्लङ्घ्य जुष्टं पतनं गुणौघैः ।
कुतोऽन्यथा ते सहजा बभूवुः कथं च ते तत्सहवृद्धिमापुः ॥
स यौवनोन्मत्तगजेन्द्रपार्श्वाद्धावन्मनो मारयदेवमेतत् ।
तस्मादृते हीन्द्रियखेटकेन विलङ्घिता वैषयिकी न सीमा ॥
कायेन गेहादिनिभेन जीवो व्योमेव जन्तोर्व्यवधीयते स्म ।
तस्मात्परस्मिन्नहमेव मत्वा लक्ष्मीं समां योऽर्थिजनैरभुङ्क्त ॥
बाहू बली कोपगुरोश्च वासो वक्षस्तथा नम्रमवेक्ष्य चापम् ।
दर्पोद्धतं मस्तकमेव येषां द्विषां छिनत्ति स्म रणे स वीरः ॥
पृष्ठं ददच्चापमभिद्विषं यः प्रियं चकार द्विषति प्रयुक्ताः ।
लक्षानुगा मार्गणपुंगवास्ते जाताः कृतार्थास्तत एव तस्मात् ॥
तस्यासीदविचारकीर्तिदयिता निस्त्रिंशहस्तस्य या
सङ्ग्रामे सभयेव हन्त सहसागच्छत्परेषां गृहम् ।

सा वाच्यापगमाय तेन दधती दिव्यं प्रतापं पुरो-
　　द्भ्रान्ता सप्तसमुद्रमण्डलभुवं शुद्धेति गीता सुरैः ॥
　　तस्माच्च वत्सराजो गुणरत्नमहानिधिर्जातः ।
　　शूरो युद्धमहार्णवमथनाय मन्दरः ख्यातः ॥
आबाल्यादियमत्र मूर्तिभवने भद्रैः समं श्रीः स्थिता
　　व्रीडाप्यत्र वधूरिव स्वविषयं प्रच्छादयन्ती सती ।
तामेवाधिकतां नयत्यविरता भर्तुर्मनो जानती
　　सा विष्णोरिव वत्सराजनृपतेः सापत्नवर्जं स्थिता ॥
　　सहैकाम्बरदुःस्थत्वे काश्चित्कोणश्रिता दिशः ।
　　इतीवाच्छादयत्त्यागी वत्सेशः कीर्तिकर्पटैः ॥
　　हेमरत्नप्रभं छत्रं सोमनाथस्य भूषणम् ।
　　दीनानाथकृते सत्रमवारितमकारि सः(च) ॥
　　तस्याङ्गसंभवः श्रीमांस्त्रिलोचनपतिर्नृपः ।
　　भोक्ता श्रीलाटदेशस्य पाण्डवः कलिभूभुजाम् ॥
　　त्यागेऽपि मार्गणा यस्य गुणग्रहणगामिनः ।
　　सत्ये धर्मो धवे वक्रः(?) शौर्ये गोपालविक्रमः ॥
　　अहो वृद्धस्य तस्यासञ्शत्रवो विकला भृशम् ।
　　भोक्तुस्तस्यैव ते चित्रं विहारमलशालिनः ॥
शत्रोः संगरभूषणस्य समरे तस्यासिना पातिते
　　मूर्धन्याशु गलत्सु कण्ठवलयाद्रक्तस्य पूरेष्वलम् ।
तत्तेजोमयवह्नितापितवपुस्तस्यासवर्णस्य त-
　　न्नूनं भाजनमुच्छलास सहसा खड्गोर्ध्वहस्तं चलम् ॥
　　धर्मशीलेन तेनेदं चलं वीक्ष्य जगत्त्रयम् ।
　　गोभूहिरण्यदानानि दत्तानीह द्विजन्मनाम् ॥
　　शाके नवशतैर्युक्ते द्विसप्तत्यधिके तथा ।
　　विकृते वत्सरे पौषे मासे पक्षे च तामसे ॥

---

१. अत्र च्छन्दोभङ्गो भवति.

अमावास्यातिथौ सूर्यपर्वण्यङ्गारवारके।
गत्वा प्रत्यगुदन्वन्तं तीर्थे चागस्त्यसंज्ञके॥
गोत्रेण कुशिकायात्र भार्गवाय द्विजन्मने।
वैश्वामित्रदेवरातावौदलः प्रवरास्त्रयः॥
इमानुद्वहते ग्रामं माधवाय त्रिलोचनः।
थिल्लीश्वरपथकान्तर्द्विचत्वारिंशसंख्यके॥
एरथाणनवशतमदादुदकपूर्वकम्।
समस्तायं ससीमानमाघाटैस्तरुभिर्युत[म्]॥
देवब्राह्मणयोर्दायान्वर्जयित्वा क्रमागतान्।
पूर्वस्यां दिशि नागाम्बा ग्रामस्तन्तिका तथा॥
वटपद्रकमाग्नेय्यां याम्यां लिङ्गवटः सि(शि)वः।
इन्दोत्थानं तु नैर्ऋत्यां वहुणदश्वा परे स्थितः॥
वायव्यां टेम्बरूकं च सौम्यां तु तलपद्रकम्।
ईशान्यां कुरुणग्रामः सीमायां खेटकाष्टकम्॥
आघाटनानि चत्वारि आयैः सह ससीमकैः।
तस्माद्द्विजवरस्यास्य भुञ्जतो न विकल्पना॥
कर्तव्या कैश्चन नरैः सार्थसाधुसमाख्यकैः।
अथैवं यदि लोपास्य स तदा पापभाजनः(नम्)।
पालने हि परो धर्मो हरणे पातकं महत्॥

तथा चोक्तम्—

'सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः।
स्ववंशजो वा परवंशजो वा रामो बत प्रार्थयते महीशाः॥
कन्यामेकां गवामेकां भूमेरर्धार्धमङ्गुलम्।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम्॥
यानीह दत्तानि पुरा नरेन्द्रैर्धर्मार्थकामादियशस्कराणि।
निर्माल्यवान्ति प्रतिमानि तानि को नाम साधुः पुनराददाति॥

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥'

लिखितं मया महासांधिविग्रहिकश्रीशंकरेण । मन्नतश्रीमिति । श्रीत्रिलोचनपालस्य ॥

(इण्डियन् आण्टिकेरी १२।२०१–२०३)

(८)

श्रीधरणीवराहाख्यमहीपतेर्दानपत्रम् ।

ओम् ।

पुण्यं व्योमसरिज्जलेन वहता चन्द्रांशुभिः शीतलं
सत्पुष्पं कनकारविन्दनिचयैर्निर्वाणसंपत्फलम् ।
व्यालालीविषकन्दलीमृगपतिभ्रान्तं न संतापदं
श्रीधन्वेश्वरमूर्ध्नि[2] .... सुखदं वस्ताज्जटाकाननम् ॥
ध्यानात्पूर्वमुवाच सम्प्रतिरवं शंभुं प्रणम्यावनी
ध्यानाध्यामितलोचने त्वयि विभो पीडामहं नासुरीम् ।
शक्ता सोढुमिलार्थमुद्धतवपू रक्षाक्षमः शक्तिमा-
न्स्वाच्चापात्परमेश्वरेण विहितश्चापाभिधानो नृपः ॥

अपि च ।

नीरन्ध्रो गतकण्टकोऽक्षततनुः सच्छायमूर्तिः सदा
सत्पत्रोऽपि विपत्रतामनुगतः सेव्योऽस्त्यगम्यो द्विषाम् ।
शश्वत्सौख्यफलप्रदोऽपि सुतरां वृद्धेर्विधातात्मनो
भूभृन्मूर्ध्नि कृतास्पदोऽपि नतिमाञ्श्रीचापवंशोऽपरः ॥
तस्मिन्नुष्णरुचेर्बभूव सदृशः श्रीविक्रमार्को नृपः
संपन्नाखिलशक्तिषड्गुणयुतो राजा ततोऽप्यड्डकः ।

---

१. 'निचयो' इति 'इण्डियन् आण्टिकेरी'स्थः पाठः. २. 'इण्डियन् आण्टिकेरी'-मध्ये त्रुटिचिह्नं नास्ति.

तस्माच्छ्रीपुलकेसिभूभृदजनि क्ष्मापालचूडामणिः
संजातः पृथिवीपतिर्ध्रुवभटो धर्मस्य मूर्तिस्ततः ॥
तस्यानुजः सकलभूपनताङ्घ्रिपद्मः
पद्मावपुष्याभिरतो धरणीवराहः।
जातोऽखिलप्रणयिकल्पतरुर्महात्मा
लीलावतीमुखसरोरुहराजहंसः ॥
किं शौर्यं प्रभुता पराभिहननं गम्भीरता सत्यता
प्रोत्साहः किमुतोच्यताममदृशो यस्य प्रतापो महान्।
औदार्यं कुलजावनीपतिसुतेष्वत्यादरः कोऽप्यसौ
येनैवं मुहुरेति मोहममला कष्टं कवीनां मतिः ॥
यस्त्यागशौर्यसौभाग्यगर्वितः कर्णपार्थकुसुमशरान्।
हेपयतीवाधिकतरनिजचरितैर्लीलयैव नृपः ॥

अयं च प्रासाचलश्रीरपि सहजविवेकादेवमभावयत्। चत्वरनिहिता-निलाहतदीपशिखासमानमायुरारोग्यादिकम्। यत्पश्य, तादृग्बलसम-न्विता अप्यस्मदादिपूर्ववंशजास्तथाविधाविधिविलसितविशेषात्कीर्तियशोना-ममात्रावशेषीभूताः समभवन्। तद्वरं धर्मविषयमेव मनो विहितम्। दा-नशीलतपोभावनात्मके च धर्मे प्रायो राज्यावस्थितनृपाणां दानभावने एव प्रवर्तिते। तद्वसुंधरादिदानं स्वर्गसोपानमाकलय्यामितगुणभाजानेन वर्ध-मानावस्थितेन समधिगताशेषमहाशब्दमहासामन्ताधिपतिश्रीधरणीवरा-हेण स्वपितामहनामाङ्कितमड्डाणकदेशमन्यं च भूयांसं राजाधिराजपरमे-श्वरश्रीमहीपालदेवपादप्रसादतः समनुशासता सता यथा दानं प्रव-र्तितं तथासौ सर्वान्स्वसंबध्यमानभाविभूपानन्यांश्च राष्ट्रपतिग्रामपतिभो-गिकमहत्तरकुटुम्बिकपाश्वकुलिकदण्डपासिकमध्यगप्रभृतीन्समनुबोधयति—

---

१. अन्यलेखेषु 'पुलकेशि' इति तालव्यान्तमुपलभ्यते. २. 'पुराभिहणनं' इति 'इ-ण्डियन् आण्टिकेरी'धृतः पाठः. ३. गुजरातप्रान्ते 'वढवाण'नाम्ना प्रसिद्धं नगरमेव वर्धमानम्. ४. 'दण्डपाशिक' इत्यन्यत्र तालव्यमध्यः समुपलभ्यते.

अस्तु वः संविदितम् । यथा—मया मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये तथैवामुष्मिकफलावाप्त्यर्थं श्रीमदामर्दकसंतानीयश्रीशिवदेवाचार्यसुतश्रीमहेश्वराचार्याय विद्याधनं कन्यिकास्थलीसंबध्यमानः विङ्कलाभिधानग्रामः स्वसीमापर्यन्तः सदार्णाभोगभागः सदण्डदशापराधः सवृक्षमालाकुलः सकलराजकीयानामहस्तप्रक्षेपणीयः अपरिपन्थनीयश्च प्रासादगयनमहापर्वणि परमभक्त्या मया उदकातिसर्गेण प्रतिपादितः । यस्य चाघाटनानि पूर्वतः उत्तरक्ककाभिधानग्रामः । दक्षिणतः त्रिन्त्रिनरिआणकाभिधानग्रामः। अपरतः कुरलाभिधानग्रामः । उत्तरतः शणाइचाणकाभिधानग्रामः । एवं चतुराघाटनोपलक्षितोऽयं विङ्कलाभिधानग्रामः सोत्पद्यमानवेष्टिकः अचाटभटप्रवेशः पूर्वदत्तदेवदायब्रह्मदायवर्जं भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतकालीनः श्रीमहेश्वराचार्यस्य पुत्रपौत्रान्वयन्यायेन भुञ्जतो भोजयतो वा न केनचिद्व्यासेधनीयः । यत उक्तमेव भगवता वेदव्यासेन व्यासेन—

> 'बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
> यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
> षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
> आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
> यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
> निर्माल्य वान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥' इति ।

शकसंवत् ८३६[1] पौषसुदि ४ उत्तरायणे । यथा चैतदेवं तथा ग्रामं दाता स्वहस्तमारोपयति । स्वहस्तोऽयं श्रीधरणीवराहस्य । लिखितं चैतद्राजादेशात्सांधिविग्राहिकमहिन्दकेन पार्थिलसुतेनेति ।

(इण्डियन् आण्टिकेरी १२ । १९३–१९४)

---

१. अयं शकाङ्कस्तत्र लेखे संदिग्ध एवास्ति. अस्माभिस्तु 'आण्टिकेरी'पुस्तके एतल्लेखप्रकाशकस्य डॉक्टरबूलरस्य निर्णयानुसारं स्थापितः.

(९)

राष्ट्रकूटवंशोद्भवस्य द्वितीयकर्कराजस्य दानपत्रम्।

ओम्।

श्रीमरस्त्वत्युमाभास्वद्वल्लीसंश्लेषभूषितम्।
भूतये भवतां भूयादजकल्पतरुत्रयम्॥

ब्रह्माद्यामग्वन्द्यधूर्जटिजटाजूटाटवीसंस्थिते:
सिक्ताद्देवनदीविशुद्धसलिलैर्यश्चन्द्रखण्डादभूत्।
आश्चर्यार्जितवृत्तजातमहिमा पालीध्वजोत्पल्लवो
वंशः कुन्दसितातपत्रबहलच्छायासु वृद्धिं गतः॥

तस्मादिन्दुरिवाम्बुधेः शशभृतः कान्तिप्रवाहस्ततो
निष्यन्दश्च यथामृतस्य समभूद्वन्द्यो यदोरन्वयः।
रेमेऽत्यद्भुतसाहसः स भगवान्गोपीकटाक्षालिभिः
शार्ङ्गी यत्र निपीयमानविलसल्लावण्यपुष्पोद्गमः॥

प्रतिबोधितबन्धुपद्मषण्डः कृतचालुक्यघनान्धकारनाशः।
उदगादथ **दन्तिदुर्गभानु**र्यदुवंशोदयपर्वतात्प्रतापी॥

तस्मिन्नपुत्रेऽनु च तत्पितृव्यः पतिर्भुवोऽभूदिह **कृष्णराजः**।
अष्टादशेशालयदृश्यरूपं पुञ्जीकृतं येन यशो विशुद्धम्॥

गोविन्दराजः क्षितिपश्च तस्मादभूदनेकाहवलब्धकीर्तिः।
धर्मार्थयोर्येन फलं मनोभूरा तृप्तितः कोशवतोपभुक्तः॥

अतिशयगुणयुक्तत्वाद्यथार्थाभिधानो
निरुपम इति तस्यैवानुजोऽभूत्क्षितीशः।
सकलजलधिवेलाप्रान्तविश्रान्तसैन्यः
परिणतभुवनत्वादुद्धृतैकातपत्रः॥

तस्माज्जगत्तुङ्गनृपः सुतोऽभूत्तुङ्गत्वमागाज्जगतां गुणैर्यः।
यस्यानिशं गन्धमदेभभीता मदं प्रयाणे दिगिभास्त्यजन्ति॥

---

१. काव्यमालायां मुद्रिते षष्ठे लेखे 'तस्याद्यं नृपतेः' इत्यादि पञ्चमे श्लोके 'पितृव्यमुदयी' इत्यस्य स्थाने 'पितृव्य उदयी' इति पाठः समीचीनः.

तस्य श्रीमदमोघवर्षनृपतिश्चालुक्यकालानलः
सूनुर्भूपतिरूर्जिताहितवधूवैधव्यदीक्षागुरुः ।
आसीदिन्द्रपुराधिकं पुरमिदं श्रीमान्यखेटाभिधं
येनेदं च सरः कृतं गुरुकरुप्रासादमन्तःपुरम् ॥

तस्मादकालवर्षोऽभूत्सार्वभौमः क्षितीश्वरः ।
यत्प्रतापपरित्रस्ता व्योम्नि चन्द्रायते रविः ॥

चेदीशो दशकण्ठदर्पदलनः श्रीहैहयानां कुले
कोक्कल्लः समभूच्च तस्य तनया या शंकुकस्यानुजा ।
तस्यां कृष्णनृपात्ततः श्रितमहादेवीपदायामभू-
त्तैस्तैर्यः प्रथितो गुणैर्भुवि जगत्तुङ्गाभिधानः सुतः ॥

चेदीश्वरशंकरगणदुहितरि लक्ष्म्यां ततो जगत्तुङ्गात् ।
सूनुरभूदिन्द्रनृपो भावी राज्यश्रियो भर्ता ॥

जनकगृहीतैः परमण्डलैरसंतुष्टमानसः स्वपितुः ।
एकच्छत्रां पृथ्वीं कर्तुं निरगाज्जगत्तुङ्गः ॥

चेद्यां मातुलशंकरगणात्मजायामभूज्जगत्तुङ्गात् ।
श्रीमानमोघवर्षो गोविन्दाम्बाभिधानायाम् ॥

आरुह्येन्द्रपदोपमं स नृपतिः श्रीवीरसिंहासनं
दत्त्वा ताम्रनमस्यशासनगतान्ग्रामाननन्तांस्तथा ।
अर्थैरर्थिमनोरथाधिकतरैः कृत्वा कृतार्थं जग-
द्व्याप्ता येन शिवालयैर्निजयशःपुञ्जोपमैर्मेदिनी ॥

ऐन्द्रपदजिगीषयेव स्वर्गमधिरूढे च ज्येष्ठे भ्रातरि श्रीमत्कृष्णराजदेवे
युवराजदेवदुहितरि कुण्डकदेव्याममोघवर्षनृपात् ।
जातः खोट्टिगदेवो नृपतिरभूद्भुवनविख्यातः ॥

---

१. 'दशकण्ठदर्पदलनश्रीहैहयानां' इति समस्तः पाठो युक्तः. २. चेदिदेशाधीशशं-करगणस्य दुहितरि लक्ष्म्यां गोविन्दाम्बायां च जगत्तुङ्गनृपात्क्रमेणेन्द्रः, अमोघवर्षश्चेति पुत्रद्वयमुद्भूत्. अमोघवर्षात्कृष्णः, खोट्टिगः, निरुपमश्चेति त्रयः पुत्रा बभूवुः. भाण्डारक-रपण्डितास्तु दक्षिणेतिहासे 'गोविन्दोऽम्बाभिधानायाम्' इति पाठं समुचितं वदन्ति. ३. 'इण्डियन् आण्टिक्केरी'मध्ये फ्लीटपण्डितेन एतद्वयमप्यग्रिमायामार्यायां प्रवेशितम्. तथैव दक्षिणेतिहासेऽपि.

तस्यानुजान्निरुपमादुपलब्धजन्मा
वीरश्रियः पदमभूद्भुवि कक्कराजः।
यो बाल एव सकलामपि राजनीति-
मात्मप्रबोधविभवातिशयाद्विवेद ॥
सीमालीति दिशां गुणीति विदुषां त्यागीति दीनार्थिनां
क्रोधीति द्विषतां शमीति च सतां रूपीति सद्योषिताम्।
मित्राणां सुहृदित्यवन्ध्यविभवो विश्वंभरायाः पतिः
सर्वेषामपि सर्ववेति निवमत्येकोऽपि यश्चेतसि ॥
यस्यास्ते करवालवारिणि चिरं प्रक्षालयन्ती यथा
लक्ष्मीरात्मकलङ्कमाहितमलं निन्द्यैः कुभूपाश्रयैः।
सत्यं श्रीगृहमेतदम्बुजमितो मे द्वेषिणी साप्यत-
स्तिष्ठाम्यत्र रुषेति यस्य च मुखे देवी सरस्वत्यपि ॥
सत्यं गुर्जरनिर्जितारिनिकरश्चोलादिलीलारतो
हूणाधीशरणेष्वकम्पितमतिः पाण्ड्यप्रचण्डो नृपः।
वन्द्योऽयं भवतामनिन्द्यचरितः स्पर्धन्त मा स्मामुना
कीर्तिर्यस्य नियामिकैवमनिशं पृथ्वीं परिभ्राम्यति ॥
त्यागेनैव परां प्रसिद्धिमगमत्कर्णः किलानश्वरीं
सत्येनात्र युधिष्ठिरोऽपि नृपतिः प्रख्यातकीर्तिः कृतः।
सौन्दर्येण मनोभवश्च विदितः पार्थो धनुः कौशलै-
र्यः सर्वानतिशेत एव भुवने देवः समस्तैर्गुणैः ॥

यश्चानुपरतकनकधारानिपातोपजनितलोकहर्षः श्रीमदमोघवर्षः स्वकौशलक्षिप्तनिशितास्त्रविदारितारातिसार्थः श्रीनूतनपार्थः सकलबलवदरितिमिरभेदनप्रचण्डः श्रीमदहितमार्तण्डः स्वविक्रमच्छालितबालिबन्धपरायणः श्रीवीरनारायणः सकलादिराजचरितातिशयतुङ्गः श्रीमान्नृपतुङ्गो निखिलभुवनाधिपत्यप्रकाशितैकातपत्रः श्रीराजात्रिनेत्रः समभवत्सदर्थाभिधानतया

१. 'अवन्ध्य' इति 'इण्डियन् आण्टिक्केरी'मुद्रितः पाठः.

स च परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमदकालवर्षदेवपादानुध्यातः परमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरश्रीमदमोघवर्षदेवः पृथिवीवल्लभः श्रीमद्वल्लभनरेन्द्रदेवः कुशली सर्वानेव यथासंबध्यमानकान्राष्ट्रपतिविषयपतिग्रामकूटमहत्तरायुक्तकोपयुक्तकाधिकारिकान्समादिशति—अस्तु वः संविदितम्, यथा श्रीमान्यखेटस्थिरावासिते श्रीमत्कक्कदेवराजे शकनृपकालातीतसंवत्सरशतेष्वष्टसु चतुर्नवत्यधिकेष्वङ्कतः संवत् ८९४ अङ्गिरःसंवत्सरान्तर्गताश्वयुजपौर्णमास्यायां(स्यां) बुधदिने सोमग्रहणमहापर्वणि मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये श्रीमद्रेनुन्नवावीवास्तव्याय इहैव कार्याभ्यागताय भारद्वाजगोत्रबह्वृचशाखामब्रह्मचारिणे त्रिप्रवराय श्रीमच्छंकरैयपुत्राय श्रीमत्सङ्गमैयसुताय श्रीमच्छन्नपैयभट्टाय उप्पलिकाशतत्रयान्तर्गतबब्बुलतल्लद्वादशमध्ये पङ्गरिकानाम ग्रामः सवृक्षमालाकुलः सधान्याहिरण्यादेयः सदण्डदोषदशापराधः पूर्वप्रसिद्धचतुःसीमापर्यन्तः शुल्कादिसमस्तोत्पत्तिसहितः आ चन्द्रार्कं मया नमस्यो दत्तः । तस्य पूर्वतः रोहीतल्लग्रामः । दक्षिणतः शिलहरेग्रामः । पश्चिमतः किणिहिग्रामः । उत्तरतः अन्तरवल्लीग्रामः । एवं चतुराघाटविशुद्धममुं पङ्गरिकाग्रामं श्रीमच्छन्नपैयभट्टस्य कृषतः कर्षयतो भुञ्जतो भोजयतो वा न केनाचिद्व्याघातः कार्यः । यश्च करोति स पञ्चभिरपि महापातकैरुपपातकैश्च संयुक्तः स्यात् । उक्तं च—

'सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ॥'

'यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥'

'बहुभिर्वसुधा भुक्ता पार्थिवैः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥'

'विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदानापहारिणः ॥'

'षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥'
'सुवर्णमेकं गामेकां भूमेरप्येकमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥'
'मद्वंशजाः परमहीपतिवंशजा वा
पापादपेतमनसो भुवि भाविभूपाः ।
ये पालयन्ति मम धर्ममिदं समस्तं
तेषां मया विरचितोऽञ्जलिरेष मूर्ध्नि ॥'

श्रीमदम्बार्यपौत्रेण योगमार्यसुतेन च । कायस्थकुमुदभागिना लिखितं पुन्नार्यनाम्ना ॥

(इण्डियन् आण्टिक्वेरी १२।२६४–६७)

(१०)

राणासमरसिंहस्य प्रशस्तिः ।[1]

ॐम् ।

ॐ नमः शिवाय ।

ध्यानानन्दपराः सुराः कति कति ब्रह्मादयोऽपि स्वसं-
वेद्यं यस्य महः स्वभावविशदं किंचिद्विदांकुर्वते ।
मायामुक्तवपुः स्वसंगतभवाभावप्रदः प्रीतितो
लोकानामचलेश्वरः स दिशतु श्रेयः प्रभुः प्रत्यहम् ॥
सर्गार्थं स्वतनुं हुताशमनिशं पद्मासने जुह्वतः
प्राणैः प्राजनि नीललोहितवपुर्यो विश्वमूर्तेः पुरा ।
दुष्टाङ्गुष्ठनखाङ्कुरेण हठतस्तेजोमयं पञ्चमं
छिन्नं धातृशिरः कराम्बुजतले बिभ्रत्स वस्त्रायताम् ॥

१. प्रशस्तिरियमर्बुदाचलो(आबूपहाड)परि श्रीमदचलेश्वरमहादेवमन्दिरसमीपस्थसंन्यासिमठे शिलायां समुत्कीर्णा वर्तते. वर्णिताश्चात्रोदयपुरमहीपतेः पूर्वपुरुषाः.

अव्यक्ताक्षरनिर्भरध्वनिजपस्त्यक्तान्यकर्मश्रमः
स्वं देहास्मितिमानमुज्झितुमना दानाम्बुसंवर्धितः ।
यत्कुम्भाचलगस्तपांसि वितनोत्यद्यापि भृङ्गव्रजः
प्रत्यूहापगमोन्नतिर्गजमुखो देवः स वोऽस्तु श्रिये ॥

किं च ।

क्षुभ्यद्वारिधिदीर्यमाणशिखरिश्रेणि भ्रमद्भूतलं
त्रुट्यद्व्योमदिगन्तसंहति पतद्ब्रह्माण्डभाण्डस्थिति ।
कल्पान्तस्य विपर्ययेऽपि जगतामुद्वेगमुच्चैर्दिश-
त्सिन्धोर्लङ्घनमद्भुतं हनुमतः पायादपायात्स नः ॥

शाखोपशाखाकुलितः सुपर्वा गुणाचितः पत्रविभूषिताङ्गः ।
कृतास्पदो मूर्धनि भूधराणां जयत्युदारो गुहिलस्य वंशः ॥

यद्वंशो गुहिलस्य राजभगवन्नारायणः कीर्त्यते
तत्सत्यं कथमन्यथा नृपतयस्तं संश्रयन्तेतराम् ।
मुक्तेः कल्पितवेतसः करतलव्यासक्तदण्डोज्ज्वलाः
प्राणत्राणधियः श्रियः समुदयैर्न्यस्तापहस्ताः सदा ॥

मेदःक्लेदभरेण दुर्जनजनस्याप्लावितः संगरे
देशः क्लेशकथापकर्षणपटुर्यो बप्पकेनोच्चकैः ।
लावण्योत्करनिर्जितामरपुरः श्रीमेदपाटाभिधा-
माधत्ते स्म स एष शेषनगरश्रीगर्वसर्वंकषः ॥[1]

अस्ति नागह्रदं[2] नाम सायाममिह पत्तनम् ।
चक्रे तपांसि हारीतराशिर्यत्र तपोधनः ॥

केऽपि क्वापि परप्रभावजनितैः पुण्यैर्हविर्भिर्विभुं
प्रीणन्ति ज्वलनं हिताय जगतां प्रारब्धयागक्रमाः ।
अन्ये प्राणनिरोधबोधितसुखाः पश्यन्ति चात्मस्थितं
विश्वं सद्विजनस्थलीषु मुनयो यत्राप्ततत्त्वोदयाः ॥

---

१. यस्याधुना 'मेवाड'नाम्ना प्रसिद्धिः. 'भिन्दानाः सान्द्रमानप्रहपाटममदं मेदपाटाङ्गनानाम्' इति कर्णसुन्दर्यां (१।५०) बिह्लणप्रयोगः. २. अधुना 'नागदा'नाम्ना प्रसिद्धः.

अस्मिन्नेव वने तपस्विनि जने प्रायःस्खलद्बन्धने
वृत्तान्तं भुवनस्य योगनियतः प्रत्यक्षतः पश्यति ।
हारीतः शिवसङ्गसङ्गविगमात्प्राप्तः स्वसेवाकृते
बप्पाय[1] प्रथिताय सिद्धिनिलयो राज्यश्रियं दत्तवान् ॥
हारीतात्किल बप्पकोऽङ्घ्रिवलयव्याजेन लेभे महः
क्षात्रं धातृनिभाद्वितीर्य मुनये ब्राह्मं स्वसेवाछलात् ।
एतेऽद्यापि महीभुजः क्षितितले तद्वंशसंभूतयः
शोभन्ते सुतरामुपात्तवपुषः क्षात्रा हि धर्मा इव ॥
बप्पकस्य तनयो नयवेत्ता संबभूव नृपतिर्गुहिलाख्यः[2] ।
यस्य नामकलितां किल जातिं भूभुजो दधति तत्कुलजाताः[3] ॥
यः[4] पीयूषमयूखसुन्दरमतिर्विद्यासुधालंकृति-
र्निष्प्रत्यूहविनिर्जितस्मरगतिः प्राकाम्यरम्याकृतिः ।
गाम्भीर्योन्नतिसंभृतस्य जलधेर्विस्फोटिताहंकृति-
स्तस्माद्भोजनरेश्वरः स समभूत्संसेवितश्रीपतिः ॥
शीलः सशीलकरवालकरालपाणि-
र्भेजे भुजेन तदनु प्रतिपक्षलक्ष्मीम् ।
उत्साहभावगमकं पुलकं दधानो
वीरः स्वयं रस इव स्फुटबद्धदेहः ॥
सोऽस्त्रीरतिखण्डनः कुलनृपश्रेणीशिरोमण्डनः
कर्णाटेश्वरदण्डनः प्रभुकलामैत्रीमनोनन्दनः ।
तत्सूनुर्नयमर्मनर्मसचिवः श्रीकालभोजः क्षमा-
पालः कालकरालकर्कशधनुर्दण्डप्रचण्डोऽजनि ॥
छायाभिर्वनिताः फलैः सुमनसः सत्पत्रपुञ्जैर्दिशः
शाखाभिर्द्विजवर्गमर्गलभुजः कुर्वन्मुदामास्पदम् ।

१. 'बापारावल' नाम्नास्य सर्वत्रेतिहासेषु प्रसिद्धिः. २. 'अङ्घ्रि' इति मुद्रितः पाठः.
३. 'गुहिलोत' नाम्ना तद्वंशोद्भवानां प्रसिद्धिः. ४. 'यत्' इति मुद्रितः पाठः.

तद्वंशप्रबलाङ्कुरोऽतिरुचिरः प्रादुर्बभूवावनी-
पालो **भर्तृभट**स्त्रिविष्टपतरोर्गर्वाभिहर्ता ततः ॥

मुष्टिप्रमेयमध्यः कपाटवक्षस्थलस्तदनु ।
सिंहस्वामितभुवरमत्तेभो भूपतिर्जयति ॥

तज्जन्मा स **महायकः** स्वभुजयोः प्रातिकमाहायकः
क्षोणीभारमुदारमुन्नतशिरा धत्ते स्म भोगीश्वरः ।
यत्क्रोधानलविस्फुलिङ्गमहसि प्रत्यर्थिनोऽनर्थिनः
प्राप्तत्पक्षपरिग्रहाकुलधियः पेतुः पतङ्गा इव ॥

खुम्माणस्य ततः प्रयाणवियति क्षोणीरजोदुर्दिने
निस्त्रिंशाम्बुधरः सिषेच सुभटान्धाराजलैरुज्ज्वलैः ।
तन्नारीकुचकुङ्कुमानि जगलुश्चित्राणि नेत्राञ्जनै-
रित्याश्चर्यमहो मनःसु सुधियामद्यापि विस्फूर्जति ॥

अल्लटोऽजनि ततः क्षितिपालः संगरेऽनुकृतदुर्जयकालः ।
यस्य वैरिपृतनां करवालः क्रीडयैव जयति स्म करालः ॥

उदयति स्म ततो **नरवाहनः** समिति संहृतभूपतिवाहनः ।
विनयसंचयसेवितशंकरः सकलवैरिजनस्य भयंकरः ॥

विक्रमविधूतविश्वप्रतिभटनीतेस्तथा गुणस्फीतेः ।
कीर्तिस्तारकजैत्री **शक्तिकुमारस्य** संजज्ञे ॥

आसीत्ततो नरपतिः **शुचिवर्म**नामा
युद्धप्रदेशरिपुदर्शितचण्डधामा ।
उच्चैर्महीधरशिरःसु निवेशिताङ्घ्रिः
शंभोर्विशाम्ब इव विक्रमसंभृतश्रीः ॥

स्वर्लोके शुचिवर्मणि स्वसुकृतैः पौरंदरं विभ्रमं
बिभ्राणे कलकण्ठकिंनरवधूसंगीतदोर्विक्रमे ।

---

१. 'साहायिकः' इति मुद्रितः पाठः. २. 'परामहा' इति मुद्रितः पाठः. ३. 'खुमाण-स्य' इति मुद्रितः पाठः. ४. 'शिषेच' इति मुद्रितः पाठः. ५. 'मनस्तु' इति मुद्रितः पाठः. ६. 'रिपुरर्दाशित' इति मुद्रितः पाठः. ७. 'निर्वेशिताङ्घ्रिः' इति मुद्रितः पाठः.

माद्यन्मारविकारवैरितरुणीगण्डस्थलीपाण्डुरै-
ब्रह्माण्डं नरवर्मणा धवलितं शुभ्रैर्यशोभिस्ततः ॥
जाते सुरस्त्रीपरिरम्भसौख्यसमुन्मुके श्रीनरवर्मदेवे।
ररक्ष भूमीमथ कीर्तिवर्मा नरेश्वरः शक्रसमानधर्मा ॥
कामक्षामनिकामतापिनि तप(?)ऽमुष्मिन्नृपे रागिणि
स्वःसिन्धोर्जलमंकृते रमयति स्वर्लोकवामभ्रुवः।
दोर्दण्डद्वयभग्नवैरिवसतिः क्षोणीश्वरो वैरट-
श्चक्रे विक्रमतः स्वपीठविलुठन्मूर्धश्चिरं द्वेषिणः ॥
तस्मिन्नुपरते राज्ञि मुदिताशेषविद्विषि।
वैरिसिंहस्ततश्चक्रे निजं नामार्थवद्भुवि ॥
व्यूढोरस्कस्तनुर्मध्ये क्ष्वेडाकम्पितभूधरः।
विजयोपपदः सिंहस्ततोऽरिकरिणोऽवधीत् ॥
यन्मुक्तं हृदयाङ्गरागमहितं गौरत्वमेतद्विप-
न्नारीभिर्विरहात्ततोऽपि ममभूत्कि कर्णिकारक्रमः।
धत्ते यत्कुसुमं तदीयमुचितं रक्तत्वमभ्यन्तरे
बाह्ये पिञ्जरतां च कारणगुणग्रामोपमंवर्गणम् ॥
ततः प्रतापानलदग्धवैरिक्षितीशधूमोत्थमषीरसेन।
नृपोऽरिसिंहः सकलासु दिक्षु लिलेख वीरः स्वयशःप्रशस्तिम् ॥
लोचनेषु सुमनस्तरुणीनामञ्जनानि दिशता यदनेन।
वारिकल्पितमहो बत चित्रं कज्जलं हृतमरातिवधूनाम् ॥
नृपोत्तमाङ्गोपलकान्तिकूटप्रकाशिताष्टापदपादपीठः।
अभूदमुष्मादथ चोडनामा नरेश्वरः सूर्यसमानधामा ॥
कुम्भिकुम्भविलुठत्करवालः संगरे विमुखनिर्मितकालः।
तस्य सूनुरथ विक्रमसिंहो वैरिविक्रमकथां निरमाइत् (?) ॥

१. क्ष्वेडा सिंहनादः. २. 'माद्यन्नरे' इति मुद्रितः पाठः. ३. 'धूमोच्छमषीरसेन' इति मुद्रितः पाठः.

भुजवीर्यविलासेन समस्तोद्धृतकण्टकः ।
चक्रे भुवि ततः क्षेमं **क्षेमसिंहो** नरेश्वरः ॥

रक्तं किंचिन्निपीय प्रमदपरिलसत्पादविन्यासमुग्धाः
कान्तेभ्यः प्रेतवध्वो ददति रसभरोद्गारमुद्राकपालैः ।
पायंपायं तदुच्चैर्मुदितसहचरीहस्तविन्यस्तपात्रं
प्रीतास्ते ते पिशाचाः समरभुवि यशो यस्य संख्याहरन्ति ॥

सामन्तसिंहनामा कामाधिकसर्वसुन्दरशरीरः ।
भूपालोऽजनि तस्मादपहृतसामन्तसर्वस्वः ॥

खोमाणसंततिवियोगविलक्षलक्ष्मी-
मेनामदृष्टविरहां गुहिलान्वयस्य ।
राजन्वतीं वसुमतीमकरोत्**कुमार-**
सिंहस्ततो रिपुगतामपहृत्य भूयः ॥

नामापि यस्य जिष्णोः परबलमथनेन सान्वयं जज्ञे ।
विक्रमविनीतशत्रुर्नृपतिरभून्**मथनसिंहो**ऽथ ॥

कोशस्थितिः प्रतिभटक्षतजं न भुङ्क्ते
कोशं न वैरिरुधिराणि निपीयमानः ।
सङ्ग्रामसीमनि पुनः परिरभ्य यस्य
पाणिं द्विसंश्रयमवाप फलं कृपाणः ॥

शेषनिःशेषसारेण **पद्मसिंहेन** भूभुजा ।
मेदपाटमही पश्चात्पालिता लालितापि न ॥

व्यादीर्णवैरिमदसिन्धुरकुम्भकूट-
निश्च्युतमौक्तिकमणिस्फुटवर्णभाजः ।
युद्धप्रदेशफलिकासु समुल्लिलेख
विद्वानयं स्वभुजवीर्यरसप्रबन्धान् ॥

१. 'षोमाण' इति मुद्रितः पाठः. २. 'कृपाणः' इति मुद्रितः पाठः. ३. 'निष्प्र' इति मुद्रितः पाठः.

नड्डूलमूलंकपबाहुलक्ष्मीस्तुरुष्कसैन्यार्णवकुम्भयोनिः।
अस्मिन्सुराधीशसहासनस्थे ररक्ष भूमीमथ **जैत्रसिंहः** ॥

अद्यापि संधकचमूरुधिरावमत्त-
संघूर्णमानरमणीपरिरम्भणेन।
आनन्दमन्दमनसः समरे पिशाचाः
श्रीजैत्रसिंहभुजविक्रममुद्गृणन्ति ॥

धवलयति स्म यशोभिः पुण्यैर्भूमण्डलं तदनु।
विहितहितभ्रंशशङ्कस्तेजः**सिंहो** निरातङ्कः ॥

उप्तं मौक्तिकबीजमुत्तमभुवि त्यागस्य दानाम्बुभिः
सिक्त्वा सद्गुरुसाधनेन नितरामादाय पुण्यं फलम्।
राज्ञानेन कृपाणकोटिमटता स्वैरं विगाह्य श्रियः
पश्चात्केऽपि विवर्धिता दिशि दिशि स्फारा यशोराशयः ॥

आद्यक्रोडवपुः कृपाणविलसद्दंष्ट्राङ्कुरो यः क्षणा-
न्मग्नामुद्धरति स्म गूर्जरमहीमुच्चैस्तुरुष्कार्णवात्।
तेजःसिंहसुतः स एषः **समरः** क्षोणीश्वरग्रामणी-
राधत्ते बलिकर्णयोर्धुरमिलागोले वदान्योऽधुना ॥

तालीभिः स्फुटतूर्यतालरचनासंजीवनीभिः कर-
द्वन्द्वोपात्तकबन्धमुग्धशिरसः संनर्तयन्तः प्रियाः।
अद्याप्युन्मदराक्षसास्तव यशःखण्डप्रशस्तिं रणे
गायन्ति प्रतिपक्षशोणितमदास्तेजस्विसिंहात्मज ॥

अप्रमेयगुणगुम्फकोटिभिर्गाढबद्धवृषविग्रहाकृतेः।
कीर्त्यते न सकला तव स्तुतिर्ग्रन्थगौरवभयान्नरेश्वर ॥

अर्बुदो विजयते गिरिरुच्चैर्देवसेवितकुलाचलरत्नम्।
यत्र षोडशविकारविपाकैरुज्झितोऽकृत तपांसि वसिष्ठः ॥

---

१. 'भ्रप' इति मुद्रितः पाठः. २. 'कृषाण' इति मुद्रितः पाठः. ३. 'कृषाण' इति मुद्रितः पाठः. ४. भूमण्डले. ५. 'प्युष्मद' इति मुद्रितः पाठः. ६. 'यशःखण्डं प्रतिष्ठं' इति मुद्रितः पाठः.

क्लेशावेशविमुग्धदान्तजनयोः सद्भुक्तिमुक्तिप्रदे
लक्ष्मीवेश्मनि पुण्यजह्नुतनयासंसर्गपूतात्मनि ।
प्राप प्रागचलेश्वरत्वमचले यस्मिन्भवानीपति-
र्विश्वव्याप्तिविभाव्यसर्वगतया देवश्चलोऽपि प्रभुः ॥

सर्वसौन्दर्यसारस्य कोऽपि पुञ्ज इवाहृतः ।
अयं यत्र मठस्तिष्ठत्यनादिस्तापसोचितः ॥

यत्र क्वापि तपस्विनः सुचरिताः कुत्रापि मर्त्याः क्वचि-
द्गीर्वाणाः परमात्मनिर्वृतिमिव प्राप्ताः क्षणेषु त्रिषु ।
यस्याद्योद्गतिमर्बुदेन महितां गायन्ति पौराणिकाः
संधत्ते स खलु क्षणत्रयमिषात्त्रैलोक्यलक्ष्मीमिह ॥

जीर्णोद्धारमकारयन्मठमिमं भूमीश्वरग्रामणी-
र्देवः श्रीसमरः स्वभाग्यविभवादिष्टो निजश्रेयसे ।
किं चास्मिन्परमास्तिको नरपतिश्चक्रे वसुभ्यः कृपा-
संश्लिष्टः शुभभोजनस्थितिमपि प्रीत्या मुनिभ्यस्ततः ॥

अचलेशदण्डमुच्चैः सौवर्णं समरभूपालः ।
आयुर्वायुचलाचलमिह दृष्ट्वा कारयामास ॥

आसीद्भावाग्निनामेह स्थानाधीशः पुरा मठे ।
हेलोन्मूलितसंसारबीजैः पाशुपतैर्वृतः[1] ॥

अन्योन्यवैरविरहेण विशुद्धदेहाः
स्नेहानुबन्धिहृदयाः सदया जनेषु ।
अस्मिंस्तपस्यति मृगेन्द्रगजादयोऽपि
सत्त्वाः समीक्षितविमोक्षविधायितत्त्वाः ॥

शिष्यस्तस्यायमधुना नैष्ठिको भावशंकरः ।
शिवसायुज्य[2]लाभाय कुरुते दुष्करं तपः ॥

---

१. 'वृतैः' इति मुद्रितः पाठः. २. 'सायोज्य' इति मुद्रितः पाठः.

फलकुसुमसमृद्धिं सर्वकालं वहन्तः
परमनियमनिष्ठां यस्य भूमीरुहोऽमी।
अपरमुनिजनेषु प्रायशः सूचयन्ति
स्वलितविषयवृत्तेरर्बुदाद्रिप्रसूताः॥
राज्ञा समरसिंहेन भावशंकरशासनात्।
मठः सौवर्णदण्डेन महितः कारितोऽर्बुदे॥
योऽकार्षीदेकलिङ्गत्रिभुवनविदितश्रीसमाधीशचक्र-
स्वामिप्रासादवृन्दे प्रियपटुतनयो वेदशर्मा प्रशस्तीः।
तेनैषापि व्यधायि स्फुटगुणविशदा नागरज्ञातिभाजा
विप्रेणाशेषविद्वज्जनहृदयहरा चित्रकूटस्थितेन॥
यावदर्बुदमहीधरसङ्गं संबिभर्ति भगवानचलेशः।
तावदेव पठतामुपजीव्या सत्प्रशस्तिरियमस्तु कवीनाम्॥
लिखिता शुभचन्द्रेण प्रशस्तिरियमुज्ज्वला।
उत्कीर्णा कर्मसिंहेन सूत्रधारेण धीमता॥
सं १३४२ वर्षे मार्गशुदि १ प्रशस्तिः कृता।

(भावनगरप्राचीनशोधसंग्रहस्य प्रथमे भागे पृष्ठे ३०–३७)

(११)

राष्ट्रकूटवंशोद्भवस्य द्वितीयप्रभूतवर्षमहीपतेर्दानपत्रम्।

स्वस्ति विस्तृतविशदयशोवितानविशदीकृताशाचक्रवालकरवालप्रबला-वतंसविराजितजयलक्ष्मीसमालिङ्गितदक्षदक्षिणाभूरिभुजार्गलः गलितसार-शौर्यरसविसरविखलीकृताग्रारिवर्गः। वर्गत्रयवर्गणैकनिपुणाचलाभारवो-र्वी(?)विशेषनिर्जितोर्वीमण्डलोत्सवोत्पादनपरम्पर(?)भूपालमौलिमालालीढा-

---

१. 'अर्बुदाद्रि' इति मुद्रितः पाठः. २. 'चित्तोडगढ'स्थितेनेत्यर्थः. प्रथमं चित्तोड-गढ एव राजधान्यासीत्. उदयपुरनिर्माणं तु पश्चात् (ख्रिस्ताब्दीयषोडशे शतके) जातम्. ३. 'विशाद' इति मुद्रितः पाठः. ४. 'आवतंश' इति मुद्रितः पाठः. ५. 'भुजर्गलः' इति मुद्रितः पाठः. ६. 'वर्गनैक' इति मुद्रितः पाठः.

द्विड्वृन्दारविन्दो **गोविन्दराजः** तस्य सूनुः सुतरुणभावोदयदया-
दानदीनेतरगुणगणसमर्पितबन्धुजनः सकलकलागमजलधिकलशयोनिः म-
नुदर्शितमार्गानुगामी राष्ट्रकूटकुलामलगगनमृगलाञ्छनः भुवनजनमुखकम-
लांशुमाली मनोहरगुणगणालंकृतभारः (?) **कक्कराज**नामधेयः तस्य पुत्रः
स्ववंशानेकनृपसंघातपरम्पराभ्युदयकारणः परमर्षिब्राह्मणभक्तितात्पर्य-
कुशलः समस्तगुणगणाधिष्ठानो विख्यातसर्वलोकनिरुपमस्थिरभावनिर्जि-
तारिमण्डलः यस्येममासीत् (?) ॥

जित्वा भूपारिवर्गान्नयकुशलतया येन राज्यं कृतं यः
कष्टे मन्वादिमार्गस्तुतधवलयशा न क्वचिद्यागपूर्वः ।
सङ्ग्रामे यस्य शेषा स्वभुजकरबलप्रापिता या जयश्री-
र्यस्मिञ्जाते स्ववंशाभ्युदयधवलतां यातदानर्कितजः (?) ॥

असा**विन्द्रराज**नामधेयस्तस्य पुत्रः स्वकुलललामायमानो मानधनो
दीनानाथजनाह्लादनकरदाननिरतमनोवृत्तिः हिमकर इव सुखकरकरः कु-
लाचलसमुदाय इव सुधाधारगुणनिपुणः (?) शिमशैलकूटतटस्थापितयशः-
स्तम्भो लिखितानेकविक्रमगुणः ।

अघसंघातविनाशकसुरापगा यस्य सद्यशो विशदम् ।
गायन्तीव तरङ्गैर्भ्रमवरवैर्वहति जनमहिता ॥

असौ **वैरमेघ**नामधेयस्तस्य पितृव्यः हृदयपद्मासनस्थपरमेश्वरशिरः-
शिशिरकर[कर]निकरनिराकृततमोवृत्तिः सविशेषस्य जगत्त्रयमासा-
द्ययेनेव (?) विरचितस्य चतुर्थलोकोदयसमानस्य कृतयुगशतैरिव निष्ठि-
तस्य यस्य यशसः पुञ्जमिव विराजमानः

---

१. 'सतर्पित' इत्युचितः पाठः. २. 'कक्कराजानामधेयः' इति मुद्रितः पाठः. ३. 'कारणम्' इत्यपेक्षितम्. ४. 'इन्द्रराजानामधेय' इति मुद्रितः पाठः. ५. 'स्तम्ब' इति मुद्रितः पाठः. ६. 'गुनम्' इति मुद्रितः पाठः. ७. 'विशादम्' इति मुद्रितः पाठः. ८. 'प्रभतरावैः' इति मुद्रितः पाठः ९. 'कर' इति मुद्रिते पाठे नास्ति. १०. 'जगत्रय' इति मुद्रितः पाठः. ११. 'निष्टितस्य' इति मुद्रितः पाठः. १२. 'पुञ्ज इव' इत्यपेक्षितम्.

प्रदग्धकालागरुधूपधूमैः प्रवर्धमानोपचयाः पयोदाः।
यस्याजिरं स्वच्छसुगन्धतोयैः सिञ्चन्ति सिद्धोदितकूटभागाः॥ (?)
न चेदृशं प्राप्यमिति प्रलोभाद्भवोद्भवो भावियुगावतारे।
अवैमि यस्य स्थितये स्वयं तत्कल्पान्तरं नैव च भाव्यतीति॥ (?)
तारागणेषून्नतकूटकोटितटार्पिता[1]मुज्ज्वलदीपिकासु।
मोमुह्यते रात्रिविभेदभावः निशात्ययः पौरजनै[2]र्निशायाम्॥ (?)
आधारभूताहमिदं व्यतीत्य[3] मां वर्धते चायमतिप्रसङ्गः।
यस्यावकाशार्थमितीव पृथ्वी[4] पृथ्वीव भूतेति च मे वितर्कः॥

विचित्रपताकासहस्रसंछादितमुपरि परिचरणभयाल्लोकैकचूडामणिना मणिकुट्टिमसंक्रान्तप्रतिबिम्बव्याजेन स्वयमवतीर्य परमेश्वरभक्तियुक्तेन नमस्क्रियमाणमिव[5] विराजमानम्, प्रहतपुष्करमन्द्रनिनादाकर्णनोदितानुरागैः प्रावृडारम्भकालजनितोत्सवारम्भैर्मयूरैः प्रारब्धनृत्तवृत्तान्तम्[6], धूमवेल्लालिलागत(?)विलासिनीजनानां करतलकिसलयरसभावसद्भावप्रकटनकुशलशशिवदनाङ्गनानर्तनाहृतपौरयुवतिजनचित्तान्तरम्, समस्तसिद्धान्तसागरपारगमुनिशतसंकुलं देवकुलमासीत् कन्नेश्वरं[7] नाम स्वनामधेयाङ्कितम्।

असावकालवर्ष इति विख्यातस्तस्य सूनुराननतनृपमुकुटमणिगणकिरणजालरञ्जितपादयुगलनखमयूखप्रभाभासितसिंहासनोपान्तः कान्ताजनकटकखचितपद्मरागदीधितिविसरशुम्भत्कुसुम्भरसरञ्जितानिजधवलवर्ज्य[8]मानचारुचामरनिचयविख्यातः[9] प्राज्यराज्याभिषेकान्तरैश्वर्यसुखसमानुभवस्थितिः निजतुरंगमैकविजयानीतराजलक्ष्मीसनाथो महीनाथो यः कल्पाङ्घ्रिपः संसेव[10] (?) चिन्तामणिरिति दृढं[11] यं वदन्त्यर्थिनः नित्यप्रीत्या प्राप्तार्थसंपदसौ प्रभूतवर्ष इति विख्यातो भूपचक्रचूडामणिः तस्यानुजः धारा-

१. 'तटर्पितासु ज्वाल—' इति मुद्रितः पाठः. २. 'पौरजनेर्' इति मुद्रितः पाठः. ३. 'व्यतीत्यम् आवर्धते' इति मुद्रितः पाठः. ४. 'पृथ्वीम्' इति मुद्रितः पाठः. ५. 'नमस्क्रयमाणम् एव' इति मुद्रितः पाठः. ६. 'वृत्तनृत्तान्तम्' इति मुद्रितः पाठः. ७. कन्नेश्वर इति राज्ञोऽकालवर्षस्य नामान्तरम्. ८. 'विज्यमान' इति मुद्रितः पाठः. ९. 'विचयविख्यातम्' इति मुद्रितः पाठः. १०. 'सत्यमेव' इत्यपेक्षितम्. ११. 'धुढं' इति मुद्रितः पाठः.

वर्षश्रीपृथ्वीवल्लभमहाराजाधिराजपरमेश्वरः खण्डितारिमण्डलासिभा-
सितदोर्दण्डः पुण्डरीक इव बलिरिपुमर्दनाक्रान्तसकलभुवनतलः मुक्ता-
नेकराज्यभारसमोद्वहनसमर्थः हिमशैलविशालोरःस्थलेन राजलक्ष्मीविहर-
णमणिकुट्टिमेन चतुराङ्गनालिङ्गनतुङ्गकुचकुङ्कुममुद्राङ्कितोद्दितरोमाञ्चाजितेन
स्वभुजासिधारादलितसमस्तगलितमुक्ताफलविसरविराजितारिबलहस्तिह-
स्तास्फालनदन्तकोटिघट्टितवनीकृतेन विराजमानः त्रिपुरहरवृषभककुदा-
कारोन्नतविकटांसतटनिकटदोधूयमानचारुचामरचयः फेनपिण्डपाण्डुरप्रभा-
वोद्भिन्नच्छविना वृत्तेनापि चतुराकारेण सितातपत्रेणाच्छादितसमस्तदिग्व-
लयो रिपुजनहृदयविदारणदारुणेन सकलभुवनाधिपत्यलक्ष्मीलीलामुत्पाद-
यता प्रहतपटहढक्कागम्भीरध्वानेन घनाघनगर्जनानुकारिणा अभ्यागतानां
विनोदनिर्गमः (?) स्वकीयां सीमलतां (?) परनृपचेतांसि च दातुमिवो-
च्चैरविलोलप्रकटितराज्यचिह्नः (?) तुरङ्गमखरखुरोत्थितपांशुपटलसमुत्थित-
जलदसंचयानेकमत्तद्विपकरटतटगलितदानधारासन्तानप्रशमितमहीपरागः ।

> यस्य श्री चपलोदया सुरतरङ्गालोलसमास्फालना-
> न्निर्भिन्नद्विपयानपात्रगतया ये संचलच्चेतसः । (?)
> तस्मिन्नेव समेत्य सारविभवं संत्यज्य राज्यं रणे
> भग्ना मोहवशात्स्वयं खलु दिशामन्तं भजन्तेऽरयः ॥

> इदं कियद्भूतलमत्र सम्यक्स्थातुं महत्संकटमित्युदग्रम् ।
> स्वस्यावकाशं न करोति यस्य यशो दिशां भित्तिविभेदनानि ॥

अनवरतदानधारावर्षागमेन नृपजननतायाः धारावर्ष इति जगति वि-
ख्यातः सर्वलोकवल्लभतया वल्लभ इति । तस्यात्मजो निजभुजबलसमानी-

---

१. 'पुण्डरीकाक्ष' इत्यपेक्षितम्. २. 'स्थालन' इति मुद्रितः पाठः. ३. 'विदारण' इति मुद्रितः पाठः. ४. 'हास्ता—' इति मुद्रितः पाठः. ५. 'घणाकृतेन' इति मुद्रितः पाठः. ६. 'पाण्डर' इति मुद्रितः पाठः. ७. 'चतुरस्राकारेण' इत्युचितं भाति. ८. 'आतपत्रेन' इति मुद्रितः पाठः. ९. 'दारुणेन' इति मुद्रितः पाठः. १०. 'पटढका' इति मुद्रितः पाठः. ११. 'चञ्चलतां' इति भाति. १२. 'इवोच्चै' इति मुद्रितः पाठः. १३. 'सत्यज्य' इति मुद्रितः पाठः. १४. 'तस्यात्मजा' इति मुद्रितः पाठः.

तपरनृपलक्ष्मीकरधृतधवलातपत्रनालप्रतिकूलरिपुकुलचरणनिबद्धखलखला-यमानधवलशृङ्खलारवबधिरीकृतपर्यन्तजनो निरुपमगुणगणाकर्णनसमाह्लादितमनसा साधुजनेन सदा संगीयमानशशिविशदयशोराशिराशावष्टब्धजननमनःपरिकल्पनत्रिगुणीकृतस्वकीयानुष्ठानो निष्ठितकर्तव्यः **प्रभूतवर्षश्रीपृथ्वीवल्लभ**राजाधिराजपरमेश्वरस्य प्रवर्धमानश्रीराज्यविजयसंवत्सरेषु वहत्सु । चारुचालुक्यान्वयगगनतलहरिणलाञ्छनायमान**श्रीबलवर्म**नरेन्द्रस्य सूनुः स्वविक्रमावर्जितसकलरिपुनृपशिरःशेखरार्चितचरणयुगलो **यशोवर्म**नामधेयो राजा व्यराजत । तस्य पुत्रः सुपुत्रः कुलदीपक इति पुराणवचनमवितथमिह कुर्वन्नतितरां धीराजमानो मनोजात इव मानिनीजनमनस्थलीयः (?) रणचतुरश्चतुरजनाश्रयः श्रीसमालिङ्गितविशालवक्षस्थलो नितरामशोभत । असौ महात्मा

कमलोचितसद्गुणान्तर**श्रीविमलादित्य** इति प्रतीतनामा ।
कमनीयवपुर्विलासिनीनां भ्रमदक्षिभ्रमरालिवक्रपद्मः ॥

सः प्रचण्डतरकरवालदलितरिपुनृपकरिघटाकुम्भमुक्तमुक्ताफलविकीर्णितरुचिरक्ताभिकान्तिरुचिरपरीतनिजकलत्रकण्ठः शितिकण्ठ इव महितमहिमासाध्यमानरुचिरकीर्तिरशेषगङ्गमण्डलाधिराज**श्रीचाकिराजस्य** भागिनेयः भुवि प्रकाशतयस्मि कुनुन्गिलनामदेशमयशःपराङ्मुखा मनुमार्गेण पालयति सति श्रीयापनीयनन्दिसंघपुंनागवृक्षमूलगणे श्रीकित्याचार्यान्वये बहुष्वाचार्येष्वतिक्रान्तेषु व्रतसमितिगुप्तिगुप्तमुनिवृन्दवन्दितचरणकुविलाचार्याणामासीत् (?) तस्यान्तेवासी समुपनतजनपरिश्रमाहारः स्वदा-

१. 'करे धृत' इति मुद्रितः पाठः. २. 'मानसा' इति मुद्रितः पाठः. ३. 'सङ्गीयमान' इति मुद्रितः पाठः. ४. 'वहत्सु' इति भाति. ५. 'हारिण—' इति मुद्रितः पाठः. ६. 'सूनु' इति मुद्रितः पाठः. ७. 'आवर्जित' इति मुद्रितः पाठः. ८. 'कुलदीपिक' इति मुद्रितः पाठः. ९. 'अवितथं' इति मुद्रितःपाठः. १०. 'विलासिनीना' इति मुद्रितः पाठः. ११. 'भ्रमराली' इति मुद्रितः पाठः. १२. 'करवाला' इति मुद्रितः पाठः. १३. 'नृपरकरि—' इति मुद्रितः पाठः. १४. 'कलत्रिकण्ठः' इति मुद्रितः पाठः. १५. 'प्रकाशते यस्मिन्' इति भाति. १६. 'पराङ्मुखे' इत्यपेक्षितम्. १७. 'मार्गेन पालयति' इति मुद्रितः पाठः. १८. 'आचार्य्याणाम्' इति मुद्रितः पाठः.

नसंतर्पितसमस्तविद्वज्जनो जनितमहोदयः विजयकीर्तिनाममुनिप्रभुरभूत्।

अर्ककीर्तिरिति ख्यातिमातन्वन्मुनिसत्तमः।

तस्य शिष्यत्वमायातो नायातो वशमेनेसाम्॥

तैस्मै मुनिवराय तस्य विमलादित्यस्य शणेश्वर(?)पीडापनोदाय मयूरखण्डिमधिवसति विजयस्कन्धावारे चाकिराजेन विज्ञापितो वल्लभेन्द्रः इडिगूर्विषयमध्यर्वर्तिनं जालमङ्गलनामधेयग्रामं शकनृपसंवत्सरेषु शरशिखिमुनिषु (७३५) व्यतीतेषु ज्येष्ठमासशुक्लपक्षदशम्यां पुष्यनक्षत्रे चन्द्रवारे मान्यपुरवरापरादिग्विभागालंकारभूतशिलाग्रामाजैनेन्द्रभवनाय दत्तवान् तस्य पूर्वदक्षिणापरोत्तरदिग्विभागेषु स्वस्तिमङ्गल-बेळिन्द-गुडनुरत्तरिपाल इति प्रसिद्धा ग्रामाः एवं चतुर्णां ग्रामाणां मध्ये व्यवस्थितस्य जालमङ्गलस्यायं चेतुरायधिक्रमः पुनस्तस्य सीमाविभागः ईशानतः मुकुडलदक्षिणदिग्विभागमवलोक्य एलुतग-कोडल-मूडग-केल-बन्दु इर्णय-कोषदे-पळ्ळदू-ओलगण उलि-अलरियें कोदेयालि-बेलने सयूकने-बन्दु पोल पुणसे एव कीले अन्ते पोयिए त्रिदिरूग्गेरे मुकुडलू ततः पश्चिमतः पुलिपदिय तेङ्कण पेरओल्रवेये पेरबिलिके एलगल-करण्डलो मुकुडलू अन्ते सयूकने पोगि नायमणिगेरेय तायगण्डि मुकुडलू ततः उत्तरतः बल्लगेरेय पडुव गजगोड पळम्बे पुणुसेये आनेद्लो गेरेए पुलपडिये एलगल्ल पुलिगारद गेरे मुकुडलू ततः पूर्वतः निडु विळिहक्के····दविन पुलपडिये कल्लगार गल्ले पोल एल्ले पुणुसये बट्टपुणुसये बेळने बन्दु ईशानद मुकुडलोलू कूडि निन्दत्तू। राचमल्लगामुण्डनुं शीरनुं गङ्गगामुण्डनुं मारेयनुं बेलगेरेयओडेयोरुं मोदबागे-एलपदिम्बरुं कुनुन्गिल-अयसार्बरुं साक्षियागे कोट्टत्तू। नमः।

---

१. 'अभाद्' इति मुद्रितः पाठः. २. 'एनसा' इति मुद्रितः पाठः. ३. 'तस्मे' इति मुद्रितः पाठः. ४. 'विमलादित्यास्य' इति मुद्रितः पाठः. ५. 'वसती' इति मुद्रितः पाठः. ६. 'वार्त्तिन' इति मुद्रितः पाठः. ७. 'जिनेन्द्र' इति भाति. ८. 'ग्रामानां' इति मुद्रितः पाठः. ९. 'चतुरत्रधिक्रमः' इति भाति.

अद्भिर्दत्तं त्रिभिर्भुक्तं षड्भिश्च परिपालितम् ।
एतानि न निवर्तन्ते पूर्वराजकृतानि च ॥
स्वं दातुं सुमहच्छक्यं[1] दुःखमन्यस्य पालनम् ।
दानं वा पालनं वेति[2] दानाच्छ्रेयोऽनुपालनम् ॥
स्वदत्तां परदत्तां वा यो हरेत[3] वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्टाया जायते क्रिमिः ॥
देवस्वं [हि] विषं घोरं कालकूटसमप्रभम् ।
विषमेकाकिनं हन्ति देवस्वं पुत्रपौत्रकम् ॥

(इण्डियन् आण्टिक्वेरी १२।१३-१६)

(१२)

मथनदेवमहीपतेर्दानपत्रम्[4] ।

ॐ स्वस्ति । परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीक्षितिपालदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीविजयपालदेवानाम-भिप्रवर्धमानकल्याणविजयराज्ये संवत्सरशतेषु दशसु षोडशोत्तरकेषु माघमाससितपक्षत्रयोदश्यां शनियुक्तायामेवं १०१६ माघसुदि १३ शनावद्य श्रीराज्यपुरावस्थितो महाराजाधिराजपरमेश्वरश्रीमथनदेवो महा-

१. 'सुमच्छक्यं' इति मुद्रितः पाठः. २. 'वेत्ति' इति मुद्रितः पाठः. ३. 'हरेति' इति मुद्रितः पाठः. ४. एतल्लेखशिला अलवरनगरे पण्डितश्रीभवानन्दोदयानन्दरामचन्द्रशर्मणां सदने वर्तते. तैरेव मुद्रितं स्वहस्तलिखितं च तत्प्रतिरूपकमुपयुक्तेन टिप्पणेनालंकृत्यास्मभ्यं प्रहितमिति भूयसीं तदुपकृतिं प्रणतिपुरःसरं स्वीकुर्मः. ५. विजयपालनामा तत्समये सुप्रसिद्धो महीपतिरासीत्, यत्संततिरधुना 'करोली'नगरे राज्यं करोति. विजयपालसमये तु तद्राजधानी 'बयाना'नगरमभूत्, यदधुना भरतपुरराज्यान्तर्गतं वर्तते. ६. अलवरनगराद्दक्षिणदिश्यष्टादशक्रोशान्तरे पर्वतस्थल्यामधुना 'राजोर'नाम्ना प्रसिद्धो ग्राम एव राज्यपुरमासीत्. अद्यापि तत्र चतुर्दिक्षु छिन्नभिन्नगोपुरप्राकारापणदेवालयादीनि प्राचीननगरचिह्नानि दृश्यन्ते. लभ्यन्ते चेतस्ततः प्रकीर्णा भूयस्यः खण्डिता बौद्धप्रतिमाः. विलोक्यन्ते च प्राचीनत्वानुमापका बहवश्चतुष्कोणाः कूपाः. तत्र च कथाशेषतां गतेषु परःशतेषु देवालयेष्वधुना नीलकण्ठमहादेवस्याशावरीदेव्याश्च त्रुटितप्रायं मन्दिरमवशिष्यते. श्रावणमासे च नीलकण्ठदर्शनार्थं सर्वतो जनाः समायान्ति. ७. मथनदेवस्तु विजयपालस्य कश्चन सामन्त आसीदित्यनुमीयते.

राजाधिराजश्रीसावटसूनुर्गुर्जरप्रतीहारान्वयः कुशली स्वभोगावाप्तवंशपोतकभोगसंबद्धव्याघ्रवाटकग्रामे समुपगतान्सर्वानेव राजपुरुषान्नियोगस्थान्क्रमागमिकान्नियुक्तकानियुक्तकांस्तन्निवासिमहत्तरमहत्तमवणिक्प्रवणिप्रमुखजनपदांश्च यथार्हं मानयति बोधयति समादिशति च । अस्तु वः संविदितम्—तृणाग्रलग्नजलबिन्दुसंस्थानास्थिराणि शरीरसंपज्जीवितानीतीमां संसारासारतां, कीर्तिमूर्तेश्च कल्पस्थायितां ज्ञात्वा मया पित्रोरात्मनश्च पुण्ययशोभिवृद्धये ऐहिकामुष्मिकफलनिमित्तं संसारार्णवतरणार्थं स्वर्गमार्गार्गलोद्घाटनहेतोः स्वमातृश्रीलच्छुकानाम्ना श्रीलच्छुकेश्वरमहादेवाय प्रत्यहं २ स्नपनसमालभनपुष्पधूपनैवेद्यदीपतैलमुधामिन्दूरलागनखण्डस्फुटितसमारचनप्रेक्षणकपवित्रकारोहणकर्मकरवाटिकापालादिव्ययार्थमुपरि सूचितव्याघ्रवाटकग्रामः स्वसीमातृणयूतिगोक(च)रपर्यन्तः सोद्रङ्गः सवृक्षमालाकुलः सकलाभोगम(सकलभोगसं)युतादायाभ्यामपि समस्तसस्यानां भागखलभिक्षाप्रस्थकस्कन्धकमार्गणकदण्डदशापराधदानिधिनिधानापुत्रिकाधननष्टिभरटोचितानुचितनिबद्धानिबद्धसमस्तप्रत्यादेयसहितस्तथैतत्प्रत्यासन्नश्रीगुर्जरवाहितसमस्तक्षेत्रसमेतश्चाकिंचित्प्रग्राह्योऽद्य पुण्येऽहनि स्नात्वा देवस्य प्रतिष्ठाकाले उदकपूर्वं परिकल्प्य शासनेन दत्तः । मत्वैवमद्य दिनादारभ्य श्रीमदामर्दकविनिर्गतश्रीसोपुरीयसंतत्यां श्रीछात्रशिवे श्रीगोपालीदेवीतडागपालीमठसंबद्धश्रीराज्यपुरे श्रीनित्यप्रमुदितदेवमठे श्रीश्रीकण्ठाचार्यशिष्यश्रीरूपशिवाचार्यस्तच्छिष्यश्रीमदोंकारशिवाचार्यस्यास्खलितब्रह्मचर्यावाप्तमहामहिम्नः परमयशोराशेः शिष्यप्रतिशिष्यक्रमेण देवोपयोगार्थं तत्रिमव्यवच्छेदेनाचन्द्रार्कं यावत्कुर्वतः कारयतो वास्मद्वंशजैरन्यतरैर्वा भाविभिर्भूपालैः कालकालेष्वपि परिपन्थना न कार्या । प्रत्युतास्मत्कृतप्रार्थनया सदा तत्रिसानाथ्यं बोढव्यम् । यतः समानैवेयं पुण्यफलावाप्तिरनुमन्तव्या । उक्तं च भगवता परमर्षिणा वेदव्यासेन व्यासेन—

'बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

१. अयं ग्रामोऽधुना 'बाघोर'नाम्ना प्रसिद्धोऽस्ति.

आदित्यो वरुणो वायुर्ब्रह्मा विष्णुर्हुताशनः ।
भगवाञ्शूलपाणिश्च अभिनन्दति भूमिदम् ॥
षष्टिर्वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरकं वसेत् ॥'

यैर्वाञ्छितं शिशिरदीधितिशुभ्रकीर्ते-
र्यैश्चामरप्रणयिनीपरिरम्भणस्य ।
ते साधवो नहि हरन्ति परेण दत्तां
दानाद्वदन्ति परिपालनमेव साधु ॥

शासनं कृतवान्देवो लिखितं तस्य सूनुना ।
व्यक्तं सूरप्रसादेन उत्कीर्णं हरिणा ततः ॥ इति ॥

तथामुष्मै देवाय पार्श्वदेवकुलिकाचतुष्टया ४ राजधान्यां प्रतिष्ठिताविनायकसहितायं हट्टदाने गोनीं प्रतिहट्टव्यावहारिकाविं २ घटककूपकं प्रति घृतस्य तैलस्य च पलिके द्वे २ वीथीं प्रति मासि २ विं २ तथा बहिः प्रविष्टचोह्लिकां प्रति पर्णानां ५० एतद्देवस्य कृतमिति॥ श्रीमथनः ॥ ९

(१२)

श्रीपृथ्वीकोङ्गणिमहाराजस्य दानपत्रम् ।

स्वस्ति जितं भगवता गतघनगगनाभेन पद्मनाभेन । श्रीमज्जाह्नवेयकुलामलव्योमावभासनभास्करः स्वखड्गैकप्रहारखण्डितमहाशिलास्तम्भलब्धबलपराक्रमो दारुणारिगणविदारणोपलब्धव्रणविभूषणविभूषितः काण्वायनसगोत्रः श्रीमत्कोङ्गणिवर्मधर्ममहाधिराजः,तस्य पुत्रः पितुरन्वागतगुणयुक्तो विद्याविनयविहितवृत्तः सम्यक्प्रजापालनमात्राधिगतराज्यप्रयोजनो विद्वत्कविकाञ्चननिकषोपलभूतो नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो दत्तकसूत्र-

१. 'कुलामलाव्योमा' इति मुद्रितः पाठः. २. 'पराक्रमोदारणा' इति मुद्रितः पाठः. ३. 'पुत्र' इति मुद्रितः पाठः. ४. 'विहीत' इति मुद्रितः पाठः.

वृत्तेः प्रणेता श्रीमान्**माधव**महाधिराजः, तत्पुत्रः पितृपैतामहगुणयुक्तोऽने-
कचातुर्दन्तयुद्धावाप्तचतुरुदधिसलिलस्वादितयशाः श्रीमद्**हरिवर्म**महाधि-
राजः, तस्य पुत्रो द्विजगुरुदेवतापूजनपरो नारायणचरणानुध्यातः श्रीमा-
न्**विष्णुगोप**महाधिराजः, तत्पुत्रस्त्र्यम्बकचरणाम्भोरुहरजःपवित्रीकृतोत्त-
माङ्गः स्वभुजबलपराक्रमक्रयक्रीतराज्यः कलियुगबलपङ्कावसन्नधर्मवृषो-
द्धरणनित्यसंनद्धः श्रीमान्**माधव**महाधिराजः, तत्पुत्रः श्रीमत्कदम्बकुलगग-
नगभस्तिमालिनः कृष्णवर्ममहाधिराजस्य प्रियभागिनेयो विद्याविनया-
तिशयपरिपूरितान्तरात्मा निरवग्रहप्रधनशौर्यो विद्वत्सु प्रथमगण्यः श्रीमा-
न्**कोगणि**महाधिराजः **अविनीत**नामा, तत्पुत्रो विजृम्भमाणशक्तित्रयः
अन्दरिहू-अलत्तुपू-पौरुळरे-पेलूनग-राज्यानेकसमरमुखमखहुतशूरपुरुषपशू-
पहारविघसविहस्तीकृतकृतान्ताग्निमुखः किरातार्जुनीयपञ्चदशसर्गटीका-
कारो **दुर्विनीत**नामधेयः, तस्य पुत्रो दुर्दान्तविमर्दविमृदितविश्वंभरादि-
पश्चालिमालामकरन्दपुञ्जपिञ्जरीक्रियमाणचरणयुगलनलिनो **मुष्कर**नाम-
धेयः, तस्य पुत्रश्चतुर्दशविद्यास्थानाधिगतविमलमतिः विशेषतो नवको-
शस्य नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो रिपुतिमिरनिकरनिराकरणोदय-
भास्करः श्री**विक्रम**प्रथितनामधेयः, तस्य पुत्रोऽनेकसमरसंपादितविजृम्भित-
द्विरदरदनकुलिशाघातव्रणसंरूढस्वास्थ्यद्विजय(?)लक्षणलक्षीकृतविशाल-
वक्षःस्थलः समधिगतसकलशास्त्रार्थितत्त्वः समाराधितत्रिवर्गो निरवद्य-
चरितः प्रतिदिनमभिवर्धमानप्रभावो **भूविक्रम**नामधेयः । अपि च ।

नानाहेतिप्रहारप्रतिहतसुभटारामवाटोत्थितासृ-
ग्धारास्वादामृताशक्षुभितपरिसरभ्रभ्रमंरुद्धसीमे ।
सामन्तान्पल्लवेन्द्रान्नरपतिमजयद्यो विलन्दाभिधाने
राजा श्रीवल्लभाख्यः समरशतजयावाप्तलक्ष्मीविलासः ॥

तस्यानुजो नतनरेन्द्रकिरीटकोटि-
रत्नार्कदीधितिविराजितपादपद्मः ।

१. 'सलील' इति मुद्रितः पाठः. २. 'कित' इति मुद्रितः पाठः. ३. 'प्रधान' इति मुद्रितः पाठः.

लक्ष्म्याः स्वयंवृतपतिर्नवकामनामा
शिष्टप्रियोऽरिगणदारणलब्धकीर्तिः॥

तस्य कोंगणिमहाराजस्य सीमेश्वरापरनामधेयस्य पौत्रः समवनतसमस्तसामन्तमुकुटतटघटितबहुलरत्नविलसदमरधनुःखण्डमण्डितचरणनखमण्डलो नारायणे निहितभक्तिः शूरपुरुषतुरगनरवारणघटासंघट्टदारुणसमरशिरसि निहितात्मकोपो भीमकोपः प्रकटरतिसमयसमनुवर्तनचतुरयुवतिजनलोकभर्ता लोकभर्तः मुदुर्धरानेकयुद्धमूर्धन्यलब्धविजयसंपदहितगजघटाकेसरी राजकेसरी। अपि च।

यो गङ्गान्वयनिर्मलाम्बरतलव्याभासनप्रोल्लस-
न्मार्तण्डोऽरिभयंकरः शुभकरः सन्मार्गरक्षाकरः।
सौराज्यं समुपेत्य राज्यमविता राजन्यतारोत्तमो
राजा श्रीपुरुषेश्वरो विजयते राजन्यचूडामणिः॥

कामं रामः स चापे दशरथतनयो विक्रमे जामदग्र्यः
प्राज्ये वीर्ये बलारिर्बहुमहसि रविः स्वप्रभुत्वे धनेशः।
भूयो विख्यातशक्तिः स्फुटतरमखिलप्राणभाजां विधाता
धात्रा सृष्टः प्रजानां पतिरिति कवयो यं प्रशंसन्ति नित्यम्॥

तेन प्रतिदिनप्रवृत्तमहादानजनितपुण्याहघोषमुखरितमन्दिरोदरेण श्रीपुरुषप्रथमनामधेयेन पृथ्वीकोङ्गणिमहाराजेन अष्टानवत्युत्तरषट्छतेषु(६९८) शकवर्षेष्वावर्तितेष्वात्मनः प्रवर्धमानविजयवीर्यसंवत्सरे पञ्चाशत्तमे प्रवर्धमाने मान्यपुरमधिवसति विजयस्कन्दावारे श्रीमूलमूलशरणाभिनन्दितनन्दिसंघान्वय-एरेगित्तुर्नाम्नि गणे मूलिकल्गच्छे स्वच्छतरगुणाकिर(?)-प्रततिप्रह्लादितसकललोकश्चन्द्र इवापरश्चन्द्रनन्दिनामगुरुरासीत्। तस्य शिष्यः समस्तविबुधलोकपरिरक्षणक्षमात्मशक्तिः परमेश्वरलालनीयमहिमा कुमारवद्द्वितीयः कुमारनन्दिनामा मुनिपतिरभवत्। तस्यान्तेवासी समधिगतसकलतत्त्वार्थसमर्पितबुधसार्थसंपत्संपादितकीर्तिः कीर्तिनन्द्याचार्यो नाम महामुनिः समजनि। तस्य प्रियशिष्यः शिष्यजनकमलाकर-

प्रबोधजनकः मिथ्याज्ञानसंततसनुतससन्मानात्तक(?)सद्धर्मव्योमावभास-नभास्करो विमलचन्द्राचार्यः समुदपादि । तस्य महर्षेर्धर्मोपदेशनया श्रीमद्बाणकलकलः (?) सर्वतपोमहानदीप्रवाहः बाहादण्डमण्डलाखण्डितारिमण्डलद्रुमषण्डो डुण्डुप्रथमनामधेयो निर्गुण्डयुवराजो जज्ञे । तस्य प्रियात्मज आत्मजनितनयविशेषनिःशेषीकृतरिपुलोकः लोकहितः मधुरमनोहरचरितः चरितार्थत्रिकरणप्रवृत्तिः परमगूळप्रथम[नाम]धेयः श्रीपृथ्वीनिर्गुण्डराजोऽजायत । पल्लवाधिराजप्रियात्मजायां सगरकुलतिलकान्मरुवर्मणो जाता कुण्डव्वीनामधेया भर्तृभावनाविर्बभूव भार्या । तया सततप्रवर्तितधर्मकार्यया निर्मिताय श्रीपुरोत्तरदिशमलंकुर्वते लोकतिलकधाम्ने जिनभवनाय खण्डस्फुटितनवसंस्कारदेवपूजादानधर्मप्रवर्तनार्थं तस्यैव पृथ्वीनिर्गुण्डराजस्य विज्ञापनया महाराजाधिराजपरमेश्वरश्रीजसहितदेवेन निर्गुण्डविषयान्तःपातिपोन्नळ्लिनामा ग्रामः सर्वपरिहारोपेतो दत्तः । तस्य सीमान्तराणि—पूर्वस्यां दिशि नोलिबेळदा बेल्गल्मोराडि । पूर्वदक्षिणस्यां दिशि पण्यङ्गेरि । दक्षिणस्यां दिशि बेल्गाल्लिगेरेया दिळगेरेया पळ्ळदाकूदल् । दक्षिणपश्चिमायां दिशि जैदराकेय्या बेल्गल्मोरड्डु । पश्चिमायां दिशि हेङ्केवी ताळ्तुवायराकेरि । पश्चिमोत्तरस्यां दिशि पुणुसेयागोट्टगालाकलकुप्पे । उत्तरस्यां दिशि सामगेरेया पळ्ळदा पेर्मुरिके। उत्तरपूर्वस्यां दिशि कलम्बेट्टिगट्टु। ईशान्यामन्यानि क्षेत्रान्तराणि दत्तानि डुण्डुसमुद्रदावयलुल्किरुदारामेगेपदिरकण्डुगम्मण्णमपालेया इरनल्लुराजार्पाळुदिर्कण्डुगं श्रीवरदाडुण्डुगामण्डराताण्डडाडुवयाण्डुताण्डुश्रीवरदावयलुल्कम्मरगट्टिनल्लिइर्कण्डुगं कळनि पेर्गेरेया केलगे आरुगण्डुगं एरेपूळिगेरेया कोयिल्गोदाएदा इर्पत्तुगुण्डुगं बेदे अदुवश्रीवरदा बडगणापट्टुवणाकोनुळन् देवं गेरीमदमं ऐदिदं मूवत्ताडिण्डुमनेयमनेताणम् । अस्य दान[स्य] साक्षिणोऽष्टादशप्रकृतयः । अस्य दानस्य साक्षिणः षण्णवतिसहस्रविषयप्रकृतयः । योऽस्यापहर्ता लोभान्मोहात्प्रमादेन वा स पञ्च-

भिर्महाद्भिः पातकैः संयुक्तो भवति । यो रक्षति स पुण्यभाग्भवति । अपि चात्र मनुगीताः श्लोकाः—

'स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिर्वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
स्वं दातुं सुमहच्छक्यं दुःखमन्यस्य पालनम् ।
दानं वा पालनं वेति दानाच्छ्रेयोऽनुपालनम् ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
देवस्वं तु विषं घोरं न विषं विषमुच्यते ।
विषमेकाकिनं हन्ति देवस्वं पुत्रपौत्रकम् ॥'

सर्वकलाधारभूतचित्रकलाभिज्ञेन विश्वकर्माचार्येणेदं शासनं लिखितम् । चतुष्कण्डुकव्रीहिबीजमात्रं द्विकण्डुककङ्गुक्षेत्रं तदपि ब्रह्मदेयमिव रक्षणीयम् ॥

(इण्डियन् आण्टिक्केरी २।१५६–१५९)

---

(१४)

यादववंशोद्भवस्य वीरबल्लालदेवमहीपतेर्दानपत्रम् ।

स्वस्ति ॥

त्रैलोक्यं पाल्यते येन सदयं सत्त्ववृत्तिना ।
स देवो यदुशार्दूलः श्रीपतिः श्रेयसेऽस्तु वः ॥
देवः समस्तसामन्तमस्तकन्यस्तशासनः ।
आचन्द्रार्कं नृपः पायाद्भुवमम्भोधिमेखलाम् ॥
आसीत्क्षितौ क्षत्रियपुंगवानां शिरोमणिः श्रीयदुनामधेयः ।
यदन्ववाये स हरिर्धरित्रीभारावतारार्थमजोऽपि जातः ॥
तदन्ववाये बहवो बभूवुर्भुजोद्भवा विश्रुतकीर्तिभाजः ।
अद्यापि लोके चरिताद्भुतानि येषां पुराणेषु पठन्ति सन्तः ॥

कालक्रमेणाथ बभूव कश्चिन्महीपतिस्तत्र **सलाभिधानः**।
कुलस्य कृत्वा व्यपदेशमन्यं विस्मारितो येन **यदुस्तदाद्यः**॥
केनापि व्रतिपतिना स्वदेवकार्ये शार्दूलं ग्रसितुमुपागतं निहन्तुम्।
आदिष्टः शशकपुरे स होयसलेति प्रापत्तं किल विनिहत्य **होयसला**ख्याम्॥
ततः प्रभृति तद्वंशे प्रवृत्तं होयसलाख्यया।
शार्दूलश्च ध्वजस्यासीदङ्कः शत्रुभयंकरः॥
अपरेषु च तद्राज्यं भुक्तवत्स्वथ राजसु।
विनयादित्य इत्यासीत्क्रमशः पृथिवीपतिः॥
इरेयङ्गाभिधानोऽभून्नृपतिस्तस्य चात्मजः।
गुणैरनन्यसामान्यैः प्रख्यातः पृथिवीतले॥
अथ तस्यापि **बल्लाल-विष्णुवर्धन**नामकौ।
अभूतामात्मजन्मानावु**दयादित्य**पश्चिमौ॥
तेजस्विनौ भूतहितप्रवृत्तौ लोकपूजितौ।
यावभासयतां विश्वं सूर्याचन्द्रमसाविव॥
रणशिरसि येन बलिना गजपतिमाक्रम्य निजतुरङ्गेण।
विनिपात्य जगद्देवं सप्ताङ्गं तस्य चापहृतम्॥
तत्राग्रजे निजं राज्यमुपभुक्तवति क्रमात्।
अनुजोऽपि चिरं राज्यं बुभुजे विष्णुवर्धनः॥
यो देशमग्रहारीकृत्य समस्तं निजं स्वराज्यार्थम्।
आचक्रामोच्चङ्गीप्रभृतीनन्यान्द्विषद्देशान्॥
आरभ्य निजनिवासाद्बल्वोलपर्यन्तमखिलमहिविषयम्।
आक्रम्य येन धौतं तुरगवपुः कृष्णवेणायाम्[1]॥
यः स्मार्यते नियुक्तैः प्रत्युपचारं नृपेष्वसाध्यतया।
परमर्दिदेवनृपतेर्होयसलमवधारयेति मुहुः॥
येनाग्रहाराः क्रतवो महादानानि षोडश।
अन्यान्यपि च पुण्यानि पौनःपुन्येन चक्रिरे॥

---

1. 'कृष्णवेर्णायाम्' इति मुद्रितः पाठः.

नरसिंह इति ख्यातो जातस्तस्यात्मजो नृपः।
यस्य वर्णयितुं नैव शक्यन्ते मादृशैर्गुणाः॥
तस्य श्रीरिव दैत्यारेः शंकरस्येव पार्वती।
आसीदेचलदेवीति महादेवी कुलोद्गता॥
तेनापि तस्यामतुलप्रभावो वज्रेश्वराराधनलब्धराज्यः।
जातः सुतो दोर्बलचक्रवर्ती **श्रीवीरबल्लाल** इति प्रसिद्धः॥
माध्यस्थ्येनोन्नत्या काञ्चनविभवेन विबुधसेव्यतया।
यो जङ्गम इव मेरुर्महीभृतामग्रणीर्जगति॥
सीमातिक्रमभीरोरतिगम्भीरस्य विपुलसत्त्वस्य।
रत्नाकरस्य यस्य च न कोऽपि लक्ष्मीवतो भेदः[1]॥
चरितं भरतादीनामपि भुवने तावदेव बोध्यमिह।
लोकोत्तरा न यावद्दृश्यन्ते यस्य साधुगुणाः॥
विष्णौ निसर्गसिद्धां भक्तिं यस्याद्य पश्यतां पुंसाम्।
प्रह्लादादिकथा[2] अपि न विस्मयाय प्रकल्पन्ते॥
तन्न तपस्तन्नेष्टं तन्न हुतं तन्न दानमस्तीह।
असकृन्न येन विहितं देशे काले च पात्रे च॥
स्त्रीष्वर्भकेषु शूद्रेष्वन्येष्वपि येषुकेषुचिज्जगति।
सोऽस्ति न जनो विधत्ते यः पापं यत्र शासितरि॥
षट्तर्ककाव्यनाटकवात्स्यायनभरतराजनीतिषु च।
अन्येषु तेषु तेषु च शास्त्रेष्वखिलेषु यः कुशलः॥
सर्वेषु दर्शनेषु च भुवि तार्किकचक्रवर्तिनो यस्य।
नैवास्ति प्रतिवादी वादिमदद्विरदकेसरिणः॥
सर्वायुधाजीवपुरःसरेण समस्तविद्वज्जनवल्लभेन।
शस्त्राणि शास्त्राणि च येन लोके सनाथतामद्य चिराद्गतानि॥
यन्नामधेयमपि विश्वविलासिनीनां
लोके वशीकरणकर्मणि सिद्धमन्त्रः।

१. 'लक्ष्मीव्रतोर्' इति मुद्रितः पाठः. २. 'प्रहारादि' इति मुद्रितः पाठः.

तस्य प्रगल्भवनिताकुसुमायुधस्य
सौभाग्यवर्णनविधौ कतमः समर्थः ॥

विष्वग्वाजिखुरप्रहारदलितक्षोणीतलप्रोच्चल-
द्धूलीध्वान्तनिमीलिताखिलदिशि द्वन्द्वप्रदोषागमे ।
दूतीवातिपटीयसी मुहुरिह स्वःसुन्दरीभिः समं
वीराणामभिसारणं वितनुते यत्खड्गयष्टिर्द्विषाम् ॥

शश्वद्यत्समरावतारपिशुनेष्वाहन्यमानेष्वित-
स्तूर्येषु स्वपतिप्रणाशचकिताः क्षुभ्यन्त्यरातिस्त्रियः ।
अप्येताः सुभटस्वयंवरकृते मन्दारमालामितो
हस्ताभ्यां परिगृह्य नाकवनिताः सज्जीभवन्त्यम्बरे ॥

यस्मिन्होय्सलभूमिपालधरणीसाम्राज्यसिंहासना-
दारूढे सति मत्तवारणपतेर्युद्धाय पूर्वासनम् ।
सद्यः स्वस्वकुलक्रमागतमहीसाम्राज्यसिंहासना-
त्प्रत्यर्थिक्षितिपालकैरपि रणे वल्मीकमारुह्यते ॥

यस्मिन्दिग्विजयार्थमुद्यतवति प्रस्थानभेरीरवे
गम्भीरे स्फुटमुच्चरत्यवनिभृत्स्वन्येषु वार्तैव का ।
दूरादङ्गकलिङ्गवङ्गमगधाश्चोलास्तथा मालवाः
पाण्ड्याः केरलगुर्जरप्रभृतयोऽप्युज्झन्ति सद्यो धृतिम् ॥

न्यक्कारेण पितुः श्रियं कलचुरिक्षत्रान्वयात्कर्षता
येनैकेन पि(हि) तूबरेण करिणा षष्टिर्जिता दन्तिनाम् ।
तं च ब्रह्मचमूपतिं गजघटावष्टब्धसैन्यं हठा-
द्येनाश्वैरपि केवलैर्भुजभृता निर्जित्य राज्यं हृतम् ॥

उच्छिद्य जैत्रसिंहं दक्षिणमिव तस्य भिल्लमस्य भुजम् ।
वीरेण येन लब्धं कुन्तलदेशाधिपत्यमपि ॥

---

१. 'विष्वद्वाजि' इति मुद्रितः पाठः. २. 'पदीयसी' इति मुद्रितः पाठः. ३. 'युद्धास्य' इति मुद्रितः पाठः.

स च समस्तभुवनाश्रयश्रीपृथ्वीवल्लभमहाराजाधिराजपरमेश्वरपरमभट्टारकद्वारावतीपुरवराधीश्वरयादवकुलाम्बरद्युमणिसम्यक्त्वचूडामणिमलपरालगण्डकदनप्रचण्ड(?)-असहायशूर-एकाङ्गवीर-शनिवारसिद्धि-गिरिदुर्गमल्ल-चलदङ्कराम-इत्यादिसमस्तप्रशस्तनामावलीविराजमानः[1] श्रीमत्प्रतापचक्रवर्तिश्रीवीरबल्लालदेवो लोक्किगुण्डिनिवेशितविजयस्कन्धावारः

अस्ति स्वयंभूः क्रतुकाभिधाने ग्रामे त्रिकूटेश्वरनामधेयः।
शिवः समस्तक्षितिपालमौलिमणिप्रभारञ्जितरम्यपीठः॥

तस्य स्थानाचार्यः कालमुखाचार्यसंततिप्रभवः।
सिद्धान्तिचन्द्रभूषणपण्डितदेवाभिधोऽस्ति मुनिः॥

तं त्रिकूटेश्वरं देवं लिङ्गैः स्वैः स्थावरैस्त्रिभिः।
जङ्गमेन समं[2] येन चतुःकूटेश्वरं विदुः॥

सततशरीरार्धस्थितगौरीभृशसंगमाद्धधूध्वप्य(?)।
शिव इव विराजमानो[3] यो भाति ब्रह्मचर्यस्तु(?)॥

यश्च

कुलशैलेषु चलत्स्वपि मर्यादामतिपतत्सु सिन्धुषु च।
सत्यं न सत्यवाक्यद्वितीयनामापदि[4] त्यजति॥

अन्यत्र काव्यनाटकवात्स्यायनभरतराजनीत्यादौ।
नैव कथा सिद्धान्तेष्वखिलेष्वपि यस्य नास्ति समः॥

येन च

आदृश्येत कदाचिद्विश्रामो गतिषु [जल]तरङ्गाणाम्।
न त्वेव कृपाभाजा प्रदीयमानेऽश्नतां सत्रे॥

अन्नेनैव न केवलमपि तु सुवर्णौषधाम्बुवस्त्राद्यैः।
अन्तो नास्ति जनानां निरन्तरं तृप्यमाणानाम्[5]॥

---

१. 'विराजमानर्' इति मुद्रितः पाठः. २. 'तमन्येन' इति मुद्रितः पाठः. ३. 'विरज्यमानो' इति मुद्रितः पाठः. ४. 'नामापति' इति मुद्रितः पाठः. ५. 'तप्यमानानाम्' इति मुद्रितः पाठः.

येन चात्र स्थाने

उद्धृत्य जीर्णमखिलं निर्माय च नूतनं पुरं रम्यम्।
देवान्तिकमानीता वेश्यावीथी स्थिता परतः॥
अमृतोपमपानीयपूर्णा पुष्करिणी कृता।
वनं च नन्दनसमं नानपुष्पलतावृतम्॥
किं जल्पनेन बहुना ग्रामप्राकारवलयबाह्यमिह।
यद्यत्समस्ति तत्तत्समस्तमपि तस्य निर्माणम्॥

तस्य भगवतश्चराचरगुरोः श्रीस्वयंभूत्रिकूटेश्वरदेवस्याङ्गरङ्गभोगखण्डस्फुटितजीर्णोद्धाराद्यर्थं विद्यादानार्थं तपोधनब्राह्मणादिभोजनार्थं बेल्वोलत्रिशतान्तर्गतहोम्बालल्लुनामधेयग्रामं पूर्वप्रसिद्धसीमासमन्वितं निधिनिक्षेपजलपाषाणारामादिसहितं त्रिभोग्याभ्यन्तरमष्टभोगतेजःस्वाम्ययुक्तं शुल्कदण्डादिसकलद्रव्योपार्जनोपेतं शकनृपकालातीतसंवत्सरशतेषु चतुर्दशाधिकेष्वेकादशसु अङ्कतोऽपि १११४ वर्तमानपरिभाविसंवत्सरान्तर्गतमार्गशीर्षपौर्णमास्यां शनैश्चरवारे सोमग्रहणे तस्य कालमुखाचार्यसोमेश्वरदेवप्रशिष्यस्य विद्याचरणदेवशिष्यस्य सत्यवाक्यापरनामधेयस्य श्रीमदाचार्यसिद्धान्तिचन्द्रभूषणपण्डितदेवस्य पादप्रक्षालनं कृत्वा राजा राजकीयैरप्यनङ्गुलिप्रेक्षणीयं सर्वनमस्यं कृत्वा धारापूर्वकं भक्त्या दत्तवान्। अस्य च धर्मस्य संरक्षणे फलमिदमुदाहरन्ति स्म तपोमहिमसाक्षात्कृतधर्मस्थितयो मन्वादयो महर्षयः—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
गण्यन्ते पांसवो भूमेर्गण्यन्ते वृष्टिबिन्दवः।
न गण्यते विधात्रापि धर्मसंरक्षणे फलम्॥

अपहरतः समर्थस्याप्युदासीनस्य तैरेव च परीतं(?) फलमुदाहृतम्।

---

१. 'नूतनपुरं' इति मुद्रितः पाठः. २. 'नन्दनसाम्यं' इति मुद्रितः पाठः. ३. 'जल्पेन' इति मुद्रितः पाठः. ४. 'समस्तं' इति मुद्रितः पाठः. ५. 'शनेश्चर' इति मुद्रितः पाठः. ६. 'राज्ञा' इति मुद्रितः पाठः.

'स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः॥
परदत्तां तु यो भूमिमुपहिंसेत्कदाचन।
स बद्धो[1] वारुणैः पाशैः क्षिप्यते पूयशोणिते॥
कुलानि तारयेत्कर्ता सप्त सप्त च सप्त च।
अधोऽधः[2] पातयेद्धर्ता सप्त सप्त च सप्त च॥
अपि गङ्गादितीर्थेषु हन्तुर्गामथवा द्विजम्।
निष्कृतिः स्यान्न देवस्वब्रह्मस्वहरणे नृणाम्॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरशायिनः।
कृष्णसर्पा हि जायन्ते देवद्रव्यापहारकाः॥
कर्मणा मनसा वाचा यः समर्थोऽप्युपेक्षते।
स स्यात्तदैव चण्डालः सर्वधर्मबहिष्कृतः॥'

अत[3] एवाह रामचन्द्रः—

'सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः॥
मद्वंशजाः परमहीपतिवंशजा वा
पापादपेतमनसो भुवि भाविभूपाः।
ये पालयन्ति मम धर्ममिमं समग्रं
तेषां मया विरचितोऽञ्जलिरेष मूर्ध्नि॥'
बल्लालदेवनृपतेरादेशादग्निशर्मणा रचिता।
शासनपद्धतिरेषा सारस्वतसार्वभौमेन॥

(इण्डियन् आण्टिक्वेरी २। २९६–३०३)

---

१. 'लब्धो' इति मुद्रितः पाठः. २. 'अहोऽधः' इति मुद्रितः पाठः. ३. 'अथ एवह' इति मुद्रितः पाठः.

(१५)

गुप्तवंशोद्भवस्य श्रीमहाभवगुप्तदेवस्य दानपत्रम् ।

स्वस्ति श्रीमहाराजसमावासिनः श्रीमतो विजयकटकात् परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीशिवगुप्तदेवपादानुध्यातपरममाहेश्वरपरमभट्टारकमहाराजाधिराजपरमेश्वरसोमकुलतिलकत्रिकलिङ्गाधिपतिमहाराजाधिराजश्रीमहाभवगुप्तदेवः कुशली कोशलदेशे योधाविषयी(ये) दारण्डाग्रामे तथा खलाण्डलग्रामे ब्राह्मणान्संपूज्य तद्विषयीयान् यथाकालाध्यासिनः समाहूत(य) सन्निवीतनियुक्तकाधिकारिकदण्डपा(पा)शिकनाटभट्टपिशुनविधिकाररोधजनराणकराजवल्लभादीन् सर्वान् समाज्ञापयति—विदितमस्तु भवतां यथास्माभिरयं ग्रामः सनिधिः सोपनिधिः शतशोऽपराधः सर्वबाधाविवर्जितः सर्वोपरिकर्तृत्वदानसहितश्चतुःसीमाद्यायत्तः सामन्त्रकः सगर्तोषरजलस्थलसहितः प्रतिनिषिद्धनाटभट्ट(ट)प्रवेशाष्टङ्गारीविनिर्गताय कोशले उर्वरावास्तव्याय भारद्वाजगोत्राय बार्हस्पत्याङ्गिरसप्रवराय वाजसनेयशाखाध्यायिने भट्टश्रीमहत्तमसाधारणाय भट्टश्रीशोभनसुताय सलिलधारापुरःसरमाचन्द्रतारकार्कज्योतिःसमकालोपभोगार्थं मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये ताम्रशासनेनाकरीकृत्य प्रतिपादितमित्यवगत्य संवरितभोगभागकरहिरण्यादिप्रत्ययमुपनयद्भिर्भवद्भिः सुखेन प्रतिवस्तव्यमिति । भाविभिश्च भूपतिभिर्दत्तिरियमस्मदीया धर्मगौरवादस्मदनुरोधात्स्वदत्तिरिवात्र पालनीया ।

तथा चोक्तं धर्मशास्त्रे—

'बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
मा भूदफलशङ्का वः परदत्तेति पार्थिवाः ।
स्वदत्तात्फलमानन्त्यं परदत्तानुपालने ॥
षष्टिवर्षसहस्राणि स्वर्गे मोदति भूमिदः ।
क्षितिपात्रान्नहर्तारद्वितयं(?) नरकं व्रजेत् ॥

अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
यः काञ्चनं गां च महीं प्रदद्याद्दत्तास्त्रयस्तेन भवन्ति लोके ॥
आस्फोटयन्ति पितरः प्रवल्गन्ति पितामहाः ।
भूमिदाता कुले जातः स नस्त्राता भविष्यति ॥
भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥
तडागानां सहस्राणि वाजपेयशतानि च ।
गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ॥
हरेत हारयेद्यस्तु मन्दबुद्धिस्तु मोहतः ।
सवंशो(संबद्धो) वारुणैः पाशैस्तिर्यग्योनिं स गच्छति ॥
सुवर्णमेकं गामेकां भूमिमप्यर्धमङ्गुलाम् ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते ॥
आदित्यो वरुणो विष्णुर्ब्रह्मा सोमो हुताशनः ।
शूलपाणिश्च भगवानभिनन्दति भूमिदम् ॥
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः ।
सर्वानेवं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥
सकलभूपालमौलिमालाविलग्नमाणिक्यमयूखपादाभिरञ्जिताङ्घ्रितं लब्धवर्णः प्रचण्डदोर्दण्डमण्डलाग्रखण्डितारातिमत्तमातङ्गविमुक्तमुक्ताफलप्रसाधिताशेषबलं महीमण्डलम्——
यः साधारणनाम्नि मन्त्रितिलके विन्यस्य सर्वागमं
चौर्योदन्वति(शौर्योदन्वति) तीव्रतेजसि धुरं राष्ट्रस्य विप्रोत्तमे ।
नानाख्यानकवीश्वरामृतरसास्वादादमर्त्यस्फुर-
त्संतोषात्सुखमन्वभूदविरतं पृथ्वीशचूडामणिः ॥

ज्ञाताशेषार्थशास्त्रस्मृतिविमलधिया वेदवेदाङ्गविद्या-
शिक्षाकल्पेतिहासप्रकटसुरसवाक्प्राप्तभूयिष्ठधाम्ना ।
नाम्ना साधारणेन द्विजवरविधिना मन्त्रिणा यस्य राज्ये
निष्ठागम्भीरमूर्तिस्त्रिजगति विदितो धर्मकंदर्पदेवः ॥

परममाहेश्वरपरमभट्टारकमहाराजाधिराजपरमेश्वरसोमकुलतिलकत्रिक-लिङ्गाधिपतिश्रीमहाभवगुप्तदेवपादपद्मप्रवर्धमानविजयराज्ये एकत्रिंशत्तमे संवत्सरे मार्गसुदितिथौ त्रयोदश्यां यत्राङ्केनापि ३४ (३१) मार्गसुदि ३ (१३) लिखितमिदं त्रिफलीताम्रशासनं महासांधिविग्रही राणकश्रीमल्लदत्तप्रतिबद्धकायस्थश्रीमाहूकेन इयद्वर्णाङ्कितं स्वेनेति ।

प्रणीतं कोशलेन्द्रेण प्रतिबोध्य महत्तम[म्] ।
श्रीदत्तपुण्डरीकाक्षः शासनं ताम्रनिर्ण्णि(र्मि)तम् ॥
तन्निर्मितं माधवेन वा सृष्टं तेनेति ॥

(इण्डियन् आण्टिक्केरी ५ । ५५-५७)

(१६)

चालुक्यवंशोद्भूतस्य श्रीपुलकेशिनः शिलालेखः ।

जयति भगवाञ्जिनेन्द्रो····ज····रक्षणजन्मनो यस्य ।
ज्ञानसमुद्रान्तर्गतमखिलं जगदन्तरीपमिव ॥
तदनु चिरमपरिचेयश्चलुक्यकुलविपुलजलनिधिर्जयति ।
पृथिवीमौलिललामो यः प्रभवः पुरुषरत्नानाम् ॥
शूरे विदुषि च विभजन्दानं मानं च युगपदेकत्र ।
अविहितयाथातथ्यो जयति च सत्याश्रयः सुचिरम् ॥
पृथिवीवल्लभशब्दो येषामन्वर्थतां चिरं जातः ।
तद्वंशे(श्ये)षु जिगीषुषु तेषु बहुष्वप्यतीतेषु ॥
नानाहेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे
नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्रे रणे ।

लक्ष्मीर्भावितचापलादिव कृता शौर्येण येनात्मसा-
द्राजासीज्जयसिंहवल्लभ इति ख्यातश्चलुक्यान्वयः ॥
तदात्मजोऽभूद्रणरागनामा दिव्यानुभावो जगदेकनाथः ।
अमानुषत्वं किल यस्य लोकः सुप्तस्य जानाति वपुःप्रकर्षात् ॥
तस्याभवत्तनूजः **पुलकेशी** यः श्रितेन्दुकान्तिरपि ।
श्रीवल्लभोऽप्ययासीद्वातापिपुरीवधूवरताम् ॥
यत्त्रिवर्गपदवीमलं क्षितौ नानुगन्तुमधुनापि राजकम् ।
भूश्च येन हयमेधयाजिना प्रापितावभृथमज्जना बभौ ॥
नलमौर्यकदम्बकालरात्रिस्तनयस्तस्य बभूव **कीर्तिवर्मा** ।
परदारनिवृत्तचित्तवृत्तेरपि धीर्यस्य रिपुश्रियानुकृष्टा ॥
रणपराक्रमलब्धजयश्रिया सपदि येन विरुग्णमशेषतः ।
नृपतिगन्धगजेन महौजसा पृथुकदम्बकदम्बकदम्बकम्[१] ॥
तस्मिन्सुरेश्वरविभूतिगताभिलाषे
राजाभवत्तदनुजः किल **मङ्गलीशः** ।
यः पूर्वपश्चिमसमुद्रतटोषिताश्वः
सेनारजःपटविनिर्मितदिग्वितानः ॥
स्फुरन्मयूखैरसिदीपिकाशतैर्व्युदस्य मातङ्गतमिस्रसंचयम् ।
अवाप्तवान्यो रणरङ्गमन्दिरे कलच्चुरिश्रीललनापरिग्रहम् ॥
पुनरपि च जिघृक्षोः सैन्यमाक्रान्तसालं
रुचिरबहुपताकं रेवतीद्वीपमाशु ।
सपदि महदुदन्वत्तोयसंक्रान्तबिम्बं
वरुणबलमिवाभूदागतं यस्य वाचा ॥
तस्याग्रजस्य तनये नहुषानुभावे
लक्ष्म्या किलाभिलषिते **पुलकेशिनाम्नि** ।
सासूयमात्मनि भवन्तमतः पितृव्यं
ज्ञात्वापरुद्धचरितव्यवसायबुद्धौ ॥

---

१. कदम्बाः केचन क्षत्रियास्त एव कदम्बा वृक्षविशेषास्तेषां कदम्बकं समूहम्.

स यदुपचितमन्त्रोत्साहशक्तिप्रयोग-
क्षपितबलविशेषो मङ्गलीशः समन्तात् ।
स्वतनयगतराज्यारम्भयत्नेन सार्धं
निजमतनु च राज्यं जीवितं चोज्झति स्म ॥

तावत्तच्छत्रभङ्गे जगदखिलमरात्यन्धकारोपरुद्धं
यस्यासह्यप्रतापद्युतिततिभिरिवाक्रान्तमासीत्प्रभातम् ।
नृत्यद्विद्युत्पताकैः प्रजविनि मरुति क्षुण्णपर्यन्तभागै-
र्गर्जद्भिर्वारिवाहैरलिकुलमलिनं व्योम या(जा)तं कदा वा ॥

लब्ध्वा कालं भुवमुपगते जेतुमाप्यायिकाख्ये
गोविन्दे च द्विरदनिकरैरुत्तराम्भोधिरथ्याः ।
यस्यानीकैर्युधि भयरसज्ञत्वमेकः प्रयात-
स्तत्रावाप्तं फलमुपकृतस्यापरेणापि सद्यः ॥

वरदातुङ्गतरङ्गरङ्गविलसद्धंसानदीमेखलां
वनवासीमवमृद्नतः सुरपुरप्रस्पर्धिनीं संपदा ।
महता यस्य बलार्णवेन परितः संछादितोर्वीतलं
स्थलदुर्गं जलदुर्गतामिव गतं तत्तत्क्षणे पश्यताम् ॥

गङ्गाम्बु पीत्वा व्यसनानि सप्त हित्वा पुरोपार्जितसंपदोऽपि ।
यस्यानुभावोपनताः सदासन्नासन्नसेवामृतपानशौण्डाः ॥

कोङ्कणेषु यदादिष्टचण्डदण्डाम्बुवीचिभिः ।
उदस्तास्तरसा मौर्यपल्वलाम्बुसमृद्धयः ॥

अपरजलधेर्लक्ष्मीं यस्मिन्पुरीं पुरभित्प्रभे
मदगजघटाकारैर्नावां शतैरवमृद्नति ।
जलदपटलानीकाकीर्णं नवोत्पलमेचकं
जलनिधिरिव व्योम व्योम्नः समोऽभवदम्बुधिः ॥

प्रतापोपनता यस्य लाटमालवगूर्जराः ।
दण्डोपनतसामन्तचर्या वर्या इवाभवन् ॥

अपरिमितविभूतिस्फीतसामन्तसेना-
मुकुटमणिमयूखाक्रान्तपादारविन्दः ।
युधि पतितगजेन्द्रानीकबीभत्सभूतो
भयविगलितहर्षो येन चाकारि हर्षः ॥
भुवमुरुभिरनीकैः शासतो यस्य रेवा
विविधपुलिनशोभावन्ध्यविन्ध्योपकण्ठा ।
अधिकतरमराजत्स्वेन तेजोमहिम्ना
शिखरिभिरिभवर्ज्या वर्ष्मणां स्पर्धयेव ॥
विधिवदुपचिताभिः शक्तिभिः शक्रकल्प-
स्तिसृभिरपि गुणौघैः स्वैश्च माहाकुलाद्यैः ।
अनमदधिपतित्वं यो महाराष्ट्रकाणां
नवनवतिसहस्त्रग्रामभाजां त्रयाणाम् ॥
गृहिणां स्वगुणैस्त्रिवर्गतुङ्गा विहितान्यक्षितिपालमानभङ्गाः ।
अभवन्नुपजातभीतिलिङ्गा यदनीकेन सकोसलाः कलिङ्गाः ॥
पिष्टं पिष्टपुरं येन जातं दुर्गमदुर्गमम् ।
चित्रं यस्य कलेर्वृत्तं जातं दुर्गमदुर्गमम् ॥
संनद्धवारणघटास्थगितान्तरालं
नानायुधक्षतनरक्षतजाङ्गरागम् ।
आसीज्जलं यदवमर्दितमभ्रगर्भा-
र्कौणालमम्बरमिवोर्जितसांध्यरागम् ॥
उद्धूतामलचामरध्वजशतच्छत्रान्धकारैर्बलैः
शौर्योत्साहरसोद्धतारिमथनैर्मौलादिभिः षड्विधैः ।
आक्रान्तात्मबलोन्नतिं बलरजःसंछन्नकाञ्चीपुरः
प्राकारान्तरितप्रतापमकरोद्यः पल्लवानां पतिम् ॥
कावेरी द्रुतशफरीविलोलनेत्रा चोलानां सपदि जयोद्यतस्य यस्य ।
प्रश्च्योतन्मदगजसेतुरुद्धनीरा संस्पर्शं परिहरति स्म रत्नराशेः ॥

चोलकेरलपाण्ड्यानां योऽभूत्तत्र महर्द्धये ।
पल्लवानीकनीहारतुहिनेतरदीधितिः ॥
उत्साहप्रभुमन्त्रशक्तिसहिते यस्मिन्समन्ताद्दिशो
जित्वा भूमिपतीन्विसृज्य महितानाराध्य देवद्विजान् ।
वातापीं नगरीं प्रविश्य नगरीमेकामिवोर्वीमिमां
चञ्चन्नीरधिनीरनीलपरिखां सत्याश्रये[1] शासति ॥
त्रिंशत्सु त्रिसहस्रेषु भारतादाहवादितः ।
सप्ताब्दशतयुक्तेषु श(ग)तेष्वब्देषु पञ्चसु (३७३५) ॥
पञ्चाशत्सु कलौ काले षट्सु पञ्चशतासु च (५५६) ।
समासु समतीतासु शकानामपि भूभुजाम् ॥
तस्याम्बुधित्रयनिवारितशासनस्य
सत्याश्रयस्य परमाप्तवता प्रसादम् ।
शैलं जिनेन्द्रभवनं भवनं महिम्नां
निर्मापितं मतिमता रविकीर्तिनेदम् ॥
प्रशस्तेर्वसतेश्चास्या जिनस्य त्रिजगद्गुरोः ।
कर्ता कारयिता चापि रविकीर्तिः कृती स्वयम् ।
येनायोजि नवेऽश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म ।
स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः ॥
(इण्डिअन् आण्टिक्वेरी ५ । ६७–७१)

(१७)

वलभीप्रभोर्महाराजध्रुवसेनस्य दानपत्रम् ।

स्वस्ति वलभीतः प्रसभप्रणतामित्राणां मैत्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तसंप्रहारशतलब्धप्रतापः प्रतापोपनतदानमानार्जवोपार्जितानुरागानुरक्तमौलभृतमित्रश्रेणीबलावाप्तराज्यश्रीः परममाहेश्वरः श्रीसेनापतिभटार्कः तस्य सुतस्तत्पादरजोरुणनतपवित्रीकृतशिराः शिरोवनतश-

1. सत्याश्रय इति पुलकेशिमहीपतेर्नामान्तरम्.

न्त्रचूडामणिप्रभाविच्छुरितपादनखपङ्क्तिदीधितिः दीनानाथजनोपजीव्यमान-
विभवः परममाहेश्वरः सेनापतिधरसेनस्तस्यानुजस्तत्पादाभिप्रशस्तविम-
लमौलिमणिर्मन्वादिप्रणीतविधिविधानधर्मा धर्मराज इव विहिता…
वस्थापद्धतिरखिलभुवनमण्डलाभोगस्वामिना परमस्वामिना स्वयमुपहितरा-
जाभिषेकमहाविश्राणनावपूतराज्यश्रीः परममाहेश्वरो महाराजद्रोण-
सिंहः सिंह इव तस्यानुजः स्वभुजबलघटानीकानामनेकविजयी शरणै-
षिणां शरणमवबोद्धा शास्त्रार्थतत्त्वानां कल्पतरुरिव सुहृत्प्रणयिनां य-
थाभिलषितफलोपभोगदः परमभागवतः परमभट्टारकपादानुध्यातो म-
हाराजध्रुवसेनः कुशली सर्वानेव स्वानायुक्तकविनियुक्तकद्रङ्गिकमह-
त्तरचाटभटध्रुवस्थानाधिकरणदण्डपाशिकादीनन्यांश्च यथासंबध्यमानका-
ननुदर्शयति । अस्तु वः संविदितम्—यथा मया हस्तकवप्राहरण्यं
कुक्कुटग्रामे योतिल्लप्रत्ययसीतापादावर्तशतं कूपश्च हस्तकवप्रवास्तव्य-
ब्राह्मणसंचितिशर्मणे द्रोणायनसगोत्रायाथर्वणसब्रह्मचारिणे मातापित्रोः
पुण्याप्यायनायात्मनश्चैहिकामुष्मिकयथाभिलषितफलावाप्तिनिमित्तमा च-
न्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनं पुत्रपौत्रान्वयभोग्यं ब्रह्मदेयमनुज्ञा-
तम् । अतोऽस्योचितया ब्रह्मदेयस्थित्या भुञ्जतः प्रदिशतः कर्षापयतः
कृषतो वा न कैश्चित्स्वल्पाप्याबाधा कार्यास्मद्वंशजैरागामिनृपतिभिश्च ।
अनित्यान्यैश्वर्याण्यस्थिरं मानुष्यं चावेक्ष्य सामान्यं च भूमिदानफलम-
वगच्छद्भिरियमस्मदनुमतिरनुमन्तव्या । यश्चाच्छिन्द्यादाच्छिद्यमानं वानु-
मोदेत्स पञ्चभिर्महापातकैः सोपपातकैः संयुक्तः स्यात् । अपि चात्र
व्यासगीतः श्लोको भवति—

'षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥'

स्वहस्तो मम महाराजध्रुवसेनस्य । दूतकः प्रतीहारमम्मकः । लि-
खितं किक्ककेन । [1]सं. २०७ कार्तिकसुदि ७ ।

(इण्डियन् आण्टिक्वेरी ५।२०५-२०६)

---

१. वलभीसंवत्सरोऽयम्.

(१८)

शिलाहारवंशोद्भवस्य श्रीछित्तराजदेवस्य दानपत्रम् ।

ॐ जयश्चाभ्युदयश्च ।

लभते सर्वकार्येषु पूजया गणनायकः । (?)
विघ्नं निघ्नन्स वः पायादपायाद्गणनायकः ॥
स वः पातु शिवो नित्यं यन्मौलौ भाति जाह्नवी ।
सुमेरुशिखरोद्गच्छदच्छचन्द्रकलोपमा ॥

जीमूतकेतुतनयो नियतं दयालु-
जींमूतवाहन इति त्रिजगत्प्रसिद्धः ।
देहं निजं तृणमिवाकलयन्परार्थे
यो रक्षति स्म गरुडात्किल शङ्खचूडम् ॥
तस्यान्वये नरपतिः समभूत्कपर्दी
शीलारवंशतिलको रिपुदर्पमर्दी ।
तस्मादभूच्च तनयः पुलशक्तिनामा
मार्तण्डमण्डलसमानसमिद्धधामा ॥

जातवानथ लघुः स कपर्दी सूनुरस्य सकलैररिवर्गैः ।
यद्भयेन सलिलाञ्जलिरुच्चैर्दीयते स्म निजराज्यसुखाय ॥

तस्मादभूच्च तनयो भुवनैकवीरः
श्रीवप्पुवन्न इति संगररङ्गधीरः ।
श्रीझञ्झ इत्यभवदस्य सुतः सुकीर्ति-
र्भ्राताथ गोग्गिनृपतिः समभूत्सुमूर्तिः ॥
तस्माद्विस्मयकारिहारिचरितप्रख्यातकीर्तिः सुतः
श्रीमान्वज्जडदेवभूपतिरभूद्भूचक्रचूडामणिः ।
दोर्दण्डैकबलस्य यस्य सहसा सङ्ग्रामरङ्गाङ्गणे
राज्यश्रीः स्वयमेव वक्षसि रतिं चक्रे मुरारेरिव ॥

जयन्त इव वृत्रारेः पुरारेरिव षण्मुखः।
ततः श्रीमानभूत्पुत्रः सच्चरित्रोऽपराजितः॥
कर्णस्त्यागेन यः साक्षात्सत्येन च युधिष्ठिरः।
प्रतापादीप्तमार्तण्डः कालदण्डश्च(कालोदण्डाच्च) यो द्विषाम्॥
तस्मादभूद्वज्जडदेवनामा ततोऽग्रजः श्रीकेशिदेवश्च (?)।
तद्भ्रातृजो वज्जडदेवसूनुः श्रीछित्तराजो नृपतिर्बभूव।
शीलारवंशः शिशुनापि येन नीतः परामुन्नतिमुन्नतेन॥

अतः स्वकीयपुण्योदयात्समधिगताशेषपञ्चमहाशब्दमहासामन्ताधिपतितगरपुरपरमेश्वरशिलाहारनरेन्द्रजीमूतवाहनान्वयप्रसूतसुवर्णगरुडध्वजसहजविद्याधरत्यागजगज्झम्पिमाण्डलिकशिखामणिशरणागतवज्रपञ्जरप्रभृतिसमस्तराजावलीसमलंकृतमहामण्डलेश्वरश्रीमच्छित्तराजदेवे निजभुजोपार्जितानेकमण्डलसमेतां पुरीप्रमुखचतुर्दशग्रामशतीसमन्वितां समग्रकोङ्कणभुवं समनुशासति तच्चैतद्राज्यचिन्ताभारमुद्वहत्सु सर्वाधिकारिश्रीनागणैयसांधिविग्रहिकश्रीसीहपैयकर्णाटसांधिविग्रहिकश्रीकपर्दिश्रीकरणादिपञ्चप्रधानेषु सत्सु अस्मिन्काले प्रवर्तमाने स च महामण्डलेश्वरश्रीमच्छित्तराजदेवः सर्वानेव स्वसंबध्यमानकानन्यानपि समागामिराजपुत्रमन्त्रिपुरोहितामात्यप्रधानाप्रधाननैयोगिकांस्तथा राष्ट्रपतिविषयपतिनगरपतिग्रामपतिनियुक्तानियुक्तराजपुरुषजनपदांस्तथा हंयमननगरपौरत्रिवर्गप्रभृतींश्च प्रणतिपूजासत्कारसमादेशैः संदिशति। अस्तु वः संविदितम्—यथा 'चला विभूतिः क्षणभङ्ग(ङ्गि) यौवनं कृतान्तदन्तान्तरवर्ति जीवितम्[1]।' संसारः(रे) सहजजरामरणसाधारणं शरीरकम्। पवनचलितकमलिनीदलगतजललवतरलतरैव चायुषी(तरलतरमेव चायुः) इति मत्वा द्रढयन्ति दानफलम्। तथा चोक्तं भगवता व्यासेन—

'अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः।
लोकत्रयं तेन भवेद्धि दत्तं यः काञ्चनं गां च महीं च दद्यात्॥'

---

१. 'तथाप्यवज्ञा परलोकसाधने नृणामहो विस्मयकारि चेष्टितम्' इत्युत्तरार्धं सुभाषितावली.

इति धर्माधर्मविचारचारुचिरंतनमुनिवचनान्यवधार्य मातापित्रोरात्मनश्च श्रेयोर्थिना मया शकनृपकालातीतसंवत्सरशतेषु नवसु अष्टचत्वारिंशदधिकेषु क्षयसंवत्सरान्तर्गतकार्तिकशुद्धपञ्चदश्याम् यत्राङ्कतोऽपि संवत् ९४८ कार्तिकशुद्ध १५ रवौ संजाते आदित्यग्रहणपर्वणि सुतीर्थे स्नात्वा गगनैकचक्रचूडामणये कमलिनीकामुकाय भगवते सवित्रे नानाविधकुसुमश्लाघ्यमर्घ्यं दत्त्वा सकलसुरासुरगुरुत्रैलोक्यस्वामिनं भगवन्तमुमापतिमभ्यर्च्य यजनयाजनाध्ययनाध्यापनादिषट्कर्मनिरताय क्रतुक्रियाकाण्डशौण्डाय पाराशरगोत्राय च्छन्दोगशाखिने महाब्राह्मणाय आमदेवैयाय विप्रनोडमैयसुताय यजनयाजनाध्ययनाध्यापनादिषट्कर्मकरणाय आगताभ्यागतनित्यनैमित्तिकसंव्यवहारार्थं बलि चरुकवैश्वदेवाग्निहोत्रक्रतुक्रियाद्युपसर्पणार्थं स्वपरिग्रहपोषणार्थं च श्रीस्थानकाभ्यन्तरषट्षष्ठी(ष्टि)विषयान्तःपाति नोउरग्रामान्तर्वर्ति चोडणिभट्टक्षेत्रम् यस्य चाघाटनानि—पूर्वतः गोंवणिमर्यादा, दक्षिणतः गोरपवलीमर्यादा, पश्चिमतो राजपथः, पूर्वोत्तरतो गोंवाणिमर्यादा, एवं चतुराघाटनोपलक्षितं ससीमापर्यन्तं समस्तोत्पत्तिसंयुक्तं अचाटभटप्रवेश्यं अनादेश्यमनासेध्यं उदकातिसर्गेण नमस्यावृत्त्या परमया भक्त्या प्रतिपादितम् । तदस्य सान्वयबन्धोरपि भुञ्जतो भोजयतो वा कृषतः कर्षयतो वा न केनापि परिपन्थना करणीया । यत उक्तमेव महामुनिभिः—

'बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥'

'दत्त्वा भूमिं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥'

इति महर्षिवचनान्यवधार्य सर्वैरपि समागामिभिर्भूपालैः पालनधर्मफललोभ एव कलनीयः । न पुनस्तल्लोपनपापकलङ्काग्रेसरेण केनापि भवितव्यम् । यस्त्वेवमभ्यर्थितोऽपि लोभादज्ञानतिमिरपटलावृतमतिराच्छिन्द्यादाच्छिद्यमानमनुमोदेत वा स पञ्चभिरपि पातकैरुपपातकैश्च लिप्तो

रौरवमहारौरवान्धतामिस्रादिनरकांश्चिरमनुभविष्यति । तथा चोक्तं व्यासेन—

'स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा कृमिभिः सह पच्यते ॥'

यथा चैतदेवं शासनदाता लेखकहस्तेन स्वमतमारोपयति । यथा—मतं मम महामण्डलेश्वरश्रीछित्तराजदेवस्य महामण्डलेश्वरश्रीमद्वज्जडदेवराजसूनोर्यदत्र शासने लिखितम् । लिखितं चैतन्मया श्रीमद्राजानुज्ञया भाण्डागारसेन जोगपैयेन भाण्डागारसेनमहाकविश्रीनागलै(पै)यभ्रातृसुतेन । यदत्रोनाक्षरमधिकाक्षरं वा तत्सर्वं प्रमाणमिति । श्रीर्भवतु ।

(इण्डियन् आण्टिक्केरी ५।२७७–२७९)

(१९)

श्रीविष्णुगोपवर्मणो महीपतेर्दानपत्रम् ।

जितं भगवता ॥ श्रीविजयपलक्कड्स्थानात् परमब्रह्मण्यस्य स्वबाहुबलार्जितोर्जितक्षात्रतपोनिधेः विहितसर्वमर्यादस्य स्थितिस्थितस्यामितात्मनो महाराजस्य **श्रीस्कन्दवर्मणः** प्रपौत्रस्यार्चितशक्तिसिद्धिसंपन्नस्य प्रतापोपनतराजमण्डलस्य महाराजस्य वसुधातलैकवीरस्य **श्रीवीरवर्मणः** पौत्रस्य देवद्विजगुरुवृद्धोपचायिनो विवृद्धविनयस्यानेकगोहिरण्यभूम्यादिप्रदानैः प्रवृद्धधर्मसंचयस्य प्रजापालनदक्षस्य लोकपालानां पञ्चमस्य लोकपालस्य सत्यात्मनो महात्मनो महाराजस्य **श्रीस्कन्दवर्मणः** पुत्रस्य भगवद्भक्तिसद्भावसंभावितसर्वकल्याणस्य प्रजासंरञ्जनपरिपालनोद्योगसततसत्रव्रतदीक्षितस्य अनेकसमरसाहसावमर्दलब्धविजययशःप्रकाशस्य कलियुगदोषावसन्नधर्मोद्धरणानित्यसंनद्धस्य राजर्षिगुणसर्वसंदोहविजिगीषोर्धर्मविजिगीषोर्भगवत्पादानुध्यातस्य बप्पभट्टारकमहाराजपादभक्तस्य परमभागवतस्य भारद्वाजसगोत्रस्य स्वविक्रमाक्रान्तान्यनृपश्रीनिलयानां यथावदाहृताश्वमेधानां पल्लवानां धर्मयुवमहाराजस्य **श्रीविष्णुगोपवर्मणो** वचनेन मुण्डराष्ट्रे उरुवपल्लिये ग्रामेयका वक्तव्याः—एतस्मिन्ग्रामसीमे

द्विशतं सि(सी)मनिवर्तनानि । एतेषां निवर्तनानामवधयः—अपरदिशि कण्डुकूरग्रामस्य सीमावधिः । दक्षिणदिशि सुप्रयोगनदी अवधिः । पूर्वदिशि अवधिः पूर्वदक्षिणोत्तरं महापथपार्श्वे शिला । एतस्या उत्तरं गत्वा चिञ्चावृक्षः । तत उत्तरं गत्वा कुरुपूरग्रामस्य केण्डुकूरग्रामस्य च पथि शिला । तत उत्तरं गत्वा शिलोपलयम् । तत उत्तरं गत्वा कुरुपूरग्रामे ब्राह्मणानां हलक्षेत्रस्यावधौ शिला । उत्तरदिश्यवधिः शिलोपलयन्तो महाचिञ्चावृक्षः । ततः अपरदिशं गत्वा कोण्डुमुरुवुडुग्रामस्य सीमान्तमवधिः । एवं चतुर्णां सीमावधीनां मध्यसीमस्य तद्विशतं निवर्तनानि केण्डुकूरे विष्णुवर्मसेनापतिकृतविष्णुहारदेवकुलाय देवभोगं कृत्वा अष्टादशजातिभिः परिहारैरुपेतं अस्मदायुर्बलवर्धनीयमस्माभिः संप्रदत्तम् । तदवगम्य तस्मिन्विषये सर्वायुक्तकाः सर्वनियुक्ता राजवल्लभाः संचरन्तकाश्च तत्सीमं सर्वपरिहारैः परिहरन्तु परिहारयन्तु च । यश्चेदमस्मच्छासनमतिक्रामेत्स पापः शरीरदण्डमर्हति । अपि चापि श्लोकाः—

'भूमिदानात्परं दानं न भूतं न भविष्यति ।
तस्यैव हरणपापान्(हरणात्पापं) न भूतं न भविष्यति ॥'
'स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
गवां शतसहस्रस्य हन्तुः पिबति दुष्कृतम् ॥'

सिंहवर्ममहाराजस्य विजयसंवत्सरे एकादशे पौष्य(ष)मासे कृष्णपक्षे दशम्यां मया दत्ता ताम्रपट्टिका ॥

(इण्डियन् आण्टिक्केरी ५।५१–५२)

---

(२०)

अविनीतमहीपतेर्दानपत्रम् ।

जितं भगवता गतघनगगनाभेन पद्मनाभेन श्रीमज्जान्हवेयकुलामलव्योमावभासनभास्करस्य स्वखड्गैकप्रहारखण्डितमहाशिलास्तम्भलब्धबलस्वस्तिः (?) पराक्रमयशाः(शसः) दारुणारिगणविदारणरणोपलब्धव्रणविभूषणविभूषितस्य काण्वायनसगोत्रस्य श्रीमत्कोङ्गणिवर्मधर्ममहाधि-

राजस्य पुत्रस्य पितुरन्वागतगुणयुक्तस्य विद्याविनयविनीतस्य सम्य[क्]प्रजापालनमात्राधिगतराज्यप्रयोजनस्य नानाशास्त्रार्त(र्थ)सद्भावाधिगमप्रणीतमतिविशेषस्य विद्वत्काञ्चननिकषोपलभूतस्य विशेषतोऽप्यनवशेषस्य (?) नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलस्य सुविभक्तभक्तभृत्यजनस्य दत्तकसूत्रवृत्तेः प्रणेतुः श्रीमन्माधवमहाधिराजस्य पुत्रस्य पितृपितामहगुणयुक्तस्य अनेकचतुर्दन्तयुद्धावाप्तचतुरुदधिसलिलास्वादितयशसः समदद्विरदतुरगारोहणातिशयोत्पन्नतेजसो धनुरभियोगसंपादितसंपद्विशेषस्य श्रीमद्धरिवर्ममहाधिराजस्य पुत्रस्य गुरुगोब्राह्मणपूजकस्य नारायणचरणानुध्यातस्य श्रीमद्विष्णुगोपमहाधिराजस्य पुत्रस्य त्र्यम्बकचरणाम्भोरुहरजःपवित्रीकृतोत्तमाङ्गस्य व्यायामोद्वृत्तपीनकठिनभुजद्वयस्य स्वभुजबलपराक्रमक्रयक्रीतराज्यस्य क्षुत्शा(क्षा)मोष्ठपिशिताशनप्रीतिकरनिशितधारासे[ः] (?) चिरप्रनष्टदेवभोगब्रह्मादेयविमर्गअयणकारिण[ः] (?) कलियुगबलपङ्कावसन्नधर्मवृषोद्धरणनित्यसंनद्धस्य श्रीमन्माधवमहाधिराजस्य पुत्रस्य अविच्छिन्नाश्वमेधावभृता(था)भिषिक्तश्रीमत्कादम्बकुलगगनगभस्तिमालिनः श्रीकृष्णवर्ममहाधिराजस्य प्रियभागिनेयस्य जननि(नी)देवताङ्कपर्यङ्क एवाधिगतराज्याभिषेकस्य विजृम्भमाणशक्तित्रयस्य परस्परानवमर्द्दि(र्दे)नोपभुज्यमानत्रिवर्गसारस्य असंभ्रमावनमितसमस्तसामन्तमण्डलस्य निरन्तरप्रेमबहुमानानुरक्तप्रकृतिवर्गस्य विद्याविनयातिशयपरिभू[षि]तान्तरात्मन[ः] कार्तयुगीयराजचरितावलम्बिन[ः] अनेकसमरविजयोपार्जितविपुलयश[सः] क्षीरोदैकार्णवीकृतभुवनत्रयस्य निरवग्रहप्रदानशौर्यस्य अविषह्यपराक्रमाक्रान्तप्रतिराजमस्तकार्पिताप्रतिहतशासनस्य अनेकमुखाभिवर्धमानविभवोदयपराजितद्रविणपतेः प्रतीतानेकगुणनिधानभूतस्य विद्वत्सु प्रथमगण्यस्य प्रणायिजनहृदयानन्दनस्य मर्यादालङ्घनालं(नु)कृतरत्नाकरवृत्तस्य यथार्हदण्डितयानुकृतवैवस्वतस्य प्रतापातिशयानुग(क)त विवस्वतो वैवस्वतस्य वा मनोर्वर्णाश्रमाभिरक्षिणे(णो) दक्षिणदिशामभिगोप्तुं पर्य्याप्सु(प्त)वतः (?) प्रातिजनीनस्य सुप्रजसः श्रीमत्कोगणिमहाधिराजस्य अविनीतनामपुत्रेण पुन्ना-

डराजस्कन्दवर्मप्रियपुत्रिकाजन्मना स्वगुरुणानुगामिना पित्रा परसुतसमावर्जितयापिलष्या(क्ष्म्या ?) स्वयमभिप्रतिया(त्या) लिङ्गितवक्षस्त(क्षः-स्थ)लेन विजृम्भमाणशक्तित्रयोपनमितसमस्तसामन्तमण्डलेन अन्दरिय-आलन्तूर-पौरुलरे अपेर्नगराद्यनेकसमरमखमुखाहुतप्रपातशूरपुरुषपशूपहारविघसविहस्तीकृतान्ताग्निमुखेन श्रीमत्कोगणिवृद्धराजेन **दुर्विनीत**नामधेयेन समस्तपान्नाडपुन्नाडाधिपतिना वैवस्वतेनेव मनुना वर्णाश्रमाभिलक्षणां दक्षिणां दिशमभिगोप्तुं परिया(र्या)प्तवता प्रातिजनितेन सुप्रजसा आत्मनः प्रवर्धमानविजयैश्वर्ये पञ्चत्रिंशद्विजयसंवत्सरे (शकाब्दे ४३९) प्रवर्तमाने श्रीमद्वाल्मीकिनाम्नि जगत्सूर्यवंशखरमहादेवाख्यकास्य(श्य)पसगोत्रवाजसैन्यवादेयश्रीमद्देवशर्मणां केल्लेनाम्ना बेम्पुरीश्वस्तीन(?)मुदकपूर्वं दत्त[म्] ईशान्यदिशा आपक्षेत्रं चतारिखण्डि कृष्णता(त)टाकं आपक्षेत्रं ऊर्ध्वत्रिखण्डि अध आपक्षेत्रं पट्खण्डि पेन्तनाडिपूर्वदिशां क्षेत्रं पञ्चदशखण्डि दक्षिणदिश(शि) महावृक्ष अग्नि अश्वत्तं(त्थं) ईशानायदिशा जमुवृक्षं पुनः पुन ईशानायदिशा नकुले तटाकवरुणदिशां क्षेत्रं द्वादशखण्डि वायव्यदिशा महातटाक आपक्षेत्रं सप्तखण्डि एतेन महादेवादिव्यदत्तम् । अपि चात्र मनुगीतो(ताः) श्लोको(काः)—

'स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि घोरे तमसि वर्तते ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य [तस्य] तदा फलम् ॥
स्वं दातुं सुमहच्छक्यं दुःखमन्यत्र पालनम् ।
दानं वा पालनं वेति दानाच्छ्रेयोऽनुपालनम् ॥
अद्भिर्दत्तं त्रिभिर्भुक्तं षड्भिश्च प्रतिपालनम्(लितम्) ।
एतानि न निवर्तन्ते पूर्वराजकृतानि च ॥'

(इण्डियन् आण्टिक्वेरी ५।१३८–१३९)

---

(२१)

ग्वाल्हेरनगरोपकण्ठस्थितगिरिदुर्गे पद्मनाथ[2]देवालये समुत्कीर्णा प्रशस्तिः ।

ॐ नमः पद्मनाथाय ॥

हर्षोत्फुल्लविलोचनैर्दिशि दिशि प्रोद्गीयमानं जनै-
र्मेदिन्यां विततं ततो हरिहरब्रह्मास्पदानि क्रमात् ।
श्वेतीकृत्य यदात्मना परिणतं श्रीपद्मभूभृद्यशः
पायादेष जगन्ति निर्मलवपुः श्वेतानिरुद्धश्चिरम् ॥ १ ॥

मौलिन्यस्तमहानीलशकलः पातु वो हरिः ।
दर्शयन्निव केशस्थनवजीमूतकर्णिकाम् ॥ २ ॥

मुक्ताशैलच्छलेन क्षितितिलकयशोराशिना निर्मितोऽयं
देवः पायादुषायाः पतिरतिधवलस्वच्छकान्तिर्जगन्ति ।
मन्वानः सर्वथैव त्रिभुवनविदितं श्यामतापह्नवं यः
शङ्के स्वं वर्णचिह्नं मुकुटतटमिलन्नीलकान्त्या बिभर्ति ॥ ३ ॥

इदं मौलिन्यस्तं न भवति महानीलशकलं
न मुक्ताशैलेन स्फुरति घटितश्चैष भगवान् ।

---

१. प्रशस्तिरियं सुप्रसिद्धविद्वद्वरराजेन्द्रलालमित्रेण 'इण्डो-आर्यन्स्' (Indo-Aryans) नाम्नि स्वग्रन्थे द्वितीयभागे (३७०-३७७ पृष्ठेषु) १८८१ मिते खिस्ताब्दे मुद्रिता. तत्र चात्रुटितानि शुद्धानि च विरलान्येव पद्यानि दृश्यन्ते. बहूनि च पद्यानि निःशेषमेव गलितानि सन्ति. पुनर्भट्टकीलहार्नेन १८८६ मिते खिस्ताब्दे 'इण्डियन्-आण्टिक्वेरी'मध्ये (१५ । ३३-४७) मुद्रिता. तन्मुद्रणं समीचीनमेव. अथ चास्मिन्नेव वर्षे ग्वाल्हेरमहाराजाश्रितपौराणिकभट्टश्रीपुरुषोत्तमशार्मभिरेकमेतत्प्रशस्तिप्रतिरूपकमस्मभ्यं प्रहितम्. तदपि केनचिद्वैधेयधुरीणेन लिखितमित्यशुद्धिप्रचुरमेव. किंतु तत्राक्षराणि पद्यानि वा न गलितानि सन्ति. अस्माभिरत्र भट्टकीलहार्नमुद्रिता क-नाम्ना, ग्वाल्हेरनगरागता च प्रशस्तिः ग-नाम्ना व्यवहृतास्ति. राजेन्द्रलालमित्रमुद्रितायास्तु नोपयोगः कृतः. २. पद्मपालमहीपतिस्थापितत्वात्पद्मनाथ इति नाम.

उषाकर्णोत्तंसीकरणसुभगं नीलनलिनं
वहत्यद्याप्यस्याश्चिरविरहपाण्डूकृततनुः ॥ ४ ॥

आसीद्वीर्यलघूकृतेन्द्रतनयो निःशेषभूमीभृतां
वन्द्यः कच्छपघातवंशतिलकः क्षोणीपतिर्**लक्ष्मणः** ।
यः कोदण्डधरः प्रजाहितकरश्चक्रे स्वचित्तानुगां
गामेकः पृथुवत्पृथूनपि हठादुत्पाट्य पृथ्वीभृतः ॥ ५ ॥

तस्माद्वज्रधरोपमः क्षितिपतिः **श्रीवज्रदामा**भव-
द्दुर्वारोर्जितबाहुदण्डविजिते गोपाद्रिदुर्गे[1] युधा[2] ।
निर्व्याजं परिभूय गाधिनगराधीश[3]प्रतापोदयं
यद्वीरव्रतसूचकः समभवत्प्रोद्घोषणाडिण्डिमः[4] ॥ ६ ॥

न तुलितः किल केनचिदप्यहं जगति भूमिभृतेति कुतूहलात् ।
तुलयति स्म तुलापुरुषैः स्वयं स्वमिह यः सुविशुद्धहिरण्मयैः ॥ ७ ॥

ततो रिपुध्वान्तसहस्रधामा नृपोऽभवन्**मङ्गलराज**नामा ।
यं ईश्वरैकप्रणतिप्रभावान्महीश्वराणां प्रणतः सहस्रैः[5] ॥ ८ ॥

श्रीकीर्तिराजो नृपतिस्ततोऽभूद्यस्य प्रयाणेषु चमूसमुत्थैः ।
धूलीवितानैः सममेव चित्रं मित्रस्य वैवर्ण्यमभूद्विपश्च ॥ ९ ॥

किं ब्रूमोऽस्य कथाद्भुतं नरपतेरेतेन शौर्याब्धिना
दण्डो मालवभूमिपस्य समरे संख्यामतीतोजितः[6] ।
यस्मिन्भङ्गमुपागते[7] दिशि दिशि त्रासात्कराग्रच्युतै-
र्ग्रामीणाः स्वगृहाणि कुन्तनिकरैः संछादयांचक्रिरे ॥ १० ॥

अद्भुतः सिंहपानीयनगरे येन कारितः ।
कीर्तिस्तम्भ इवाभाति प्रासादः पार्वतीपतेः ॥ ११ ॥

---

१. गोपाद्रिरिति ग्वाल्हेरसमीपवर्तिनः पर्वतस्य नाम. २. 'युवा' ग. ३. 'वैरिनगरा' ग. ४. 'पूरकः समचरत्' क. ५. 'यंश्चैक' ग. ६. 'अतीतोर्जित' ग. ७. 'रङ्गमुपागते' ग.

तस्मादजायत [1]महामतिमूलदेवः
पृथ्वीपतिर्भुवनपाल इति प्रसिद्धः।
आनन्दयञ्जगदनिन्दितचक्रवर्ति-
चिह्नैरलंकृततनुर्मनुतुल्यकीर्तिः॥ १२॥

यस्य [2]ध्वस्तारिभूपालां सर्वां पालयतः प्रभोः।
भुवं त्रैलोक्यमल्लस्य निःसपत्नमभूज्जगत्॥ १३॥

[3]राज्ञी देवव्रता तस्य हरेर्लक्ष्मीरिवाभवत्।
तस्यां **श्रीदेवपालो**ऽभूत्तनयस्तस्य भूपतेः॥ १४॥

त्यागेन कर्णमजयत्पार्थं कोदण्डविद्यया।
धर्मराजं च सत्येन स युवा विनयाश्रयः॥ १५॥

सूनुस्तस्य विशुद्धबुद्धिविभवः पुण्यैः प्रजानामभू-
न्मांधातेव स चक्रवर्तितिलकः **श्रीपद्मपालः** प्रभुः।
मत्स्वाम्येऽपि करप्रवृत्तिरपरस्येतीव यश्चिन्तय-
न्दिग्यात्रासु मुहुः खरांशुमरुणत्सान्द्रैश्चमूरेणुभिः॥ १६॥

कृत्वान्याः स्ववशे दिशः क्रमवशादाशां गतैर्दक्षिणा-
मुत्क्षिप्ताचलसंनिभानविरतं यत्सैन्यवाजिव्रजैः।
उद्भूतान्पततः पयोधिमभितः संप्रेक्ष्य रेणूत्करा-
न्भूयोऽप्युद्भटसेतुबन्धनधिया त्रस्यन्ति नक्तंचराः॥ १७॥

यस्येन्दुद्युतिसुन्दरेण यशसा नीते सुराणां गणे
वैवर्ण्यं [4]भ्रमशीलखण्डनभयादप्राप्नुवन्तः प्रियान्।

---

१. महामत्या मूलदेवतुल्यः. कलाङ्कुरापरनामा निखिलकलावेत्ता विक्रमादित्यसभ्यो मूलदेवः कथासरित्सागरादिषु प्रसिद्ध एव. भट्टकीलहार्नस्तु 'मूलदेव इति महीपतेर्नाम, भुवनपालस्त्रैलोक्यमल्लश्चेति नामद्वयमपि तस्यैव' इति वदति. वस्तुतस्तु 'महामतिमूलदेवः' इति भुवनपालस्य विशेषणरूपमेवेति ज्ञेयम्. तथा च समयमातृकायां क्षेमेन्द्रप्रयोगः— 'श्रीगुप्तो नाम धूर्तः सकलकलिकलाकल्पनामूलदेवः' (६।२९). एवं त्रैलोक्यमल्ल इत्यपि भुवनपालस्य विशेषणमेव. २. 'ध्वस्तान्यभूपालां' क. ३. 'पत्नी' ग. ४. 'शुचिशील' ग.

नूनं शक्रपुरःसरामरवधूसंघाः श्रिये सांप्रतं
गौर्यै च स्पृहयन्ति ये प्रथमतः पत्युर्वपुःसंश्रिते ॥ १८ ॥
कैर्दृष्टाः[1] क्व समस्तवाञ्छितफलप्राजिष्णवः पादपा
गावः कामदुघाश्च कैः क्व मणयः कैश्चिन्तितार्थप्रदाः ।
पूर्णाः कस्य मनोरथा इह न कैः[2] पत्यामुना पूरिता
वीरोऽभोऽनयदस्य(?)[3] तद्गुणवतः कल्पद्रुमादीनपि[4] ॥ १९ ॥
स्तुत्वा[5] न पद्मनृपतिं परिरक्षिता[6] भूः
प्राप्तोऽन्यथापि यदमौ बत नैग्नभावः[7] ।
दौःस्थ्यान्निरम्बरतनुर्विपिनेष्वशोच-
द्यस्य[8] प्रतिक्षणमिति प्रतिपन्थिसार्थः ॥ २० ॥
भ्रमः कुलालचक्रेषु लोभः पुण्यार्जनेष्वभूत् ।
काठिन्यं कुचकुम्भेषु यस्मिञ्शासति[9] मेदिनीम् ॥ २१ ॥
असंमतोद्गुणस्य[10] पीडा माभुन्न निस्त्रिंशपरिग्रहोऽपि[11] ।
इत्याललम्बे न धनुर्न चासिं तथापि यो वैरिगणं जिगाय ॥ २२ ॥
सद्यः स्रुतास्रपटपतव्यतिकीर्णभूषु[12]
वैरिद्विपाधिपशिरोमणिभिः[13] समन्तात् ।
लोकानुरागयशसामिव बीजवापं
विस्तारयां यदसिरास[14] रणाजिरेषु ॥ २३ ॥
वने यदरिनारीणां हैमनीरजनिश्रयः (?) ।
भृङ्गाणां तन्मुखेनाता[15] हैमनीरजनिश्रयः ॥ २४ ॥
स विमृश्य नदीपूरगत्वरे संपदायुषी ।
पूर्तधर्मे मतिं चक्रे जिघृक्षुरनयोः[16] फलम् ॥ २५ ॥

---

१. 'दृष्टाः' क. २. 'कैः' क. ३. 'वीरोद्यानतटस्य' क. ४. 'कल्पद्रुमादीन्यपि' क. ५. 'श्रुत्वा' क. ६. 'परिरक्षितारं' ग. ७. नग्ना बन्दिनोऽपि. 'नग्नभावः' ग. ८. 'यस्मात्' क. ९. 'तस्मिन्' क. १०. उद्गुणस्य गुणवतः पुरुषस्य धनुषश्च पीडा असंमता. ११. 'परिज्ञतापि' क. १२. 'व्यतिकीर्णरूपो' क. १३. 'वैरिद्विपाधिप' क. १४. यस्य खड्गो लोकानुरागयशसामिव बीजवापं विस्तारयामास. १५. 'तन्मुखेष्वेव' ग. १६. अनयोः संपदायुषोः.

प्रजाभर्त्रा तेन क्षितितिलकभूतेन सदनं
हरेर्धर्मज्ञेन त्रिदशसदृशा कारितमदः।
वदाम्यस्योच्चैस्त्वं कथमिव गिरा यस्य शिखरं
समारूढः सिंहो मृगमिव मृगाङ्कस्थमशितुम् ॥ २६ ॥

प्रासादस्यास्य शश्वद्विधुधरशिखरिस्पर्धिनो हैममण्डं
दण्डाग्रात्पावनीयं शशधरधवला वैजयन्ती पतन्ती।
निर्भ्रान्तं भाति भूतिच्छुरितनिजतनोर्देवदेवस्य शंभोः
स्वर्गाद्गङ्गेव पिङ्गस्फुटविकटजटाजूटमध्यं विशन्ती ॥ २७ ॥

तदेतद्ब्रह्माण्डं स इह भविता पङ्कजभवः
पुनर्यं वोढास्मो(रो) वयमिह विमानेन वियति।
सुवर्णाण्डं हंसास्तदिदमुररीकृत्य सकलं
ध्रुवं संमन्वन्ते हरिसदनमूर्ध्नि स्थितममी ॥ २८ ॥

तुङ्गिम्ना कनकाचलः शुभविभावन्तःस्थितश्रीपति-
र्बिभ्राणो द्विजसत्तमानुदधिजावासो नृसिंहान्वितः।
निर्मातास्य कृतः समस्तविबुधैर्लब्धप्रतिष्ठैरयं
प्रासादश्च धरातले सममहो कल्पं हरेः कल्पताम् ॥ २९ ॥

देवेऽर्धसिद्धे द्विजपुंगवेषु प्रतिष्ठितेष्वष्टसु पद्मपालः।
युवैव दैवप्रतिकूलभावात्संक्रन्दनार्धासनभाग्बभूव ॥ ३० ॥

तस्य भ्राता नृपतिरभवत्सूर्यपालस्य सूनुः
श्रीगोपाद्रौ सुकृतनिलयः **श्रीमहीपालदेवः**।
यं प्राप्यैव प्रथितयशसं तावभूतां सनाथौ
शौर्यत्यागौ हरिरविसुताभावदुःस्थौ चिरेण ॥ ३१ ॥

---

१. 'भवनं' क. २. 'प्रासादस्योत्पतन्ती विधु' ग. ३. कैलासतुल्यस्य. ४ 'शृङ्गाग्रा-त्' ग. ५. 'निर्भ्रान्तं' ग. ६. 'उच्चैः स्थितं' क. ७. 'समभवच्चान्तःस्थितश्रीपतिः' ग. ८. 'देवेन्द्रसिद्धद्विज' ग. ९. 'प्रतिष्ठितेष्वेषु स' ग. १०. 'संक्रन्दनाङ्कासन' क. ११. अर्जुनकर्णवियोगदुःखितौ शौर्यत्यागौ.

सृष्टिं कुर्वन्नमात्यानां विप्राणां स नृपः स्थितिम् ।
प्रलयं विद्विषामासीद्ब्रह्मोपेन्द्रहरात्मकः ॥ ३२ ॥

यत्र धामनिधौ राज्ञि पालयत्यवनीतलम् ।
न भास्वान्भास्करादन्यो न राजान्यो विधोरभूत् ॥ ३३ ॥

कृताभिषेकं सद्वृत्तैरुपविष्टं नृपासने ।
यमुदारपदैरेवं तुष्टुवुः सूतमागधाः ॥ ३४ ॥

'त्वामुद्वहन्ति शिरसा खलु राजहंसाः
सृष्टास्त्वया पुनरिमाः समयावसन्नाः ।
नाथ प्रजाः सुमनसां प्रथमोऽसि कोऽसि
त्वं सिद्धवीररस तामरसोद्भवस्य ॥ ३५ ॥'

लक्ष्मीपतिस्त्वमसि पङ्कजचक्रचिह्नं
पाणिद्वयं वहसि भूप भुवं बिभर्षि ।
श्यामं वपुः प्रथयसि स्थितिहेतुरेक-
स्त्वं कोऽसि नीतिविजितोद्धव माधवस्य ॥ ३६ ॥

त्वं पालयस्यनिशमर्थिजनस्य कामं
रामः श्रिया त्वमसि नाथ गुणैरनन्तः ।
संकर्षणः समिति विद्विषदायुपस्त्वं
त्वं कोऽसि सच्चरितहाल हलायुधस्य ॥ ३७ ॥

ख्याता रतिस्तव निजप्रमदासु नित्यं
रूपं तवातिशयविस्मयकारि देव ।

---

१. 'विशां वै' ग. २. विद्विषां प्रलयं कुर्वन्नासीत्. ३. 'गायनाः' क. ४. इतः प्रभृति षड्विंशतिपद्यानां भट्कोलहार्नेन इङ्ग्लिशभाषान्तरं न विहितम्. ५. 'नीतिविजितोद्धव' क. नीत्या विजित उद्धवो येन. श्रीकृष्णामात्यो नीतिविज्ञोद्धव आसीदिति शिशुपालवधादौ व्यक्तमेव. ६. कामपाल इति बलदेवस्य नामान्तरमपि. ७. अनन्तः शेषोऽपि. बलदेवः शेषावतार इति प्रसिद्धिः. ८. सच्चरितैर्हालो द्वितीयः सातवाहनमहीपतिरेवेति तात्पर्यम्; बलदेवपक्षे तु सम्यक् चरिता हाला सुरा येन. ९. रतिः कामदेवस्य भार्यापि.

त्वं मीनचिह्न पुरुषोत्तमसंभवोऽसि
कस्त्वं क्षितीश्वर शम्बरसूदनस्य ॥ ३८ ॥
भूभृत्सुतापतिरसि द्विषतां पुराणां
भेत्ता त्वमीश वृषपोषरतोऽसि नित्यम्।
भूतिं दधास्यमलचन्द्रविभूषिताङ्गः
कस्त्वं सदम्बुजदिवाकर शंकरस्य ॥ ३९ ॥
त्वं तेजसा शिखिनमिद्धमधः करोषि
शक्तिं दधासि नरदेव विपत्तिहन्त्रीम्।
त्वं तारकं रिपुबलस्य बलान्निहंसि
कस्त्वं नवीनबल नीलगलध्वजस्य ॥ ४० ॥
त्वं वज्रभृत्त्वमसि पक्षभिदप्यशेष-
भूमीभृतां विबुधवन्द्य गुरुप्रियोऽसि।
श्रीमत्सुवर्णगिरिदुर्गचरोऽसि कोऽसि
त्वं भीमसाहस सहस्रविलोचनस्य ॥ ४१ ॥
ख्यातं तवेश बहुपुण्यजनाधिपत्यं
कान्तालकाबलिभिरामतमैश्च गुप्ता। (?)
त्वामामनन्ति परमेश्वरबद्धसख्यं
त्वं कोऽसि सद्गुणनिधान धनाधिपस्य ॥ ४२ ॥

---

१. मत्स्याकारं चिह्न महीपतीनां करचरणे भवति यस्य मत्स्यरेखेति प्रसिद्धिः; पक्षे मकरध्वज. २. पुरुषोत्तमो विष्णुः, सत्पुरुषश्च. ३. मन्मथस्य. ४. पार्वती नृपतिकन्याश्च. ५. शत्रुभूतानां त्रिपुरासुराणां वैरिनगराणां च. ६. वृषो महोक्षो धर्मश्च. ७. भस्म संपत्तिश्च. ८. चन्द्रं कनकमपि. ९. 'विभाकर' क. १०. मयूरमग्निं च. ११. आयुधविशेषं सामर्थ्यं च. १२. 'विपश्चिहन्त्रीम्' क. १३. तारकं दैत्यविशेषं रिपुबलस्य तारकं शरण्यं च. प्रधानरिपुमिति यावत्. १४. 'नवीननल' क. १५. मयूरध्वजस्य कार्तिकेयस्य. १६. वज्रो हीरकमणिर्दम्भोलिश्च. १७. पक्षाः सहायाः पतत्राणि च. १८. राज्ञां पर्वतानां च. १९. विबुधा देवाः पण्डिताश्च. २०. गुरुरुपदेष्टा वाक्पतिश्च. २१. शोभनवर्णो गिरिदुर्गः; पक्षे सुवर्णगिरिः कनकाचलो मेरुः स एव दुर्गः. 'श्रीकम्बुवर्णगिरिदुर्गचणोऽसि' क. २२. इन्द्रस्य. २३. पुण्ययुक्ता जना राक्षसाश्च. २४. अलका कुबेरपुरी; पक्षे अलकावलिभिश्चूर्णकुन्तलैः. २५. कुबेरपक्षे परमेश्वरः शिवः. २६. कुबेरस्य.

तेजोनिधिस्त्वमसि भूमिभृतः[1] समग्राः
क्रान्ताः करैः[2] प्रसभमुग्रतरैस्तवेश ।
प्राप्तोदयः सततमर्थिजनस्य[3] कोऽसि
त्वं कल्पभूरुह सरोरुहबान्धवस्य[4] ॥ ४३ ॥
आनन्ददोऽसि जनतानयनोत्पलाना-
माप्यायिताखिलजनः करमार्दवेन[6] ।
त्वं शश्वदीश्वर[5]शिरस्तलदत्तपाद-
स्तत्कोऽसि[7] मर्त्यभुवनेश निशाकरस्य ॥ ४४ ॥
त्वामंशमीश निगदन्ति मधुद्विषोऽमी
श्यामाभिरामतनुरस्यमलप्रबोधः ।
पुण्यं च भारत[8]मिदं विहितं त्वयैव
त्वं कोऽसि सत्यधन सत्यवतीसुतस्य[9] ॥ ४५ ॥
नीतात्मकीर्तिसुरसिन्धुरियं समुद्र-
प्रान्तं त्वयोन्नति[10]मसौ गमितः स्ववंशः ।
पूर्वे पवित्रतनवो विहिताश्च कोऽसि
त्वं सत्सु लब्धपरभाग भगीरथस्य ॥ ४६ ॥
एतत्त्वया कृतमताडक[11]माशु विश्वं
व्याप्ता मही हरिभि[12]रीश मनोजवैस्ते ।
पुण्यावतारकरणक्षत[13]दुर्दशास्य-
स्त्वं कोऽसि दत्तरिपुलाघव राघवस्य[14] ॥ ४७ ॥
धर्मप्रसू[15]स्त्वमसि सत्यधनस्त्वमेक-
स्त्वं वासुदेवचरणार्चनदत्तचित्तः ।

---

१. पर्वता राजानश्च. २. किरणं राजग्राह्यभागश्च. ३. हे अर्थिजनस्य कल्पभूरुह. ४. सूर्यस्य. ५. शिवो राजानश्च. ६. किरणा अग्रहस्तश्च. ७. 'त्वं कोऽसि' क. ८. महाभारताभिधो ग्रन्थः, भारतवर्षं च. ९. वेदव्यासस्य. १०. प्राप्तगुणोत्कर्षं. ११. ताडयतीति ताडकः शत्रुः; पक्षे ताडका रामायणप्रसिद्धा काचन राक्षसी. १२. अश्ववानरैश्च. १३. क्षतं दुर्दशाया आस्यं मुखं प्रारम्भो येन; पक्षे क्षतो दुष्टो दशास्यो रावणो येन. १४. रामचन्द्रस्य. १५. युधिष्ठिरो धर्मात्मजः, सत्यसंधश्च प्रसिद्ध एव.

त्वं कोऽसि विप्रजनसेवितशेषवृत्तिः
सङ्ग्रामनिष्ठुर युधिष्ठिरपार्थिवस्य ॥ ४८ ॥
त्वं भूरिकुञ्जरबलो भुवनैकमल्ल-
विद्याविभूषिततनुर्नृप पावनोऽसि।
प्रच्छन्नसूपकृतिसंभृतबन्धुवाञ्छः
कस्त्वं कवीन्द्रकृतमोद वृकोदरस्य ॥ ४९ ॥
एकस्त्वमीश भुवि धन्वभृतां वरिष्ठः
संस्वामिकारिगणदर्पहरस्त्वमाजौ। (?)
गन्धर्वराजपृतनाविजयाप्तकीर्ति-
स्त्वं कोऽसि सुन्दर पुरंदरनन्दनस्य ॥ ५० ॥
दुर्योधनारिबलदर्पहृतस्तवेश
यत्नः परार्जुनयशःप्रसरं निरोद्धुम्।

१. विप्रजनसेविताद्यन्त्रोपं तेन शांसयस्य. २. दशमहल्लनागबलो भीमसेन इति भारते प्रसिद्धम्; राजपक्षे भूरिकुञ्जरगुणं बलं सैन्यं यस्य. ३. मल्लविद्याविभूषिततनुर्भीमः; राजपक्षे भुवनैकमल्लेति मर्यादनम्. ४. प्रच्छन्ना या सूपकृतिः सूपकर्म तया संभृता बन्धुवाञ्छा येन. भीमः सूपकारो भूत्वा विराटसदने स्थित इति भारते विराटपर्वणि प्रसिद्धम्; अन्यत्र प्रच्छन्ना या शोभना उपकृतिरुपकारस्तया. महान्तस्तु प्रच्छन्नमेवोपकुर्वन्ति न तु स्वोपकारं प्रोद्घोषयन्ति. ५. भीमस्य. ६. 'धर्मभृतां' क. अर्जुनस्य धनुर्धरत्वं प्रसिद्धं न तु धर्मभृत्त्वम्. ७ 'संशप्तकारिगणदर्पहरस्त्वमाजौ' इति पाठो भाति. 'संशप्तकास्तु समरे सङ्ग्रामादनिवर्तिनः' इति कोषप्रामाण्यात्संशप्तकाः सङ्ग्रामादनिवर्तिनो येऽरयस्तेषां गणस्य दर्पहर इति राजपक्षे; अर्जुनपक्षे तु संशप्तका नाम केचन क्षत्रिया आसन्, तैः सहार्जुनस्य युद्धं महाभारते द्रोणपर्वण्यतीव प्रसिद्धमस्तीति ज्ञेयम्. ८. गन्धर्वराजा अश्वश्रेष्ठास्तेषां पृतना अश्वसैन्यम्. मक्कीलहार्नस्तु 'Nothing definite of any historical importance is said of Mahipâla, unless there is in V. 50 an allusion to some war in which a Prince of the Gandharvas was defeated by him' इति वदति; अर्जुनपक्षे गन्धर्वराजस्य चित्ररथस्य पृतना. इयं कथा भारते वनपर्वणि द्रष्टव्या. ९. अर्जुनस्य. १०. दुर्योधना दुःखेन योद्धुं शक्या येऽरयस्तेषां बलं तद्दर्पहारिणः; अन्यत्र दुर्योधनस्यारयः पाण्डवाः. ११. परेषां शात्रवाणामर्जुनस्य शुभ्रस्य यशसः प्रसरम्; अन्यत्र परः शत्रुर्योऽर्जुनो मध्यमपाण्डवस्तस्य यशःप्रसरम्.

त्वं कोऽसि सूर्यजनितप्रमदार्थिसार्थ-
　दौर्गत्यकर्तन विकर्तनसंभवस्य ॥ ९१ ॥

रत्नालयस्त्वमसि धाम गभीरताया-
　स्त्वं पासि पार्थसम भूमिभृतः प्रविष्टान् ।
अन्तःस्थितस्तव हरिः सततं नरेश
　कस्त्वं वितीर्णरिपुजागर सागरस्य ॥ ९२ ॥

शौर्यैकभूः क्रमसमागतसत्त्ववृत्ति-
　स्त्वं राजकुञ्जरशिरःप्रवितीर्णपादः ।
दृप्तारिभास्करतिरस्कृतिसिंहिकाभूः
　कस्त्वं महीपतिमृगाङ्क मृगाधिपस्य ॥ ९३ ॥

दानं ददासि विकटोन्नतवंशशोभ-
　स्त्वं दन्तपालिकरवालहतारिदर्पः । (?)
क्षोणीभृतो जयसि तुङ्गतया नरेन्द्र
　त्वं कोऽसि वैरिबलवारण वारणस्य ॥ ९४ ॥

सद्म श्रियस्त्वमसि मित्रकृतप्रमोद-
　स्त्वं राजहंससमलंकृतपादमूलः ।
स्वामिन्नधःकृतजडोऽसि गुणाभिरामः
　कस्त्वं स्मिताढ्यमुखपङ्कज पङ्कजस्य ॥ ९५ ॥

सत्पत्रभूषिततनुः सुविशुद्धकोश-
　स्त्वं चन्द्रकान्तिसमलंकृतकान्तमूर्तिः ।
ख्यातं तवैव कविवल्लभ सौमनस्यं
　त्वं ब्रूहि कः समरभैरव कैरवस्य ॥ ९६ ॥

---

१. कर्णः सूर्यसुतः, राजा च सूर्यपालसुतः. २. कर्णस्य. ३. हे अर्जुनतुल्य. ४. राजकुञ्जराः श्रेष्ठगजाः, नृपश्रेष्ठाश्च. ५. सिंहिकाभूः सिंहो राहुश्च. ६. केसरिणः. ७. मदजलमपि. ८. पर्वतान्महीपतींश्च ९. गजस्य. १०. मित्रः सूर्योऽपि. ११. राजहंसाः पक्षिविशेषाः, नृपश्रेष्ठाश्च. १२. जलं सलिलम्, जडश्च मूर्खः. १३. गुणास्तन्तवः, शौर्यौदार्योदयश्च. १४. पत्रं वाहनमपि. १५. कोशः कर्णिकापि. १६. पुष्पत्वम्, पाण्डित्यं च.

त्वं पश्यतां हरसि देव मनांसि शश्व-
न्मङ्गल्यभूस्त्वमसि निर्मलताभिरामः।
कोऽसि प्रसीद वद सद्गुणरत्नयोनि-
स्त्वं कच्छपारिकुलभूषण भूषणस्य ॥ ५७ ॥
धात्रा परोपकरणाय विसृष्टकाय
सच्छायजन्ममलंकृततुङ्गगोत्रैः।
ब्रूहि त्रिसंध्यमवनीश्वरवन्दनीय-
स्त्वं कोऽसि सूर्यनृपनन्दन चन्दन ॥ ५८ ॥
नाथः कर्ताद्विजपतिर्न गदान्वितोऽसि
न त्वं विशुद्धहृदय प्रथितोग्रमायः।
त्वं जातु न क्षतवृषो न जडे कृतास्थ-
स्तेनास्तु नाथ हरिणोपमितिः कथं ते ॥ ५९ ॥
नित्यं संनिहितक्षयः स तमसा प्रायोऽभिभूयेत स
त्वन्नामादुर्यनेकनाथ हरिणस्तस्योदरे प्राविशत्।
मूर्तिस्तस्य कलङ्किता सजडतां धत्ते स दोषाकर
शश्वत्ते विदितस्तथापि नृपते राजा त्वमित्यद्भुतम् ॥ ६० ॥
एकेनोत्तरगोग्रहे विमुखतां पार्थेन नीताः परे
व्यासेन स्तुतिरर्जुनस्य विहितेत्यश्रायि पूर्वं किल।
तत्सम्यक्प्रतिभाति संप्रति पुनः श्रीमन्महीपाल न-
स्त्वामालोक्य सहस्रशो रिपुबलं निघ्नन्तमेकं रणे ॥ ६१ ॥
किं ब्रूमोऽविकलत्वमीश भवतस्त्वं नीतिपात्रं परं
वृत्तान्तं जगतीपते चतसृणामात्मप्रियाणां शृणु।

१. कटककण्ठलादिः. २. निर्मितशरीर. ३. गोत्रः पर्वतोऽपि. ४. गरुडः, ब्राह्मणश्रेष्ठश्च. ५. गदा आयुधविशेषः, गदश्च रोगः. 'मदान्वितो' क. ६. विष्णुर्मायावीति पुराणप्रसिद्धम्. ७. वृषो धर्मः, कश्चिदसुरश्च. ८. जले, मूर्खे च. ९. विष्णुना. १०. 'शश्वत्ते' क. ११. राजा चन्द्रः क्षयादिदोषयुक्तः, भवांस्तद्रहितोऽपि राजेत्याश्चर्यम्. १२. 'ब्रूमोऽधिकतरत्वमीश' क.

कीर्तिर्भ्राम्यति दिक्षु गीर्गुणवतां कण्ठे लुठत्यादृता
मर्यादारहिता मही द्विजसुहृद्गेहे रता श्रीरपि ॥ ६२ ॥

किं[1] चित्रं भुवनैकमल्ल यदियं मन्दाकिनी पद्मभू-
र्लोकादुद्धरता भगीरथनृपेणानायि निम्नां महीम् ।
आश्चर्यं पुनरेतदीश यदितो निम्नान्महीमण्डला-
दूर्ध्वं कीर्तितरङ्गिणी कमलभूर्लोकं त्वया प्रापिता ॥ ६३ ॥

चित्रं नात्र सलक्षणस्त्वमकरोः सर्वात्मना विद्विषां
देव प्रत्ययलोपमाशु विशिखैः संमूर्छितस्याहवे ।
क्रोधाद्भैरवमूर्तिरुल्लसदसिक्रूरप्रहाराद्भुतै-
रस्य त्वं यदनीनशः प्रकृतिमप्येतन्न नाश्चर्यकृत् ॥ ६४ ॥

अत्यम्बुधिं भवद्धैर्यमत्यादित्यं भवन्महः ।
अतिसिंहं भवच्छौर्यमतः केनोपमीयसे ॥ ६५ ॥

केयूरं तव भूपाल भुजदण्डे विराजते ।
किरीटमिव बाह्वन्तर्निवासि विजयश्रियः ॥ ६६ ॥

यदर्चायां नित्यं त्रिभुवनगुरोस्तोत्रमकृथा-
स्तदेष प्रीतस्त्वां ध्रुवमकृत कल्पस्थितिमिह ।
यदुत्सङ्गे तुङ्गे तव लुठति चन्द्रांशुविमला
प्रलम्बव्याजेन क्षितितिलक तारावलिरियम् ॥ ६७ ॥

वैतालिकैरित्थमभिष्टुतेन संपूजितामर्त्यगुरुद्विजेन ।
विमुक्तकारागृहसंयतेन वितीर्णभूताभयदक्षिणेन ॥ ६८ ॥

तेनाभिषिक्तमात्रेण प्रतिजज्ञे द्वयं स्वयम् ।
पद्मनाथस्य संसिद्धिः कन्यायाः सद्वरार्पणम् ॥ ६९ ॥

---

१. 'चित्रं तावदिदं सुरेन्द्रभवनान्मन्दाकिनीपाथसा केनाप्युत्तमतेजसा नृपतिना क्ष्मामण्डलं मण्डितम् । नातश्चित्रतरं निशाकरकलालावण्यदुग्धोदधे भूमेर्यद्भवता विरञ्चिनगरी कीर्तिप्लवैः प्लाव्यते ॥' इति प्राचीनपद्यच्छायामनुहरतीदं पद्यम्. २. सप्तसप्ततिमिते पद्येऽपि 'सूरिसलक्षण:' इति प्रयोगोऽस्ति. 'स लक्षशः' क. ३. प्रकृतिप्रत्ययौ व्याकरणप्रसिद्धावपि. ४. 'यदर्चां संतत्य' क. ५. ध्रुवो नक्षत्रविशेषोऽपि. ६. 'धवलरविचन्द्रांशु' क.

तेन[1] द्वयं कृतमनेन विवेकभाजा
राजात्मजा मदनपालवराय[2] दत्ता।
श्रीपद्मनाथसुरमन्दिरमेतदुच्चै-
र्नीतं समाप्तिमविनाशि यशःशरीरम्॥ ७०॥

समर्थिता[3] ब्रह्मपुरी च तेन शेषान्विधायावनिदेवमुख्यान्।
प्रवर्तितं सत्रमतन्द्रितेन मृष्टान्नपानैरतिधार्मिकेण॥ ७१॥

श्रीपद्मनाथस्य स लोकनाथश्चक्रिद्वयं[4] (?) भूपतिचक्रवर्ती।
नैवेद्यपाकाय विपक्षबुद्धिः प्रादात्प्रदीपाय च गोत्रदीपः॥ ७२॥

ब्रह्मोत्तरं मण्डपिकाममुत्र द्वेधा[5] विधाय स्वयमीश्वरेण।
श्रीपद्मनाथाय वितीर्णमर्धमर्धं च वैकुण्ठसुरेश्वराय॥ ७३॥

विलासिनीवादकगायनाद्यैर्यथार्हतः पादकुलस्य वृत्तिम्।
स पद्मनाथस्य पुरः समग्रामकल्पयत्प्रेक्षणकाय भूपः॥ ७४॥

पाषाणपल्लीं प्रविभज्य सम्यग्देवाय सार्धानि पदानि पञ्च।
संपादयामास तथा द्विजेभ्यः सार्धां चतुर्विंशतिमुत्तमेभ्यः॥ ७५॥

ददौ करस्वं[6] खरवारस्वेटं महीपतिस्तत्रभवं समस्तम्।
आकाशपातालसमुद्गतं च देवद्विजेभ्यो लवणाकरं च॥ ७६॥

तस्यादृष्टसहायतामुपगतो योगेश्वराङ्गोद्भवः
ख्यातः सूरिमलक्षणः क्षितिपतेः सर्वत्र विश्वासभूः।
आधारो विनयस्य शीलभवनं भूमिः श्रुतस्याकरः
स्वाध्यायस्य कृतज्ञ[illegible]कमतिः सौजन्यकोशालयः॥ ७७॥

तत्प्रत्ययेन निदधे निखिलानि धर्म-
कार्याणि धर्मनिरतः स नरेन्द्रचन्द्रः।
विप्रः स निःस्पृहतया गुणगौरवेण
चित्तं विवेश समवर्तितया च राज्ञः॥ ७८॥

---

१. 'तत्र' ग. २. 'मदनहारिवराय' क. ३. 'समर्पिता' क. ४. 'चक्रिद्वयं' क. ५. 'द्विधा' क. ६. 'करस्कन्धकवाटपीटं' क.

महीपालेन ये विप्रास्तस्मिन्ग्रामे प्रतिष्ठिताः ।
तेषां नामानि लिख्यन्ते विस्तरः शासनोदितः ॥ ७९ ॥
देवलब्धिः सुधीराद्यस्तथा श्रीधरदीक्षितः ।
सूरिः कीर्तिरथः सार्धपदिनोऽस्य द्विजास्त्रयः ॥ ८० ॥
गङ्गाधरो गौतमश्चामल्कोऽथ गदाधरः ।
देवनागो वसिष्ठश्च देवशर्मा यशस्करः ॥ ८१ ॥
कृष्णो वराहस्वामी च गृहरामः प्रभाकरः ।
इच्छाधरो मधुश्चैव तिक्कैकः पुरुषोत्तमः ॥ ८२ ॥
रामेश्वरो द्विजवरस्तथा दामोदरो द्विजः ।
अष्टादशैते विप्राश्च पदिनः शैङ्को द्विजः ॥ ८३ ॥
पादोनपदिको रत्नतिहुणेकौ सुगर्चकौ ।
द्वावर्धपदिनावेष विप्राणां संग्रहः कृतः ॥ ८४ ॥
ददौ देवपदानां च मध्यादर्धपदं नृपः ।
विधाय शाश्वतं लोहभटकायस्थसूरये ॥ ८५ ॥
देवाय दत्तः सौवर्णो राज्ञा रत्नैः समाचितः ।
मुकुटः सुमहानीलो मणिर्यत्र विराजते ॥ ८६ ॥
हरिन्मणिमयं भूपतिलकस्तिलकं ददौ ।
रत्नैर्विचित्रं निष्कं च निष्कलङ्कः स भूपतिः ॥ ८७ ॥
प्रादात्केयूरयुगलं रत्नैर्बहुभिराचितम् ।
कङ्कणानां चतुष्कं च महार्हमणिभूषितम् ॥ ८८ ॥
इति रत्नमयं तावदेकमाभरणं विभोः ।
द्वितीयमनिरुद्धस्य सौवर्णं केवलं यथा ॥ ८९ ॥
कङ्कणानां चतुष्कं च भालपट्टद्वयं तथा ।
कत्तिदारं(?) स्वर्णमुष्टिं बिभर्त्यन्वहमच्युतः ॥ ९० ॥

---

१. 'वै' क. २. 'च मल्कोऽथ गयाधरः' क. ३. 'गृहदासः' क. ४. 'पद्मौ' क. ५. 'तिहुणेकौ' क. ६. 'सुमहान्मध्ये' क. ७. 'नाल' क.

रूप्यमंद्रालिका(?) दत्ता कचोलैः पञ्चभिर्युता ।
नैवेद्यधारणार्थं च कांस्यस्थालचतुष्टयम् ॥ ९१ ॥
सुवर्णाण्डत्रयं देवपरिवारविभूषणम् ।
धृतं चोपरि हैमाब्जमातपत्रीकृतं विभोः ॥ ९२ ॥
निवेश्य ताम्रपट्टे च तन्मयेनैव गड्डुना ।
स्नाप्यते प्रतिमा नित्यमनिरुद्धस्य राजती ॥ ९३ ॥
प्रतिमा वामनस्यैका द्वितीया लघुराच्युती ।
राजावर्तमयी चान्या द्वे पूर्वे रीतिनिर्मिते ॥ ९४ ॥
ताः प्रयत्नेन तिस्रोऽपि पूज्यन्ते गर्भवेश्मनि ।
तत्र ताम्रमयं दत्तं दीपार्थं मल्लिकाद्वयम् ॥ ९५ ॥
स्नानार्थं ताम्रकुण्डे द्वे दत्ते द्वे ताम्रपात्रिके ।
ताम्रार्घपात्रद्वितयं तथा दत्तं महीभुजा ॥ ९६ ॥
सधूपदहनाः सप्त घण्टाश्चारात्रिकान्विताः ।
दत्ताः शङ्खाश्च सप्तैव ताम्रपात्रीचतुष्टयम् ॥ ९७ ॥
सकांस्यभाजनं प्रादान्नृपतिः काहलाद्वयम् ।
चामरं दण्डयुग्मं च रीतिस्फटिकसंभवम् ॥ ९८ ॥
बृहच्चरुद्वयं ताम्रमयं ताम्राल्लुकात्रयम् ।
ताम्रीभाण्ड्यस्तथा पञ्च दत्ताश्चाटुश्च तन्मयः ॥ ९९ ॥
.... ।
एष देवोपकरणद्रव्याणां संग्रहः कृतः ॥ १०० ॥
शिलाकुट्टस्थपत्यादियन्त्रिशाकटिकादिषु ।
वापीकूपतडागादिखननाबन्धनेषु च ॥ १०१ ॥
दशमांशं तथा विंशत्यंशं सर्वत्र मण्डले ।
ददौ राजानिरुद्धाय तेन सत्रं प्रवर्तते ॥ १०२ ॥

---

१. 'मन्द्रालिहा' क. २. कचोलः पात्रविशेषः. कचोला, कटोरा, इति हिन्दीभाषा. ३. 'पट्टे' क. ४. गड्डुर्जलपात्रविशेषः. गडुवा, लोटा इति यस्य प्रसिद्धिः. 'किं त्वं लोचनगड्डुकैः प्रपयसे वक्षोजालिद्वयम्' इति प्राचीनकविप्रयोगः. ५. मल्लिका दीपाधारपात्रम् 'मल्लिकाद्वयम्' क. ६. 'कांस्यवाद्यौ' क. ७. चरुः 'चरुवा' इति प्रसिद्धो बृहद्भाण्डविशेषः 'भीरद्वयं' ग. ८. 'द्वयम्' क. ९. 'भाण्डाः' ग. १०. चाटुरिति दर्वीवाचकं देशभाषापदम्. ११. 'खानसर्करिलादिषु' ग. १२. 'खननाबन्धनेषु' ग.

अयं देवालयः पद्मनृपतेः स्फटिकामलः ।
भूयादुपार्जितः पुण्यैर्विष्णुलोक इवाक्षयः ॥ १०३ ॥
भारद्वाजेन मीमांसान्यायसंस्कृतबुद्धिना ।
कवीन्द्ररामपौत्रेण गोविन्दकविसूनुना ॥ १०४ ॥
कविना मणिकण्ठेन सुभाषितसरस्वता ।
प्रशस्तिर्द्विजमुख्येन रचितेयमनिन्दिता ॥ १०५ ॥
प्रतापलङ्केश्वरवाग्द्वितीयां(?)बिभ्रत्सुहृत्तां मणिकण्ठसूरेः ।
अशेषभाषासुकविर्लिलेख वर्णान्यशोदेव दिगम्बरार्कः ॥ १०६ ॥
एकादशस्वतीतेषु संवत्सरशतेषु च ।
एकोनपञ्चाशति च गतेष्वब्देषु विक्रमात् ॥ १०७ ॥
पञ्चाशे चाश्विने मासे कृष्णपक्षे नृपाज्ञया ।
रचिता मणिकण्ठेन प्रशस्तिरियमुज्ज्वला ॥ १०८ ॥
अङ्कतोऽपि ११५० आश्विनबहुलपञ्चम्याम् ।
ॐ ॥ तैस्तैस्तस्य महीपतेः प्रतिरणं प्रौढप्रतापानले
नाश्चर्यं यदनेकशो रिपुचमूचक्रैः पतङ्गायितम् ।
यस्येन्द्रप्रतिमस्य बुद्धिसचिवः सर्वज्ञकल्पोऽभव-
न्नीत्या निर्जितमौर्यवंशतिलकाचार्यः स गौरः सुधीः ॥ १०९ ॥
किं चित्रं यन्महीपालो भुनक्ति क्ष्माखिलां महीम् ।
यस्य गीर्वाणमन्त्रीव मन्त्री गौरोऽभवत्सुधीः ॥ ११० ॥
प्रशस्तिरियमुत्कीर्णा सद्वर्णा पद्मशिल्पिना ।
देवस्वामिसुतेन श्रीपद्मनाथसुरालये ॥ १११ ॥
तथैव सिंहराजेन माहुलेन च शिल्पिना ।
प्राप्नुवन्तु समुत्कीर्णान्यक्षराणि यथार्थताम् ॥ ११२ ॥

१. 'उपार्जितैः' ग. २. सुक्तिसमुद्रेण. ३. धीसचिवपदस्य रूपान्तरम्. मन्त्री-त्यर्थः. 'बुद्धिसहितः' क. ४. नीत्या निर्जितो मौर्यवंशतिलकस्य (चन्द्रगुप्तस्य) आचार्यो (चाणक्यः) येन सः. चाणक्यादप्यधिकनीतिवेत्तेति भावः. 'मौर्यवंश' इति भट्टहाल-हार्नः पठति स्म, व्याख्याति स्म च तथैव. ६. 'सिंहराजेन' क. ७. 'महलेन' ग.

(२२)

कान्यकुब्जाधीशविजयचन्द्रमहीपतिसूनुयुवराज-जयच्चन्द्रस्य दानपत्रम् ।

ॐ स्वस्ति ॥

अकुण्ठोत्कण्ठवैकुण्ठकण्ठपीठलुठत्करः ।
संरम्भः सुरतारम्भे स श्रियः श्रेयसेऽस्तु वः ॥ १ ॥

आसीदशीतद्युतिवंशजातक्ष्मापालमालासु दिवं गतासु ।
साक्षाद्विवस्वानिव भूरिधाम्ना नाम्ना **यशोविग्रह** इत्युदारः ॥ २ ॥

तत्सुतोऽभून्महीचन्द्रश्चन्द्रधामनिभं निजम् ।
येनापारमकूपारपारे व्यापारितं यशः ॥ ३ ॥

तस्याभूत्तनयो नयैकरसिकः क्रान्तद्विषन्मण्डलो
विध्वस्तोद्धतवीरयोधतिमिरः **श्रीचन्द्रदेवो** नृपः ।
येनोदारतरप्रतापशमिताशेषप्रजोपद्रवं
श्रीमद्गाधिपुराधिराज्यमसमं दोर्विक्रमेणार्जितम् ॥ ४ ॥

तीर्थानि काशिकुशिकोत्तरकोशलेन्द्र-
स्थानीयकानि परिपालयताभिगम्य ।
हेमात्मतुल्यमनिशं ददता द्विजेभ्यो
येनाङ्किता वसुमती शतशस्तुलाभिः ॥ ५ ॥

तस्यात्मजो **मदनपाल** इति क्षितीन्द्र-
चूडामणिर्विजयते निजगोत्रचन्द्रः ।
यस्याभिषेककलशोल्लसितैः पयोभिः
प्रक्षालितं कलिरजःपटलं धरित्र्याः ॥ ६ ॥

तस्मादजायत निजायतबाहुवल्लि-
बन्धावरुद्धनवराज्यगजो नरेन्द्रः ।

---

१. कनौजनगरसाम्राज्यम्.

सान्द्रामृतद्रवमुचां प्रभवो गवां यो
गोविन्दचन्द्र इति चन्द्र इवाम्बुराशेः ॥ ७ ॥

न कथमप्यलभन्त रणक्षमांस्तिसृषु दिक्षु गजानथ वज्रिणः ।
ककुभि बभ्रमुरभ्रमुवल्लभप्रतिभटा इव यस्य घटागजाः ॥ ८ ॥

अजनि **विजयचन्द्रो** नाम तस्मान्नरेन्द्रः
सुरपतिरिव भूभृत्पक्षविच्छेददक्षः ।
भुवनदलनहेलाहर्म्यहम्मीरनारी-
नयनजलदधाराधौतभूलोकतापः ॥ ९ ॥

यस्मिंश्चलत्युदधिनेमिमहीजयाय
माद्यत्करीन्द्रगुरुभारनिपीडितेव ।
याति प्रजापतिपदं शरणार्थिनी भू-
स्त्वङ्गत्तुरंगनिवहोत्थरजश्छलेन ॥ १० ॥

सोऽयं समस्तराजचक्रसंसेवितचरणः स च परमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरनिजभुजोपार्जितकन्यकुब्जाधिपत्यश्रीचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरश्रीमदनपालदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीगोविन्दचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराज्यत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीमद्विजयचन्द्रदेवो विजयी देवहलीपत्तलायां नागलीग्रामनिवासिनो निखिलजनपदानुपगतानपि च राजराज्ञीयुवराजमन्त्रिपुरोहितप्रतीहारसेनापतिभाण्डागारिकाक्षपटलिकभिषङ्नैमित्तिकान्तःपुरिकदूतकरितुरगपत्तनाकरस्थानगोकुलाधिकारिपुरुषानाज्ञापयति बोधयत्यादिशति च यथा विदितमस्तु भवतां यथोपरिलिखितग्रामः सजलस्थलः सलोहलवणाकरः सगर्तोषरः साम्रमधूकवनः समत्स्याकरस्तृणयूतिगोचरसहितः स्वसीमासहितश्चतुराघाटविशुद्धः पञ्चविंशत्यधिकद्वाद-

१. वाणीनामुत्पत्तिस्थानम्. गोविन्दचन्द्रः कविरासीदिति तात्पर्यम्.

शशातसंवत्सरेऽङ्केऽपि १२२९ माघीपौर्णमास्यां वसिष्ठघट्टे यमुनायां स्नात्वा विधिवन्मन्त्रदेवमुनिमनुजभूतपितृगणांस्तर्पयित्वा तिमिरपटलपाटनपटुमहसमुष्णरोचिषमुपस्थायौषधिपतिशकलशेखरं समभ्यर्च्य त्रिभुवनत्रातुर्भगवतो वासुदेवस्य पूजां विधाय मातापित्रोरात्मनश्च पुण्ययशोविवृद्धयेऽस्मत्संमत्या समस्तराज[प्र]क्रियोपेतयौवराज्याभिषिक्तमहाराजपुत्रश्रीजयचन्द्रदेवेन गोकर्णकुशलतापूतकरतलोदकपूर्वमा चन्द्रार्कं यावत्काश्यपगोत्राभ्यां काश्यपापवत्सारनैध्रुवत्रिप्रवराभ्यां ठक्कुरतिहुलपौत्राभ्यां ठक्कुरआल्हपुत्राभ्यां राउतश्रीदादेशर्मभ्यां ब्राह्मणाभ्यां शुद्धप्रसादं प्रदत्तो मत्वा यथादीयमानभागभोगकरप्रवणिकरगोकरजानकरतुरुष्कदण्डक्षमारगादिआणणप्रभृतिसमस्तनियतानियतादायानाज्ञाविधेयीभूय दास्यथ।

भवन्ति चात्र धर्मानुशासिनः पौराणिकश्लोकाः---

'भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ॥
शङ्खं भद्रासनं छत्रं वराश्वा वरवारणाः।
भूमिदानस्य चिह्नानि फलमेतत्पुरंदर॥
षष्टिं वर्षसहस्राणि स्वर्गे वसति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति॥
गामेकां स्वर्णमेकं च भूमेरप्येकमङ्गुलम्॥
हरन्नरकमाप्नोति यावदाहूतसंप्लवम्॥
वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरा विषयोपभोगाः।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने॥

१. 'ठन्कुर' इति मुद्रितः पाठः. २. 'पौत्राभ्यां' इति मुद्रितः पाठः.

सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥'

लिखितं ताम्रकमिदं श्रीजयपालेन ।

(इण्डियन् आण्टिक्केरी १५।७८८.)

(२३)

कान्यकुब्जेश्वरश्रीजयचन्द्रमहीपतेर्दानपत्रम् ।

ॐ स्वस्ति ॥

अकुण्ठोत्कण्ठवैकुण्ठकण्ठपीठलुठत्करः ।
संरम्भः सुरतारम्भे स श्रियः श्रेयसेऽस्तु वः ॥ १ ॥

आसीदशीतद्युतिवंशजातक्ष्मापालमालासु दिवं गतासु ।
साक्षाद्विवस्वानिव भूरिधाम्ना नाम्ना **यशोविग्रह** इत्युदारः ॥ २ ॥

तत्सुतोऽभून्**महीचन्द्र**श्चन्द्रधामनिभं निजम् ।
येनापारमकूपारपारे व्यापारितं यशः ॥ ३ ॥

तस्याभूत्तनयो नयैकरसिकः क्रान्तद्विषन्मण्डलो
विध्वस्तोद्धतवीरयोधतिमिरः **श्रीचन्द्रदेवो** नृपः ।
येनोदारतरप्रभावशमिताशेषप्रजोपद्रवं
श्रीमद्गाधिपुराधिराज्यमसमं दोर्विक्रमेणार्जितम् ॥ ४ ॥

तीर्थानि काशिकुशिकोत्तरकोशलेन्द्र-
स्थानीयकानि परिपालयताधिगम्य ।
हेमात्मतुल्यमनिशं ददता द्विजेभ्यो
येनाङ्किता वसुमती शतशस्तुलाभिः ॥ ५ ॥

तस्यात्मजो **मदनपाल** इति क्षितीन्द्र-
चूडामणिर्विजयते निजगोत्रचन्द्रः ।
यस्याभिषेककलशोल्लसितैः पयोभिः
प्रक्षालितं कलिरजःपटलं धरित्र्याः ॥ ६ ॥

यस्यासीद्विजयप्रयाणसमये तुङ्गाचलोच्चैश्चल-
न्माद्यत्कुम्भिपदक्रमासमभरभ्रश्यन्महीमण्डले ।
चूडारत्नविभिन्नतालुगलितस्त्यानासृगुद्भासितः
शेषः शेषमथादिव(?) क्षणमसौ क्रोडे निलीनाननः ॥ ७ ॥

तस्मादजायत निजायतबाहुवल्लि-
बन्धावरुद्धनवराज्यगजो नरेन्द्रः ।
सान्द्रामृतद्रवमुचां प्रभवो गवां यो
गोविन्दचन्द्र इति चन्द्र इवाम्बुराशेः ॥ ८ ॥

न कथमप्यलभन्त रणक्षमांस्तिसृषु दिक्षु गजानथ वज्रिणः ।
ककुभि बभ्रमुरभ्रमुवल्लभप्रतिभटा इव यस्य घटागजाः ॥ ९ ॥

अजनि **विजयचन्द्रो** नाम तस्मान्नरेन्द्रः
सुरपतिरिव भूभृत्पक्षविच्छेददक्षः ।
भुवनदलनहेलाहर्म्यहम्मीरनारी-
नयनजलदधाराधौतभूलोकतापः ॥ १० ॥

लोकत्रयाक्रमणकेलिविशृङ्खलानि
प्रख्यातकीर्तिकविवर्णितवैभवानि ।
यस्य त्रिविक्रमपदक्रमभाञ्जि भान्ति
प्रोद्द्योतयन्ति बलिराजभयं यशांसि ॥ ११ ॥

यस्मिंश्चलत्युदधिनेमिमहीजयार्थे
माद्यत्करीन्द्रगुरुभारनिपीडितेव ।
याति प्रजापतिपदं शरणार्थिनी भू-
स्त्वङ्गत्तुरङ्गनिवहोत्थरजश्छलेन ॥ १२ ॥

तस्मादद्भुतविक्रमादथ **जयच्चन्द्राभिधानः** पति-
र्भूपानामवतीर्ण एष भुवनोद्धाराय नारायणः ।
द्वैधीभावमपास्य विग्रहरुचिं धिक्कृत्य शान्ताशयाः
सेवन्ते यमुदग्रबन्धनभयध्वंसार्थिनः पार्थिवाः ॥ १३ ॥

गच्छेन्मूर्छामतुच्छां न यदि कवलयेत्कूर्मपृष्ठाभिघात-
प्रत्यावृत्तः श्रमार्तो नमदखिलफणश्वासवात्यासहस्रम् ।
उद्योगे यस्य धावद्धरणिधरधुनीनिर्झरस्फारधार-
भ्रश्यद्दानद्विपालीबहलभरगलद्धैर्यमुद्रः फणीन्द्रः ॥ १४ ॥

सोऽयं समस्तराजचक्रसंसेवितचरणः स च परमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरनिजभुजोपार्जितकन्यकुब्जाधिपत्यश्रीचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरश्रीमदनपालदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीगोविन्दचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीविजयचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीमज्जयच्चन्द्रदेवो विजयी असुरेसपत्तलायां केमोलीग्रामनिवासिनो निखिलजनपदानुपगतानपि च राजराज्ञीयुवराजमन्त्रिपुरोहितप्रतीहारसेनापतिभाण्डागारिकाक्षपटलिकभिषङ्नैमित्तिकान्तःपुरिकदूतकरितुरगपत्तनाकरस्थानगोकुलाधिकारिपुरुषानाज्ञापयति बोधयत्यादिशति च । विदितमस्तु भवतां यथोपरिलिखितग्रामः सजलस्थलः सलोहलवणाकरः समत्स्याकरः सगर्तोषरः सगिरिगहननिधानः समधूकाम्रवनवाटिकाविटपतृणयूतिगोचरपर्यन्तः सोर्ध्वाधश्चतुराघाटविशुद्धः स्वसीमापर्यन्तस्त्रिचत्वारिंशदधिकद्वादशशतसंवत्सरे आषाढे मासि शुक्लपक्षे सप्तम्यां तिथौ रविदिने अङ्कतोऽपि संवत् १२४३ आषाढसुदि ७ रवौ अद्येह श्रीमद्वाराणस्यां गङ्गायां स्नात्वा विधिवन्मन्त्रदेवमुनिमनुजभूतपितृगणांस्तर्पयित्वा तिमिरपटलपाटनपटुमहसमुष्णरोचिषमुपस्थायौषधिपतिशकलशेखरं समभ्यर्च्य त्रिभुवनत्रातुर्भगवतो वासुदेवस्य पूजां विधाय प्रचुरपायसेन हविषा हविर्भुजं हुत्वा मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धयेऽस्माभिर्गोकर्णकुशलतापूतकरतलोदकपूर्वकं भारद्वाजगोत्राय भारद्वाजाङ्गिरसबा-

हस्यत्येति त्रिप्रवराय राउतश्रीआढलेपौत्राय राउतश्रीदूंटापुत्राय डोडराउतश्रीअणंगाय चन्द्रार्कं यावच्छासनीकृत्य प्रदत्तो मत्वा यथादीयमानभागभोगकरप्रवणिकरप्रभृतिनियतानियतसमस्तदायानाज्ञाविधेयीभूय दास्यथेति ।

भवन्ति चात्र श्लोकाः—

भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥
शङ्खं भद्रासनं छत्रं वराश्वा वरवारणाः ।
भूमिदानस्य चिह्नानि फलमेतत्पुरंदर ॥
षष्टिं वर्षसहस्राणि स्वर्गे वसति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति ॥
तडागानां सहस्रेण वाजपेयशतेन च ।
गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ॥
वारिहीनेष्वरण्येषु शुष्ककोटरवासिनः ।
कृष्णसर्पाश्च जायन्ते देवब्रह्मस्वहारिणः ॥
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥
वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरा विषयोपभोगाः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥

(इण्डियन् आण्टिक्केरी १५।११–१२)

(२४)

महाराजश्रीमहेन्द्रपालस्य दानपत्रम् ।

(पत्रोपरि राजमुद्रा)

परमवैष्णवो महाराजश्रीदेवशक्तिदेवस्तस्य पु-
त्रस्तत्पादानुध्यातः श्रीभूयिकादेव्यामुत्पन्नः प-
रममाहेश्वरो महाराजश्रीवत्सराजदेवस्तस्य पुत्र-
स्तत्पादानुध्यातः श्रीसुन्दरीदेव्यामुत्पन्नः परम-
भगवतीभक्तो महाराजश्रीनागभटदेवस्तस्य पु-
त्रस्तत्पादानुध्यातः श्रीमदीसटादेव्यामुत्पन्नः पर-
मादित्यभक्तो महाराजश्रीरामभद्रदेवस्तस्य पुत्र-
स्तत्पादानुध्यातः श्रीमदप्पादेव्यामुत्पन्नः परम-
भगवतीभक्तो महाराजश्रीभोजदेवस्तस्य पुत्रस्त-
त्पादानुध्यातः श्रीचन्द्रभट्टारिकादेव्यामुत्पन्नः
परमभगवतीभक्तो महाराजश्रीमहेन्द्रपालदेवः ॥

(दानपत्रम्)

स्वस्तिश्रीमहोदय[1]समावासितानेकगोहस्त्यश्वरथपत्तिसंपन्नस्कन्धावारात्पर-मवैष्णवो महाराज**श्रीदेवशक्तिदे**वस्तस्य पुत्रस्तत्पादानुध्यातः श्रीभूयिका-देव्यामुत्पन्नः परममाहेश्वरो महाराज**श्रीवत्सराजदे**वस्तस्य पुत्रस्तत्पादानु-ध्यातः श्रीसुन्दरीदेव्यामुत्पन्नः परमभगवतीभक्तो महाराज**श्रीनागभटदेव**-स्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदीसटादेव्यामुत्पन्नः परमादित्यभक्तो महा-राज**श्रीरामभद्रदे**वस्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदप्पादेव्यामुत्पन्नः पर-मभगवतीभक्तो महाराज**श्रीभोजदे**वस्तस्य पुत्रस्तत्पादानुध्यातः श्रीचन्द्र-भट्टारिकादेव्यामुत्पन्नः परमभगवतीभक्तो महाराज**श्रीमहेन्द्रपालदेवः** श्रा-वस्ती[2]भुक्तौ श्रावस्तीमण्डलान्तःपातिवालयिकाविषयसंबद्धपानीयकग्राममुप-

१. महोदयमिति कान्यकुब्ज(कनौज)नगरस्य नामान्तरम्. २. श्रावस्तीति 'साहेतमाहेत'नाम्ना प्रसिद्धो ग्रामो 'गोंडा'प्रान्ते वर्तते.

गतान्सर्वानेव यथास्थाननियुक्तान्प्रतिवासिनश्च समाज्ञापयति। उपरिलिखितग्रामः सर्वायसमेत आचन्द्रार्कक्षितिकालं पूर्वदत्तदेवब्रह्मदेयवर्जितो मया पित्रोः पुण्याभिवृद्धये सावर्णसगोत्रकौथुमच्छन्दोगसब्रह्मचारिभट्टपद्मसाराय सवितुः कुम्भसंक्रान्तौ स्नात्वा प्रतिग्रहेण प्रतिपादित इति विदित्वा भवद्भिः समनुमन्तव्यम्। प्रतिवासिभिरप्याज्ञाश्रवणविधेयैर्भूत्वा सर्वाया अस्य समुपनेया इति।

श्रीमद्भाकप्रयुक्तस्य शासनस्य स्थिरायतेः।
संवत्सराणां १०० ५० ५ माघसुदि १० निबद्धम्॥

(इण्डियन् आण्टिक्केरी १५।१०५-१३)

(२५)

महाराजश्रीविनायकपालस्य दानपत्रम्।

(पत्रोपरि राजमुद्रा)

परमवैष्णवो महाराजश्रीदेवशक्तिदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीभूयिकादेव्यामुत्पन्नः परममाहेश्वरो महाराजश्रीवत्सराजदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीसुन्दरीदेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीनागभटदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदीसटादेव्यामुत्पन्नः परमादित्यभक्तो महाराजश्रीरामभद्रदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदप्पादेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीभोजदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीचन्द्रभट्टारिकादेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीमहेन्द्रपालदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीदेहनागादेव्यामुत्पन्नः परमवै-

१. अत्र संवत्सराङ्काणां संकलने १५५ इयं संख्या समुत्पद्यते. अयं सुप्रसिद्धस्य कान्यकुब्जमहीपतेर्हर्षवर्धनस्य संवत्सरः. हर्षवर्धनश्च ६०६ खिस्ताब्द आसीदित्येतेषु वर्षेषु पूर्वसंख्यायां योजितेषु ७६१ मितः खिस्ताब्दो दानपत्रलेखनकाल इति फ्लीटपण्डितो वक्ति.

ष्णवो महाराजश्रीभोजदेवस्तस्य भ्राता श्रीमहेन्द्रपा-
लदेवपुत्रस्तयोः पादानुध्यातः श्रीमहीदेवीदेव्यामुत्प-
न्नः परमादित्यभक्तो महाराजश्रीविनायकपालदेवः ॥

(दानपत्रम्)

ॐ स्वस्ति महोदयसमावासितानेकगोहस्त्यश्वरथपत्तिसंपन्नस्कन्धावारा-त्परमवैष्णवो महाराज**श्रीदेवशक्तिदेव**स्तस्य पुत्रस्तत्पादानुध्यातः श्रीभूयिकादेव्यामुत्पन्नः परममाहेश्वरो महाराज**श्रीवत्सराजदेव**स्तस्य पुत्रस्तत्पादानुध्यातः श्रीसुन्दरीदेव्यामुत्पन्नः परमभगवतीभक्तो महाराज**श्रीनागभटदेव**स्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदीमटादेव्यामुत्पन्नः परमादित्यभक्तो महाराज**श्रीरामभद्रदेव**स्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदप्पादेव्यामुत्पन्नः परमभगवतीभक्तो महाराज**श्रीभोजदेव**स्तस्य पुत्रस्तत्पादानुध्यातः श्रीचन्द्रभट्टारिकादेव्यामुत्पन्नः परमभगवतीभक्तो महाराज**श्रीमहेन्द्रपालदेव**स्तस्य पुत्रस्तत्पादानुध्यातः श्रीदेहनागादेव्यामुत्पन्नः परमवैष्णवो महाराज**श्रीभोजदेव**स्तस्य भ्राता श्रीमहेन्द्रपालदेवपुत्रस्तयोः पादानुध्यातः श्रीमहीदेवीदेव्यामुत्पन्नः परमादित्यभक्तो महाराज**श्रीविनायकपालदेवः** प्रतिष्ठानभुक्तौ[1] वाराणसीविषयसंबद्धकाशीपारपथकप्रतिबद्धटिक्करिकाग्रामसमुपगतान्सर्वानेव यथास्थाननियुक्तान्प्रतिवासिनश्च समाज्ञापयति । उपरिलिखितग्रामः सर्वायससमेत आ चन्द्रार्कक्षितिकालं पूर्वदत्तदेवब्रह्मदेयवर्जितो मया पित्रोः पुण्याभिवृद्धये दर्भिसगोत्राथर्वसब्रह्मचारिभट्टभुल्लाकाय पञ्चयां गङ्गायां स्नात्वा प्रतिग्रहेण प्रतिपादित इति विदित्वा भवद्भिः समनुमन्तव्यः । प्रतिवासिभिरप्याज्ञाश्रवणविधेयैर्भूत्वा सर्वाया अस्य समुपनेया इति ।

श्रीहर्षेण प्रयुक्तस्य शासनस्य स्थिरायतेः ।
संवत्सराणां १०० ८० ८ फाल्गुनवदि ९ निबद्धम् ॥

(इण्डियन् आण्टिक्वेरी १५।१३८–४१)

---

१. एतत्प्रतिष्ठानं नाम नगरं चन्द्रवंश्यमहीपतीनां राजधानी प्रयागसमीपे क्वचिदासीत्. 'एतद्भगवत्या भागीरथ्या यमुनासङ्गपावनेषु सलिलेषु पुण्येष्ववलोकयत इवात्मानं प्रतिष्ठानस्य' इति विक्रमोर्वश्यां द्वितीयेऽङ्के उर्वशयुक्तिः. दक्षिणदेशे पैठणनाम्ना प्रसिद्धं प्रतिष्ठानं त्वन्यत्.

(२६)

मन्दसोरनगरस्थसूर्यमन्दिरप्रशस्तिः।

सिद्धम् ॥

यो वृत्त्यर्थमुपास्यते सुरगणैः सिद्धैश्च सिद्ध्यर्थिभि-
　ध्यानैकाग्र(ग्र्य)परैर्विधेयविषयैर्मोक्षार्थिभिर्योगिभिः।
भक्त्या तीव्रतपोधनैश्च मुनिभिः शापप्रसादक्षमै-
　र्हेतुर्यो जगतः क्षयाभ्युदययोः पायात्स वो भास्करः ॥
तत्त्वं ज्ञानविदोऽपि यस्य न विदुर्ब्रह्मर्षयोऽभ्युद्यताः
　कृत्स्नं यश्च गभस्तिभिः प्रविसृतैः पुष्णाति लोकत्रयम्।
गन्धर्वामरसिद्धकिन्नरनरैः संस्तूयतेऽभ्युत्थितो
　भक्तेभ्यश्च ददाति योऽभिलषितं तस्मै सवित्रे नमः ॥
　यः प्रत्यहं प्रतिविभात्युदयाचलेन्द्र-
　　विस्तीर्णतुङ्गशिखरस्खलितांशुजालः।
　क्षीबाङ्गनाजनकपोलतलाभिरामः
　　पायात्स वः सुकिरणाभरणो विवस्वान् ॥
　कुसुमभरानततरुवरदेवकुलसभाविहाररमणीयात्।
　लाटविषयान्नगावृतशैलाज्जगति प्रथितशिल्पाः ॥
　ते(तद्)देशपार्थिवगुणापहृताः प्रकाश-
　　मध्वादिजान्यविरलान्यसुखान्यपास्य।
　जातादरा दशपुरं प्रथमं मनोभि-
　　रन्वागताः ससुतबन्धुजनाः समेत्य ॥
　मत्तेभगण्डतटविच्युतदानबिन्दु-
　　सिक्तोपलाचलसहस्रविभूषणायाः।

---

१. 'दशपुरं' इति नाम्नोऽपभ्रंशो 'दसोर' इति तस्य च क्रमेण 'मन्दसोर' इति जात इत्याधुनिकाः.

पुष्पावतंसतरुम(ण्ड)ण्डवतंसकाया
भूमेः परं तिलकभूतमिदं क्रमेण ॥

तटोत्थवृक्षच्युतनैकपुष्पविचित्रतीरान्तजलानि भान्ति ।
प्रफुल्लपद्माभरणानि यत्र सरांसि कारण्डवसंकुलानि ॥

विलोलवीचीचलितारविन्दपतद्रजःपिञ्जरितैश्च हंसैः ।
स्वकेसरोदारभरावभुग्नैः क्वचित्सरांस्यम्बुरुहैश्च भान्ति ॥

स्वपुष्पभारावनतैर्नगेन्द्रैर्मदप्रगल्भालिकुलस्वनैश्च ।
अजस्रगाभिश्च पुराङ्गनाभिर्वनानि यस्मिन्समलंकृतानि ॥

चलत्पताकान्यबलासनाथान्यत्यर्थशुक्लान्यधिकोन्नतानि ।
तडिल्लताचित्रसिताभ्रकूटतुल्योपमानानि गृहाणि यत्र ॥

कैलासतुङ्गशिखरप्रतिमानि चान्या
न्याभान्ति दीर्घवलभीनि सवेदिकानि ।
गान्धर्वशब्दमुखराणि निविष्टचित्र-
कर्माणि लोलकदलीवनशोभितानि ॥

प्रासादमालाभिरलंकृतानि धरां विदार्येव समुत्थितानि ।
विमानमालासदृशानि यत्र गृहाणि पूर्णेन्दुकरामलानि ॥

यद्भात्यभिरम्यसरिद्वयेन चपलोर्मिणा समुपगूढम् ।
रहसि कुचशालिनीभ्यां प्रीतिरतिभ्यां स्मराङ्गमिव ॥

सत्यक्षमादमशमव्रतशौचधैर्य-
स्वाध्यायवृत्तविनयस्थितिबुद्ध्युपेतैः ।
विद्यातपोनिधिभिरस्मयितैश्च विप्रै-
र्यद्भ्राजते ग्रहगणैः खमिव प्रदीप्तैः ॥

अथ समेत्य निरन्तरसंगतैरहरहः प्रविजृम्भितसौहृदाः ।
नृपतिभिः सुतवत्प्रतिमानिताः प्रमुदिता न्यवसन्त सुखं पुरे ॥

---

१. 'सिवानो' 'सुमली' इति च नदीद्वयं मन्दसोरनगरसमीपस्थम्. २. ते पूर्वोक्ता लाटविषयादागताः पट्टशिल्पिनः.

श्रवणसुभगं धानुर्वेद्यं दृढं परिनिष्ठिताः
सुचरितशतासङ्गाः केचिद्विचित्रकथाविदः ।
विनयनिभृताः सम्यग्धर्मप्रसङ्गपरायणाः
प्रियमपरुषं पथ्यं चान्ये क्षमा बहु भाषितुम् ॥

केचित्स्वकर्मण्यधिकास्तथान्यैर्विज्ञायते ज्योतिषमात्मवद्भिः ।
अद्यापि चान्ये समरप्रगल्भाः कुर्वन्त्यरीणामहितं प्रसह्य ॥

प्राज्ञा मनोज्ञवधवः(पुषः) प्रथितोरुवंशा
वंशानुरूपचरितामरणास्तथान्ये ।
सत्यव्रताः प्रणयिनामुपकारदक्षा
विस्रम्भपूर्वमपरे दृढसौहृदाश्च ॥

विजितविषयसङ्गैर्धर्मशीलैस्तथान्यै-
र्मृदुभिरधिकसत्त्वैर्लोकयात्राम(प)रैश्च ।
स्वकुलतिलकभूतैर्मुक्तरागैरुदारै-
रधिकमभिविभाति श्रेणि[1]रेवंप्रकारैः ॥

तारुण्यकान्त्युपचितोऽपि सुवर्णहार-
ताम्बूलपुष्पविधिना समलंकृतोऽपि ।
नारीजनः प्रियमुपैति न तावदग्र्यां (:)
यावन्न पट्टमयवस्त्रयुगानि धत्ते ॥

स्पर्शवता वर्णान्तरविभागचित्रेण नेत्रसुभगेन ।
यैः सकलमिदं क्षितितलमलंकृतं पट्टवस्त्रेण ॥

विद्याधरीरुचिरपल्लवकर्णपूर-
वातेरितास्थिरतरं प्रविचिन्त्य लोकम् ।
मानुष्यमर्थनिचयांश्च तथा विशालां-
स्तेषां शुभा मतिरभूदचला ततस्तु ॥

---

१. सजातीयानां शिल्पिनां समूहः.

चतुःसमुद्रान्तविलोलमेखलां सुमेरुकैलासबृहत्पयोधराम् ।
वनान्तवान्तस्फुटपुष्पहासिनीं **कुमारगुप्ते** पृथिवीं प्रशासति ॥
समानधीः शुक्रबृहस्पतिभ्यां ललामभूतो भुवि पार्थिवानाम् ।
रणेषु यः पार्थसमानकर्मा बभूव गोप्ता नृप**विश्ववर्मा** ॥
दीनानुकम्पनपरः कृपणार्तवर्ग-
संधा(?)प्रदोऽधिकदयालुरनाथनाथः ।
कल्पद्रुमः प्रणयिनामभयप्रदश्च
भीतस्य यो जनपदस्य च बन्धुरासीत् ॥
तस्यात्मजः स्थैर्यनयोपपन्नो बन्धुप्रियो बन्धुरिव प्रजानाम् ।
बन्ध्वर्तिहर्ता नृप**बन्धुवर्मा** द्विड्दृप्तपक्षक्षपणैकदक्षः ॥
कान्तो युवा रणपटुर्विनयान्वितश्च
राजापि सन्नुपसृतो न मदैः स्मयाद्यैः ।
शृङ्गारमूर्तिरभिभात्यनलंकृतोऽपि
रूपेण यः कुसुमचाप इव द्वितीयः ॥
वैधव्यतीव्रव्यसनक्षतानां स्मृत्वा यमद्याप्यरिसुन्दरीणाम् ।
भयाद्भवत्यायतलोचनानां घनस्तनायासकरः प्रकम्पः ॥
तस्मिन्नेव क्षितिपतिवृषे बन्धुवर्मण्युदारे
सम्यक्स्फीतं दशपुरमिदं पालयत्युन्नतांसे ।
शिल्पावाप्तैर्धनसमुदयैः पट्टवायैरुदारं
श्रेणीभूतैर्भवनमतुलं कारितं दीप्तरश्मेः ॥
विस्तीर्णतुङ्गशिखरं शिखरिप्रकाश-
मभ्युद्गतेन्द्वमलरश्मिकलापगौरम् ।
यद्भाति पश्चिमपुरस्य निविष्टकान्त-
चूडामणिप्रतिसमं नयनाभिरामम् ॥
रामासनाथरचने दरभास्करांशु-
वह्निप्रतापसुभगे जललीनमीने ।

१. हिन्दुस्तानीभाषायां 'पट्टवा' इति प्रसिद्धः.

चन्द्रांशुहर्म्यतलचन्दनतालवृन्त-
हारोपभोगरहिते हिमदग्धपद्मे ॥
रोध्रप्रियंगुतरुकुन्दलताविकोश-
पुष्पासवप्रमुदितालिक(कु)लाभिरामे।
काले तुषारकणकर्कशशीतवात-
वेगप्रनृत्तलवलीनगणै(नै)कशाखे ॥
स्मरवशगतरुणजनवल्लभाङ्गनाविपुलकान्तपीनोरु[1]-।
स्तनजघनघनालिङ्गननिर्भर्त्सिततुहिनहिमपाते ॥
मालवानां गणस्थित्या याते शतचतुष्टये।
त्रिनवत्यधिकेऽब्दानां(४९३)ऋतौ सेव्यघनस्व(स्त)ने ॥
सहस्यमासशुक्लस्य प्रशस्तेऽह्नि त्रयोदशे।
मङ्गलाचारविधिना प्रासादोऽयं निवेशितः ॥
बहुना समतीतेन कालेनान्यैश्च पार्थिवैः।
व्यशीर्यतैकदेशोऽस्य भवनस्य ततोऽधुना ॥
स्वयशोवृद्धये सर्वमत्युदारमुदारया।
संस्कारितमिदं भूयः श्रेण्या भानुमतो गृहम् ॥
अत्युन्नतमवदातं नभः स्पृशन्निव मनोहरैः शिखरैः।
शशिभान्वोरभ्युदयेष्वमलमयूखायतनभूतम् ॥
वत्सरशतेषु पञ्चसु विंशत्यधिकेषु नवसु चाब्देषु(५२९)।
यातेष्वभिरम्यतपस्यमासशुक्लद्वितीयायाम् ॥
स्पष्टैरशोकतरुकेतकसिन्दुवार-
लोलातिमुक्तकलतामदयन्तिकानाम्।
पुष्पोद्गमैरभिनवैरधिगम्य नून-
मैक्यं विजृम्भितशरे हरधूतदेहे ॥
मधुपानमुदितमधुकरकुलोपगीतनगणै(नै)कपृथुशाखे।
काले नवकुसुमोद्गमदन्तुरकान्तप्रचुररोध्रे ॥

---

१. कविसंप्रदायाविरुद्धोऽयं पूर्वोत्तरार्धयोः समासः. २. विक्रमसंवत्सरोऽयम्.

शशिनेव नभो विमलं कौस्तुभमणिनेव शार्ङ्गिणो वक्षः ।
भवनवरेण तथेदं पुरमखिलमलंकृतमुदारम् ॥

अमलिनशशिलेखादन्तुरं पिङ्गलानां
परिवहति समूहं यावदीशो जटानाम् ।
विकट(च)कमलमालामंससक्तां च शार्ङ्गी
भवनमिदमुदारं शाश्वतं तावदस्तु ॥

श्रेण्यादेशेन भक्त्या च कारितं भवनं रवेः ।
पूर्वा(?) चेयं प्रयत्नेन रचिता वत्सभट्टिना ॥

स्वस्ति कर्तृलेखकवाचकश्रोतृभ्यः । सिद्धिरस्तु ॥

(इण्डियन् आण्टिक्वेरी १५।१९४–२०१)

(२७)

मन्दसोरनगरकूपस्थितप्रशस्तिः ।

सिद्धम् ॥

स जयति जगतां पतिः पिनाकी स्मितरवगीतिषु यस्य दन्तकान्तिः ।
द्युतिरिव तडितां निशि स्फुरन्ती तिरयति च स्फुटयत्यदश्च विश्वम् ॥

स्वयंभूर्भूतानां स्थितिलयसमुत्पत्तिविधिषु
प्रयुक्तो येनाज्ञां वहति भुवनानां विधृतये ।
पितृत्वं चानीतो जगति गरिमाणं गमयता
स शंभुर्भूयांसि प्रतिदिशतु भद्राणि भवताम् ॥

फणमणिगुरुभाराक्रान्तिदूरावनम्रं
स्थगयति रुचमिन्दोर्मण्डलं यस्य मूर्ध्नाम् ।
स शिरसि विनिबध्नन्रन्ध्रिणीमस्थिमालां
सृजतु भवसृजो वः क्लेशभङ्गं भुजंगः ॥

---

१. शिवस्य.

षष्ट्या सहस्रैः सगरात्मजानां खातः खतुल्यां रुचमादधानः ।
अस्योदपन्ना(पाना)धिपतेश्चिराय यशांसि पायात्पयसां विधाता ॥
अथ जयति जनेन्द्रः श्रीयशोधर्मनामा
प्रमदवनमिवान्तः शत्रुसैन्यं विगाह्य ।
व्रणकिसलयभङ्गैर्योऽङ्गभूषां विधत्ते
तरुणतरुलतावद्वीरकीर्तीर्विनाम्य ॥
आजौ जिती(तां) विजयते जगतीं पुनश्च
श्रीविष्णुवर्धननराधिपतिः स एव ।
प्रख्यात औलिकरलाञ्छन आत्मवंशो
येनोदितोदितपदं गमितो गरीयः ॥
प्राचो नृपान्सुबृहतश्च बहूनुदीचः
साम्ना युधा च वशगान्प्रविधाय येन ।
नामापरं जगति कान्तमदो दुरापं
राजाधिराजपरमेश्वर इत्युदूढम् ॥
स्निग्धश्यामाम्बुदाभैः स्थगितदिनकृतो यज्वनामाज्यधूमै-
रम्भो मेध्यं(ध्यं) मघोनावधिषु विदधता गाढसंपन्नसस्यैः ।
संहर्षाद्वाणिनीनां कररभसहृतोद्यानचूताङ्कुराग्रा
राजन्वन्तो रमन्ते भुजविजितभुवा भूरयो येन देशाः ॥
यस्योत्केतुभिरुन्मदद्विपकरव्याविद्धलोध्रद्रुमै-
रुद्धूतेन वनाध्वनि ध्वनिनदद्विन्ध्याद्रिरन्ध्रैर्बलैः ॥
वालेयच्छविधूम(म)रेण रजसा मन्दांशु संलक्ष्यते
पर्यावृत्तशिखण्डिचन्द्रक इव ध्यामं रवेर्मण्डलम् ॥
तस्य प्रभोर्वंशकृतां नृपाणां पादाश्रयाद्विश्रुतपुण्यकीर्तिः ।
भृत्यः स्वनैभृत्यजितारिषट्क आसीद्व(द्व?)सीयान्किल **षष्ठिदत्तः** ॥

---

१. कूपस्य. २. स्त्रीणाम्. ३. गर्दभकान्तिमलिनेन.

हिमवत इव गाङ्गस्तुङ्गनम्रः प्रवाहः
शशभृत इव रेवावारिराशिः प्रथीयान्।
परमभिगमनीयः शुद्धिमानन्ववायो
यत उदित गरिम्णस्तायते नैगमानाम् ॥
तस्यानुकूलः कुलजात्कलत्रात्सुतः प्रसूतो यशसां प्रसूतिः।
हरेरिवांशं वशिनं वराहं **वराहदासं** यमुदाहरन्ति ॥
सुकृतिविषयितुङ्गं रूढमूलं धरायां
स्थितिमपगतभङ्गां स्थेयसीमादधानम्।
गुरुशिखरमिवाद्रेस्तत्कुलं स्वात्मभूत्या
रविरिव **रविकीर्तिः** सुप्रकाशं व्यधत्त ॥
बिभ्रता शुभ्रमभ्रंशि स्मार्तं वर्त्मोचितं सताम्।
न विसंवादिता येन कलावपि कुलीनता ॥
धुतधीदीधितिध्वान्तान्हविर्भुज इवाध्वगान्।
भानुगुप्ता ततः साध्वी तनयांस्त्रीनजीजनत् ॥
भगवद्दोप इत्यासीत्प्रथमः कार्यवर्त्मसु।
अवलम्बनं बान्धवानामन्धकानामिवोद्धवः ॥
बहुनयविधिवेधा गह्वरेऽप्यर्थमार्गे
विदुर इव विदूरं प्रेक्षया प्रेक्षमाणः।
वचनरचनबन्धे संस्कृतप्राकृते यः
कविभिरुदितरागं गीयते गीर्भिरिज्ञः ॥
प्रणिधिदृगनुगन्त्रा यस्य बौद्धेन चारुणा
न निशि तनु दवीयो नास्त्यदृष्टं धरित्र्याम्।
पदमुदयि दधानोऽनन्तरं तस्य चाभू-
त्स भयमभय**दत्तो** नाम छिन्दन्प्रजानाम् ॥
विन्ध्यस्यावन्ध्यकर्मा शिखरतटपतत्पाण्डुरेवाम्बुराशे-
र्गोल्लाङ्गूलैः सहेलं प्लुतिनमिततरोः पारियात्रस्य चाद्रेः।

१. वैश्यानाम्. २. यादवानाम्.

आसिन्धोरन्तरालं निजशुचिसचिवाध्यासितानेकदेशं
राजस्थानीयवृत्त्या सुरगुरुरिव यो वर्णिनां भूतये पात् ॥
विहितसकलवर्णासंकरं शान्तडिम्बं
कृत इव कृतमेतद्येन राज्यं निराधि ।
स धुरमयमिदानीं दोषकुम्भस्य सूनु-
र्गुरु वहति तदूढां धर्मतो धर्मदोषः ॥
स्वसुखमनतिवाञ्छन्दुर्गमेऽध्वन्यसङ्गं
धुरमतिगुरुभारां यो दधद्भर्तुरर्थे ।
वहति नृपतिवेषं केवलं लक्ष्ममात्रं
वलिनमिव विलम्बं कम्बलं बाहुलेयः ॥
उपहितहितरक्षामण्डनो जातिरन्ये-
र्भुज इव पृथुलांसस्तस्य दक्षः कनीयान् ।
महदिदमुदपानं खानयामास विभ्र-
च्छ्रुतिहृदयनितान्तानन्दिनिर्दोषनामा ॥
सुखाश्रेयच्छायं परिणतिहितस्वादुफलदं
गजेन्द्रेणारुग्णं द्रुममिव कृतान्तेन बलिना ।
पितृव्यं प्रोद्दिश्य प्रियमभयदत्तं पृथुधिया
प्रथीयस्तेनेदं कुशलमिह कर्मोपरचितम् ॥
पञ्चसु शतेषु शरदां यातेष्वेकान्ननवतिसहितेषु (५८९) ।
मालवगणस्थितिवशात्कालज्ञानाय लिखितेषु ॥
यस्मिन्काले कलमृदुगिरां कोकिलानां प्रलापा
भिन्दन्तीव स्मरशरनिभाः प्रोषितानां मनांसि ।
भृङ्गालीनां ध्वनिरनुवनं भार(तार)मन्द्रश्च यस्मि-
न्नाधूतज्यं धनुरिव नदच्छ्रूयते पुष्पकेतोः ॥

१. वलियुक्तम्. २. विशेषेण लम्बमानम्. ३. सास्नाम्. ४. वृषभः. ५. ५३३–३४ मिते खिस्ताब्द इति फ्लीटपण्डितः.

प्रियतमकुपितानां रामयन्बद्धरागं
किसलयमिव मुग्धं मानसं मानिनीनाम् ।
उपनयति नभस्वान्मानभङ्गाय यस्मि-
न्कुसुमसमयमासे तत्र निर्मापितोऽयम् ॥

यावत्तुङ्गैरुदन्वान्किरणसमुदयं(या)सङ्गकान्तं तरङ्गै-
रालिङ्गन्निन्दुबिम्बं गुरुभिरिव भुजैः संविधत्ते सुहृत्ताम् ।
बिभ्रत्सौधान्तलेखावलयपरिगतिं मुण्डमालामिवायं
सत्कूपस्तावदास्तामृतसमरसस्वच्छविष्यन्दिताम्बुः ॥

धीमान्दक्षो दक्षिणः सत्यसंधो ह्रीमाञ्छूरो वृद्धसेवी कृतज्ञः ।
बद्धोत्साहः स्वामिकार्येष्वखेदी निर्दोषोऽयं पातु धर्मं चिराय ॥

उत्कीर्णा **गोविन्देन** ॥

(इण्डियन् आण्टिक्वेरी १५।२२२-२२८)

(२८)

यशोधर्ममहीपतेः प्रशस्तिः ।

वेपन्ते यस्य भीमस्तनितभयसमुद्भ्रान्तदैत्या दिगन्ताः
शृङ्गाघातैः सुमेरोर्विघटितदृषदः कंदरा यः करोति ।
उक्षाणं तं दधानः क्षितिधरतनयादत्तपञ्चाङ्गुलाङ्कं
द्राघिष्ठः शूलपाणेः क्षपयतु भवतां शत्रुतेजांसि केतुः ॥

आविर्भूतावलेपैरविनयपटुभिर्लङ्घिताचारमार्गै-
र्मोहादैदंयुगीनैरपशुभरतिभिः पीड्यमाना नरेन्द्रैः ।
यस्य क्ष्मा शार्ङ्गपाणेरिव कठिनधनुर्ज्याकिणाङ्कप्रकोष्ठं
बाहुं लोकोपकारव्रतसफलपरिस्पन्दधीरं प्रपन्ना ॥

निन्द्याचारेषु योऽस्मिन्विनयमुषि युगे कल्पनामात्रवृत्त्या
राजस्वन्येषु पांशुष्विव कुसुमबलिर्नावभासे प्रयुक्तः ।
स श्रेयोधाम्नि सम्राडिति मनुभरतालर्कमांधातृकल्पे
कल्याणे हेम्नि भास्वान्मणिरिव सुतरां भ्राजते यत्र शब्दः ॥

ये भुक्ता गुप्तनाथैर्न सकलवसुधाक्रान्तिदृष्टप्रतापै-
　　र्नाज्ञा हूणाधिपानां क्षितिपतिमुकुटाध्यासिनी यान्प्रविष्टा।
देशांस्तान्धन्वशैलद्रुमगहनसरिद्वीरबाहूपगूढा-
　　वीर्यावस्कन्नराज्ञः स्वगृहपरिसरावज्ञया यो भुनक्ति॥
आ लौहित्योपकण्ठात्तलवनगहनोपत्यकादा महेन्द्रा-
　　दा गङ्गाश्लिष्टसानोस्तुहिनशिखरिणः पश्चिमादा पयोधेः।
सामन्तैर्यस्य बाहुद्रविणहृतमदैः पादयोरानमद्भि-
　　श्चूडारत्नांशुराजिव्यतिकरशबला भूमिभागाः क्रियन्ते॥
स्थाणोरन्यत्र येन प्रणतिकृपणतां प्रापितं नोत्तमाङ्गं
　　यस्याश्लिष्टो भुजाभ्यां वहति हिमगिरिर्दुर्गशब्दाभिमानम्।
नीचैस्तेनापि यस्य प्रणतिभुजबलावर्जनक्लिष्टमूर्ध्ना
　　चूडापुष्पोपहारैर्मिहिरकुलनृपेणार्चितं पादयुग्मम्॥
गा(ग्रा)मेवोन्मातुमूर्ध्वं विगणयितुमिव ज्योतिषां चक्रवालं
　　निर्देष्टुं मार्गमुच्चैर्दिव इव सुकृतोपार्जितायाः स्वकीर्तेः।
तेनाकल्पान्तकालावधिरवनिभुजा श्रीयशोधर्मणायं
　　स्तम्भः स्तम्भाभिरामस्थिरभुजपरिघेणोच्छ्रितिं नायितोऽत्र॥
श्लाघ्ये जन्मास्य वंशे चरितमघहरं दृश्यते कान्तमस्मि-
　　न्धर्मस्यायं निकेतश्चलति नियमितं नामुना लोकवृत्तम्।
इत्युत्कर्षं गुणानां लिखितुमिव यशोधर्मणश्चन्द्रबिम्बे
　　रागादुत्क्षिप्त उच्चैर्भुज इव रुचिमानयः पृथिव्या विभाति॥
　　　इति तुष्टूषया तस्य नृपतेः पुण्यकर्मणः।
　　　वासुलेनोपरचिताः श्लोकाः कक्कस्य सूनुना॥

उत्कीर्णा गोविन्देन॥

(इण्डियन् आण्टिक्वेरी १५।२५३-२५७)

(२९)

श्रीनारायणपालदेवस्य दानपत्रम् ।

ॐ स्वस्ति ।

मैत्रीं कारुण्यरत्नप्रमुदितहृदयः प्रेयसीं संदधानः
सम्यक्संबोधिविद्यासरिदमलजलक्षालिताज्ञानपङ्कः ।
जित्वा यः कामकारिप्रभवमभिभवं शाश्वतीं प्राप शान्तिं
स श्रीमाँल्लोकनाथो जयति दशबलोऽन्यश्च **गोपालदेवः** ॥

लक्ष्मी जन्मनिकेतनं समकरो वोढुं क्षमः क्ष्माभरं
पक्षच्छेदभयादुपस्थितवतामेकाश्रयो भूभृताम् ।
मर्यादापरिपालनैकनिरतः शौर्यालयोऽस्मादभू-
द्दुग्धाम्भोधिविलासहासिमहिमा **श्रीधर्मपालो** नृपः ॥

जित्वेन्द्रराजप्रभृतीनरातीनुपार्जिता येन महोदयश्रीः ।
दत्ता पुनः सा बलिनार्थयित्रे चक्रायुधायानतिवामनाय ॥

रामस्येव गृहीतसत्यतपसस्तस्यानुरूपो गुणैः
सौमित्रेरुदपादि तुल्यमहिमा **वाक्पाल**नामानुजः ।
यः श्रीमान्नयविक्रमैकवसतिर्भ्रातुः स्थितः शासने
शून्याः शत्रुपताकिनीभिरकरोदेकातपत्रा दिशः ॥

तस्मादुपेन्द्रचरितैर्जगतीं पुनानः
पुत्रो बभूव विजयी **जयपाल**नामा ।
धर्मद्विषां शमयिता युधि **देवपाले**
यः पूर्वजे भुवनराज्यसुखान्यनैषीत् ॥

यस्मिन्भ्रातुर्निदेशाद्बलवति परितः प्रस्थिते जेतुमाशाः
सीदन्नाम्नैव दूरान्निजपुरमजहादुत्कलानामधीशः ।
आसांचक्रे चिराय प्रणयिपरिवृतो बिभ्रदुच्चेन मूर्ध्ना
राजा प्राग्ज्योतिषाणामुपशमितसमित्संकथां यस्य चाज्ञाम् ॥

श्रीमान्विग्रहपालस्तत्सूनुरजातशत्रुरिव जातः।
शत्रुवनिताप्रसाधनविलोपिविमलासिजलधारः॥

रिपवो येन गुर्वीणां विपदमास्पदीकृताः।
पुरुषायुपदीर्घाणां सुहृदः संपदामपि॥

लज्जेति तस्य जलधेरिव जह्नुकन्या
पत्नी बभूव कृतहैहयवंशभूषा।
यस्याः शुचीनि चरितानि पितुश्च वंशे
पत्युश्च पावनविधिः परमो बभूव॥

दिक्पालैः क्षितिपालनाय दधतं देहे विभक्ताः श्रियः
श्रीनारायणपालदेवमसृजत्तस्यां स पुण्योत्तरम्।
यः क्षोणीपतिभिः शिरोमणिरुचा श्लिष्टाङ्घ्रिपीठोपलं
न्यायोपात्तमलं चकार चरितैः स्वैरेव धर्मासनम्॥

चेतःपुराणलेख्यानि चतुर्वर्गनिधीनि च।
आरिप्सन्ते यतस्त्यानि चरितानि महीभृतः॥

स्वीकृतसुजनमनोभिः सत्यार्पितसातवाहनः सूक्तैः।
त्यागेन यो व्यधत्त श्रद्धेयामङ्गराजकथाम्॥

भयादरातिभिर्यस्य रणमूर्धनि विस्फुरन्।
असिरिन्दीवरश्यामो ददृशे पीतलोहितः॥

यः प्रज्ञया च धनुषा च जगद्विनीय
नित्यं न्यवीविशदनाकुलमात्मधर्मे।
यस्यार्थिनः सविधमेत्य भृशं कृतार्था
नैवार्थितां प्रति पुनर्विदधुर्मनीषाम्॥

श्रीपतिरकृष्णकर्मा विद्याधरनायको महाभोगी।
अनलसदृशोऽपि धाम्ना यश्चित्रं नलसमश्चरितैः॥

व्याप्ते यस्य त्रिजगति शरच्चन्द्रगौरैर्यशोभि-
र्मन्ये शोभां न खलु बिभरामास रुद्राट्टहासः।

सिद्धस्त्रीणामपि शिरसिजेष्वर्पिताः केतकीनां
पत्रापीडाः सुचिरमभवन्भृङ्गशब्दानुमेयाः ॥
तपो ममास्तु राज्यं ते द्वाभ्यामुक्तमिदं द्वयोः ।
यस्मिन्विग्रहपालेन सगरेण भगीरथे ॥

स खलु भागीरथीपथप्रवर्तमाननानाविधनौवाटसंपादितसेतुबन्धनिहितशैल-शिखरश्रेणीविभ्रमात् निरतिशयघनघनाघनघटाश्यामायमानवामरलक्ष्मीसमारब्धसंततजलदसमयसंदेहात् उदीचीनानेकनरपतिप्राभृतीकृताप्रमेयहयवाहिनीखरखुरोत्खातधूलीधूसरितदिगन्तरालात् परमेश्वरसेवासमायाताशेषजम्बुद्वीपभूपालानन्तपादातभरनमदवनेः श्रीमुद्गगिरिसमावासितश्रीमज्जयस्कन्धावारात् परमसौगतो महाराजाधिराजश्रीविग्रहपालदेवपादानुध्यातः परमेश्वरः परमभट्टारको महाराजाधिराजः श्रीमन्नारायणपालदेवः कुशली तीरभुक्तौ कक्षवैषयिकस्वसंबद्धाविच्छिन्नतलोपेतमकुतिकाग्रामे समुपगताशेषराजपुरुषान् राजराज(जा)नकराजपुत्रराजामात्यमहासांधिविग्रहिकमहाक्षपटलिकमहासामन्तमहासेनापतिमहाप्रतीहारमहाकार्ताकृतिकमहादौःसाधसाधनिकमहादण्डनायकमहाकुमारामात्यराजस्थानीयोपरिकदाशापराधिकचौरोद्धरणिकदाण्डिकदाण्डपाशिकशौल्किकगौल्मिकक्षेत्रपप्रान्तपालकोट्टपालखण्डरक्षतदायुक्तकविनियुक्तकहस्त्यश्वोष्ट्रनौबलव्यापृतककिशोरवडवागोमहिष्यजाविकाध्यक्षदूतप्रेषणिकगमागमिकाभित्वरमाणविषयपतिग्रामपतितरिकगौडमालवखशहूणकुलिककर्णाटलाटचाटभटसेवकादीन् अन्यांश्चाकीर्तितान् राजपादोपजीविनः प्रतिवासिनो ब्राह्मणोत्तरान् महत्तमोत्तमपुरोगमेदान्ध्रचण्डालपर्यन्तान् यथार्हं मानयति बोधयति समादिशति च । मतमस्तु भवताम् । कलशपोते महाराजाधिराजश्रीनारायणपालदेवेन स्वयंकारितसहस्रायतनस्य तत्र प्रतिष्ठापितस्य भगवतः शिवभट्टारकस्य पाशुपताचार्यपरिषदश्च यथार्हं पूजाबलिचरुसत्रनवकर्माद्यर्थं शयनासनग्लानप्रत्ययभैषज्यपरिष्काराद्यर्थमन्येषामपि स्वाभिमतानां स्वपरिकल्पितविभागेनानवद्यभोगार्थं च यथोपरिलिखितमकु-

१. 'मुङ्गेर' नाम्ना प्रसिद्धे नगरे. २. 'तिरहुत' इति प्रसिद्धायां मिथिलायाम्.

तिकाग्रामः स्वसीमातृणयूतिगोचरपर्यन्तः सतलः सोद्देशः साम्रमधूकः सजलस्थलः सगर्तोषरः सोपरिकरः सदशापचारः सचौरोद्धरणः परिहृतसर्वपीडः अचाटभटप्रवेशः अकिंचित्प्रग्राह्यः समस्तभागभोगकरहिरण्यादिप्रत्यायसमेतः भूमिच्छिद्रन्यायेनाचन्द्रार्कक्षितिसमकालं यावत् मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये भगवन्तं शिवभट्टारकमुद्दिश्य शासनीकृत्य प्रदत्तः। ततो भवद्भिः सर्वैरेवानुमन्तव्यम् । भाविभिरपि भूपतिभिर्भूमेर्दानफलगौरवादपहरणे च महानरकपातभयाद्दानमिदमनुमोद्य पालनीयम् । प्रतिवासिभिः क्षेत्रकरैश्चाज्ञाश्रवणविधेयीभूय यथाकालं समुचितभागभोगकरहिरण्यादि सर्वप्रत्यायोपनयः कार्य इति । संवत् १७[1] वैशाखदिने ९ ॥

तथा च धर्मानुशंसिनः श्लोकाः—

बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

षष्टिं वर्षसहस्राणि स्वर्गे मोदति भूमिदः ।
आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत् ॥

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते ॥

सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयोभूयः प्रार्थयत्येष रामः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयः क्रमेण ॥

इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा न हि पुरुषैः परकीर्तयो विलोप्याः ॥

वेदान्तैरप्यसुगमतमं वेदिता ब्रह्मतार्थं(तत्त्वं)
यः सर्वासु श्रुतिषु परमः सार्धमङ्गैरधीती ।
यो यज्ञानां समुदितमहादक्षिणानां प्रणेता
भट्टः श्रीमानिह स गुरवो दूतकः पुण्यकीर्तिः ॥

---

१. नारायणपालदेवस्य राज्यारम्भसंवत्सरोऽयम्.

श्रीमता म(स)ङ्गदासेन शुभदासस्य सूनुना ।
इदं शासनमुत्कीर्णं मत्सामन्तजन्मना ॥

(राजमुद्रा)

श्रीनारायण[illegible]देवस्य

(इण्डियन् आण्टिक्केरी १५ । ३०४-३१०)

(३०)

वलभीप्रभोः श्रीधरसेनमहीपतेर्दानपत्रम् ।

ॐ स्वस्ति विजयस्कन्धावाराद्भरुकच्छवासकात्प्रसभप्रणतामित्राणां मै त्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तप्रहारशतलब्धप्रतापात्प्रतापोपनतदानमानार्जवोपार्जितानुरागादनुरक्तमौलभृतश्रेणीबलावाप्तराज्यश्रियः परममाहेश्वरश्रीभट्टार्कादव्यवच्छिन्नराजवंशान्मातापितृचरणारविन्दप्रणतिप्रविधौताशेषकल्मषः शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषः तत्प्रभावप्रणताराातिचूडारत्नप्रभासंसक्तपादनखरश्मिसंहतिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनान्वर्थराजशब्दो रूपकान्तिस्थैर्यगाम्भीर्यबुद्धिसंपद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलप्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः परममाहेश्वर**श्रीगुहसेन**स्तस्य सुतस्तत्पादनखमयूखसंतानविसृतजाह्नवीजलौघप्रक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यमानसंपद्रूपलोभादिवाश्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मदायानामपाकर्ता प्रजोपघातकारिणामुपप्लवानां दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य संहतारातिपक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममाहेश्वरः **श्रीधरसेन**स्तस्य सुतस्तत्पादानुध्यातः सकलजगदानन्दनात्यद्भुतगुणसमुदयस्थगितसमग्रदिङ्मण्डलः समरशतविजयशोभासनाथमण्डलाग्रद्युतिभासुरतरां-

सपीठोदूढगुरुमनोरथमहाभारः सर्वविद्यापरावरविभागाधिगमविमलमतिरपि सर्वतः सुभाषितलवेनापि सुखोपपादनीयपरितोषः समग्रलोकागाधगाम्भीर्यहृदयोऽपि सुचरितातिशयसुव्यक्तपरमकल्याणस्वभावः खिलीभूतकृतयुगनृपतिपथविशोधनाधिगतोदग्रकीर्तिर्धर्मानुपरोधोज्ज्वलतरीकृतार्थसुखसंपदुपसेवानिरूढधर्मादित्यद्वितीयनामा परममाहेश्वरः **श्रीशीलादित्यः** तस्यानुजस्तत्पादानुध्यातः स्वयमुपेन्द्रगुरुणेव गुरुणात्यादरवता समभिलषणीयामपि राजलक्ष्मीं स्कन्धसक्तां परमभद्र इव धुर्यस्तदाज्ञासंपादनैकरसतयेवोद्वहन्खेदसुखरतिभ्यामनायासितसत्त्वसंपत्तिः प्रभावसंपद्वशीकृतनृपतिशतशिरोरत्नच्छायोपगूढपादपीठोऽपि परावज्ञाभिमानरसानालिङ्गितमनोवृत्तिः प्रणतिमेकां परित्यज्य प्रख्यातपौरुषाभिमानैरप्यरातिभिरनासादितप्रतिक्रियोपायः कृतनिखिलभुवनामोदविमलगुणसंहतिप्रसभविघटितसकलकलिविलसितगतिर्नीचजनाधिरोहिभिरशेषैर्दोषैरनामृष्टात्युन्नतहृदयः प्रख्यातपौरुषास्त्रकौशलातिशयगणतिथविपक्षक्षितिपतिलक्ष्मीस्वयंग्रहप्रकाशितप्रवीरपुरुषप्रथमसंख्याधिगमः परममाहेश्वर**श्रीखरग्रह**स्तस्य तनयस्तत्पादानुध्यातः सकलविद्याधिगमविहितनिखिलविद्वज्जनमनःपरितोषातिशयः सत्त्वसंपदा त्यागौदार्येण च विगतानुसंधानाशमाहिता(?)रातिपक्षमनोरथाक्षभङ्गः सम्यगुपलक्षितानेकशास्त्रकलालोकचरितगह्वरविभागोऽपि परमभद्रप्रकृतिरकृत्रिमप्रश्रयविनयशोभाविभूषणः समरशतजयपताकाहरणप्रत्यग्रोदग्रबाहुदण्डविध्वंसितनिखिलप्रतिपक्षदर्पोदयः स्वधनुः प्रभावपरिभूतास्त्रकौशलाभिमानसकलनृपतिमण्डलाभिनन्दितशासनः परममाहेश्वरः **श्रीधरसेन**स्तस्यानुजस्तत्पादानुध्यातः सच्चरितातिशयितसकलपूर्वनरपतिरतिदुःसाधानामपि प्रसाधयिता विषयाणां मूर्तिमानिव पुरुषकारः परिवृद्धगुणानुरागनिर्भरचित्तवृत्तिभिर्मनुरिव स्वयमभ्युपपन्नः प्रकृतिभिरधिगतकलाकलापः कान्तिमान्निर्वृतिहेतुरकलङ्कःकुमुदनाथः प्राज्यप्रतापस्थगितदिगन्तरालप्रध्वंसितध्वान्तराशिः सततोदितः सविता प्रकृतिभ्यः परं प्रत्ययमर्थवन्तमतिबहुतिथप्रयोजनानुबद्धमागमपरिपूर्णं विदधानः संधिविग्रहसमासनिश्चयनिपुणः स्थानेऽनुरूपमादेशं ददद्गुणवृद्धिविधानज-

नितसंस्कारः साधूनां राज्यशालातुरीयतन्त्रयोरुभयोरपि निष्णातः प्रकटविक्रमोऽपि करुणामृदुहृदयः श्रुतवानप्यगर्वितः कान्तोऽपि प्रशमी स्थिरसौहृदोऽपि निरसिता दोषवतामुदयसमयसमुपजनितजनतानुरागपरिपिहितभुवनसमर्थितप्रथितबालादित्यद्वितीयनामा परममाहेश्वरः **श्रीध्रुवसेन**स्तस्य सुतस्तत्पादकमलप्रणामधरणिकषणजनितकिणलाञ्छनललाटचन्द्रशकलः शिशुभाव एव श्रवणनिहितमौक्तिकालंकारविभ्रमामलश्रुतिविशेषः प्रदानसलिलक्षालिताग्रहस्तारविन्दः कन्याया इव मृदुकरग्रहणादमन्दीकृतानन्दविधिर्वसुंधरायाः कार्मुके धनुर्वेद इव संभाविताशेषलक्ष्यकलापः प्रणतसामन्तमण्डलोत्तमाङ्गधृतचूडारत्नायमानशासनः परममाहेश्वरः परमभट्टारकमहाराजाधिराजपरमेश्वरचक्रवर्ति**श्रीधरसेनः** कुशली सर्वानेव समाज्ञापयति—अस्तु वः संविदितं यथा मया मातापित्रोः पुण्याप्यायनाय उदुम्बरगह्वरविनिर्गतखेटकवास्तव्योदुम्बरगह्वरचातुर्विद्यसामान्यपराशरसगोत्रवाजसनेयिसब्रह्मचारिब्राह्मणभट्टीनागशर्मपुत्रब्राह्मणादित्यशर्मणे खेटकाहारे कोलम्बे वङ्कुमोमालिकाग्रामपूर्वसीम्नि खेटकमानेन व्रीहिद्विपिटकद्वयवापं सभृष्टीकं क्षेत्रं यस्याघाटनानि पूर्वतः सीहमुहिज्जग्रामसीमा दक्षिणतो विश्वपल्लिग्रामसीमा अपरतो द्रोणकसत्कशर्मीकेदारक्षेत्रं उत्तरतो महेश्वरसत्कखग्गडिकेदारीक्षेत्रं तथा नगरकपथकान्तर्गतदुहुदुहुग्रामे दक्षिणापरसीम्नि खेटकमानेन व्रीहिद्विपीटकवापं कोटीलकक्षेत्रं यस्याघाटनानि पूर्वतः आदिरमणकेदारसंज्ञितं महत्तरगोल्लसत्कक्षेत्रं सभीलकसत्कखण्डकेदारश्च दक्षिणतः जाइण्णपल्लिग्रामसीमा अपरतो गुड्डपल्लिग्रामसीमा उत्तरत आरलिकेदारः शर्मीकेदारो वल्मीकद्वयं च तथा पूर्वसीम्नि दुहुदुहिकापद्राके भृष्टी यस्या आघाटनानि पूर्वतः कपित्थोन्दनदी दक्षिणतो विशीर्णोज्झित केदारिकं अपरतः कपित्थोन्दनी उत्तरतः ब्राह्मणवरभटसत्कब्रह्मदेयक्षेत्रमतिक्रम्य उन्दनीद्वयं एवं क्षेत्रद्वयं सभृष्टीकं सोद्रङ्गं सोपरिकरं सभूतवातप्रत्यायं सधान्यहिरण्यादेयं सदशापराधं सोत्पद्यमानवि-

---

१. शालातुरीयः पाणिनिः.

ष्टिकं सर्वप्रक्षेपणीयं पूर्वप्रत्तदेवब्रह्मदेयब्राह्मणविंशतिरहितं भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनं पुत्रपौत्रान्वयभोग्यं उदकातिसर्गेण धर्मदायो निसृष्टः यतोऽस्योचितया ब्रह्मदेयस्थित्या भुञ्जतः कृषतः कर्षयतः प्रदिशतो वा न कैश्चिद्व्यासेधे वर्तितव्यमागामिभद्रनृपतिभिरस्मद्वंशजैरन्यैर्वा। अनित्यान्यैश्वर्याण्यस्थिरं मानुष्यं सामान्यं च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्चेति।

उक्तं च--

'बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत॥
षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥'

दूतकोऽत्र राजदुहितृभूवा॥ लिखितमिदं संधिविग्रहाधिकृतदिविरपतिवत्रभट्टिपुत्रदिविरपतिश्रीस्कन्दभटेनेति। सं ३०० ३० द्विमार्गशिरशु २ स्वहस्तो मम--

(इण्डियन् आण्टिक्वेरी १५।३३५-४०)

---

(३१)

बौद्धगयामन्दिरस्थशिलालेखोऽयम्।

ओम्॥

व्याप्तो येनाप्रमेयः सकलशशिरुचा सर्वतः सत्त्वधातुः
क्षुण्णाः पाषण्डयोधाः सुगतिपथरुधस्तर्कशास्त्राभियुक्ताः।
संपूर्णो धर्मकोषः प्रकृतिरिपुहतः साधितो लोकभूत्यै
शास्तुः शाक्यैकबन्धोर्जयति चिरतरं तद्यशःसारतन्त्रम्॥

---

१. वलभीसंवत्सरोऽयम् ३३०. अत्र ३१९ मितवर्षेषु योजितेषु ६४८-६४९ मितः ख्रिस्ताब्दः.

नैरोर्थी शुभभावनामनुसृतैः संसारसंक्लेशजि-

न्मैत्रेयस्य करे विमुक्तिवशिता यस्यार्पिता व्याकुला ।

निर्वाणावसरे च येन चरणौ दृष्टौ मुनेः पावनौ

पायाद्वः स मुनीन्द्रशासनधरः स्थैर्ये महाकाश्यपः ॥

संयुक्तागमिनो विशुद्धरजसः सत्त्वानुकम्पोद्यताः

शिष्या यस्य सकृद्विनेयकरतुल्या लङ्कातलोपत्यकाम ।

तेभ्यः शीलगुणान्विताश्च शतशः शिष्यप्रशिष्याः क्रमा-

ज्जातास्तुङ्गनरेन्द्रवंशतिलकाः प्रोत्सृज्य राज्यश्रियम् ॥

ध्यानोदयाहितहितः शुभाशुभविवेककृद्विहतमोहः ।

सद्धर्मातुलविभवो भवो बभूव श्रमणस्तेनः ॥

राहुलाख्यश्च तच्छिष्य उपसेनो यतिर्यतः ।

महानामा क्रमादेवमुपसेनस्ततोऽपरः ॥

वात्सल्यं शरणागतस्य सततं दीनस्य वैशेषिकं

व्यापत्सायकसंततिक्षतधृतेरार्तस्य चापत्यकम् ।

क्रूरस्याहितकारिणः प्रवितनं बन्धोर्यथाभावतः

एवं सच्चरितोद्भवेन यशसा यस्याचितं भूतलम् ॥

आम्रद्वीपाधिवासी पृथुकुलजलधिस्तस्य शिष्यो महीयां-

ल्लङ्काद्वीपप्रसूतः परहितनिरतः सन्महानामनामा ।

तेनोच्चैर्बोधिमण्डे शशिकरधवलः सर्वतो मण्डपेन

कान्तः प्रासाद एष स्मरबलजयिनः कारितो लोकशास्तुः ॥

व्यपगतविषयस्नेहो हततिमिरदशः प्रदीपवदसङ्गः ।

कुशलेनानेन जनो बोधिसुखमनुत्तरं भजताम् ॥

यावद्ध्वान्तापहारी प्रविततकिरणः सर्वतो भाति भास्वा-

न्यावत्पूर्णोऽम्बुराशिः फणिफणकुटिलैरूर्मिचक्रैः समन्तात् ।

यावच्चेन्द्राधिवासो विविधमणिशिलाचारुशृङ्गः सुमेरुः
शोभाढ्यं तावदेतद्भवनमुरु मुनेः शाश्वतत्वं प्रयातु ॥
संवत् २०० ६० ९, चैत्रसुदि ८ ॥

(इण्डियन् आण्टिक्केरी १५।३५६–३५८)

(३२)

कोटाप्रान्तस्थविहारप्रशस्तिः ।

ॐ नमो रत्नत्रयाय ।

जयन्ति वादाः सुगतस्य निर्मलाः समस्तसंदेहनिरासभासुराः ।
कुतर्कसंपातनिपातहेतवो युगान्तवाता इव विश्वसंततेः ॥
योऽरूपवानपि बिभर्ति सदैव रूप-
मेकोऽप्यनेक इव भाति च यो निकामम् ।
आराद्गतापरधियः प्रतिमर्त्यवेद्यो
यो निर्जितारिरजितश्च जिनः स वोऽव्यात् ॥
भिनत्ति यो नृणां मोहं तमो वेश्मनि दीपवत् ।
सोऽव्याद्वः सौगतो धर्मो भक्तमुक्तिफलप्रदः ॥
आर्यसंघस्य विमलाः शरच्छशिजितश्रियः ।
जयन्ति जयिनः पादाः सुरासुरशिरोर्चिताः ॥
आसीदम्भोधिधीरः शशिधवलयशा विन्दुनागाभिधान-
स्तत्सूनुः पद्मनागोऽभवदसमगुणैर्भूपिताशेषवंशः ।
तस्याप्यानन्दकारी करनिकर इवानुष्णरश्मेस्तनूजो
जातः सामन्तचक्रप्रकटतरगुणः सर्वणागो जितारिः ॥
तस्याभूद्दयिता विशुद्धयशसः श्रीरित्युरःशायिनी
कृष्णस्येव महोदया च शशिनो ज्योत्स्नेव विश्वंभरा ।
गौरीवाद्रिदृशोऽसमा शमवतः प्रज्ञेव वा तायिनो
गम्भीरा यदि वा महोर्मिवलया वेलेव वेलाभृतः ॥

ताभ्यामभूद्गुणाम्भोधिर्वशीकृतमनोमलः।
देवदत्त इति ख्यातः सामन्तः कृतिनां कृती॥
येषां नतिर्जिनगुरौ गुरुता गुणेषु
सङ्गोऽर्थिभिः सततदाननिबद्धगर्वैः।
भीतिः प्रकाममघतो जगदेकशत्रो-
स्तेषामयं कृतविशेषगुणोऽन्ववाये॥
येषां भूतिरियं परेति न परैरालोक्यतेऽर्थार्थिभि-
र्येषां मुद्विभवः परः परमुदः स्वप्नेऽपि नाभूत्ततो।
येषामात्महितोदयाय दयितं नासीद्गुणामादनं
तेषामेव वशी शशाङ्कधवलो जातः कुलाम्भोनिधौ॥
संपादितजनानन्दः समासादितसंततिः।
कल्पशाखीव जगतामेष जातो गुणाकरः॥
विश्वाश्वासविधौ तृणीकृतसितज्योत्स्नोदये देहिना
मन्तःशुद्धिविचारणे सुरगुरोरप्याहितालपोदयः।
गाम्भीर्याकलने निकामकलितक्षीरोदसारस्त्वयं
यत्तन्नूनमहो गुणा गुणितनुव्यासङ्गिनः संगताः॥
तावन्मानधना यशस्ततिभृतस्तावच्च तावद्बुधा-
स्तावत्तायिसुतानुकारकरणास्तावत्कृपाम्भोधयः।
तावन्यस्तपरोपकारतनवस्तावत्कृतज्ञाः परे
यावन्नास्य गुणेक्षणे क्षणमपि प्राप्तावधानो जनः॥
यस्योद्वीक्ष्य गुणानशेषगुणिनामव्याप्यवज्ञात्मनि
निर्वाणाखिलमानसंततिपतच्चेतोविकासाममा।
भानौ ध्वस्तसमस्तनैशतमसि स्वैरं करालीकृति
प्रातर्येन कलाबलोऽपि विगलच्छायः शशाङ्को न किम्॥
यस्यान्वयेऽप्यगुणजन्म न दृष्टपूर्व-
मासादिता न च गुणैर्गणनव्यवस्था।

याता मुहूर्तमपि नो कलिदोषलेशाः
सोऽयं निरस्तसमतो भुवि कोऽप्यपूर्वः ॥
यस्य दानमतिरक्षतदाना भापितान्यफलवन्ति न सन्ति ।
प्राणदानविहितावधि सख्यं तस्य को गुणनिधेरिह तुल्यः ॥
नाना सन्ति दिनानि सन्ति विविधाश्चन्द्रांशुशीता निशाः
सन्त्यन्याः शतशोऽबला जितजगन्नारीसमस्तश्रियः ।
तन्नानन्दि जगत्त्रयेऽपि सुदिनं सा वा निशा साबला
यज्जन्मन्यगमन्निमित्तपदवीमस्यापैरदुर्गमाम् ॥
कोपवर्धनगिरेरनुपूर्वं सोऽयमुन्मिषितधीः सुगतस्य ।
व्यस्तमारनिकरैकगरिम्णो मन्दिरं स विदधाति यथार्थम् ॥
सुखान्यस्वन्तानि प्रकृतिचपलं जीवितमिदं
प्रियाः प्राणप्रख्यास्तडिदुदयकल्पाश्च विभवाः ।
प्रियोदर्काश्चालं क्षणसुखकृतो दुःखबहुला
विहारस्तेनायं भवविभवभीतेन रचितः ॥
मान्द्रख्यानशरद्बलाक(?)निवहत्यक्तार्कबिम्बोज्ज्वलं
संसाराङ्कुरसङ्गभङ्गचतुरं यत्पुण्यमात्तं मया ।
जैनावासविधेरतोऽयमखिलो लोकत्रयानन्दिनीं
तेनारं सुगतश्रियं जितजगद्दोषां जनः प्राप्नुयात् ॥
प्रशस्तिमेनामकरोज्जातः शाक्यकुलोदधौ ।
जज्जकः कियदर्थांशानिवेशविहितस्थितिम् ॥
संवत्सराङ्क ७ माघशुदि ६। उत्कीर्णा चणकेन ॥

(इण्डियन् आण्टिक्वेरी १४।४५–४८)

(३३)

भरतपुरदेशान्तर्वर्तिव्यानानगरस्थप्रशस्तिः ।

ॐ ॐ नमः सिद्धेभ्यः ॥

आसीन्निर्वृतकान्वयैकतिलकः श्रीविष्णुसूर्यासने
श्रीमत्काम्यकगच्छतारकपथश्वेतांशुमान्विश्रुतः ।

श्रीमान्सूरिमहेश्वरः प्रशमभूः श्वेताम्बरग्रामणी
राज्ये श्रीविजयाधिराजनृपतेः श्रीश्रीपथायां पुरि ॥

ततश्च

नाशं यातु शतं सहस्रसहितं संवत्सराणां द्रुतं
स्यामा(मा मा) भाद्रपदः स भद्रपदवीं मासः ममारोहतु ।
सास्यैव क्षयमेतु सोमसहिता कृष्णा द्वितीया तिथिः
पञ्चश्रीपरमेष्ठिनिष्ठहृदयः प्राप्तो दिवं यत्र सः ॥

अपि च

कीर्तिर्दिक्करिकान्तदन्तमुसलप्रोद्भूतलास्यक्रमं
क्वापि क्वापि हिमाद्रिमू····महासोत्प्रासहासस्थितिम् ।
क्वाप्यैरावणनागराजजनितस्पर्धानुबन्धोद्धुरं
भ्राम्यन्ती भुवनत्रयं त्रिपथगेवाद्यापि न श्राम्यति ॥

सं० ११०० भाद्रपदि २ चन्द्रे कल्याणकदिने प्रशस्तिरियं साधुसर्वदेवेनोत्कीर्णेति ।

(इण्डियन् आण्टिक्वेरी १८४०-१०)

(३४)

सत्यवर्ममहीपतेर्दानपत्रम् ।

ॐ ॥ स्वस्ति अमरपुरानुकारिणः सर्वर्तुसुखरमणीयाद्विजयवतः कलिङ्गनगरवासकान्महेन्द्राचलामलशिखरप्रतिष्ठितस्य सचराचरगुरोः सकलभुवननिर्माणैकसूत्रधारस्य शशाङ्कचूडामणेर्भगवतो गोकर्णस्वामिनश्चरणकमलयुगलप्रणामाद्विगतसर्वकलिकलङ्कोऽनेकाहवसंक्षोभजनितजयशब्दप्रतापोपनतसमस्तसामन्तचक्रचूडामणिप्रभामञ्जरीपुञ्जरञ्जितवरचरणः सितकुमुदकुन्देन्दुवदात[यशाः] ध्वस्तारातिकुलाचलो नयविनयदयादानदाक्षिण्यशौर्यौदार्यसत्यत्यागादिगुणसंपदाधारभूतो निजनिस्त्रिंशधारोपार्जितसकलकलिङ्गाधिराज्यः परममाहेश्वरो मातापितृपादानुध्यातो गङ्गामलकुलतिलकमहा-

राजश्रीमद्देवेन्द्रवर्मसूनुः श्रीमत्सत्यवर्मदेवो गल्लेलविषये तरुग्रामवासिनः कुटुम्बिनः समाज्ञापयति— विदितमस्तु वो यथायं मया विदितसकलपरमार्थतत्त्वेनाभिमतदेवतायै नृङ्कवर्पासे स्वामित्यै सूर्योपरागे उदकपूर्वकं तारुग्रामदेवाग्रहारं कृत्वा सर्वकरभरैः परिहृत्याचन्द्रतारकं मातापित्रोरात्मनश्च पुण्याभिवृद्धये संप्रदत्त इति । अखण्डितब्रह्मदेयं शैवस्थानकमिदं खण्ड्यमगुरवपुत्रकभट्टासनभट्टारकेणोपार्जितम् इदानीं प्रदक्षिणं(प्रतिदिशं) सीमालिङ्गानि लिख्यन्ते— पूर्वस्यां दिशि त्रिवृनतटाकस्वेतु आग्नेय्यां दिशि अर्जुनडोङ्कः दक्षिणेन गिरिनाशिका नैर्ऋत्यां दिशि पर्वत पश्चिमेन मेरुपापाण वायव्यस्यां दिशि अक्षलोङ्क उत्तरेण अलिशिलातल ईशान्यस्यां दिशि उत्पलवापी स्वेतु ॥

अत्र व्यासगीतानि भवन्ति—

'बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते ॥
हिरण्यमेकं गामेकां भूमेरप्येकमङ्गुलम् ।
हरन्नरकमायाति यावदाभूतसंप्लवम् ॥'

आदित्य, पुनरपि गल्लेले धान्यसहस्रकस्य भूमिः तद्विषये ग्रामानुग्रामे तण्डुलमुरय्यघुननालि गल्लेल पोलि खाण्डी । गाङ्गेयवंशसंवछ(त्स)रशतानां एकपञ्चाशत् ॥ श्रीरहस्यखण्डिमपुत्रवीरपलिखितोत्कीर्णमिति ॥

(इण्डियन् आण्टिक्वेरी १४।१०–१२)

(३९)

चालुक्यवंशोद्भूतराजराजापरनामश्रीविष्णुवर्धनमहीपतेर्दानपत्रम् ।

श्रीधाम्नः पुरुषोत्तमस्य महतो नारायणस्य प्रभो-
र्नाभीपङ्करुहाद्बभूव जगतः स्रष्टा स्वयंभूस्ततः ।

जज्ञे मानससूनुरत्रिरिति यस्तस्मान्मुनेरत्रितः
सोमो वंशकरः सुधांशुरुदितः श्रीकण्ठचूडामणिः ॥
तस्मादासीत्सुधासूतेर्बुधो बुधनुतस्ततः ।
जातः पुरूरवा नाम चक्रवर्ती सविक्रमः ॥

तस्मादायुरायुषो नहुषस्ततो ययातिश्चक्रवर्ती वंशकर्ता ततः पुरुरिति चक्रवर्ती । ततो जनमेजयोऽश्वमेधत्रितयस्य कर्ता ततः प्राचीशस्तस्मात्सै न्ययाती ततो हयपतिस्ततः सार्वभौमस्ततो जयसेनस्ततो महाभौमस्तस्मादै शानकस्ततः क्रोधाननः । ततो देवकिः देवकेः ऋभुकस्तस्मात् ऋक्षकः । ततो मतिवरः सत्रयागयाजी सरस्वतीनदीनाथः ततः कात्यायनः कात्याय नान्नीलः ततो दुष्यन्तः तत आर्यो गङ्गायमुनातीरे यदविच्छिन्नांस्तयाग यूपान् क्रमशः कृत्वा तथाश्वमेधान्नाम महाकर्म भरत इति योऽलभत । ततो भरताद्भूमन्युः तस्मात्सुहोत्रः ततो हस्ती । ततो विरोचनः तस्मादजमीढः ततः संवरणः ततश्च तपनसुतायास्तपत्याश्च सुधन्वा । ततः परिक्षित् । ततो भीमसेनः । ततः प्रदीपनः तस्माच्छन्तनुः ततो विचित्रवीर्यः । ततः पाण्डुराजः ।

ततः आर्या

पुत्रास्तस्य च धर्मजभीमार्जुननकुलसहदेवाः ।
पञ्चेन्द्रियवत्पञ्च स्युर्विषयग्राहिणस्तत्र ॥

येनादाहि विजित्य खाण्डवमठ(वनं) गाण्डीविणा वज्रिणं
युद्धे पाशुपतास्त्रमन्धकरिपोश्चालाभि दैत्यान्वहून् ।
इन्द्राधासनमध्यरोहि जयिना यत्कालिकेयादिका-
न्हत्वा स्वैरमकारि वंशविपिनच्छेदः कुरूणां विभोः ॥

ततोऽर्जुनादभिमन्युः ततः परिक्षित् ततो जनमेजयः ततः क्षेमुकः ततो नरवाहनः ततः शतानीकः तस्मादुदयनः ॥

ततः परं तत्प्रभृतिष्वविच्छिन्नसंतानेष्वयोध्यासिंहासनासीनेष्वेकान्नषष्टि-चक्रवर्तिषु तद्वंश्यो **विजयादित्यो** नाम राजा विजिगीषया दक्षि-

१. फ्लीट पण्डितेन तु 'आर्या' इत्यग्रिमेण 'पुत्रा' इति पदेन संयोज्य 'आर्या-पुत्राः' इत्येकं पदं विधाय 'पुत्रास्तस्य च' इत्याद्यार्या गद्यतां नीता. २. 'ग्राहिणः' इति मुद्रितः पाठः.

णापथं गत्वा त्रिलोचनपल्लवमभिक्षिप्य दैवदुरीहया लोकान्तरमगमत्। त-स्मिन्संकुले पुरोहितेन सार्धमन्तर्वत्नी तस्य महादेवी मुडिवेमुनामाग्रहारं कतिपयाभिरन्तःपुरकान्ताभिः कञ्चुकिभिश्च सहोपगम्य तद्वास्तव्येन विष्णु-भट्टसोमयाजिना दुहितृनिर्विशेषमभिरक्षिता सती विष्णुवर्धनं नन्दनम-सूत। सा तस्य च कुमारकस्य मानव्यसगोत्रहारीतिपुत्रद्विपक्षगोत्रक्रमो-चितानि कर्माणि कारयित्वा तमवर्धयत्। स च मात्रा विदितवृत्तान्तः स-न्निर्गत्य चलुक्यगिरिं नन्दां भगवतीं गौरीमाराध्य कुमारनारायणमातृग-णांश्च संतर्प्य श्वेतातपत्रैकशङ्खपञ्चमहाशब्दपालिकेतनप्रतिढक्का वराहला-ञ्छनपिञ्छकुन्तसिंहासनमकरतोरणकनकदण्डगङ्गायमुनादीनि स्वकुलक्र-मागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादाय कदम्बगङ्गादिभूमि-पान्निर्जित्य सेतुनर्मदामध्यं सार्धसप्तलक्षं दक्षिणापथं पालयामास।

श्लोकः--

तस्यासीद्विजयादित्यो विष्णुवर्धनभूपतेः।
पल्लवान्वयजातायां महादेव्याश्च नन्दनः॥

तत्सुतः पोलकेशीवल्लभः तत्पुत्रः कीर्तिवर्मा। तस्य तनयः स्वस्ति-श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकी-वरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेनपादानुध्या-तानां भगवन्नारायणप्रसादसमासादितवरवराहलाञ्छनेक्षणक्षणवशीकृताराति-मण्डलानां अश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंक-रिष्णोः सत्याश्रयवल्लभेन्द्रस्य भ्राता कुब्जविष्णुवर्धनोऽष्टादशवर्षाणि वेङ्गीदेशमपालयत्। तदात्मजो जयसिंहवल्लभस्त्रयस्त्रिंशतम्। तदनुज इन्द्रराजनन्दनः सप्तदिनानि। तत्सुतो विष्णुवर्धनो नव वर्षाणि। त-त्सूनुर्माङ्गियुवराजः पञ्चविंशतिम्। तत्पुत्रो जयसिंहस्त्रयोदश। तदव-रजः कोक्किलिः षण्मासान्। तस्य ज्येष्ठो भ्राता विष्णुवर्धनस्तमुच्छित्य सप्तत्रिंशतमब्दान्। तत्पुत्रो विजयादित्यभट्टारकोऽष्टादश। तदनुजो विष्णुवर्धनः षट्त्रिंशतम्। तत्सूनुर्विजयादित्यनरेन्द्रमृगराजश्चाष्टाचत्वारिं-शतम्। तत्सुत कलिविष्णुवर्धनोऽध्यर्धवर्षम्। तत्सुतो गुङ्गविजयादि-

त्यश्चतुश्चत्वारिंशतम् । तद्भ्रातुर्**विक्रमादित्य**भूपतेस्तनयश्चालुक्य**भीम**स्त्रिंशतम् । तत्सुतः **कोल्लाविगण्डविजयादित्यः** षण्मासान् । तत्सुनु**रम्मराजः** सप्तवर्षाणि । तत्सुतं **विजयादित्यं** बालमुच्छिद्य **ताडपो** मासमेकम् । तं जित्वा चालुक्यभीमतनयो **विक्रमादित्य** एकादश मासान् । तत्ताडपराजसुतो **युद्धमल्लः** सप्तवर्षाणि । अम्मराजानुजो **राजभीमो**ऽब्दान्द्वादशाभुनक् । युद्धे युद्धमल्लं तं धाक्का निर्गत्य भर्तरि (?)-**सुताम्मभूपः** क्ष्मां पञ्चविंशतिं वर्षाण्यपात् ।

> द्वैमातुरोऽम्मराजस्य **दानार्णव** इति स्मृतः ।
> चतुःषष्टिकलाभिज्ञः समास्तिस्रोऽभुनग्भुवम् ॥
> ततः परं पतिं लब्ध्विमनुरूपमनाथिकाम् (?) ।
> सप्तविंशतिं वर्षाणि च्छाव एव तपः क्षमाम् (?) ॥
> अथ दानार्णवाज्जातः कलावान्मृदुभिः करैः ।
> राजा चालुक्यचन्द्रो यः क्ष्मातापमपाकरोत् ॥
> सत्ये प्रतिष्ठिता लोका इति सत्यं वचो यतः ।
> सर्वलोकाश्रये यस्मिन्**सत्यराजे** स्थितं जगत् ॥
> निर्वक्रं वसुधाचक्रमरक्षत्क्षपिताहितः ।
> न्याय्ये पथि नृपराद्यैः स द्वादशसमाः समः ॥
> **विमलादित्यदेवा**ख्यस्ततस्तस्यानुजोऽदधत् ।
> महीमण्डलसाम्राज्यं विजित्य विजयी रिपून् ॥

> यस्य प्रज्वलितं प्रतापदहनं सोढुं न शक्ता भया-
> द्रुत्वा काननमम्बुधिं च तरसा विद्वेषिणो विह्वलाः ।
> दावौर्वाग्निपदेन तत्र च पुनस्तेनैव संतापिताः
> श्रीपादामरपादपस्य महतीं छायां समाशिश्रियन् ॥

अपि च ।

> सूर्यान्वये सुरपतिप्रतिमः प्रभावैः
> **श्रीराजराज** इति यो जगति व्यराजत् ।

नाथः समस्तनरनाथकिरीटकोटि-
रत्नप्रभापटलपाटलपादपीठः ॥
जातस्ततस्तनयशोजितराजतेजा
राजेन्द्रचोडनृपतिर्नृपचक्रवर्ती ।
द्रस्त्रं (?) प्रचण्डमददन्तिकपोलनिर्य-
द्दानाविलामरसरित्सलिलप्रवाहः ॥

मर्द्दीपां च प(चतु)रम्बुराशिपरिखां विश्वंभरां लीलया
दण्डेनैव विजित्य च प्रतिदिशं योऽतिष्ठिपत्सर्वतः ।
स्वैरोद्भ्रान्तिनिवारणाय विजयस्तम्भान्स्वनामाङ्किता-
नाल्मानानिव बद्धमन्थमनसो दर्पेण दिग्दन्तिनः ॥

तस्यानुजां सुरूपामनुरूपां कुन्दवां महादेवीम् ।
स उपायत कृतकृत्यो विमलादित्यो जनस्तुत्यः ॥

समुद्ररशनां पृथ्वीं पृथ्वीं स भुजविक्रमात् ।
समरक्षत्समाः सप्त सप्तसप्तिसमः समः ॥

तस्माच्चालुक्यचूडामणिरथ विमलादित्यदेवान्महीश-
श्चोडक्ष्मापालक्ष्म्या इव रचिततनोः कुन्दवायाश्च देव्याः ।
जातः **श्रीराजराजो** रजनिकरकुलश्रीमदम्भोधिराजो
राजद्राजन्यसेव्यामभृत भुजबलाद्राजलक्ष्मीं पृथिव्याः ॥

यो रक्षितुं वसुमतीं शशवत्सरेषु
वेदाम्बुराशिनिधिवर्तिषु (९४४) सिंहगेऽर्के ।
कृष्णद्वितीयदिवसोत्तरभद्रिकायां
वारे गुरोर्वणिजि लग्नवरेऽभिषिक्तः ॥

यस्योत्तमाङ्गं पट्टेन समबन्धि महीयसा ।
भर्तुं विश्वंभराभारं जनैरारोपितं चिरम् ॥

पृथ्वीमिमां यत्र पृथुप्रभावे रक्षत्यवर्गे क्षपितारिवर्गे ।
दूरीकृतावग्रहचोररोगाः प्रजा लभन्ते सफलं त्रिवर्गम् ॥

शौर्यौदार्याभिमानाद्यगणितगुणजन्मानुरक्ता महिम्ना
प्रख्यातेनातिकृष्णा शशधरधवला सज्जनानां गणेन ।
पीता प्रीतेन कर्णाञ्जलिभिरभिनवा भाति दिग्देवतानां
नानावर्णा वितानश्रियमननुगता तन्वती यस्य कीर्तिः ॥
पित्रोर्वंशगुरू बभूवतुरलं यस्य स्फुरत्तेजसौ
सूर्याचन्द्रमसौ निरस्ततमसौ देवौ जगच्चक्षुषी ।
दंष्ट्राकोटिसमुद्धृताखिलमहीचक्रं महत्क्रीडया
विष्णोरादिवराहरूपमभवद्यच्छासने लाञ्छनम् ॥

स सर्वलोकाश्रयश्रीविष्णुवर्धनमहाराजाधिराजपरमेश्वरपरमभट्टारकः परमब्रह्मण्यः मातापितृपादानुध्यातः त्यागसिंहासनासीनः चण्डिकाप्रसादपरिलब्धसाम्राज्यचिह्नः गुद्दवाडिविषयनिवासिनो राष्ट्रकूटप्रमुखान्कुटुम्बिनः सर्वान्समाहूय मन्त्रिपुरोहितसेनापतियुवराजदौवारिकप्रधानाध्यक्षानित्यादिशति—

आद्यन्तात्यन्तदूरात्समजनि जगतां ज्योतिषो जन्महेतु-
र्ब्रह्मा धाम प्रजानामभवदथ ततः कश्यपो नाम वेधाः ।
भारद्वाजस्ततोऽभून्मुनिरधिकतपास्तस्य गोत्रे पवित्रे
तत्रापस्तम्बसूत्रे श्रुतिनिधिरुदगाच्चीडमार्यः क्रमेण ॥
गङ्गामर्चितवर्चसः समुदितैर्यज्ञैर्विधौतांङ्क(तांह)सो
यज्ञो नाम सुतस्ततः कृतधियो जज्ञे कृतज्ञः कृती ।
विज्ञाताखिलवेदशास्त्रसमयः प्राज्ञः सदा पोषित-
ज्ञातिर्ज्ञाननिधिर्गुरुज्ञसदृशो नीतिज्ञतायां भुवि ॥
यथा वसिष्ठो विदुषां वरिष्ठो निरुन्धतीं दोषमरुन्धतीं सः ।
तथानुरूपामभिरूपरूपः सतीमुपायच्छत माकवाख्याम् ॥
पुत्रस्तयोरदितिकश्यपयोरिवाभू-
द्भास्वानपाकृततमाः खलु चीडमार्यः ।
यो वेदशास्त्रसकलश्रुतिरश्मिजातैः
शिष्याननाम्बुरुहबोधकरो गरीयान् ॥

नित्याभीष्टफलप्रदानरुचिरं लक्ष्मीनिवासास्पदं
त्रिभ्राणं गुरुतां प्रवुद्धसुमनःसंपूर्णशाखान्वितम् ।
छायासंततिमाश्रितैश्च विबुधैः संस्तूयमानं सदा
सेवित्वा सुखमास्यते द्विजवरैर्य विप्रकल्पद्रुमम् ॥

यद्गेहं सुचिरं विभाति पर(ठ)तां पुण्यैर्वटूनां पटु-
व्यावृत्त्याविरतं क्रमात्क्षमपदं सामर्थ्यजुघुगो(मुद्घो)षणैः ।
सायं प्रातरुपाहितं(ता) हुतिहुतस्वाहाप्रियप्रोज्वल-
द्धामै(?)श्चापि समन्ततः कलिमलं प्रोत्सारयद्दूरतः ॥

तस्मै समस्तजनताविशेषणा(का)य । रैसुतर्पितमहीदेवदेवगणाय । विप्रान्वयाब्धिशशभृत्प्रतिचन्द्राय(च्छन्दाय) । विद्वज्जनाङ्गीकृतविश्रुतानन्दाय । जन्मप्रभृति गीतवेदार्थतत्त्वाय । सन्मनोवसतिवास्तव्यात्मसत्त्वाय । लम्भितसरलत्वपरिलालितचरित्राय । शुम्भितमतिस्वमितजीवभृशपुत्राय (?) । सिद्धानिजनाथकृतिसेवितमनीषाय (?) । शुद्धमतिदूषितसमस्तजनदोषाय । संततागधितनिजस्वामिपादाय । चिन्तितमनःस्थसुखदाभूतसुपादाय (?) । होमधूमविनिर्गनामितकलङ्काय । धीमत्प्रगीतरुचिरस्थिरस्वनामाङ्काय । सकलमुनिगणनुतापस्तम्बसूत्राय । तत्रसंगीत(?)भारद्वाजगोत्राय । सप्ततन्तुकृतयूपस्तम्भशोभाय । सप्ताश्वरूपमदशात्मतनुलाभाय । नित्यजनतोचितगुसत्यसणयुक्ताय(?) । पत्यभिलपितकार्यनिःपत्तिसक्ताय । परमपुरुषार्थसंपादनपटिष्ठाय । परमेश्वरस्मरणपालनवरिष्ठाय । सकलार्थशास्त्रपरिनिश्चितविनोदाय । सुकुमारताधिकसरोजनिभपादाय । धाराकरेणाग्रहारीकृतः कोरुमेल्लिनामा ग्राम इन्दूपरागे दत्तो मया आचन्द्रतारकं हि तिष्ठेत् । तस्याभिव्यक्तिरेपोच्यतेऽद्य । पूर्वतः कूडकुसीमा । आग्नेयतः मुण्डकालियसीमा । दक्षिणतः वानपल्लियु संपर्तानिययु मामण्डेट्टियु सीमैव सीमा । नैर्ऋत्यतः गोदावरियसीमा । पश्चिमतः बूरुवुडोग्गुसीमा । वायव्यतः वेनेटियु मासरयु सीमैव सीमा । उत्तरतः मासरपोन्बङ्कुवयु खलमेण्डिकालियुसीमा । ईशानतः एरुवङ्कयुत्तरमुन कडलिभाटिसीमा ॥ अस्योपरि न केनचिद्बाधा क-

रणीया । यः करोति स पञ्चमहापातकयुक्तो भवति । तथा चोक्तं भगवता व्यासादिमहर्षिप्रकरेणापि—

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
आज्ञप्ति(प्तिः) कटकेशो राचियपेड्डेरिर्भीमनामतनूजः ।
कर्ता चेतनभट्टः काव्यानां लेखकोऽस्य गण्डाचार्यः ॥

अस्मिन्ग्रामे प्रतिवर्षं भूपसिद्धाय ग्रहणम् पञ्चविंशतिनिष्काणि शतद्वय-सहितानि पञ्चाशद्धान्यखण्डकानि च ॥

(इण्डियन आंटिक्वेरी १४।५०–५५)

(३६)

कुलोत्तुङ्गचोडदेवमहीपाश्रितकाटदण्डाधिनाथस्य दानपत्रम् ।

जयति जलधिकन्यावक्त्रपद्मांशुमाली
सकलभुवनसृष्टित्राणसंहारहेतुः ।
उपनिषदवगम्यो योगिविज्ञानवेद्य-
स्त्रिदशवरवचोभिः स्तूयमानो मुकुन्दः ॥
जयति जगति नित्यं सोमवंशो महाभृ-
च्छिरसि निहितपादः संश्रयः कीर्तिवल्ल्याः ।
जलधिवलयितोर्वीचक्रवालालवाला-
द्रिपुनृपरुधिरौघैरुक्षितादुद्गतायाः ॥

स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेनपादा-

---

१. स्कन्धकं नाम च्छन्दः. एतदपि फ्लीटपण्डितेन गद्यान्तः पातितम्.

नुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलाञ्छनेक्षणक्षणवशीकृतारातिमण्डलानामश्वमेधावभृथपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोः **सत्याश्रयवल्लभेन्द्रस्य** भ्राता **कुब्जविष्णुवर्धनो**ऽष्टादशवर्षाणि वेङ्गीदेशमपालयत्। तत्पुत्रो **जयसिंहस्त्रिंशत्**। तत्कनीयानि**न्द्रराजः** सप्ताहम्। तत्पुत्रो **विष्णुवर्धनो** नववर्षाणि। तत्पुत्रो **मङ्गियुवराजः** पञ्चविंशतिम्। तत्पुत्रो **जयसिंहस्त्रयोदश**। तत्कनीयान्**कोक्किलिः** षण्मासान्। तद्भ्राता **विष्णुवर्धनः** सप्तत्रिंशत्। तत्सूनु**र्विजयादित्यो**ऽष्टादश। तत्सूनु**र्विष्णुवर्धनः** षट्त्रिंशत्। तत्सूनु**र्नरेन्द्रो**ऽष्टाचत्वारिंशत्। तत्सुतः **कलिविष्णुवर्धनो**ऽध्यर्धवर्षम्। तत्सूनु**र्गुण्डविजयादित्य**श्चतुश्चत्वारिंशत्। तद्भ्रातृविक्रमादित्यपुत्र**श्चालुक्यभीमस्त्रिंशत्**। तत्सूनु**र्विजयादित्यः** षण्मासान्। तत्सूनु**रम्मराजः** सप्तवर्षाणि। विक्रमादित्यभ्रातृपुत्र**स्ताडपो** मासम्। चालुक्यभीमसूनु**र्विक्रमादित्य** एकादशमासान्। तत्सूनु**र्युद्धमल्लः** सप्तवर्षाणि। अम्मराजानुजो **राजभीमो** द्वादश। तत्सूनु**रम्मराजः** पञ्चविंशतिम्। तज्ज्येष्ठो **दानार्णवस्त्रिंशत्**। तत्पुत्रः **शक्तिवर्मा** द्वादश। तदनुजो **विमलादित्यः** सप्त। तत्पुत्रो **राजराजदेव** एकचत्वारिंशत्। तत्पुत्रः **श्रीकुलोत्तुङ्गचोडदेव** एकोनपञ्चाशत्। तत्सुतो **विक्रमचोडः** पञ्चदश। तत्पुत्रे **श्रीकुलोत्तुङ्गचोडदेवे** राज्यं प्रशासति तद्वंशराजप्रसादलब्धनानादेशपरिवृतं परम्परागतमण्डलेशाधिष्ठितं वेङ्गीमण्डले महासरः स्थिरतरमस्ति।

तत्रासीत्सरसीपुरीति जलधौ विष्णोः पुरीं द्वारका-
　　मुद्यल्लावणवारिदोषकलुषां न्यक्कुर्वती यानिशम्।
मातेव स्वपयःप्रवाहनिवहैः सुस्वादुभिः सादरं
　　स्वाङ्कं संश्रितमण्डलेश्वरमहीचक्रं स्वयं रक्षति॥

१. पूर्वमुद्रिते विष्णुवर्धनदानपत्रे तु 'त्रयस्त्रिंशतम्' इत्यस्ति. २. 'तदनुज इन्द्रराजनन्दनः' इति विष्णुवर्धनदानपत्रे पाठः. ३. 'विजयादित्यनरेन्द्रमृगराजः' इति विष्णुवर्धनदानपत्रे पाठः. ४. 'तताडपराजसुतो युद्धमल्लः' इति विष्णुवर्धनदानपत्रधृतः पाठः. ५. 'तिस्रः' इति विष्णुवर्धनदानपत्रे शोधितः पाठः.

गर्वाद्यद्विजिगीषया रिपुगणाः संप्राप्य वेलातलं
लोलत्स्यन्दनवाजिवारणभटा जेतुं न शक्ताः पुनः ।
युद्धालोकनलोलवैरिललनामोल्लासहामोदया-
लज्जावद्धदनाः प्रविश्य मरमीं यान्त्येकतां कर्दमैः ॥

तस्याः पतिः को(कु)र्लानकाटमनायकोऽभू-
त्प्रख्यातधर्मनिचयः प्रततोरुकीर्तिः ।
स्फूर्जत्स्वबाहुवलनिर्जितवैरिवर्गः
सर्वाश्रयो नयनिधिर्भुवि सत्यसंधः ॥

यो धर्मे धर्मपुत्रप्रतिनिधिरवनित्राणने कार्तवीर्यः
प्रायः शौर्ये किरीटी स्फुटमहिमरुचा तुल्य एव प्रतापे ।
औदार्ये कर्णकल्पः स्मर इव वपुषि क्ष्मामदृक्षः क्षमायां
सौजन्ये यस्य लोके कथमपि सदृशो विक्रमादित्य एव ॥

योऽदृश्यत सतां भूत्यै जलदुर्गे श्रिया सह ।
भुवनत्रितयं भासा भासयन्व्योम चन्द्रवत् ॥

यः सर्वामवनिमरक्षदक्षतश्रीः सेनाभिर्बहुगणकेलिनिर्जितारिः ।
वीरश्रीवदनविलासदर्पणाभो नीतिज्ञो नियमितवागतिप्रगल्भः ॥

द्विजजनपरिरक्षादक्षमक्षय्यलक्ष्मीं
प्रशमितरिपुपक्षं काङ्क्षिणां कल्पवृक्षम् ।
गुणमणिगणकूमाकल्पमाकल्पगुर्व्यी
धृततनुमिव धर्मं मन्वते मानवा यम् ॥

सुधृता येन धरित्री निःशङ्कं निर्जितारिवर्गेण ।
चिरतरकालं कृतिना कृतयुगवच्छ्रीसमृद्धियम् ॥

विदुषां बहवो ग्रामा देवानां भूरिहर्म्याणि ।
जलपरिपूर्णतटाका देशे देशे विनिर्मिता येन ॥

यस्मिन्काङ्क्षाबहुलं ददति द्रव्यं प्रभूतमर्थे(र्थि)भ्यः ।
उपपदरहिता जाताश्चिन्तामणिकामधेनुकल्पागाः ॥

यस्यासिधारासुनिपीतमम्बु द्विषच्छिरश्छेदनकर्महेतु।
प्रवर्तुलं वैरिपुरं त्रिनेत्रेष्वश्रुच्छलेनेव कृतस्वकार्यम्[1]॥

यत्खड्गहस्तपरिघातमदान्धमत्त-
मातङ्गमस्तकविनिर्गतमौक्तिकौघैः।
संगत्यरातिनिकरान्हसतीव नाना-
दिक्षु पलायनपरान्महती जयश्रीः॥

कीर्तिर्यस्य मनोहरा त्रिभुवनं विभ्राजयन्ती भृशं
स्वच्छामलकुमुदाकरप्रियकरी दिङ्मण्डलं तन्वती।
कुर्वाणापि सदा समस्तजगतां हर्षं द्विषद्योपितां
वक्त्राम्भोजमुदुःसहा विजयते ज्योत्स्नेव शीतद्युतेः॥

स स्वामिनश्चोडदेवस्य तस्य प्राप्य प्रसादादथ ग्रामवर्यम्।
लक्ष्मीपतीशप्रसादात्तलक्ष्मीर्दातुं द्विजेभ्यो धियं संदधार॥

ततश्च—

शाकाब्दानां प्रमाणे रसविशिखवियच्चन्द्रसंख्यां (१०५६) प्रयाते
देशे सावत्तिलीतिक्षितितलविदिते पोण्डुवग्रामयुक्तम्।
सार्द्रर्क्षे पूर्वपक्षे विषुवति सुतिथौ मण्डडोरग्रहारं
प्रादाद्विद्वद्द्विजेभ्यः स्थिरतरमकरं काटदण्डाधिनाथः॥

तथैतद्ग्रामसीमान्तर्वर्तिनो ये कुटुम्बिनः।
विट्कृद्रनक्षरजककर्मारितिलपूतकाः॥
सुवर्णकंसचर्मास्त्रिकुम्भकाराश्च नापिताः।
अजगोपालकाश्चैव चण्डालाद्यास्तथापरे॥
तैर्देयकरमप्येभ्यो ब्राह्मणेभ्योऽददात्तदा।
दत्त्वैवमग्रहारं तमित्थमाज्ञापयत्यसौ।
तद्राष्ट्रकूटप्रमुखान्समाहूय कुटुम्बिनः।
दत्तमित्थं मया सर्वमेतद्विदितमस्तु वः॥

---

१. 'वैरिपुरंत्रिनेत्रेषु' इत्युचितः पाठः. २. 'परिघात' इत्युचितः पाठः.

प्रतिगृहीतृब्राह्मणनामानि—तत्र भारद्वाजाः द्रोणार्यः मेलार्यः सूरार्यः
नृङ्कार्यः गुण्डार्यः वेलार्यः नामार्यः वामनार्यः नामार्यः मधुरान्तिपार्यः दो-
ड्डार्यः माधवार्यः सिन्तार्यः कोम्मार्यः नामार्यः पोटार्यः गोविन्दार्यः च-
न्द्रार्यः भागिनः—सोमनार्यः तिप्पनार्यः सूरार्यः कौण्डिन्याः—भीमार्यः
उर्यकोण्डार्यः विष्णवार्यः अर्धिनः—कोम्मार्यः कृष्णार्यः नामार्यः कामार्यः
नन्दार्यः कोम्मार्यः मण्डनार्यः कृष्णार्यः भीमार्यः नामार्यः सूरार्यः वा-
धूलाः—आदित्यार्यः ईश्वरार्यः करुकनार्यः हारिताः—विष्णवार्यः माध-
वार्यः मल्लार्यः कोटार्यः द्रोणार्यः कामार्यः रामार्यः नारायणार्यः भागिनः—
नामार्यौ द्वौ मैत्रावरुणौ मल्लुनार्यो भार्गो सूरार्यः कौशिकाः—नृङ्कार्यः
कोम्मार्यः सूरार्यः अर्धिनः—नानार्यः विष्णवार्यः पेद्दार्यः बोप्पार्यः श्रीग-
रार्यः मैत्रेयः—शंकरार्यः वात्सः द्रोणार्यः कापिलः पोटार्यः यस्कः—अ-
य्यनार्यः आत्रेयाः—रामवार्यः भागिनः—नाडार्यः अन्नोडार्यः अर्धिनौ
शौनकाः पोटार्यादयः पञ्च सार्धभागिनः पराशरः कोम्मार्यः विष्णवार्यः पु-
रुकुत्सः मल्याण्डार्यः भागिनः काश्यपाः—अन्नार्यः अप्पार्यः अर्धिनौ—
वासुदेवार्यः मानार्यः सूरार्यः अन्नार्यः शासनकाव्यकृत्कंकरनारायणार्यः भा-
गिनः ईश्वरस्यैको भागः विष्णोरेको भागः। अथ पोण्डुवयुक्तस्यास्य ग्रामस्य
क्षेत्रसीमानः—पूर्वतः—पोण्डुव कोम्मग यिल्लियुरि गुय्यानिकुट्टगुण्ट अन्ते-
त्तनिगुण्ट । आग्नेयतः—पोण्डुव यिल्लियुरि नट्टमियगपगुल्लु अट्टपनुङ्को-
ल्लनयपमुल्लुम् गरुवुगुण्ट लुङ्काण्डि यावगुमितु नृङ्कनिगुण्टपु । दक्षि-
णतः—नृङ्कनिगुण्टम् चामिपाथिनयमरूपट्टु अत्पाहिण्डिगुण्ट नल्लुमु । नि-
र्ऋतितः—कोङ्कल्लिपूण्डि पाटिपल्लुमाटि गुय्यानिकुट्टगुण्ट । पश्चिमतः—ले-
ल्लगुण्ट कोल्लु। वायव्यतः—उण्डन्दोटि पासुदोव गोवमि गुय्यानिकुट्टु अट
उण्डन्दोटि गोवमि काकाण्डवाल्ल गुय्यानिकुट्टु । उत्तरतः—मद्दिगुण्ट अट
मेल्लनिगुण्टयु नेरियनिगुण्टयु नावनिगुण्टयु नट्टयागूरि पल्लियन पोण्डुव
स्वाङ्कग्राम्यानि गुय्यानिकुट्टु अट पनुल्लाण्डुगुण्टयुम् बल्लानिकाटिनल्लु । ई-
शानतः—प्रान्तगुण्ट ।

इतः परं न कार्योऽस्य ग्रामस्योपद्रवो नरैः।
लोभादुपद्रवं तस्य कुर्याद्यः स नराधमः॥
यायात्पञ्चमहापापी द्रोही सोमेश्वरस्य च।
गङ्गायां गोसहस्रस्य वधपापमवाप्नुयात्॥

अस्मिन् व्यासोक्तमपि—
'स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः॥

तथा, बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ इति॥

लेखकः कन्नाचार्यसूनुः पल्लाचार्यः।

(इण्डियन् आण्टिक्वेरी १४।५६–५९)

(३७)

श्रीभद्रबाहुप्रशस्तिः।

स्वस्ति॥

जितं भगवता श्रीमद्धर्मतीर्थविधायिना।
वर्धमानेन संप्राप्तसिद्धिसौख्यामृतात्मना॥
लोकालोकद्वयाधारवस्तु स्थास्नु चरिष्णु च।
सच्चिदालोकशक्तिः स्वा व्यश्नुते यस्य केवला॥
जगत्यचिन्त्यमाहात्म्यपूजातिशयमी ... ।
तीर्थकृन्नामपुण्यौघमहार्हन्त्यमुपेयुषः॥
तदनु श्रीविशाले यज्जयत्यद्य जगद्धितम्।
तस्य शासनमव्याजं प्रवादिमतशासनम्॥

अथ खलु सकलजगदुदयकरणोदितातिशयगुणास्पदीभूतपरमजिनशासनसरस्समभिवर्धितभव्यजनकमलविकसनवितिमिरगुणकिरणसहस्रमहोति-**महावीरसवितरि** परिनिर्वृते भगवत्परमर्षि**गौतम**गणधरसाक्षाच्छिष्य**लो**-

हार्य-जम्बु-विष्णुदेव अपराजित-गोवर्धन भद्रबाहु विशाखप्रोष्ठिल-क्षत्रिकार्य-जयनाम-सिद्धार्थ-धृतिषेण-बुद्धिलादिगुरुपरम्परीणक्रमाभ्यागतमहापुरुषसंततिसमवद्योतितान्वयभद्रबाहुस्वामिना उज्जयिन्यामष्टाङ्गमहानिमित्ततत्त्वज्ञेन त्रैकाल्यदर्शिना निमित्तेन द्वादशसंवत्सरकालवैषम्यमुपलभ्य कथिते सर्वः संघ उत्तरापथाद्दक्षिणापथं प्रस्थितः । आर्षेणैव जनपदमनेकग्रामशतसंख्यमुदितजनधनकनकसस्यगोमहिषाजाविकुलसमाकीर्णं प्राप्तवान् । अतः आचार्यः प्रभाचन्द्रणामावनितलललामभूतेऽस्मिन्कटवप्रनामकोपलक्षिते विविधतरुवरकुसुमदलावलिविरचनाशबलविपुलसजलजलदनिवहनीलोपलतले वराहद्वीपिव्याघ्रतरक्षुव्यालमृगकुलोपचितोपत्यकाकंदरदरीमहागुहागहनाभोगवति समुत्तुङ्गशृङ्गे शिखरिणि जीवितशेषमल्पतरकालमवबुध्याध्वनः सुचकितस्तपःसमाधिमाराधयितुमापृच्छ्य निरवशेषेण संघं विसृज्य शिष्येणैकेन पृथुलकास्तीर्णतलासु शिलासु शीतलासु स्वदेहं सन्यस्याराधितवान् । क्रमेण सप्तशतमृषीणामाराधितमिति । जयतु जिनशासनमिति ॥

(बी० लू० राइसपण्डितमुद्रितं 'इन्स्क्रिप्शन्स ऍट् श्रवणबेलगोला' नामकपुस्तके प्रथमो लेखः.)

(३८)

श्रीमल्लिषेणप्रशस्तिः ।

(उत्तरपार्श्वे) (पार्श्वनाथवस्ती)

श्रीमन्नाथकुलेन्दुरिद्धपरिपद्वन्द्यः श्रुतश्रीसुधा-
धाराधौतजगत्तमोपहमहः पिण्डप्रकाण्डं महत् ।
यस्मान्निर्मलधर्मवार्धिविपुलश्रीर्वर्धमाना सतां
भर्तुर्भव्यचकोरचक्रमवतु श्रीवर्धमानो जिनः ॥
जीयादर्थयुतेन्द्रभूतिविदिताभिख्यो गणी गौतम-
स्वामी सप्तमहर्द्धिभिस्त्रिजगतीमापादयन्पादयोः ।

१. प्रभाचन्द्रेण सहेत्यर्थः.

यद्बोधाम्बुधिमेत्य वीरहिमवत्कुत्कील(प्रोप)कण्ठाद्बुधा-
म्भोदात्ता भुवनं पुनाति वचनस्वच्छन्दमन्दाकिनी ॥
तीर्थेशदशन(दर्शन)भवत्त्रयदक्ससहस्र-
विस्रब्धबोधवपुषः **श्रुतकेवलीन्द्राः**।
निर्भिन्दतां विबुधवृन्दशिरोभिवन्द्याः
स्फूर्जद्वचःकुलिशतः कुमताद्रिमुद्राः ॥
वर्ण्यः कथं नु महिमा भण **भद्रबाहो**-
र्मोहोरुमल्लमदमर्दनवृत्तबाहोः।
यच्छिष्यताप्तसुकृतेन स चन्द्रगुप्तः
शुश्रूष्यते स्म सुचिरं वनदेवताभिः ॥
वन्द्यो विभुर्भुवि न कैरिह **कौण्डकुन्दः**
कुन्दप्रभाप्रणयिकीर्तिविभूषिताशः।
यश्चारुचारणकराम्बुजचञ्चरीक-
श्चक्रे श्रुतस्य भरते प्रयतः प्रतिष्ठान्(म्) ॥
वन्द्यो भस्मकभस्मसात्कृतिपटुः पद्मावतीदेवता-
दत्तोदात्तपदः स्वमन्त्रवचनव्याहूतचन्द्रप्रभः।
आचार्यः स **समन्तभद्र**गणभृद्येनेह काले कलौ
जैनं वर्त्म समन्तभद्रमभवद्भद्रं समन्तान्मुहुः ॥

चूर्णि(:) ॥

यस्यैवंविधा वादारम्भसंरम्भविजृम्भिताभिव्यक्तयः सूक्तयः ॥

वृत्त(म्) ॥

पूर्वं पाटलिपुत्रमध्यनगरे भेरी मया ताडिता
पश्चान्मालवसिन्धुठक्कविषये काञ्चीपुरे वैदिशे।
प्राप्तोऽहं करहाटकं बहुभटं विद्योत्कटं संकटं
वादार्थी विचराम्यहं नरपते शार्दूलविक्रीडितम् ॥
अवटुतटमटति झटिति स्फुटपटुवाचाटधूर्जटेरपि जिह्वा।
वादिनि समन्तभद्रे स्थितवति तव सदसि भूप कास्थानै(न्ये)षाम् ॥

योऽसौ घातिमलद्विषद्बलशिलास्तम्भावलीखण्डन-
ध्यानासिः पटुरर्हतो भगवतः सोऽस्य प्रसादीकृतः ।
छात्रस्यापि स **सिंहनन्दि**मुनिना नो चेत्कथं वा शिला-
स्तम्भो राज्यरमागमाध्वपरिघस्तेनासिखण्डो घनः ॥

वक्रग्रीवमहामुनेर्दशशतग्रीवोऽप्यहीन्द्रो यथा
जातं स्तोतुमलं वचोबलमसौ किं भग्नवाग्मिव्रजम् ।
योऽसौ शासनदेवताबहुमतो ह्रीवक्रवादिग्रह-
ग्रीवोऽस्मिन्नथ शब्दवाच्यमवदन्मासान्समासेन षट् ॥

नवस्तोत्रं तत्र प्रसरति कवीन्द्राः कथमपि
प्रणामं **वज्रादौ** रचयत परं **नन्दिनि** मुनौ ।
नवस्तोत्रं येन व्यरचि सकलार्हत्प्रवचन-
प्रपञ्चान्तर्भावप्रवणवरसंदर्भसुभगम् ॥

महिमा स **पात्रकेसरिगुरोः** परं भवति यस्य भक्त्यासीत् ।
पद्मावतीसहायात्रिलक्षणकदर्थनं कर्तुम् ॥

सुमतिदेवममुं स्तुत येन वः सुमतिसप्तकमाप्ततया कृतम् ।
परिहृतापदतत्त्वपदार्थिनां सुमतिकोटिविवर्ति भवार्तिहृत् ॥

उपेत्य सम्यग्दिशि दक्षिणस्यां **कुमारसेनो** मुनिरस्तमाप ।
तत्रैव चित्रं जगदेकभानोस्तिष्ठत्यसौ तस्य तथा प्रकाशः ॥

धर्मार्थकामपरिनिर्वृतिचारुचिन्त-
श्चिन्तामणिः प्रतिनिकेतमकारि येन ।
स स्तूयते सरससौख्यभुजा सुजात-
श्चिन्तामणिर्मुनिवृषो न कथं जनेन ॥

चूडामणिः कवीनां चूडामणिनामसेव्यकाव्यकविः ।
श्रीवर्धदेव एव हि कृतपुण्यः कीर्तिमाहर्तुम् ॥

---

1. वज्रनन्दिनि.

चूर्णि(:) ॥

य एवमुपश्लोकितो दण्डिना।

जह्नोः कन्यां जटाग्रेण बभार परमेश्वरः।

श्रीवर्धदेव संधत्से जिह्वाग्रेण सरस्वतीम् ॥

पुष्पास्त्रस्य जयो गणस्य भरणं भूभृत्कृिखावट्टनं

पश्चादस्तु महेश्वरस्तदपि न प्राप्तं तुलामीश्वरः।

यस्याखर्वकलावतोऽप्यखिलमद्दिक्पालमौलिस्खल-

त्कीर्तिस्वःसरितो **महेश्वर** इह स्तुल्यः स कैः स्यान्मुनिः ॥

यः सप्ततिमहावादान् जिगायान्यानथामितान्।

ब्रह्मरक्षोऽर्चितः सोऽर्च्यो महेश्वरमुनीश्वरः ॥

तारा येन विनिर्जिता घटकुटीगूढावतारा समं

बौद्धैर्यो धृतपीठपीडितकुदृग्देवार्थसेवाञ्जलिः।

प्रायश्चित्तमिवाङ्घ्रिवारिजरजःस्नानं च यस्याचर-

द्दोषाणां सुगतः स कस्य विषयो **देवाकलङ्कः** कृती ॥

चूर्णि(:) ॥

यस्येदमात्मनोऽनन्यसामान्यनिरवद्यविद्याविभवोपवर्णनमाकर्ण्यते।

राजन्**साहसतुङ्ग** सन्ति बहवः श्वेतातपत्रा नृपाः

किं तु त्वत्सदृशा रणे विजयिनस्त्यागोन्नता दुर्लभाः।

तद्वत्सन्ति बुधा न सन्ति कवयो वादीश्वरा वाग्मिनो

नानाशास्त्रविचारचातुरधियः काले कलौ मद्विधाः ॥

नमो मल्लिषेणमलधारिदेवाय ॥ (पूर्वपार्श्वे)

राजन्सर्वारिदर्पप्रविदलनपटुस्त्वं यथात्र प्रसिद्ध-

स्तद्वत्ख्यातोऽहमस्यां भुवि निखिलमदोत्पाटनः पण्डितानाम्।

नो चेदेषोऽहमेते तव सदसि सदा सन्ति सन्तो महान्तो

वक्तुं यस्यास्ति शक्तिः स वदतु विदिताशेषशास्त्रो यदि स्यात् ॥

नाहंकारवशीकृतेन मनसा न द्वेषिणा केवलं

नैरात्म्यं प्रतिपद्य नश्यति जने कारुण्यबुद्ध्या मया।

राज्ञः **श्रीहिमशीतलस्य** सदसि प्रायो विदग्धात्मनो
बौद्धौघान्सकलान्विजित्य सुगतः पादेन विस्फोटितः ॥

श्री**पुष्पषेण**मुनिरेव पदं महिम्नो
देवः स यस्य समभूत्स भवान्सधर्मा ।
श्रीविभ्रमस्य भवनं ननु पद्ममेव
पुष्पेषु मित्रमिह यस्य सहस्रधामा ॥

विमलचन्द्रमुनीन्द्रगुरोर्गुरुः प्रशमिताखिलवादिमदं पदम् ।
यदि यथावदवैष्यत पण्डितैर्ननु तदान्ववदिष्यत वाग्विभोः ॥

चूर्णि(:) ॥

तथाहि । यस्यायमापादितपरवादिहृदयशोकः पत्रालम्बनश्लोकः ॥

पत्रं शत्रुभयंकरोरु भवनद्वारे सदा संचर-
न्नानाराजकरीन्द्रवृन्दतुरगव्राताकुले स्थापितम् ।
शैवान्पाशुपतांस्तथागतसुतान्कापालिकान्कापिला-
नुद्दिश्योद्धृतचेतसा विमलचन्द्राशाम्बरेणादरात् ॥

दुरितग्रहनिग्रहाद्भयं यदि भो भूरिनरेन्द्रवन्दितम् ।
ननु तेन हि भव्यदेहिनो भजत श्रीमुनि**मिन्द्रनन्दिनम्** ॥

घटवादघटाकोटिकोविदं को विदां प्रवाक् ।
परवादिमल्लदेवो देव एव न संशयः ॥

चूर्णि(:) ॥

येनेयमात्मनामधेयनिरुक्तिरुक्ता नाम पृष्टवन्तं **कृष्णराजं** प्रति ।

गृहीतपक्षादितरः परः स्यात्तद्वादिनस्ते परवादिनः स्युः ।
तेषां हि मल्लः परवादिमल्लस्तन्नाम मन्नाम वदन्ति सन्तः ॥

आचार्यवर्यो यतिरार्यदेवो राद्धान्तकर्ता ध्रियतां स मूर्ध्नि ।
यः स्वर्गयानोत्सवसीम्नि कायोत्सर्गस्थितः कायमुदुत्ससर्ज ॥

श्रवणकृततृणोऽसौ संयमं ज्ञातुकामैः
शयनविहितवेलासुप्तलुप्तावधानः ।

श्रुतिमरभसवृत्त्योन्मृज्य पिञ्छेन शिश्ये
किल मृदुपरिवृत्त्या दत्ततत्कीटवर्त्मा ॥
विश्वं यः श्रुतबिन्दुनावरुरुधे भावं कुशाग्रीयया
बुद्ध्यैवातिमहीयसा प्रवचसा बद्धं गणाधीश्वरैः ।
शिष्यान्प्रत्यनुकम्पया कृशमतीनैदंयुगीनान्सुगी-
स्तं वाचार्चत चन्द्रकीर्तिगणिनं चन्द्राभकीर्तिं बुधाः ॥
सद्धर्मकर्मप्रकृतिं प्रणामाद्यस्योग्रकर्मप्रकृतिप्रमोषः ।
तं नाम्नि कर्मप्रकृतिं नमामो भट्टारकं दृष्टकृतान्तपारम् ॥
अपि स्ववाग्व्यस्तसमस्तविद्यस्त्रैविद्यशब्देऽप्यनुमन्यमानः ।
श्रीपालदेवः प्रतिपालनीयः सतां यतस्तत्त्वविवेचनी धीः ॥
तीर्थे श्रीमतिसागरो गुरुरिलाचक्रं चकार स्फुर-
ज्ज्योतिःपीततमःपयःप्रविततिः पूतं प्रभूताशयः ।
यस्माद्भूरिपरार्थ्यपावनगुणः श्रीवर्धमानोल्लस-
द्रत्नोत्पत्तिरिलातलाधिपशिरःशृङ्गारकारिण्यभूत् ॥
यत्राभियोक्तरि लघुर्लघुधामसोम-
सौम्याङ्गभृत्स च भवत्यपि भूतिभूमिः ।
विद्याधनं जयपदं विशदं दधानो
विष्णुः स एव हि महामुनिर्हेमसेनः ॥
चूर्णि ॥ यस्यायमवनिपतिपरिषदि निग्रहमहीनिपातभीतदुस्थदुर्गर्वपर्व-
तारूढप्रतिवादिलोकः प्रतिज्ञाश्लोकः ॥
तर्के व्याकरणे कृतश्रमतया धीमत्तयाप्युद्धतो
मध्यस्थेषु मनीषिषु क्षितिभृतामग्रे मया स्पर्धया ।
यः कश्चित्प्रतिवक्ति तस्य विदुषो वाग्मेयभङ्गं परं
कुर्वेऽवश्यमिति प्रतीहि नृपते हे हैमसेनं मतम् ॥
हितैषिणां यस्य नृणामुदात्तवाचा निबद्धा हितरूपसिद्धिः ।
वन्धो दयापालमुनिः स वाचा सिद्धः सतां मूर्धनि यः प्रभावैः ॥

यस्य श्रीमतिसागरो गुरुरसौ चञ्चद्यशश्चन्द्रमूः
श्रीमान्यस्य स वादिराजगणभृत्सब्रह्मचारी विभोः ।
एकोऽतीव कृती स एव हि दयापालव्रती यन्मन-
स्यास्तामन्यपरिग्रहग्रहकथा स्वे विग्रहे विग्रहः ॥
त्रैलोक्यदीपिका वाणी द्वाभ्यामेवोदगादिह ।
जिनराजत एकस्मादेकस्माद्वादिराजतः ॥
आरुह्याम्बरमिन्दुबिम्बरचितौत्सुक्यं सदा यद्यश-
श्छत्रं वाक्चमरीजराजिरुचयोऽभ्यर्णं च यत्कर्णयोः ।
सेव्यः सिंहसमर्च्यपीठविभवः सर्वप्रवादिप्रजा-
दत्तोच्चैर्जयकारसारमहिमा श्रीवादिराजो विदाम् ॥
चूर्णि ॥ यदीयगुणगोचरोऽयं वचनविलासप्रसरः कवीनाम् ।
नमोऽर्हते ॥ (दक्षिणपार्श्वे)
श्रीमच्चालुक्यचक्रेश्वरजयकटके वाग्वधूजन्मभूमौ
निष्काडं डिण्डिमः पर्यटति पटुरटो(वो) वादिराजस्य जिष्णोः ।
जह्युद्यद्वाददर्पो जहिहि गमकतागर्वभूमा जहाहि
व्याहारेर्ष्यो जहीहि स्फुटमृदुमधुरश्राव्यकाव्यावलेपः ॥
पाताले व्यालराजो वसति सुविदितं यस्य जिह्वासहस्रं
निर्गन्ता स्वर्गतोऽसौ न भवति धिषणो वज्रभृद्यस्य शिष्यः ।
जीवेतां तावदेतौ निलयबलवशाद्वादिनः केऽत्र नान्ये
गर्वं निर्मुच्य सर्वं जयिनमिनसभे वादिराजं नमन्ति ॥
वाग्देवीं सुचिरप्रयोगसुदृढप्रेमाणमप्यादरा-
दादत्ते मम पार्श्वतोऽयमधुना श्रीवादिराजो मुनिः ।
भो भोः पश्यत पश्यतैष यमिनां किं धर्म इत्युच्चकै-
रब्रह्मण्यपराः पुरातनमुनेर्वाग्वृत्तयः पान्तु वः ॥
गङ्गावनीश्वरशिरोमणिबन्धसंध्या-
रागोल्लसच्चरणचारुनखेन्दुलक्ष्मीः ।
श्रीशब्दपूर्वविजयान्तविनूतनामा[1]
धीमानमानुषगुणोऽस्ततमः प्रमांशुः ॥

1. श्रीविजय इति तात्पर्यम्.

चूर्णि ॥ स्तुतो हि स भवानेष श्रीवादिराजदेवेन ॥

यद्विद्यातपसोः प्रशस्तमुभयं श्रीहेमसेने मुनौ
प्रागासीत्सुचिराभियोगबलतो नीतं परामुन्नतिम् ।
प्रायः श्रीविजये तदेतदखिलं तद्वीथिकायां स्थिते
संक्रान्तं कथमन्यथानतिचिरादीदृग्विधेदृक्तपः ॥

विद्योदयोऽस्ति न मदोऽस्ति तपोऽस्ति भास्व-
न्नोग्रत्वमस्ति विभुतास्ति न चास्ति मानः ।
यस्याश्रये कमलभद्रमुनीश्वरं तं
यः ख्यातिमापदिह शाम्यदघैर्गुणौघैः ॥

स्मरणमात्रपवित्रतमं मनो भवति यस्य सतामिह तीर्थिनाम् ।
नमतिनिर्मलमात्मविशुद्धये कमलभद्रसरोवरमाश्रये ॥

सर्वाङ्गैर्यमिहालिलिङ्ग सुमहाभागं कला भारती
भास्वन्तं गुणरत्नभूषणगणैरप्यग्रिमं योगिनाम् ।
तं मन्तः स्तुवतामलंकृतदयापालाभिधानं महा-
सूरिं भूरिधियोऽत्र पण्डितपदं यत्रैव युक्तं स्मृताः(तम्) ॥

विजितमदनदर्पः श्रीदयापालदेवो
विदितसकलशास्त्रो निर्जिताशेषवादी ।
विमलतरयशोभिर्व्याप्तदिक्चक्रवालो
जयति नतमहीभृन्मौलिरत्नारुणाङ्घ्रिः ॥

यस्योपास्य पवित्रपादकमलद्वन्द्वं नृपः पोय्सलो
लक्ष्मीं सन्निधिमानयत्स विनयादित्यः कृताज्ञाभुवः ।
कस्तस्यार्हति शान्तिदेवयमिनः सामर्थ्यमित्थं तथे-
त्याख्यातुं विरलाः कलौ स्फुरदुरुज्योतिर्दशास्तादृशाः ॥

स्वामीति पाण्ड्यपृथिवीपतिना निसृष्ट-
नामास्पदृष्टिविभवेन निजप्रसादात् ।
धन्यः स एव मुनिराहवमल्लभूभु-
गास्थानिकप्रथितशब्दचतुर्मुखाख्यः ॥

श्रीमुल्लूरविदूरमारवसुधारत्नं सनाथो गुणे
नाक्षूणीनमहीक्षितामुरुमहःपिण्डः शिरोमण्डनः ।
आराध्यो **गुणसेनपण्डितपतिः** स स्यात्स्यकामैर्जना
यद्युक्तागमगन्धतोऽपि गलितम्लानि गति र्लम्भि(म्भि)ताः ॥
वन्दे वन्दितमादरादहरहः स्याद्वादविद्याविदां
स्वान्तध्वान्तवितानधूननविधौ भास्वन्तमन्यं भुवि ।
भक्तोत्पादितसेवमानतिकृतां यत्संनियोगान्मनः-
पद्मं सद्म भवेद्धिकामविभवस्योनु(न्मु)क्तनिद्राभरम् ।
मिथ्याभाषणभूषणं परिहरेतोद्धत्य·······चन
स्याद्वादं वदता नमेत विनयाद्वादीभकण्ठीरवम् ।
नो चेत्तद्गुणनिर्जितश्रुतिभयभ्रान्ताः स्थ यूयं यत-
स्तूर्णं निग्रहजीर्णकूपकुहरे वादिद्विपा पातिनः ॥
गुणाः कुन्दस्पन्दोड्डमरममरा वागमृत वाः-
प्लवप्रायप्रेयःप्रसरमरमा कीर्तिरिव सा ।
नखेन्दुज्योत्स्नाङ्केनृपचयचकोरप्रणयिनी
न कासां श्लाघानां पद**मजितसेन**व्रतिपतिः(तेः) ॥
सकलभुवनपालानम्रमूर्धावबद्ध-
स्फुरितमकुटचूडालीढपादारविन्दः ।
मदवदखिलवादीभेन्द्रकुम्भप्रभेदी
गणभृदजितसेनो भाति वादीभसिंहः ॥
चूर्णि ॥ यस्य संसारवैराग्यवैभवमेवंविधाः स्ववाचः सूचयन्ति ॥
प्राप्तं श्रीजिनशासनं त्रिभुवने यद्दुर्लभं प्राणिनां
यत्संसारसमुद्रमग्नजनता हस्तावलम्बायितम् ।
यत्प्राप्ताः परनिर्व्यपेक्षसकलज्ञानश्रियालंकृता-
स्तस्मात्किं गहनं कृतो भयवशः का वात्र देहे रतिः ॥
आत्मैश्वर्यं विदितमधुनानन्तबोधादिरूपं
तत्संप्राप्त्यै तदनु समयं वर्ततेऽत्रैव चेतः ।

त्यक्त्वान्यस्मिन्सुरपतिसुखे चक्रिसौख्ये च तृष्णां
तत्तुच्छार्थैरलमलमधीलोचनैर्लोकवृत्तैः ॥
अजानन्नात्मानं सकलविषयज्ञानवपुषं
सदा शान्तं स्वान्तःकरणमपि तत्साधनतया ।
बही रागद्वेषैः कलुषितमनाः कोऽपि यततां
कथं जानन्नेनं क्षणमपि ततोऽन्यत्र यतते ॥

(पश्चिमपार्श्वे) चूर्णि ॥ यस्य च शिष्ययोः **कवितांकान्त-वादिकोलाहल**परनामधेययोः **शान्तिनाथ-पद्मनाभ**पण्डितयोरखण्डपाण्डित्यगुणोपवर्णनमिदमसंपूर्णम् ॥

त्वामासाद्य महाधियं परिगता या विश्वविद्वज्जन-
ज्येष्ठाराध्यगुणा चिरेण सरसा वैदग्ध्यसंपद्गिरा(म्) ।
कृत्स्नाशान्तनिरन्तरोदितयशःश्रीकान्त शान्ते न तां
वक्तुं सापि सरस्वती प्रभवति ब्रूमः कथं तद्वयम् ॥
व्यावृत्तभूरिमदसंततिविस्मृतेर्ष्या-
पारुष्यमाप्तकरुणारुतिकान्दिशीकम् ।
धावन्ति हन्त परवादिगजास्त्रसन्तः
श्रीपद्मनाभबुधगन्धगजस्य गन्धात् ॥
दीक्षा च शिक्षा च यतो यतीनां जैनं तपस्तापहरं दधानात् ।
कुमारसेनोऽवतु यच्चरित्रं श्रेयःपथोदाहरणं पवित्रम् ॥
जगद्दुरितमत्रसरस्मरमदान्धगन्धद्विप-
द्विधाकरणकेसरी चरणभूष्यभूभृच्छिखः ।
द्विषद्गुणवपुस्तपश्चरणचण्डधामोदयो
दयेत मम **मल्लिषेणमलधारिदेवो** गुरुः ॥
वन्दे तं मलधारिणं मुनिपतिं मोहद्विषद्व्याहति-
व्यापारव्यवसायसारहृदयं सत्संयमोरुश्रियम् ।
यत्कायोपचयीभवन्मलमपि प्रव्यक्तभक्तिक्रमा-
नम्राकम्रमनोमिलन्मलमषीप्रक्षालनैकक्षमम् ॥

अतुच्छतिमिरच्छटाजटिलजन्मजीर्णाटवी-
दवानलतुलाजुषां पृथुतपःप्रभावत्विषाम् ।
पदं पदपयोरुहभ्रमितभव्यभृङ्गावलि-
र्ममोल्लसतु मल्लिषेणमुनिराण्मनोमन्दिरे ॥

नैर्मल्याय मलाबिलाङ्गमखिलत्रैलोक्यराज्याश्रिये
नैष्किचन्यमतुच्छतापहृतये न्यञ्चद्धुताशं तपः ।
यस्यासौ गुणरत्नरोहणगिरिः श्रीमल्लिषेणो गुरु-
र्वन्द्यो येन विचित्रचारुचरितैर्धात्री पवित्रीकृता ॥

यस्मिन्नप्रमिता क्षमाभिरमते यस्मिन्दयानिर्दया-
श्लेषो यत्र समत्वधीः प्रणयिनी यत्रास्पृहा सस्पृहा ।
कामं निर्वृतिकामुकः स्वयमघोऽप्यग्रेसरो योगिना-
माश्चर्याय कथं न नाम चरितैः श्रीमल्लिषेणो मुनिः ॥

यः पूज्यः पृथिवीतले यमनिशं सन्तः स्तुवन्त्यादरा-
द्येनानङ्गधनुर्जितं मुनिजना यस्मै नमस्कुर्वते ।
यस्मादागमनिर्णयोऽयमभवद्यस्यास्ति जीवे दया
यस्मिञ्श्रीमलधारिणि व्रतिपतौ धर्मोऽस्ति तस्मै नमः ॥

धवलसरसतीर्थे सैष सन्न्यासधन्यां
परिणतिमनुतिष्ठन्नन्दिमानिष्ठितात्मा ।
व्यसृजत निजमङ्गं भङ्गमङ्गोद्भवस्य
ग्रथितुमिव समूलं भावयन्भावनाभिः ॥

चूर्णि ॥ तेन श्रीमदजितसेनपण्डितदेवदिव्यश्रीपादकमलमधुकरीभूत-भावेन महानुभावेन जैनागमप्रसिद्धसल्लेखनाविधिविसृज्यमानदेहेन ममाभि-विधिविलोकनोचितकरणकुतूहलमिलितसकलसंघसंतोषनिमित्तमात्मान्तःकर-णपरिणतिप्रकाशनाय निरवद्यं पद्यमिदमाशु विरचितम् ॥

आराध्य रत्नत्रयमागमोक्तं विधाय निःशल्यमशेषजन्तोः ।
क्षमां च कृत्वा जिनपादमूले देहं परित्यज्य दिवं विशामः ॥

---

१. अधुना 'बेल्गोला'नाम्ना प्रसिद्धे.

शाके शून्यशराम्बरावनि(१०५०)मिते संवत्सरे कीलके
मासे फाल्गुनिके तृतीयदिवसे वारेऽसिते भास्करे।
स्वातौ श्वेतसरोवरे सुरपुरं यातो यतीनां पति-
र्मध्याह्ने दिवसत्रयानशनतः श्रीमल्लिषेणो मुनिः ॥

श्रीमन्मलधारिदेवर गुड्डं विरुदलेखक मदन महेश्वरं मल्लिनाथं वरेदं विरुदरूवारिमुखतिलकं गङ्गाचारिकण्डरिषिदम् ॥

(बू. ल्. राइस् पण्डितमुद्रिते 'इन्स्क्रिप्शन्स् ऐट् श्रवणबेल्गोला'नामकपुस्तके चतुष्पञ्चाशो लेखः।)

---

(३९)

यादववंशोद्भूनकृष्ण (कह्नर) महीपालामात्यमल्लिसेट्टि-दानपत्रम्।

ॐ नमः शिवाय ॥ श्रीगणाधिपतये नमः ॥

पायादाद्यः स वः पोत्री यद्दंष्ट्राप्रतिबिम्बिता।
अगादिव धृता धात्री हर्षाद्द्विगुणपुष्टताम् ॥
अस्ति स्वस्त्ययनो राजा **सिंहणो** यदुवंशजः।
यस्य कीर्तिस्त्रिभुवने प्रथिता हरिकीर्तिवत् ॥
प्रत्यर्थिक्षितिपालमौलिमुकुटप्रत्युप्तमुक्ताफल-
प्रान्तप्रोल्लसदङ्घ्रिवारिजयुगः श्रीसिंहणः क्षोणिपः।
आशाविश्रुतशुद्धयादवकुलस्पष्टोऽवति क्ष्मातलं
पारावारसुमेखलं सुतवरः शूरोऽजयज्जैतुगिः ॥
यो राजा जैतुगिर्नाम सिंहणाख्यान्नृपात्ततः।
जनितो यदुवंशाब्धौ पयोधाविव चन्द्रमाः ॥
तस्य पुत्रो महातेजाः **श्रीकह्नर** इति श्रुतः।
यदाज्ञां शिरसा धृत्वा भवन्ति सुखिनो नृपाः ॥
जयति जगति राजा सर्वभूपालमौलि-
प्र(ग्र)थितपरमरत्नप्रोल्लसत्पादपद्मः।

यदुकुलचिरलीले वासुदेवे जनाना
नयनकमलसूर्यः प्रीतिमान्कद्दराख्यः ॥
यद्वक्षसि स्थिता लक्ष्मीर्यद्भुजे विजयाङ्गना।
यद्दृष्टौ करुणा नित्यं ददामीति वनस्यपि ॥
यद्यात्रायां नृपाः सर्वे तत्र तत्र स्थिता दिशि।
बालैरन्तःपुरैर्भीत्या क्षेपयन्त्यक्षमा बलिम् ॥
तस्यान्यक्षितिपालमौलिमुकुटप्रत्युप्तरत्नाश्चिरं
नीराजचरणारविन्दयुगलः शेपस्य पृथ्वीपतेः।
शूरोऽमात्यधुरि स्थितो विजयते बीचाग्रजः संततं
मल्लाख्यः किल चिक्कदेवतनयः प्रख्यानकीर्तिर्भुवि ॥
तस्यात्मजो महामात्यश्चौण्डसेट्टिर्महायशाः।
यो जिह्वा पृथिवीशस्य यो राज्ञो दक्षिणो भुजः ॥
यश्चौण्डिसेट्टिः प्रथितप्रतापः सर्वासु दिक्ष्वर्जितपुण्यकीर्तिः।
श्रीसोमनाथाङ्घ्रियुगाब्म(ब्ज)नत्या प्रवर्धिताशेषविभूतिरम्यः ॥
दिशो जिगीषं(षुं) नमवेक्ष्य सर्वे द्विषन्त एवं त्वथ चौण्डिसेट्टिम्।
वल्मीकमारुह्य तृणं चरन्ति गृह्णन्ति नीवीमपि कर्णपत्रम् ॥
यद्रूपसौन्दर्यगुणप्रलुब्धा रतिः समासाद्य पुनः पतिं सा।
विस्मृत्य चानङ्गसुखं प्रवृद्धसुखेन विक्रीडति लब्धहर्षा ॥
प्रशास्त्यरीन्यः प्रगृहीतचापो ददाति चार्थान्कृपया द्विजेभ्यः।
चवुण्डसेट्टाख्यबुधाय दद्यात्तस्मै चिरायुर्भुवि सोमनाथः ॥ ७ ॥

स्वस्तिश्रीशकसंवत्सरस्य शताधिकसहस्रकाधिकसप्तत्या(११७०)श्रानन्तरे सौम्येऽब्दे श्रावणे मासि सितपक्षे द्वादश्यां गुरुवारे श्रीकद्दरदेवस्य महाराजस्य बीचाग्रजो मल्लिसेट्टाख्यो महामात्यः कटकयात्रायां भीमरथ्यां पौण्डरीकक्षेत्रे श्रीविष्णुसंनिधौ वेणुग्रामदेशस्थां ताम्रपुरीं दशाधिकशतवृत्तीः प्रकल्पाष्टभोगसमस्ततेजःसहितां सर्वनमस्यां प्रसिद्धचतुःसीमामुद्रितां श्रीकद्दरदेवस्य राज्ञो राज्याभ्युदयार्थं नानागोत्रेभ्यो ब्राह्मणेभ्यः सदक्षिणं धारापूर्वकं प्रदत्तवान्। तस्य पुत्रो महामात्यश्चौण्डिसेट्टिः राज्ञः समीपं

गत्वा पितुः सर्वाधिपत्यं राज्ञो लब्ध्वा वेणुग्रामदेशस्था ताम्रपुरी मम पित्रा ब्राह्मणेभ्यो दत्तेति तस्य राज्ञो निवेदयित्वा तेन राज्ञा मयैव दत्तेति लब्धाभ्यनुज्ञस्तेभ्यो ब्राह्मणेभ्योऽष्टभोगतेजःसमन्वितं सर्वनमस्यं ताम्रशासनं चौण्डिसेट्टिर्दापयित्वा पितुर्धर्ममाचन्द्रार्कं सुस्थिरं कृतवान् ॥ ७ ॥ तस्मै सर्वतः स्वस्त्यस्तु ॥ ७ ॥ ततस्तस्यास्ताम्रपुर्याः प्रतिगृहितॄणां ब्राह्मणानां गोत्रगुणनामानि क्रमेण लिख्यन्ते ॥ ७ ॥ स्वस्ति ॥ ७ ॥ वसिष्ठगोत्रीयलक्ष्मीधरभट्टोपाध्यायसुतनारायणभट्टोपाध्यायः । तस्य पुत्रः लक्ष्मीधरक्रमितः । वसिष्ठगोत्रीयवामनक्रमितसुतनारायणभट्टोपाध्यायः । आत्रेयगोत्रीयक्रगर्थद दुग्गणभट्टोपाध्यायसुतकृष्णभट्टोपाध्यायः । तस्य पुत्रः दुग्गणभट्टोपाध्यायः । काश्यपगोत्रीयकावदेवपट्टवर्धनसुतरामेश्वरपट्टवर्धनः । अगस्त्यगोत्रीयाचार्यकेशवभट्टोपाध्यायसुतदशग्रन्थिमाधवभट्टोपाध्यायः । तस्य भ्राता वेदार्थनार(राय)णभट्टोपाध्यायः । आत्रेयगोत्रीयब्रह्मदेवपट्टवर्धनसुतनारायणपट्टवर्धनः । तस्य भ्राता श्रीधरपट्टवर्धनः । जामदग्न्यवत्सगोत्रीयजक्कदेवभट्टोपाध्यायसुतश्रीधरभट्टोपाध्यायः । काश्यपगोत्रीयश्रीधरभट्टोपाध्यायसुतश्रीभागवतकलिदेवभट्टोपाध्यायः । आत्रेयगोत्रीयनारायणक्रमितसुताध्वरिबसवणभट्टोपाध्यायः । भारद्वाजगोत्रीयनारद(?)सुतकामदेवघैसः । वासिष्ठगोत्रीयभास्करसुतरामदेवघैसः । भारद्वाजगोत्रीयब्रह्मदेवक्रमितसुतसोमेश्वरक्रमितः । काश्यपगोत्रीयलक्ष्मीधरभट्टोपाध्यायसुतसोमेश्वरभट्टोपाध्यायः । भारद्वाजगोत्रीयवामदेवपट्टवर्धनसुतविष्णुपट्टवर्धनः । भारद्वाजगोत्रीयमेधाविघलिसाससुतगोपालपट्टवर्धनः । तस्य भ्राता उत्तमक्रमितः । तस्य सुतः विश्वनाथघलिसासः । वासिष्ठगोत्रीयदेवणपट्टवर्धनसुतशंकराचार्यः । तस्य सुतः चौडरायपट्टवर्धनः । वासिष्ठगोत्रीयजैतकह्लरपाठकसुतबलदेवपाठकः । तस्य भ्राता केशव पाठकः । भार्गवगोत्रीयदामोदरद्वे(द्विवे)दिसुतशिवहरिपाठकः । तस्य भ्राता सर्वेश्वरद्वे(द्विवे)दी । वासिष्ठगोत्रीयःदेव दुवे(द्विवेदि)सुतलक्ष्मीधरपाठकः । पाराशरगोत्रीयशान्तिशुक्लसुतगजा(दा)धरपाठकः । वत्सगोत्रीयदेवशर्मशुक्लसुतनरसिंहपाठकः । भार्गवगोत्रीयकीर्तिवासपाठकसुतनागदेवपाठकः । गर्गगोत्रीयदेवशर्मपाठकसुताश्वधरपाठकः ।

आर्ष्टिकगोत्रीयामदेवोपाध्यायसुतदामोदरोपाध्यायः । तस्य भ्राता आशोपाध्यायः । कापिष्ठलगोत्रीयचांगदेवपाठकसुतदामोदरपाठकः । देवरातगोत्रीयसारङ्गदीक्षितसुतवासूपाध्यायः । वत्सगोत्रीयमहेश्वरपाठकसुतमहेशर्मपाठकः । गार्ग्यगोत्रीयवाकुपाठकसुतसोढणपाठकः । भारद्वाजगोत्रीयात्रिदेवपण्डितसुतवैजनाथपण्डितः । कौशिकगोत्रीयप्रभाकरत्रिवाडि(पाठि)सुतदामोदरत्रिवाडिः । कौण्डिन्यगोत्रवाकुद्वे(द्विवे)दिसुतजगद्धरद्वे(द्विवे)दिः । कौशिकगोत्रीयमदनाइतपाठकसुतरामदेवपाठकः । भारद्वाजगोत्रीयत्रिलोचनसुतविजयशर्मपाठकः । तस्य भ्राता क्षेमधरपाठकः । शाण्डिल्यगोत्रीयहरिहरत्रिवाडिसुतमहशर्मत्रिवाडिः । कौशिकगोत्रीयउत्तमपण्डितसुतगवेयिदेवपण्डितः । गरगगोत्रीयअसधरपाठकसुतसावल्पाठकः । मौद्ग(द्ग)ल्यगोत्रीयनारायणोपाध्यायसुतबसवणोपाध्यायः । भारद्वाजगोत्रीयगनगनूरमेलारस्वामिगलसुतईश्वरस्वामिः(मी) । विश्वामित्रगोत्रीयसर्वज्ञसरस्वतीभण्डारडदेवणभट्टोपाध्यायसुतसर्वज्ञवैजनाथभट्टोपाध्यायः । आत्रेयगोत्रीयनागदेवसुतवोपदेवोपाध्यायः । काश्यपगोत्रीयतेजोपाध्यायसुतलक्ष्मीधरोपाध्यायः । गर्गगोत्रीयब्रह्मदेवपट्टवर्धनसुतसोमनाथपट्टवर्धनः । तस्य भ्राता त्रिविक्रमभट्टोपाध्यायः । भारद्वाजगोत्रीयमल्लिदेवपट्टवर्धनसुतभास्करभट्टोपाध्यायः । तस्य भ्राता कलिदेवपट्टवर्धनः । विष्णुवृद्धगोत्रीयतन्त्रमन्त्राचार्यवामदेवभट्टोपाध्यायसुतनरसिंहभट्टोपाध्यायः । विश्वामित्रगोत्रीयसोमेश्वरपट्टवर्धनसुतशंकरघलिसः । विष्णुवृद्धगोत्रीयश्रीधरपट्टवर्धनसुतमाधवपट्टवर्धनः । कपिगोत्रीयमाधवपट्टवर्धनसुतश्रीधरपट्टवर्धनः । काश्यपगोत्रीयकलिदेवघल्लिससुतविष्णुपट्टवर्धनः । काश्यपगोत्रीयकेशवपट्टवर्धनसुतस्वामिदेवघल्लिसासः । काश्यपगोत्रीयनारणभट्टसुतदेवणघल्लिसः । भारद्वाजगोत्रीयमहादेवपट्टवर्धनसुतमलिदेववैसासः । तस्य भ्राता देवणवैसासः । भारद्वाजगोत्रीयरामदेववैसाससुतविष्णुवैसासः । वासिष्ठगोत्रीयादित्यभट्टोपाध्यायसुतवारणाशियविष्णुभट्टोपाध्यायः । पाराशरगोत्रीयवारणाशियनारायणभट्टोपाध्यायसुतविश्वनाथक्रमितः । आत्रेयगोत्रीयसरस्वतीपद्मनाभभट्टोपाध्यायः । काश्यपगोत्रीयद्रविडविश्वनाथभट्टोपाध्यायः । कपिगोत्रीयदामोदरभट्टो-

पाध्यायसुतरवलदेवभट्टोपाध्यायः । काश्यपगोत्रीयमाधवपट्टवर्धनसुतमच्चयणोपाध्यायः । विश्वामित्रगोत्रीयब्रह्मज्ञानिगलब्रह्मदेवभट्टोपाध्यायसुतानन्तभट्टोपाध्यायः । हरितगोत्रीयगोविन्दपट्टवर्धनसुतवामनपट्टवर्धनः । हरितगोत्रीयवामनपट्टवर्धनसुतगोविन्दपट्टवर्धनः । तस्य भ्राता वासुदेवपट्टवर्धनः । भारद्वाजगोत्रीयचन्द्रभट्टोपाध्यायसुतप्रोलिभट्टोपाध्यायः । भारद्वाजगोत्रीयवासुदेवभट्टोपाध्यायसुतमहादेवपट्टवर्धनः । भारद्वाजगोत्रीयश्रीधरसुतईश्वरघलिसः । श्रीवत्सगोत्रीयमायिदेवघलिसाससुतगोविन्दघलिसासः । श्रीवत्सगोत्रीयदिवाकरघलिसाससुतनागदेवघलिसामः । वासिष्ठगोत्रीयबलिदेवघसमुतमलिदेवपट्टवर्धनः । मौनभार्गवगोत्रीयनारायणघलिससुतबसवणघलिसामः । भारद्वाजगोत्रीयवेदार्थदरेच्चयपणसुतमैलारभट्टोपाध्यायः । गौतमगोत्रीयलक्ष्मीधरसुतविष्णुभट्टोपाध्यायः । भारद्वाजगोत्रीयप्रसन्नसरस्वतीश्रीधरभट्टोपाध्यायसुतवासुदेवभट्टोपाध्यायः । आत्रेयगोत्रीयविष्णुभट्टोपाध्यायसुतसामवेदीहरिहरभट्टोपाध्यायः । मौनभार्गवगोत्रीयभास्करभट्टोपाध्यायसुतविष्णुपट्टवर्धनः । भारद्वाजगोत्रीयकेशवभट्टोपाध्यायसुतहिमदकलिदेवपट्टवर्धनः । भारद्वाजगोत्रीयनरसिंहपट्टवर्धनसुतमाधवपट्टवर्धनः । भारद्वाजगोत्रीयनागदेवपट्टवर्धनसुतसरस्वतीनागदेवपट्टवर्धनः । काश्यपगोत्रीयविष्णुभट्टोपाध्यायसुतमलिदेवभट्टोपाध्यायः । आत्रेयगोत्रकेशवपट्टवर्धनस्य भ्राता मधुसूदनपट्टवर्धनः । आत्रेयगोत्रवरदेवसुतप्रौढसरस्वतीनां वृत्तिद्वयम् । काश्यपगोत्रविष्णुदेव(:) । वामनभट्टोपाध्यायः । काश्यपगोत्रनागदेव(नागदेव)भट्टोपाध्यायः । काश्यपगोत्रीयबोनकममञ्चयणभट्टोपाध्यायः । वासिष्ठगोत्रीयसामवेदिचद्यणभट्टोपाध्यायः । काश्यपगोत्रीयस्वयंपाकिविश्वनाथभट्टोपाध्यायः । काश्यपगोत्रीयगोकागेयवेदार्थदनागदेवभट्टोपाध्यायः । मौनभार्गवगोत्रीयमेधाविघैससुतउत्तमक्रमितः । काश्यपगोत्रीयअण्णिगेरेयविष्णुपट्टवर्धन(:) । भारद्वाजगोत्रीयरिहशुक्लसुतश्रीविप्रदासपद्मनाभशर्मोपाध्यायः तस्य वृत्तिचतुष्टयम् । आत्रेयगोत्रसामवेदिहरिहरभट्टोपाध्यायः ॥ ७ ॥

भूमिं यः प्रतिगृह्णाति यश्च दानं प्रयच्छति ।
तावुभौ पुण्यकर्माणौ नियतौ(तं) स्वर्गगामिनौ ॥
अपि हस्तमितां भूमिं यो विप्राय प्रयच्छति ।
षष्टिं वर्षसहस्राणि स्वर्गे लोके महीयते ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
गामेकां रत्निकामेकां भूमेरप्येकमङ्गुलम ।
हरन्नरकमाप्नोति यावदा भूतसंप्लवम् ॥
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो महद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥
यो देवपूजाप्रगृहीतचित्तो यो वैरिपक्षेपु गृहीतखड्गः ।
यो ब्राह्मणेष्वर्पितवित्तराशिः स चौण्डिसेट्टिर्भवनाच्चिरायुः ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
श्रीमच्चौण्डीश्वरकृतधर्मोऽयं सर्वधर्मतोऽभ्यधिकः ।
कल्पस्थायी भूयाद्भूयादप्येप दीर्घायुः ॥ ७ ॥
श्रीसोमनाथश्रीपादपद्माराधकः श्रीचौण्डिसेट्टिः ॥ ७ ॥

लेखकः ज्योतिषनसवणोपाध्यायः ॥ ७ ॥ श्री ॥ स्वस्तिश्री ॥ मङ्गलं महाश्री ॥ ७ ॥ श्री ॥ ७ ॥

काश्यपगोत्रमङ्गलपण्डितसुतगोपालपण्डितो महाराजनङ्कलिगेनडहं वावेद्यवृत्ति ड ॥ ७ ॥ श्रीः ॥ ७ ॥ भारद्वाजगोत्रीयहिमडनागदेवपट्टवर्धनः । भारद्वाजगोत्रीयविप्रदासपद्मनाभभट्टोपाध्यायसुतसोमनाथदेवस्य वृत्तिद्वयम् ॥ ७ ॥ श्री ॥

(इण्डियन् आण्टिक्वेरी १४।६८–७५)

(४०)

नेपालमहीपालसिद्धिनृसिंहमल्लस्य प्रशस्तिः ।

ॐ नमो गोपालाय ॥

ब्रह्मत्वे सृजते विश्वं स्थितौ पालयते हरे ।
रुद्ररूपाय कल्पान्ते नमस्तुभ्यं त्रिमूर्तये ॥

प्रावीण्यप्रथितः प्रतापमथितप्रत्यर्थिपृथ्वीपति-
प्रोद्दामप्रमदौघलोचनपयःप्रारब्धवारांनिधिः ।
जातः श्रीहरिसिंहदेवनृपतिर्दातावदातान्वये
संप्राप्तः पृथुना नृपेण समतां यो वृत्तिदाता सताम् ॥

यस्यान्ववायजलधावुदियाय राज-
चन्द्रो महेन्द्र इव तत्र **महेन्द्रमल्लः** ।
येनार्थिकल्पतरुणा गुणसागरेण
राजन्वती वसुमती महती बभूव ॥

यत्प्रौढप्रभवत्प्रतापपतिताः प्राकम्पिताः शत्रवो
भेजुः शैलदरीं विहाय नगरीं त्यक्त्वा पुरे सुन्दरीम् ।
यस्याचारविचारपौरुषरवव्यग्राः समग्रा गिर-
स्तस्य क्षोणिपतेः प्रसिद्धमहसः केनोपमेयं यशः ॥

अस्यात्मजोऽजनि महीतलकल्पवृक्षो
राजा विराजितयशाः **शिवसिंहदेवः** ।
भूमीभुजा समरसीम्नि महाभुजेन
क्षेमं क्षणेन रिपवो बहवो विनष्टाः ॥

येन क्षोणिभुजा प्रयाणसमये पादातसैन्योच्छल-
द्धूलीजालसमुत्थितेन मनसा व्योमान्धकारीकृतम् ।
कूर्मो मर्मणि चूर्णितोऽपि नितरां धत्ते कथंचिद्धरां
शेषः शेषदशां जगाम सहसा सर्वंसहा निःसहा ॥

तनयोऽस्य विनयपूर्णो बभूव कर्णोपमो भूमौ।
हरिहरसिंहनरेन्द्रो वसुधानन्द्रो बभूतास्मौ॥
अरीणां निहन्ता यशःपारगन्ता सुशीलः समन्ताज्जयन्नाधिकश्रीः।
स्वतातानुरूपोऽतितेजःसुरूपो बभूवावनीमण्डले चण्डशौनिः॥
इन्द्राणीव सुरेश्वरस्य दयिता पद्मेव पद्मापते-
र्वैदेहीव रघूत्तमस्य गृहिणी गौरीव गौरीपतेः।
तस्य क्षोणिपतेर्बभूव महिषी सख्या भवानीसमा
राज्ञी लालमती सती गुणवती प्रायो रतिर्भारती॥
पौरंदरी दिगिव नूतनभानुबिम्बं
सौन्दर्यकाननगजाननसांम्बकेव।
पुत्रं पवित्रमथ सिद्धिनृसिंहमल्लं
सा राजपुत्रतनया जनयांबभूव॥
येनाकारि विपक्षपक्ष्मलदृशां दृग्वारिभिर्वारिधि-
र्येनाधारि जगत्त्रयोपरि शरच्चन्द्रावदातं यशः।
बाल्योपक्रम एव विक्रमवतस्तस्याधुना पौरुषे
श्रीमत्सिद्धिनृसिंहमल्लनृपतेर्युद्धे समर्थो हि कः॥
यद्भूमीपालगङ्गाजलविमलयशःपूरकर्पूरपूरं-
र्ब्रह्माण्डे पाण्डुरेऽस्मिन्नसमजनि रजनीनायको निष्कलङ्कः।
तत्किं भूसेवकोऽभून्मुरमलसिपादेष यस्यामृतांशुः
सोऽयं दीर्घायुरस्तामधिधरणि मणिः सिद्धिपूर्वो नृसिंहः॥
दानाल्पीकृतकल्पवृक्षगरिमा सीमा च तेजस्विनां
श्रीमानद्भुतकीर्तियुक्तमहिमा भीमानुजः साहसे।
दोर्दण्डद्वयचण्डिमान्तगलितप्रत्यर्थिपृथ्वीपतिः
श्रीमत्सिद्धिनृसिंहमल्लनृपतिर्वर्तते सर्वोपरि॥
प्रातिष्ठच्च युधिष्ठिराधिकतरं निष्ठा वसिष्ठाधिका
कीर्तिः कार्तिककृत्तिकापतिमति(:)स्तस्याधिका वर्तते।

वाणी व्याससमा रमा स्थिरतमा रामाभिरामाकृतिः
श्रीमत्सिद्धिनृसिंहमल्लनृपतेः किं नाम यन्नाद्भुतम् ॥
कदाचिदेतेन महोन्नतेन मठः कृतः कोऽपि धनैरनेकैः।
श्रीबालगोपालविरामभूमिर्विकुर्वतामर्त्यधरा जगत्याम् ॥
यो मेरुमन्दरमहेन्द्रहिमाद्रिविन्ध्य-
कैलासशैलशिखरभ्रममातनोति।
किं चास्य हेमकलशानवलोक्य देवैः
संदिह्यते कनकधामनि पर्वतेन्द्रे ॥
हर्षान्नेपालवर्षे स्वरशरतुरगैरङ्किते (७५७) फाल्गुनीये
पक्षे प्रान्ते वलक्षेऽमरगुरुदिवसे शंकरर्क्षे दशम्याम्।
चक्रे जाम्बूनदीयैर्गुरुतरकलशैर्भास्वरैरेकविंशै-
र्नेपालक्षोणिपालः प्रथितभुजबलो भूषणं तन्मठस्य ॥
युद्धारम्भः कृतोऽस्मिन्नपि शुभदिवसे शत्रुभिर्युद्धशौण्डै-
र्दुष्टैः कोटोऽवरुद्धः कुटिलनृपभटैरद्भुतैः कोटिसंख्यैः।
लीलामात्रेण शत्रूनपयनयन(?)नदा पार्थिवः पार्थतुल्यः
कोटं निर्मोचयित्वा नमुचिरिपुरिवानन्दसंदोहमाप ॥
राजसूय इवारब्धो मध्यस्थेन महीभुजा।
विशिष्य शेषनागोऽपि न शक्तो यस्य वर्णने ॥
आचार्यो यत्र मर्यादाधैर्यौदार्यदयानिधिः।
विश्वनाथ उपाध्यायो विश्वनाथ इवाभवत् ॥
यो मेरुभूधर इवातिगुरुर्गरिम्णा
योऽसौ महार्णव इवातिमहान्महिम्ना।
यो व्यासवद्विविधवैदिकमन्त्रपाठे
यो निष्ठया भुवि वसिष्ठमहर्षिकल्पः ॥
यात्रायाता मञ्जुयन्तः(?) कियन्तो विद्यावन्तो जञ्जपूका यिवन्तः (?)।
नानादिग्भ्यः पण्डितैरभ्युपेतं सत्रे तस्मिन्मण्डपं मण्डितं यैः ॥

---

१. खिस्ताब्दे तु १३६२ एतन्मिते.

द्वास्थातारौ कल्पितौ तत्र सत्रे द्वौ द्वौ द्वारि द्वारि देवर्षितुल्यौ ।
भूषाभूतो विद्विषां दर्पहन्ता नेता तेषां विश्वनाथो मनीषी ॥

आरब्धे शिबिना नृपेण विधिना सत्रे पुरा गौरवा-
द्वह्नेः खाण्डवखण्डनं समतनोद्गाण्डीवकोदण्डवान् ।
तस्मिन्सिद्धिनृसिंहमल्लनृपतेः सत्रे घृताजीर्णिनः
किं भूयासमितीव मुञ्चति शिखी बाष्पाणि धूमच्छलात् ॥

चत्वारिंशद्दिनान्यासीन्महासोमो महोत्सवः ।
श्रीमान्सिद्धिनृसिंहेन कलिकर्णेन कारितः ॥

संभारः सर्ववस्तूनां राजसूये यथा श्रुतः ।
तथैव तत्र सत्रेऽपि जातस्तदधिकोऽपि वा ॥

रत्ने स्वर्णे गवादौ करितुरगधने भूषणे दिव्यवस्त्रे
दासीदासे निवासे विविधरससये भक्ष्यमात्रे पवित्रे ।
चत्वारिंशद्दिनानि क्षितिपकुलमणेरास्यपद्मे प्रसन्ने
वाणी तत्रोल्ललास प्रतिपदमधिका देहिदेहीति मात्रा ॥

पामरी(?) वलयकुण्डलादिकं दृष्टपूर्वमपि येन न क्वचित् ।
तेन तत्र नृपतेः प्रसादतो भिक्षुणा निजतनौ समर्पितम् ॥

दिव्यान्येव गृहाणि दिव्यवसुधारत्नानि दिव्याम्बरं
दिव्यान्येव विभूषणानि सदयो दिव्यानि रत्नानि च ।
नेपाले प्रचरन्ति यानि वसुधावस्तूनि दिव्यान्यसौ
श्रीमत्सिद्धिनृसिंहमल्लनृपतिः सर्वाणि तान्यार्पयत् ॥

यानि दृष्टानि वस्तूनि न श्रुतानि कदाचन ।
तानि दत्तानि सर्वाणि तत्र सत्रे महीभुजा ॥

येनाकारि जगत्त्रयोपरि मठो होमोऽपि कोट्याहुति-
र्दत्ता स्वर्णशतद्वयी प्रतिदिनं किं किं न दत्तं धनम् ।
दत्तस्तण्डुलपर्वतोऽपि विधिना कल्पद्रुमोऽप्यद्भुतः
श्रीमत्सिद्धिनृसिंहमल्लनृपतिः कर्णावतारो ध्रुवम् ॥

विद्यावन्तः कियन्तो विविधगुणभृतः केऽपि विद्याविहीना
नानादिग्भ्यः समेताः श्रुतनृपतिगुणा भिक्षवो लक्षसंख्याः ।
तेषामन्नैः सुवर्णैः सुललितवसनैर्भूषणाद्यैर्धनौघै-
र्दारिद्र्यं वारयित्वा नृग इव मुमुदे देवकल्पोऽवनीन्द्रः ॥
कर्णः कन्यातनूजो बलिरपि विदितः किंतु दैतेयजन्मा
पाषाणो देवतानां मणिरजनि महादारु देवद्रुमोऽपि ।
भ्रान्तो राजा नृगोऽपि प्रथितभुजबलो भार्गवो मातृहन्ता
कोऽन्यो धन्यो वदान्यो जगति विजयते सिद्धिपूर्वान्नृसिंहात् ॥
नित्यानि गीतानि मनोहराणि वाद्यानि हृद्यानि च कौतुकानि ।
अन्नानि वस्त्राणि विभूषणानि सर्वाणि जातानि च तत्र सत्रे ॥
यावच्चन्द्रदिवाकरावुदयतो यावन्महीमण्डलं
यावत्पर्वतनन्दिनी पशुपतेरुत्सङ्गमालिङ्गति ।
यावज्जह्नुकलिन्दयोरपिसुते तावद्धरीवर्ततां
श्रीमत्सिद्धिनृसिंहमल्लनृपतेरेषा यशोवल्लरी ॥

अथ नेपालभाषा लिख्यते—

संवत् ७५७ फाल्गुणमासे शुक्लपक्षे दशम्यां तिथौ आर्द्रापरपुनर्वसु-नक्षत्रे आयुष्मान्योगे बृहस्पतिवासरे थ्व कुह्नु कोट्याहुतियज्ञ याङन देवतास्थापन याङन नियछपु गजुरिछास्यं देवो दयकाव आयप्रत्याय दुंता । रोव ७ पोवि वूं रोव ह्लेस पविखं ३ खोरागार वूं रोव श्लंपि १४ तवधर वूं करख छि १ थंथछे वाटिका थ्व तेया वरसानन नित्यपूजानि-श्रावहोम याङन वुंसाधन वुगंयातन इन्द्रयातन मतंछोपके स्वह्नन्तो धारे कार्तिकलछिघेर प्लछि धारेण जलदेवाछोयके कृष्णाष्टमीकुह्नु चाकमतं छो-यके थ्वते जुलो भूय रोव गुं ९ यंथाको वूं रोव च्या ८ काकापलि रोव श्लनछि १२ गुस्तलको वूं रोव ह्लेस ७ खोमोर वूं थ्वत वूया वरसानन फाल्गुनशुक्लपूर्णिमासी प्रतिपत्संधि स दोलयात्रा ज्येष्ठशुक्लपूर्णिमा कुह्नु स्नानयात्रा आषाढशुक्लद्वादशी कुह्नु शयनपूजा देवशयन यात्रके श्रावण-

शुक्ल द्वादशी कुहु पवित्रारोहण श्रावणकृष्णाष्टमी कुहु जन्माष्टमीपूजा चाक्रमतं कोयके कार्तिकशुक्लद्वादशी कुहु उत्थानपूजा वागं व्राह्मनेयातं दंशां गुये फं ९० जाकय विय थ्व छपतकजुरो । भूय गोव थ्व १६ थ्वे वूं गोव म्व थ्वां वूं थ्वतेय वरमानन कार्तिकर्शाष्ठ चेकन कुन्पान ६ । थ्वंलि नियपात १२० चाकमतं कोयके मान्मनाय निश्राव दक्षिना यात मगाङाव तंङा गोव ङा ९ न्यंनुवं–

(इन्स्क्रप्शन्स् आफ नेपाल ९३–९६)

(४१)

नेपालपालस्य श्रीजयदेवमहीपतेः प्रशस्तिः ।

त्र्यक्षस्त्रय्यव्ययात्मा त्रिसमयमदशास्त्रिप्रनीतस्त्रिलोकी-
त्राता त्रेतादिहेतुस्त्रिगुणमयतयाभ्यादिभिर्वर्णितोऽलम् ।
त्रिस्रोतोधौतमूर्धा त्रिपुरजिदजितो निर्विवन्धत्रिवर्गो
यस्योत्तुङ्गस्त्रिशूलस्त्रिदशपतिनुतः (पापिनां) तापनोऽभूत् ॥

राजद्रावणमूर्धपङ्क्तिशिखरव्यामक्तचूडामणि-
श्रेणीसंगतिनिश्चलात्मकतया लङ्कां पुनानाः पुरीम् ।
..................द्व.....................................संगताः
श्रीबाणासुरशेखराः पशुपतेः पादाणवः पान्तु वः ॥

सूर्याद्ब्रह्मप्रपौत्रान्मनुरथ भगवाञ्जन्म लेभे ततोऽभू-
दिक्ष्वाकुश्चक्रवर्ती नृपतिरपि ततः श्रीविकुक्षिर्वभूव ।
जात.............................विदितो भूमिपः सार्वभौमो
भूतोऽस्माद्विश्वगश्वः प्रचलनिजवलव्याप्तविश्रान्तरालः ॥

राजाष्टोत्तरविंशतिक्षितिभुजस्तस्माद्व्यतीत्य क्रमा-
त्संभूतः सगरः पतिः........................रायाः क्षितेः ।
जातोऽस्मादसमञ्जसो नरपतिस्तस्मादभूदंशुमा-
न्स श्रीमन्तमजीजनन्नरवरो भूपं दिलीपाह्वयम् ॥

भेजे जन्म ततो भगीरथ इति ख्यातो नृपोत्रान्तरे
भूपाला........................ रघोरप्यजः ।
श्रीमत्तुङ्गरथस्ततो दशरथः पुत्रैश्च पौत्रैः समं
राज्ञोऽष्टावपरान्विहाय परतः श्रीमानभूल्लिच्छविः ॥
अस्त्येव क्षितिमण्डलैकतिलको लोकप्रतीतो महा-
ना.................... प्रभावमहतां मान्यः सुराणामपि ।
स्वच्छो लिच्छवि नाम बिभ्रदपरो वंशः प्रवृत्तोदयः
श्रीमच्चन्द्रकलाकलापधवलो गङ्गाप्रवाहोपमः ॥
तस्माल्लिच्छवितः परेण नृपतीन्हित्वा प........रं
श्रीमान्पुष्पपुरे कृतिः क्षितिपतिर्जातः सुपुष्पस्ततः ।
साकं भूपतिभिस्त्रिभिः क्षितिभृतां त्यक्त्वान्तरे विंशतिं
ख्यातः श्रीजयदेवनामनृपतिः प्रादुर्बभूवापरः ॥
एकादशक्षिति........................
त्यक्त्वान्तरे विजयिनो जयदेवनाम्नः ।
श्रीमान्बभूव वृषदेव इति प्रतीतो
राज्ञोत्तमः सुगतशासनपक्षपाती ॥
अभूत्ततः शंकरदेवनामा श्रीधर्मदेवोऽप्युदपादि तस्मात् ।
श्रीमानदेवो नृपतिस्ततोऽभूत्ततो महीदेव इति प्रसिद्धः ॥
वसन्त इव लोकस्य कान्तः शान्तारिविग्रहः ।
आसीद्वसन्तदेवोऽस्माद्दान्तसामन्तवन्दितः ॥
अस्यान्तरेऽप्युदयदेव इति क्षितीशा-
ज्ज्ञातास्त्रयोदश ततश्च नरेन्द्रदेवः ।
मानोन्नतो नतसमस्तनरेन्द्रमौलि-
मालारजोनिकरपांशुलपादपीठः ॥
दाता सद्द्रविणस्य भूरिविभवो जेता द्विषत्संहतेः
कर्ता बान्धवतोषणस्य यमवत्पाता प्रजानामलम् ।

हर्ता संश्रितसाधुवर्गविपदां सत्यस्य वक्ता ततो
जातः श्रीशिवदेव इत्यभिमतो लोकस्य भर्ता भुवः ॥
देवी बाहुबलाढ्यमौखरिकुलश्रीवर्मचूडामणि-
ख्यातिह्रेपितवैरिभूपतिगणश्रीभोगवर्मोद्भवा ।
दौहित्री मगधाधिपस्य महतः श्र्यादित्यसेनस्य या
व्यूढा श्रीरिव तेन सा क्षितिभुजा श्रीवत्सदेव्यादरात् ॥
तस्माद्भूमिभुजोऽप्यनायत जितारातेरजय्यः परं
राजश्रीजयदेव इत्यवगतः श्रीवत्सदेव्यात्मजः ।
त्यागी मानधनो विशालनयनः सौजन्यरत्नाकरो
विद्वा ...... चिराश्रयो गुणवतां पीनोरुवक्षःस्थलः ॥
माद्यद्दन्तिसमूहदन्तमुसलक्षुण्णारिभूभृच्छिरो-
गौडोड्रादिकलिङ्गकोसलपतिश्रीहर्षदेवात्मजा ।
देवी राज्यमती कुलोचितगुणैर्युक्ता प्रभूता कुलै-
र्येनोढा भगदत्तराजकुलजा लक्ष्मीरिव क्ष्माभुजा ॥
अङ्गश्रिया परिगतो जितकामरूपः
काञ्चीगुणाढ्यवनिताभिरुपास्यमानः ।
कुर्वन्सुराष्ट्रपरिपालनकार्यचिन्तां
यः सार्वभौमचरितं प्रकटीकरोति ॥
राज्यं प्राज्यसुखोर्जितद्विजजनप्रत्यर्पिताज्याहुति-
ज्योतिर्जातशिखाविजृम्भणजिताशेषप्रजापद्रुजम् ।
बिभ्रत्कण्टकवर्जितं निजभुजावष्टम्भविस्फूर्जितं
शूरत्वात्परचक्रकाम इति यो नाम्ना परेणान्वितः ॥
स श्रीमाञ्जयदेवाख्यो विशुद्धबृहदन्वयः ।
लब्धप्रतापः संप्राप्तबहुपुण्यसमुच्चयः ॥
मूर्तीरष्टाभिरष्टौ महयितुमतुलैः स्वैर्दलैरष्टमूर्तेः
पातालादुत्थितं किं कमलमभिनवं पद्मनाभस्य नाभेः ।

देवस्याभ्यासनायोपगतमिह चतुर्वक्त्रसादृश्यमोहा-
द्विस्तीर्णं विष्टरं किं प्रविकसितसिताम्भोजमम्भोजयोनेः ॥
कीर्णा किं भूतिरेषा सपदि पशुपतेर्नृत्यतोऽत्र प्रकामं
मौलीन्दोः किं मयूखाः शरदमभिनवां प्राप्य शोभामुपेताः ।
भक्त्या कैलासशैलाद्धिमनिचयरुचः सानवः किं समेता
दुग्धाब्धेरागतः किं गलगरसहजप्रीतिपीयूषराशिः ॥

राज्ञः ॥

देवं वन्दितुमुद्यतो द्युतिमतो विद्योतमानद्युतिः
किं ज्योत्स्नाधवला फणावलिरियं शेषस्य संदृश्यते ।
अन्तर्दूररसातलाश्रितगतेर्देवं प्रभावश्रिया
किं क्षीरस्नपनं विधातुमुदिताः क्षीरार्णवस्योर्मयः ॥
विष्णोः पातालमूलं फणिपतिशयनाक्रान्तिलीलासुखस्था-
दाज्ञां प्राप्योत्पतन्त्यास्त्रिपुरविजयिनो भक्तितोऽभ्यर्चनाय ।
लक्ष्म्याः संलक्ष्यते प्राक्करनलकलितोत्फुल्ललीलासरोजं
किं वेतीत्थं वितर्कास्पदमतिरुचिरं मुग्धसिद्धाङ्गनानाम् ॥
नालीनालीकमेतन्न खलु समुदितं राजतो राजतोऽहं
पद्मा पद्मासनाब्जे कथमनुहरतो मानवा मा नवाभे ।
पृथ्व्यां पृथ्व्यां न मादृग्भवति हृतजगन्मानसे मानसे वा
भास्वान्भास्वान्विशेषं जनयति नहि मे वासरो वा सरो वा ॥
इनीव चामीकरकेसरालीसिन्दूररक्तद्युतिदन्तपङ्क्त्या ।
राजीवराजीं प्रति जीवलोके सौन्दर्यदर्पादिव सप्रहासम् ॥
एषाभाति कुलाचलैः परिवृता प्रालेयसंसर्गिभि-
र्वेदी मेरुशिलेव काञ्चनमयी देवस्य विश्रामभूः ।
शुभ्रैः प्रान्तविकासिपङ्कजदलैरित्याकलय्य स्वयं
रौप्यं पद्ममचीकरत्पशुपतेः पूजार्थमत्युज्ज्वलम् ॥

राज्ञः ॥

यं स्तौति प्रकटप्रभावमहिमा ब्रह्मा चतुर्भिर्मुखै-
र्यं च श्लाघयति प्रणम्य चरणे षड्भिर्मुखैः षण्मुखः ।
यं तुष्टाव दशाननोऽपि दशभिर्वक्त्रैः स्फुरत्कंधरः
सेवां यस्य करोति वासुकिरलं जिह्वासहस्रैः स्तुवन् ॥

ख्यात्या यः परमेश्वरोऽपि वहते वामो दिशां मण्डलं
व्यापी सूक्ष्मतरश्च शंकरतया ख्यातोऽपि संहारकः ।
एकोऽप्यष्टतनुः सुरासुरगुरुर्वानत्रपो नृत्यति
स्थाणुः पूज्यतमो विराजति गुणैरेवं विरुद्धैरपि ॥

राज्ञः ॥

तस्येदं प्रमथाधिपस्य विपुलं ब्रह्माब्जतुल्यं शुभं
राजद्राजतपङ्कजं प्रविततं प्रान्तप्रकीर्णैर्दलैः ।
पूजार्थं प्रविधाप्य तत्पशुपतेर्यत्नापि पुण्यं मया
भक्त्या तत्प्रतिपाद्य मातरि पुनः संप्राप्नुयां निर्वृतिम् ॥

किं शंभोरुपरि स्थितं ससलिलं मन्दाकिनीपङ्कजं
स्वर्गोद्भिन्ननवाम्बुजेक्षणधिया संप्राप्तमम्भोरुहम् ।
देवानां किमियं शुभा सुकृतिनां रम्या विमानावली
पद्मं किं करुणाकरस्य करतो लोकेश्वरस्यागतम् ॥

राज्ञः ॥

स्रोतः स्वर्गापगायाः किमिदमवतरल्लोलकल्लोलरम्यं
किं ब्रह्मोत्पत्तिपद्मं तलकमलवरप्रेक्षणायोपयातम् ।
संप्राप्तं चन्द्रमौलेरमलनिजशिरश्चन्द्रबिम्बं किमत्रे-
त्येवं यद्वीक्ष्य शङ्कां वहति भुवि जनो विस्मयोत्फुल्लनेत्रः ॥

श्रीवत्सदेव्या नृपतेर्जनन्या समं समन्तात्परिवारपद्मैः ।
रौप्यं हरस्योपरि पुण्डरीकं तदादरैः कारितमत्युदारम् ॥

---

१. भगवतो बुद्धस्य.

पुण्यं पुत्रेण दत्तं शशिकरविमलं कारयित्वाब्जमुख्यं
प्रासं शुभ्रं शुभं च स्वयमपि रजतैः पद्मपूजां विधाय।
सर्वं श्रीवत्सदेवी निजकुलधवलां चित्तवृत्तिं दधाना
प्रादात्कल्याणहेतोश्चिरमवनिभुजे स्वामिने स्वर्गताय॥
कः कुर्यात्कुलजः पुमान्निजगुणश्लाघामनिर्ह्रीच्छया
राज्ञा सत्कविनापि नो विरचितं काव्यं स्ववंशाश्रयम्।
श्लोकान्पञ्च विहाय साधुरचितान्प्राज्ञेन राज्ञा स्वयं
स्नेहाद्बुद्धभुजि बुद्धकीर्तिरकरोत्पूर्वामपूर्वामिमाम्॥
योगक्षेमविधानबन्धुरभुजः संवर्धयन्बान्धवा-
न्स्निह्यत्पुत्रकलत्रभृत्यसहिते लब्धप्रतापो नृपः।
दीर्घायुर्नितरां निरामयवपुर्नित्यप्रमोदान्वितः
पृथ्वीं पालयतु प्रकामविभवस्फीतानुरक्तप्रजाम्॥
संवत्[1] १५३ कार्तिकशुक्लनवम्याम्।

(इन्स्क्रिप्शन्स् फ्रॉम् नेपाल १६–१८).

(४२)

प्रतापमल्लनृपतिप्रासादप्रशस्तिः।

आसीच्छ्रीसूर्यवंशे रघुनृपकुलजो रामचन्द्रो नृपेश-
स्तद्वंशे **नान्यदेवो**ऽवनिपतिरभवत्तत्सुतो **गङ्गदेवः**।
तत्पुत्रोऽभून्नृ**सिंहो** नरपतिरतुलस्तत्सुतो **रामसिंह**-
स्तज्जः श्री**शक्तिसिंहो** धरणिपतिरतो भूप**भूपालसिंहः**॥
तस्मात्कर्णाटचूडामणिरिव **हरयुतिसहदेवो**ऽस्य वंशे
भूपः श्री**यक्षमल्लो** नरपतिरतुलो **रत्नमल्लो**ऽप्यमुष्मात्।
तस्माच्छ्री**सूर्यमल्लो** ह्यवनिपतिरभूत्तत्तनूजोऽ**मराख्यो**
मल्लोऽभूत्तस्य पुत्रो रिपुगणविजयी श्री**महेन्द्राख्यमल्लः**॥

---

१. ७५९ ख्रिस्ताब्दे.

तस्माच्छिवसिंहोऽभूद्धरिहरसिंहः सुतस्तस्मात् ।
तस्माल्लक्ष्मिनृसिंहो नरसिंहपराक्रमः [सूनुः] ॥

तस्माच्छ्रीमत्प्रतापो नरपतिरभवद्भूपभालावलीषु
न्यस्यत्पादारविन्दद्वयरसविलसद्रेणुभिर्भूषणानि ।
योऽकार्षीत्कूतिखासाकिरमिति स्ववशे भोट्टभूपस्य देशा-
ज्जग्राहैवावदीनं प्रतिदिनमपरे यं भजन्ते नरेशाः ॥

भक्तग्रामनरेशमल्लनृपतिर्दृष्ट्वैभमेनं भिया
भेजेऽसौ वसुधां जहार सुदृढं संधार्य दुर्गं पुनः ।
श्रीमड्डुम्बरशाहभूपतिबलं विध्वस्य हत्वा बलं
श्रीमत्सिद्धनृसिंहमल्लनृपतेर्जग्राह दुर्गावलीम् ॥

आस्ते क्वाप्यमरावतीव विलसद्दन्तीन्द्रदिव्याङ्गना-
युक्ता स्वर्णमयी विहारनगरी सा राजधानी परा ।
श्रीमच्छ्रीकमलाधिका मधुपतेरिन्द्रेण तुल्यस्य च
प्रत्यर्थिव्रजनिर्जितस्य नवपुन्नारायणस्यापि च ॥

लक्ष्मीनारायणस्तस्माद्वीरनारायणस्ततः ।
पुत्री रूपमती तस्य प्राणनारायणः सुतः ॥

सेयं रूपमती सती गुणवती स्वर्णद्युतिः सन्मति-
र्माद्यत्कुञ्जरगामिनी प्रणयिनी साक्षात्परा रुक्मिणी ।
आसीत्सर्वगुणा पितुर्नरपतेः श्रीमत्प्रतापस्य सा
पत्नी प्राणसमा यथा जलनिधेः पुत्री जगत्पायिनः ॥

कर्णाटीरङ्गवाटी कुचकनकवटी कामलीलैकवाटी
स्वर्णालंकारकोटी हरिमदृशकटी चारुदेहानुपाटी ।
नाम्ना राजमती महारसवती भूपप्रतापस्य सा
भूता भोगवधूटिका किल हरेर्भामेव जीवाधिका ॥

स्वर्गार्थं कृतवान्प्रतापनृपतिः सद्योषितोरेतयोः
प्रासादं वसुपत्रपद्मसदृशं शृङ्गाष्टकैः शोभितम् ।

नानाचित्रविराजितं सममिदं सद्वैजयन्तेन वै
होमाद्यैरकरोच्छ्रुतिस्मृतिमतैरस्य प्रतिष्ठाविधिम् ॥
संवत् ७६९ फाल्गुनशुक्लषष्ठ्यां अनुराधानक्षत्रे हर्षणयोगे बृहस्पतिवासरे ।

(इन्स्क्रिप्शन्स् फ्रॉम् नेपाल २७–२८).

(४३)

नेपालक्षितिपालवंशावलिः ।

श्री ३ भवानीशंकराभ्यां नमः ।

नत्वा गिरीन्द्रतनयां प्रलयानलाभां
भालोल्लसल्ललितचन्द्रकलाभिरामाम् ।
मल्लप्रतापनृपतिः स्वकुलप्रकाशां
वंशावलीं सुतनुते विमलां कवीन्द्रः ॥

श्रीविष्णोर्नयनाम्बुजात्त्रिजगतीपापान्तकर्ता रविः
प्रोद्भूतस्तिमिरौघवारणघटाविद्रावणः केसरी ।
कालाकाशदिशां प्रकाशनिपुणः कंदर्पदर्पापहः
सानन्दं सरसीरुहेषु तनुते मैत्रीं विचित्राकृतिः ॥

गाम्भीर्यादिगुणेन सागरसमो धैर्येण विन्ध्याचलः
सौन्दर्यप्रकरेण दैत्यदलनो रूपेण कामोपमः ।
जातो भूमितले ततोऽतिविमले वैवस्वताख्यो मनु-
र्मर्यादा रचिता सतां समुचिता कीर्तिप्रदा येन वै ॥

तद्वंशे विमले बभूव धरणीचन्द्रो दिलीपो हि यो
देवेन प्रमथाधिपेन तुलनां प्राप प्रचण्डे रणे ।
यस्य प्रौढतरप्रतापदहने नित्यं द्विषः शेरते
दृष्ट्वा तस्य कलेवरं सुविमलं कामेन दग्धं वपुः ॥

जातः सन्नृपसत्तमो रघुरिति ख्यातस्ततो वीर्यवा-
न्बाणाग्रैः परिमथ्य शक्रहृदयं कीर्तिः स्थिरा स्थापिता ।

यस्य प्रौढतरप्रतापतपनत्रासेन सद्यः कृता
वृष्टिस्तेन धनेश्वरेण ललिता कार्तस्वरी भूतले ॥
जातो भूपवरस्ततः कलिहरः श्रीमानजो वीर्यवा-
न्दुष्टानां किल दर्पहारणविधौ प्रोद्भूतकण्ठीरवः ।
शिष्टानां प्रतिपालकः प्रतिपलं दानैः ······· म्मनः
पश्चादिन्दुमतीवियोगजनितक्लेशाब्धिमध्येऽपतन् ॥
जातो देवतनुस्ततो दशरथः कंदर्पदर्पापहः
सेनापत्यमुपेत्य पङ्क्तपतिनः शत्रुः(क्रः) कृतो निर्भरः(यः) ।
क्रूरः कोपरतः प्रमारितभयो भेत्तुं गतः कृत्तिकां
पापे संसक्तचित्तः शनिरपि सहसा स्तम्भितो येन मार्गे ॥
जातस्तत्तनयो महानययुतो रामोऽभिरामाकृति-
र्दानेन प्रचुरेण वर्धितगुणः ख्यातस्त्रिलोकीतले ।
बद्ध्वा यो जलधिं निशाचरभटान्निर्जित्य लङ्कापुरीं
गत्वा रावणराक्षसं कलिकरं हत्वा वशे लब्धवान् ॥
तत्पुत्रः सूर्यतुल्यो लव इति विदितो प्रोल्लसद्दानपुण्यै-
र्जातो भूचक्रशक्रः प्रथितगुणचयः संमतः सज्जनानाम् ।
शत्रूणां शासकोऽसौ प्रबलरणधराधारणादत्तभारो
धर्मात्मा देवतुल्यो दशरथतनया निर्जिता येन संख्ये ॥
जातः श्रीहरिसिंहदेवनृपतिः प्रौढप्रतापोदय-
स्तद्वंशे विपुले महारिपुहरे गाम्भीर्यरत्नाकरः ।
कर्ता यः सरसामुपेत्य मिथिलां संलक्ष्य लक्षप्रियो
नेपाले पुनराढ्यवैभवयुते स्थैर्यं विधत्ते चिरम् ॥
माणिक्यप्रतिमप्रतापपटलैरादीप्तलोकत्रयो
मुक्तापङ्क्तिसहस्रशोभनयशोवृन्देन संशोभितः ।
पक्षत्याकृतिकर्णवारणगिरिग्रामावनव्याकुलः
पारावारमिवेह यः परिहसत्याधाय चित्तेऽच्युतम् ॥

तत्पुत्रो **यक्षमल्लः** प्रबलरिपुहरः कर्णतुल्योऽवनीशः
　सर्वासां नागरीणां नयनसुखकरः सर्वदः सज्जनानाम् ।
प्रोद्यद्दोर्दण्डचण्डाहतनिशितमहाखड्गपातैर्विपक्षा-
　न्क्षिप्त्वा सद्यः क्षितीशान्क्षितितलविषये प्रोल्लसत्कीर्तिचन्द्रः ॥
तस्माच्छ्री**रत्नमल्लः** समजनि विबुधाराधने दत्तबुद्धि-
　र्दन्तीनां दानकर्ता प्रबलरिपुकुलोत्सादने पार्थतुल्यः ।
यद्दानाम्बुप्रवाहप्रकरविलसितां वाहिनीं वीक्ष्य नूनं
　गङ्गासङ्गात्प्रवृद्धं प्रचलजलनिधिः प्रेमगर्वं मुमोच ॥
यो नु प्रौढतरान्निहत्य धरणीपालान्महासंगरे
　गत्वा कान्तिपुरं चकार विमलं राज्यं तु स्वर्गोपमम् ।
श्रीमद्भिर्हरपूर्विका हरवधूराराधनैस्तद्वशे
　जाता भावहता मुदा सुविदिता चाद्यापि या तिष्ठति ॥
प्रोद्यत्प्रौढप्रतापप्रचुरपरिलसत्कुङ्कुमक्षोदपूर्णः
　कीर्णः पाटीरपङ्कैः सितकरकिरणाकारकीर्तिप्रतार:(नः) ।
मित्राणामत्र शैत्यं किमपि विरचयन्पूर्वपूर्वागतानां
　तत्पुत्रः **सूर्यमल्लो** नरपतितिलकः प्रादुरासीत्प्रवीरः ॥
तस्मान्**मल्लनरेन्द्र**नामधरणीपालो बभूव प्रभुः
　प्रोद्भूतप्रबलप्रतापदहनज्वालावृताहस्करः ।
यस्यारातिनितम्बिनी सुचकिता शुष्यन्मुखाम्भोरुहा
　स्थित्वा पर्वतगह्वरेऽतिविषमे दैन्यं सदाभ्यस्यति ॥
पुण्यौघैर्जपयज्ञदानविपुलैर्गौरीपदार्चाफलैः
　संजातस्तु **महीन्द्रमल्ल**वसुधारत्नं ततस्तत्सुतः ।
येनेमां किल काश्यपीं वसुमतीं रत्नेन पूर्णां वरां
　दत्त्वा भूमिसुराय स्वर्गभवने कीर्तिः स्थिरा स्थापिता ॥
श्रीग्रामे भक्तपूर्वं विनिहितसहसावासरूपप्रतिष्ठां
　भावैर्निर्जित्य देवीं कलिकलुषहरीं दैत्यदर्पापहन्त्रीम् ।

आनीय स्वर्गतुल्ये रचितगृहवरे स्थापिता येन पूर्वे
नित्यं तत्पूजनेन त्रिभुवनललितां सिद्धिमुग्रामवाप ॥
तस्माच्छ्रीशिवसिंहनाम नृपतिर्जातो धरामण्डले
नेपालक्षितिपालभालतिलकः कंदर्पदर्पापहः ।
संसारार्णवतारणाय सततं नित्यं भवानीपद-
ध्याने दत्तमनाः समस्तविदुषां मध्ये प्रसिद्धक्रियः ॥
वैरिस्त्रीनयनाञ्जननिर्गतजलैर्धाराम्बुभिर्येन वै
शस्ताः सान्द्रकबन्धरन्ध्ररुधिरैर्नद्यः समासादिताः ।
तासां संगमसंभवं सुविमलं तीर्थं प्रयागाह्वयं
यत्र स्नानकृता प्रलब्धमनिशं शत्रुक्षयं सत्फलम् ॥
तस्माद्धरिहरसिंहो नरपतिसिंहो बभूव भूपालः ।
गच्छति जलनिधिपारं कीर्तिरेकाकिनी यस्य ॥
धत्ते गैरिकरागविभ्रमभयं यस्य प्रतापोत्करो
यत्कीर्तिर्गुणपर्वतोपरिसरी कौतूहलं यच्छति ।
एतेनैव तु हेतुनास्य तु गुणान्विज्ञाय शैलोत्तमा-
न्दूरस्थाः प्रपलाय्य संनिधिममी कुर्वन्ति यद्वैरिणः ॥
श्रीलक्ष्मीनरसिंहनामनृपतिस्तस्मादभूत्सन्मति-
र्वाणाग्रैः परिपन्थिमन्थनकरः कारुण्यपुण्याकरः ।
यं दृष्ट्वा खलु वैरिवर्गवनिता कम्पाकुला सर्वदा
प्राणेशस्य सुजीवितं मम विभो देहीति संयाचते ॥
अष्टाशास्वपि यत्प्रतापतपनस्यालोक्य नित्योदयं
दीप्तात्मापि दिवानिशं भृशमहो विश्वान्धकारापहम् ।
आत्मानं सहसा समीक्ष्य मनसा हीनं हठाद्गर्हय-
न्सायं सायमयं स्वयं दिनमणिर्दीनोऽम्बुधौ मज्जति ॥
श्रीलक्ष्मीनरसिंहभूपतिदिवप्रस्थानकालोद्यते
देवैः शङ्खमृदङ्गभेरिपटहध्वानैर्दिशः पूरिताः ।

प्रौढाः शूरतराः प्रदारितरिपोर्ब्रह्माण्डचण्डोल्लस-
न्मार्गेणैव विनिर्गताः सुयमिताः प्राणास्त्रयोऽस्यामलाः ॥
तत्पुत्रोऽसौ कवीन्द्रः क्षितिपतितिलकः **श्रीप्रतापाभिधानः**
सङ्ग्रामे वैरिवर्गप्रबलतरलसद्दर्पदावानलाभः ।
तर्कालंकारकोशादिकमकलमहाशास्त्रमार्गप्रवीणो
नानागद्यानवद्यागुल्ललितकवितानर्तकीरङ्गभूमिः ॥
मेदिन्यामुदधौ सरःसु सरितां मध्ये गिरौ कानने
यस्य प्रौढतरप्रतापतपनस्यालोक्य दीप्तिं पराम् ।
अत्युत्कर्षमवेक्ष्य संप्रति समासाद्यापकर्षं चिरा-
दौर्वैः स्वर्वैयशाः प्रशाम्यति हठान्मग्नः समुद्राम्भसि ॥
दृष्ट्वा तस्य प्रतापं तपनमनुपमं हन्त हृष्टो विवस्वा-
न्मेने ब्रह्माण्डभाण्डभ्रमणविधिकृतं श्रान्तमेव श्रमौघम् ।
व्यस्ताहोरात्रभेदं त्रिभुवनभवनं व्याप्तमेनं विदित्वा
किं चायं चक्रवाकः शिथिलयति शुचं सर्वतः सर्वबीजम् ॥
शस्त्रे शास्त्रवरे सदा सुखकरे संगीतविद्यावरे
सानन्दं किल केलिकर्मकुशलव्यापारकण्ठीरवः ।
स्वर्गे भूमितले तथा दशदिशां प्रान्ते गिरौ कानने
कोऽप्यस्तीति निगद्यते मम समो राजेन्द्रचूडामणिः ॥
नेपाले संवतेऽस्मिन्हयगिरिमुनिभिः (७८७) संयुते माघमासे
सप्तम्यां शुक्लपक्षे रविदिनसहिते रेवतीऋक्षराजे ।
योगे श्रीसिद्धिसंज्ञे रजतमणिलसत्स्वर्णमुक्ताप्रवालै-
रेकीकृत्य प्रदत्तं हयशतसहितं येन दानं तुलाख्यम् ॥

इति श्रीमहाराजाधिराजश्रीश्रीराजराजेन्द्रकवीन्द्रजयप्रतापमल्लदेवविरचिता
निजवंशावली समाप्ता ।

माधुर्यादिविचित्रताखिलपदन्यासैर्मनोहारिणी
संक्षिप्तेन कवीन्द्रभूमिपतिना वंशावली निर्मिता ।

प्रत्येकं किल कीर्तिशौर्यनिखिलप्रौढप्रतापादिकं
भूपानां रचितुं विमृश्य निपुणं शक्तो न वा वाक्पतिः ॥
(इन्स्क्रिप्शन्स् फ्रॉम् नेपाल २६–३१)

(४८)

॥ श्रीगणाधिपतये नमः ॥

कारणं जगतां वन्दे कण्ठादुपरि वारणम् ।
मातामहमहाशैलं महस्तदपितामहम् ॥
क्षेमं वः प्रचुरीकुर्यात्क्षोणीमभ्युद्वहन्हरिः ।
क्रोडाकृतेरभूद्यस्य क्रीडापल्वलमम्बुधिः ॥
अस्ति क्षीरार्णवोद्भूतमपांपुष्पमनुत्तमम् ।
अम्लानं यदनिर्माल्यमाधत्त शिरसीश्वरः ॥
सदामोदनिधेस्तस्य संताने यदुसंज्ञिते ।
अभूदाश्चर्यमाधुर्यं वसुधायास्तपःफलम् ॥
संगमो नाम राजाभूत्सारभूते तदन्वये ।
रेजे यस्य यशःसिन्धोः सरणीव सुरापगा ॥
सर्वरत्ननिधेस्तस्य सम्राडासीत्तनूभुवाम् ।
मध्ये **बुक्कमहीपालो** मणीनामिव कौस्तुभः ॥
तस्य गौराम्बिकाजानेस्तनयोऽभूद्गुणोन्नतः ।
हारगौरयशःपूरहारी **हरिहरेश्वरः** ॥
यत्षोडशमहादानयशसां दिग्विहारिणाम् ।
भूयसामभवन्नालं भुवनानि चतुर्दश ॥
प्रतापदेवरायोऽस्य पुत्रोऽभूद्भुवि विश्रुतः ।
प्रमोद इव मूर्तोऽयं प्रजानां स्वैर्गुणैरभूत् ॥
प्रत्यर्थिममिभो हत्वा प्रतापाग्नौ रणाङ्क(ङ्ग)णे ।
विहितो येन वीरेण विजयश्रीकरग्रहः ॥

---

१. वेदभाष्यादिनानाग्रन्थप्रणेता सुप्रसिद्धो माधवाचार्योऽस्यैव मन्त्रिप्रवर आसीत्.

तस्य हेमाम्बिकाजानेस्तनयो विनयोन्नतः ।
विद्यानिधिर्विशेषज्ञो वीरो **विजयभूपतिः** ॥
असौ विजयभूपालः पित्रा दत्तं स्वतेजसा ।
समस्तं द्राविडं देशमासिन्ध्याः पर्यपालयत् ॥

बुक्कक्षितीशसदने हरितान्ववायः
श्रीसिंहसूरिरभवत्प्रथमानकीर्तिः ।
यद्वारपञ्जरशुकाः किल सर्वशास्त्र-
सिद्धान्तभञ्जनसमर्थनकेलिलोलाः ॥

तत्पुत्रस्तार्किकाचार्यः पदवाक्यप्रमाणवित् ।
सर्वं हरिहरक्षोणीभुजां धर्ममब्रवीत्यत्(यद्धर्ममब्रवीत्?) ॥
तत्पुत्रो हम्पणाचार्यः सर्वविद्याविशारदः ।
निजेन चरितेनासीद्वसिष्ठ इव पूजितः ॥
राज्ञा हरिहरेणापि देवरायेण भूभुजा ।
अचीकरदसौ विद्वान्महादानानि षोडश ॥
सोऽयं विजयभूपालो हम्पणार्याय धीमते ।
स्वदेशे चेट्टुपेडाख्यं ग्रामं मान्यं प्रदत्तवान् ॥

स्वस्ति श्रीविजयाभ्युदयशकवर्ष १३३८ वर्तमानदुर्मुखिसंवत्सरद भाद्र-पदबौळ सप्तमियलु श्रीमन्महामण्डलेश्वरश्रीवीरप्रतापविजयराय वोडयरु हरितगोत्रद आपस्तम्बसूत्रद सकलविद्याविशारद तार्किकहम्पणैयगळिगे कोट्टग्रामशासनद क्रमवेंतेंदरे पडवीडुराज्यदलु सप्तनाथनु माडुव आगर-दहोवळि यनु वृत्तिपट्टिनळि शेरिवहकोनैकोट्टपट्टिन चेट्टुपडेंबग्रामक्के स-लुव तगरइरुंपेडंतांगलु सह कुलवरहगद्याण इप्पत्तुमूरुहोन्नु मूरुहणं वट्ट-दिन्द होन्नुहणंवड्डुहुरुळिय तुंटदिदंद मूरुहणवड्डुंवेळे अन्तुं रोकवराह इप्पत्तुनालुहोन्नु एंट्टुहणुंवेळे यकालुपळिसह चेट्टुपेडुग्रामवन्नु तेजोनिधि-यलु महामायाप्रीतियागि सर्वमान्यदानधारापूर्वकवागि कोट्टट्टु ईग्रामक्के सलुव सुंकद भत्य मार्गयडतोरे चेक्ककडमे वाणियरु सेट्टियरु सेणियरु

कैकोळरतेरिगिबोळगाद सकलसुवर्णादाय सकलभक्तादायसहितवागि सर्वमान्यवागि आचन्द्रार्कस्थायियागि अनुभविसुदु ईग्रामद चतुस्सीमेय-विवर ईसानामोदलागि एरेकोंडकेणिअकलुशासन अल्लिंद नडुसीमेय-कल्लुपोरांडयसालु अल्लिंद आग्नेयणल्ले वाहकोल्लगे तेंकलु एल्लकुलि अल्लिंद तेंकलु कलरवयलु अल्लिंद तेंकलु एरेयकोल्लियमूडणसीमे अल्लिंद तेंकलु कारणेयकेरेये गणपोक्करेमड्डइदरिंद तेंकलु पुल्लिकुल अल्लिंद तेंकलु समयनारायणंकुलक्केवडगनकल्लु अल्लिंद वायव्य गुडदनडुवणतेवरसमरिसु अल्लिंद वायव्य मदरहोइदकल्लु अल्लिंदवडगलु एल्लिकुलि अल्लिंदनाक्निमांगलपडुवनकोडियहुत्त अल्लिंद येत्तणङ्कियमूडणवरपु अल्लिंद वडगलु गुरुकुलियपल्लगुलियशासन अल्लिंद मूडलु मुकदकल्लु अल्लिंद ईसानकल्लनालु अल्लिंदपालकोल्लियमूडणमरिसु अल्लिंद करुवल्ल वेल्ले अल्लिंद एल्लेकल्लगलु अल्लिंद एरेकोन केणि ईचतुस्सीमेबोळगादनिधिनिक्षेपजलपाषाणसिद्धसाध्य अक्षिणि आगामि गोभूहिरण्याद्यष्टभोगवेंब स्वाम्यसहितवागि सर्वमान्यदानधारापूर्वकवागि कोट्टदु आचन्द्रार्कस्थायियागि अनुभविसुवदु।

एकैव भगिनी लोके सर्वेषामेव भूभुजाम्।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम्।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम्॥
स्वदत्ताद्द्विगुणं पुण्यं परदत्तानुपालनम्।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः॥

सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयोभूयो याचते रामचन्द्रः॥

(कण्ट्रिब्यूशन्स् टु धि हिस्टरी ऑफ् सदर्न् इण्डिआ ४५-४८)

(४९)

कुमारपालकारितवडनगरप्राकारप्रशस्तिः।

ओं ॥ ओं नमः शिवाय ॥

ब्रह्माद्वैतधिया मुमुक्षुभिरभिध्यातस्य बद्धाक्षरै-
रिच्छाशक्तिमभीष्टवीमि जगतां पत्युः श्रुतीनां निधेः।
या व्यापारितसंहृतैः स्वसमये ब्रह्माण्डपिण्डैर्नवैः
क्रीडन्ती मणिकन्दुकैरिव सदा स्वच्छन्दमाह्लादते ॥
गीर्वाणैर्वीतगर्वं दनुजपरिभवात्प्रार्थितस्त्रायकार्थं
वेधाः संध्यां नमस्यन्नपि निजचुलके पुण्यगङ्गाम्बुपूर्णे।
सद्यो वीरं चुलुक्याह्वयमसृजदिमं येन कीर्तिप्रवाहैः
पूतं त्रैलोक्यमेतन्नियतमनुहरत्येव हेनोः फलं श्रीः ॥
वंशः कोऽपि ततो बभूव विविधाश्चर्यैकलीलास्पदं
यस्माद्भूमिभृतोऽपि वीतगणिताः(णनाः) प्रादुर्भवन्त्यन्वहम्।
छायां यः प्रथितप्रतापमहतीं दध्रे विपन्नोऽपि स-
न्यो जन्यावधि सर्वदापि जगतो विश्वस्य दत्ते फलम् ॥
वंशस्यास्य यशःप्रकाशनविधौ निर्मूल्यमुक्तामणिः
क्षोणीपालकिरीटकल्पितपदः **श्रीमूलराजो**ऽभवत्।
यो मूलं कलिदावदग्धनिखिलन्यायद्रुमोत्पादने
यो राजेव करैः प्रकामशिशिरैः प्रीतिं निनाय प्रजाः ॥
यश्चापोत्कटराजराज्यकमलां स्वच्छन्दवन्दीकृतां
विद्वद्बान्धवविप्रबन्दिभृतकव्यूहोपभोग्यां व्यधात्।
यत्खड्गाश्रयिणीं तदा श्रियमलं युद्धस्फुरद्विक्रम-
क्रीताः सर्वदिगन्तरक्षितिभुजां लक्ष्म्यश्चिरं भेजिरे ॥

---

१. इतः प्रभृति मुद्रितं प्रशस्तिचतुष्टयं ऑस्ट्रिआदेशराजधान्यां वीएनानगरे विराजमानेन विद्वदवतंसेन श्रीमता डॉक्टरब्यूलरेण (G. Bühler, Ph. D., LL. D., C. I. E.) अस्मभ्यं प्रहितमस्ति. वयमपि तत्सादरं सप्रणयं चोररीकुर्मः.

सूनुस्तस्य बभूव भूपतिलकश्चामुण्डराजाह्वयो
यद्गन्धद्विपदानगन्धपवनाघ्राणेन दूरादपि।
विभ्रश्यन्मदगन्धभग्नकरिभिः श्रीसिन्धुराजस्तथा
नष्टः क्षोणिपतेर्यथास्य यशसां गन्धोऽपि निर्नाशितः॥

तस्माद्वल्लभराज इत्यभिधया क्ष्मापालचूडामणि-
र्जज्ञे साहसकर्मनिर्मितचमत्कार[ः] क्षमामण्डलो(ले)।
यत्कोपानलजृम्भितं पिशुनयत्येतत्प्रयाणश्रुति-
क्षुभ्यन्मालवभूपचक्रविकसन्मालिन्यधूमोद्गमः॥

श्रीमद्दुर्लभराजनामनृपतिर्भ्रातास्य राज्यं दधे
शृङ्गारेऽपि निषण्णधीः परवधूवर्गस्य यो दुर्लभः।
यस्य क्रोधपरायणस्य किमपि भ्रूवल्लरी भङ्गुरा
सद्यो दर्शयति स्म लाटवसुधाभङ्गस्वरूपं फलम्॥

भीमोऽपि द्विषतां सदा प्रणयिनां भोग्यत्वमासेदिवा-
न्क्षोणीभारमिदं बभार नृपतिः श्रीभीमदेवो नृपः।
धारापञ्चकसाधनैकचतुरैस्तद्वाजिभिः साधिता
क्षिप्रं मालवचक्रवर्तिनगरी धारेति को विस्मयः॥

तस्माद्भूमिपतिर्बभूव वसुधाकर्णावतंसः स्फुर-
त्कीर्तिप्रीणितविश्वकर्णविवरः श्रीकर्णदेवाह्वयः।
येन ज्याप्रथितस्वनं च्युतशरं धर्मं पुरस्कुर्वता
न्यायज्ञेन न केवलं रिपुगणः कालोऽपि विद्धः कलिः॥

दृप्यन्मालवभूपबन्धनविधित्रस्ताखिलक्ष्मापति-
र्भक्त्याकृष्टवितीर्णदर्शनशिवो मूर्तः प्रभावोदयः।
सद्यः सिद्धरसानृणीकृतजगद्गीतापमान(तावदान)स्थिति-
र्जज्ञे श्रीजयसिंहदेवनृपतिः सिद्धाधिराजस्ततः॥

वश्या वेश्म रसातलं च विलसद्भोगि.........
....भोक्तुम....................क्षत्राणि रक्षांसि च।

यः क्षोणीधरयोगिनीं च सुमहाभोगां सिषेवे चिरं
हेलासिद्धरसाः सदा क्षितिभुज ....रे ॥
[संख्य]तीतवितीर्णदाननिवहैः संपन्नपुण्योच्चयः
क्रीडाक्रान्तदिगन्तराल.................... ।
....
.... ॥
........कुलभूप......................विलम्ब.........
क्रीडाक्रोड इवोद्दधार वसुधां देवाधिदेवाज्ञया ।
देवः सोऽथ कुमारपालनृपतिः श्रीराज्यचूडामणि-
र्यः स्वर्गादवतीर्णवान्हरिरिति ज्ञातः प्रभावार्जनैः ॥
अर्णोराजनराधिराजहृदये क्षिप्त्वैक(व) बाणव्रजं
श्च्योतल्लोहिततर्पणादमदयच्चण्डीं भुजस्थायिनीम् ।
द्वारालम्बितमालवेश्वरशिरःपद्मेन यश्चाहर-
ल्लीलापङ्कजसंग्रहव्यसनितां चौलुक्यराजान्वयः ॥
शुद्धाचारनवावतारसरणिः सद्धर्मकर्मक्रम-
प्रादुर्भावविशारदो नयपथप्रस्थानसार्थाधिपः ।
यः संप्रत्यवतारयन्कृतयुगं योगं कलेर्लङ्घय-
न्मन्ये संहरति स्म भूमिवलयं(ये) कालव्यवस्थामपि ॥
प्रत्यू.........खण्डिताङ्गुलिदलैः पर्युल्लसत्पल्लवो
नष्टोदीच्यनराधिपोज्झितसितच्छत्रैः प्रसूनोज्ज्वलः ।
छिन्नप्राच्यनरेन्द्रमौलिकमलैः प्राप्य(प्रोद्य)त्फलद्योतित-
श्छायां दूरमवर्धयन्निजकुले यस्य प्रतापद्रुमः ॥
आचारः किल तस्य रक्षणविधिर्विघ्नेशनिर्नाशित-
प्रत्यूहस्य फलावलोकिशकुनज्ञानस्य सं......यः ।
देवीमण्डलखण्डिताखिलरिपोर्युद्धं विनोदोत्सवः
श्रीसोमेश्वरदत्तराज्यविभवस्याडम्बरं वाहिनी ॥

राज्ञानेन च भुज्यमानसुभगा विश्वंभरा विस्फुर-
द्रत्नद्योतितवारिराशिरशना शीताद्रिविन्ध्यस्तनी।
एषाभूषयदस्थिकुण्डलमिव श्रुत्याश्रयं····एता
बिभ्राणा नगराह्वयं द्विजमहास्थानं सुवर्णोदयम्॥

आब्रह्मादिकऋषिप्रवर्तितमहायज्ञक्रमोत्तम्भितै-
र्यूपैर्दत्तकरावलम्बनतया पादव्यपेक्षाच्युतः।
धर्मोऽत्रैव चतुर्युगेऽपि कलितानन्दः परिस्पन्दते
तेनानन्दपुरेति यस्य विबुधैर्नामान्तरं निर्मितम्॥

अश्रान्तद्विजवर्गवेदतुमुलैर्बाधिर्यमारोपितः
शश्वद्धोमहुताशधूमपटलैरान्ध्यव्यथां लम्भितः।
नानादेवनिकेतनध्वजशिखाघातैश्च खञ्जीकृतो
यस्मिन्नद्य कलिः स्वकालविहितोत्साहोऽपि नोत्सर्पति॥

सर्पद्विप्रवधूजनस्य विविधालंकाररत्नांशुभिः
स्मेराः संततगीतमङ्गलरवैर्वाचालतां प्रापिताः।
अस्तान्तोत्सवलक्ष्यमाणविभवोत्कर्षप्रकाशस्थिता
मार्गा एव वदन्ति यत्र नृपतेः सौराज्यसंपद्गुणम्॥

अस्मिन्नागरवंशजद्विजजनस्त्राणं करोत्यध्वरे
रक्षां शान्तिकपौष्टिकैर्वितनुते भूपस्य राष्ट्रस्य च।
मा भूत्तस्य तथापि तीव्रतपसो बाधेति भक्त्या नृपो
वप्रं विप्रपुराभिरक्षणकृते निर्मापयामास सः॥

अस्मिन्वप्रगुणेन तोयनिलयाः प्रीणन्ति लोकं जलैः
कामं क्षेत्रभुवोऽपि वप्रकलितास्तन्वन्ति धान्यश्रियम्।
एवं चेतसि संप्रधार्य सकलब्रह्मोपकारेच्छया
चक्रे वप्रविभूषितं पुरमिदं चौलुक्यचूडामणिः॥

पादाक्रान्तरसातलो गिरिरिव श्लाघ्यो महाभोगतः
शृङ्गारीव तरङ्गिणीपतिरिव स्फारोदयद्वारभूः।

उत्सर्पत्कपिशीर्षको जय इव क्रव्यादनाथद्विषां
नारीवर्ग इवेष्टकान्तरुचिरः सालोऽयमालोक्यते ॥
भोगाभोगमनोहरः फणशतैरुत्तुङ्गतां धारय-
न्यातः कुण्डलितां च यज्ञपुरुषस्याज्ञावशेनागतः ।
रत्नस्वर्णमहानिधिं पुरमिव त्रातुं स शेषः स्थितः
प्राकारः सुधया सितोपलशिराः संलक्ष्यते वृत्तवान् ॥
कामं कामसमृद्धिपूरकरमारामाभिरामाः सदा
स्वच्छन्दस्वनतत्परैर्द्विजकुलैरत्यन्तवाचालिताः ।
उत्सर्पद्गुणशालिवप्रवलयप्रीतिः प्रसन्ना जनै-
रत्रान्तश्च बहिश्च संप्रति भुवः शोभाद्भुतं बिभ्रति ॥
लक्ष्मीकुलं क्षोणिभुजो दधानः प्रौढोदयाधिष्ठितविग्रहोऽयम् ।
विभ्राजते नागरकाम्यवृष्टिर्वप्रश्च चौलुक्यनराधिपश्च ॥
यावत्पृथ्वी पृथुविरचिताशेषभूभृन्निवेशा
यावत्कीर्तिः सगरनृपतेर्विद्यते सागरोऽयम् ।
तावन्नन्द्याद्द्विजवरमहास्थानरक्षानिदानं
श्रीचौलुक्यक्षितिपतियशःकीर्तनं वप्र एषः ॥
एकाहनिष्पन्नमहाप्रबन्धः श्रीसिद्धराजप्रतिपन्नबन्धुः ।
श्रीपालनामा कविचक्रवर्ती प्रशस्तिमेतामकरोत्प्रशस्ताम् ॥

संवत् १२०८ वर्षे आश्विन शुदि (२) गुरौ लिखितं नागरब्राह्मणपण्डितवालणेन ॥

चौलुक्य········धिपेन कारिता प्रतोलिका यार्जुनवारिकोपगा ।
पुनर्नवोना लतफहा····त····वेगमिर्जाने········नेन नृपेण कारिता ॥
चैत्रमासे शुभ्रे पक्षे प्रतिपद्गुरुवासरे ।
नन्दाष्टनृपे १६८९ नृपे वर्षे प्रशस्तिर्लिखिता पुनः ॥
नागरब्राह्मणजोशीवेणीसुतेन विष्णुजीकेन लिखिता प्रशस्तिः ॥

शुभं भवतु ॥ छ ॥

(४६)

कुरुक्षेत्रप्रान्तवर्तिपृथूदकक्षेत्र (Pehoa) स्थविष्णु-मन्दिरप्रशस्तिः ।

ओं नमो माधवाय ॥

याते यामवतीपतौ शिखरिषु क्षामेषु सर्वात्मना
ध्वस्ते ध्वान्तरिपौ जने विघटिते त्रस्ते च नागागणे ।
भ्रष्टे भूवलये गतेषु च तथा रत्नाकरेष्वेकता-
मेको यः स्वपिति प्रधानपुरुषः पायात्स वः शार्ङ्गभृत् ॥

दृष्टिः पायात्रिजगदखिलं शार्ङ्गिणः कान्तमूर्तेः
कान्ता सभ्रूस्फुरितसुभगस्निग्धताराभिरामा ।
उद्यत्तीव्रस्मरजलनिधौ मज्जतः श्रीमुखेन्दु-
स्फारज्योत्स्ना················: स्मेरगण्डस्थलस्य ॥

क्षेत्रं कुरोर्विविधपापमलाभिघात-
दक्षं क्रियादुदयमस्तसमस्ततापम् ।
अध्यासितं मुनिगणैरुदितात्मबोध-
प्रध्वस्तगाढतिमिरप्रकटप्रमोदैः ॥

पोतः संसारसिन्धौ सुरपथगमने स्यन्दनः साधुवर्ग-
··············तवह्निः प्रलयजलधरः संपतन्मान्द्यभागः ।
नानाव्याधिप्रबन्धप्रचुरतरतमःपङ्कविध्वंसभानु-
र्नीरं चैतत्समन्ताद्दयतु····दुरित········मारम्वतं वः ॥

यः शक्तः स्वकुल·············मृद्धया भिन्दानः परबलमानसं समन्तात् ।
स श्रीमाञ्जयति महेन्द्रपालदेवः[1] शान्तारिः शशधरसुन्दरः शरण्यः ॥

आसीत्तोमरतुङ्गवंशतिलकश्चण्डप्रतापोज्ज्वलो
राजा रञ्जितसाधुवृत्तहृदयो दुर्वृत्तशैलाशनिः ।

१. अयं कन्नौजमहीपतिः खिस्ताब्दीयनवमशतकसमाप्तौ दशमशतकारम्भे च महीं शासितवान्.

नाम्ना जाउल इत्यपूर्वचरितख्यातो दयालंकृति-
स्तत्त्वालोकिविलोकितक्षितिपतिव्यापारलब्धोदयः ॥
येन ज्ञातिकुलं क[लङ्कविकलं] नीतं परां संपदं
छिन्नारातिकरीन्द्रकुम्भशकलैः कृत्वोपहारं भुवः।
कीर्त्या यस्य च नाकनागनिकर(लय)व्यासङ्गतः संगमा-
द्व्योम्नश्च स्फुरदिन्दुसुन्दररुचा स्वःसिन्धुलीलायितम् ॥
प्रतिदिशममराणां मन्दिराण्युच्छ्रिताग्र-
स्थगितशशधराणि स्फारमारोपितानि।
जगति वितनभामा येन दूरं विभान्ति
स्वयश इव निरोद्धुं शङ्कवो दिक्षु खाताः ॥
तत्संतानमहोदधेः प्रमुदितप्रोद्यद्भुजंगाश्रया-
दुर्लङ्घा(ङ्घ्या)द्धनमौक्तिकांशुनिकरस्फारीभवत्संपदः।
प्रख्यातादजनि स्ववंशतिलकः **श्रीवज्रटाख्यः** प्रभुः
प्राप्ताशेषमनोरथः शुभतरव्यापारतुङ्गोन्नतिः ॥
तस्य स्फुरदिन्दुरुचः शौरेरिव जलधिकन्यका जाता।
नाम्ना मङ्गलदेवी जाया गिरिजेव गिरिशस्य ॥
तस्मात्तस्यां **जज्जुकः** प्रादुरासीदुच्चैः शान्तः सत्सु निर्मत्सरेषु।
क्रूरः केतुर्दुर्धरारातिचक्रे क्रुध्यत्सेनाकुञ्जरध्वानरौद्रे ॥
तस्य स्फुरन्निशितखड्गनिकृत्तशत्रो-
स्त्रस्तान्धदीननिकरोद्धरणोरुकीर्तेः।
सद्वृत्तरक्तवनितातिलकाङ्ककल्पे
कान्ते बभूवतुरुदारशशाङ्ककान्ते ॥
एका चन्द्रेति विख्याता द्वितीया नायिकेति च।
विशिष्टगुणनिर्माणाद्वे एव सदनं श्रियः ॥
चन्द्रायाः समजनि **गोग्गनामधेयो** धीराणां धुरि विनिवेशितो विधात्रा।
भूनाथो द्विषदिभकुम्भभेदनिर्यन्मुक्ताभिर्महितमहीतलः शि(सि)ताभिः ॥

१. अयं कश्चन महेन्द्रपालस्य सामन्तः स्यात्.

अमूत च विचक्षणं क्षतविपक्षपक्षप्रभं
प्रभाकरकरोत्करं स्वबलसैनिकाम्भोरुहाम् ।
अधर्मपरिपन्थिनं तदनु पूर्णराजं सुतं
स्ववंशगगनोदरे तुहिनदीधितिं नायिका ॥

करतलस्थगिताधरपल्लवाः प्रतनुकान्ति कपोलतलोदरम् ।
सिषिचुरश्रुजलैर्यदरिस्त्रियः सगलितप्रचुरालकजालकाः ॥

तस्य भ्राता गुणनिधिरभूत्सोदरो देवराजः
स्फूर्जत्तेजः प्रविहतपरस्फारसेनान्धकारः ।
स्थानं क्षान्तेः क्षतकलिमलः क्षिप्तरागादिदोषः
स्निग्धच्छायस्तरुरिव ततः सत्फलानम्रमूर्तिः ॥

नामापि प्रकटतरं निशम्य यस्य क्रुद्धस्य भ्रुकुटितरङ्गिताननस्य ।
दृप्तानां युधि विकसद्विगाढभासां सस्रंसे करतलतः कृपाणदण्डः ॥

यदास्यसरसीरुहं सरसमर्थिनां पश्यतां
नितान्तमगमत्क्षणात्क्षयमुपद्रवो मानसः ।
व्यघूर्णत च संभ्रमात्प्रतिभटध्वनद्दन्तिनां
घटा विघटनोन्मुखी समिति यस्य सद्यः पुरः ॥

इत्युद्दामप्रकटितगुणोद्गाररम्याः क्रमेण
प्राप्तश्रीकाः शुभतरधियः साधुरक्तास्त्रयोऽपि ।
विष्णोः सौधान्यतुलमहसः कारयामासुरत्र
त्रस्तास्तीव्राद्भवजलनिधेर्दुर्गमान्मन्दबोधैः ॥

गोग्गेन कारितं मध्ये पूर्णराजेन पृष्ठतः ।
पुरतो देवराजेन घनान्धतमसच्छिदे ॥

चतुःसमुद्रसीमाङ्कं यावदेतन्महीतलम् ।
इदमायतनं तावद्विभातु सदनं श्रियः ॥

धन्वन्तरिप्रतिनिधिः श्रुतसारमूर्तिः
सद्बन्धुरच्युत इति प्रकटाभिधानः ।

काम्बोजजः प्रभुमनःकमलद्विरेफो
　　रामस्य सूनुरिह कारयिता बभूव ॥
यक्षपालकनामैको द्वितीयो गेज्जराभिधः।
पाटलाख्यस्तृतीयोऽपि ग्रामो भोगाय कल्पितः ॥
अत्रार्यैः क्ष्मानाथैः श्रेयोर्थं देहस्य।
संसारं दृष्ट्वोच्चैः कर्तव्या सद्बुद्धिः ॥
स्वकुलगगनभानुः····ि········प्रसक्तः
　　श्रुतविनयविदग्धो भट्टरामः किलासीत्।
अकृत मधुरबन्धां मु[द्गल]स्तस्य सूनुः
　　सरसललितसारां लीलयेमां प्रशस्तिम् ॥
बभूव सूत्रधारोऽत्र दुर्लभादित्यसंज्ञकः।
························लादित्येन धीमता ॥

---

(४७)

सोमनाथक्षेत्रस्थस्य कस्यचन प्रासादस्य प्रशस्तिः।

ॐ ॥ ॐ नमः शिवाय।
हृदि स्थितं चिन्मयमात्मवेदिनः समाधिमास्थाय विलोकयन्ति यम्।
स चित्तसंतापमपाकरोतु वः स्तनंधयश्वेतमयूखभूषणः ॥
शैलात्मजोरसिजश्टङ्गकुरङ्गनाभि-
　　पत्रावलीतलिनतल्पशयालुपाणिः।
पीयूषभानुकलिकाकलितावतंसो
　　देवः शिवानि वितनोतु दिवानिशं वः ॥
त्रैलोक्यमङ्गलमनङ्गरिपोरपत्य-
　　मङ्कूरितैकदशनोल्लसदाननश्रीः।
देवः प्रपद्य हृदयैकपदीं कपर्दी
　　भूयादनेकपमुखः सुखसंपदे वः ॥

श्रीविश्वमल्ल इति भूपतिमौलिरत्नं
चौलुक्यवंशमवतंसयति स्म जिष्णुः ।
यस्य द्विधारमपि संयति मण्डलाग्र-
मारादमंस्त शतधारमरातिवर्गः ॥

आबद्धमूलमभितः क्षितिपाद्रिजात-
मुन्मूलयन्कुलिशवंशभुवा भुजेन ।
सत्त्वस्य यः किमपि धाम जनेन राज-
नारायणेति जगदे जगदेकनाथः ॥

यस्मिन्नात्मकलां न्यधत्त सकलक्ष्मावतंसे जग-
त्तापव्यापदपाकरिष्णुमहिमा श्रीविश्वनाथः प्रभुः ।
शस्त्रैस्तेन चिकित्सितास्तदुचितं विश्वापकारव्रत-
स्नातेन प्रतिभूभुजामपि हृदः प्रौढा मदग्रन्थयः ॥

नागल्लदेवीति बभूव यस्य जाया जयश्रीरिव देहबद्धा ।
तया स राजा सुतरां बभासे भासेव देवो हरिणाङ्कमूर्तिः ॥

आशान्तविश्रान्तभुजप्रतापः प्रतापमल्लावरजः स राजा ।
स्वपौरुषोत्कर्षसमातिरेकादेकातपत्रां बुभुजे धरित्रीम् ॥

श्रीविश्वमल्लः स्वपदेऽभिषिच्य प्रतापमल्लात्मजमर्जुनं सः ।
साकं सुधापाकमभुङ्क्त नाकनितम्बिनीनामधरामृतेन ॥

राकानिशाकरसनाभिगुणाभिरामो
दामोदरांश इव विक्रममामलश्रीः ।
भूपालमौलिमणिरर्जुनदेवनामा
कामार्जुनीमिव धनानि धरामदुग्ध ॥

हस्ते विधाय कदनाय दुराशयानां
दानावधूतसुरशाखिनि भूमिचक्रम् ।
यः स्वैरुदारचरितैरनघः प्रजानां
रक्षां चकार किल चक्रधरावतारः ॥

तस्याङ्कभूर्जयति गूर्जरराज्यलक्ष्मी-
संभोगकन्दलितसौख्यनिमग्नचेताः।
क्षोणीसमुद्धरणकेलिरसोत्तरङ्गः
सारङ्गदेव इति शार्ङ्गधरानुभावः॥
युधि यादवमाल्वेश्वरावकृत क्षीणबलौ बलेन यः।
पृथुविग्रहधारिणौ पुरा पतगेन्द्रो गजकच्छपाविव॥
इतश्च।
भट्टारकश्रीलकुलीशमूर्त्या तपःक्रियाकाण्डफलप्रदाता।
अवातरद्विश्वमनुग्रहीतुं देवः स्वयं बालमृगाङ्कमौलिः॥
अनुग्रहीतुं च चिरं विपुत्रकानुलूकभूतानभिशापतः पितुः।
ललाटमुर्व्या इव लाटभूषणं समेत्य कारोहणमध्युवास यः॥
अवतेरुश्चत्वारः पाशुपतव्रतविशेषचर्यार्थम्।
इह कुशिकगार्ग्यकौरुषमैत्रेया इति तदन्तसदः॥
ततस्तपस्विनां तेषां चतुर्धा जातिरुद्गता।
भुवं विभूषयामास चतुरर्णवमुद्रिताम्॥
एतैरनुगृहीतानामन्वयेन महात्मनाम्।
निःसीमवैभवं श्रीम········कमित्यभूत्॥
गार्गेयगोत्राभरणं बभूव स्थानाधिपः कार्तिकराशिनामा।
मूर्तस्तपोराशिरिवाश्रितानामालोकमात्रेण हरन्नघानि॥
तेन स्वहस्तकमलानुगृहीतजन्मा
वाल्मीकिराशिरुदियाय दयालुचेताः।
वाणीं च तीर्थपदवीं च सदा पदानां
न्यासैः स्वचित्तविमलाकृतिभिः पुनानः॥
तेनानुगृह्य समकेति सतां प्रबोध-
कारी तपोधनयुवा त्रिपुरान्तकेति।
साक्षाद्भवन्ति विबुधाः किल तद्विधानां
हस्ताम्बुजेन दृषदोऽपि कृतप्रतिष्ठाः॥

वाल्मीकिराशेः सुगृहीतनाम्नस्तस्यैष शिष्यस्त्रिपुरान्तकेति ।
तीर्थान्तरालोकनकौतुकेन पवित्रयामास दिशश्चतस्रः ॥

पूर्वं तपस्विगृहिणीस्पृहणीयमूर्ति-
र्यो देवदारुविपिने विजहार देवः ।
आशावधूलवणिमानमनुग्रहीतुं
तीर्थावगाहनमिषेण चचार सोऽयम् ॥

समाधिपूतेन हृदम्बुजेन यः ····यि··········· ।
ततः शुचिब्रह्मसरःसरोजैरानर्च केदारपदारविन्दे ॥

जगद्गुरुं चेतसि यः प्रपद्य यागेश्वरं मूर्तमि··········· ।
··············· प्रसादसंपत्तिलभ्यानि तपःफलानि ॥

मिथोमिलज्जह्नुकलिन्दकन्यातरङ्गहस्तोपहृतैः पयोभिः ।
ससर्ज यस्याजि···············षः पाद्यमिव प्रयागः ॥

प्रदक्षिणीकृत्य सतां प्रदीपः श्रीपर्वतं यः किल सर्वतोऽपि ।
श्रीमल्लिनाथस्य विलोकनेन कृतार्थ··················त्ते ॥

प्रेङ्खोलितानि कलशोद्भवपादमुद्रा-
निःकल्मषाकृतिषु विन्ध्यगिरेः शिलासु ।
रेवाजलानि गजराजविगाहलीला-
···············पाण्यपि यः सिषेवे ॥

गोदावरीतीरविहारणीभिर्वनस्थलीनामधिदेवताभिः ।
कृतार्थयन्नध्वगदत्तपयोजं यो जङ्गमत्र्यम्बक·········· ॥

ततः शमाद्वैतरसाभिरामे रामेश्वरं चेतसि चिन्तयन्यः ।
ददर्श लङ्काधिपकालरात्रेः प्रस्थानवीथीमिव सेतुलेखाम् ॥

श्रीदेवपत्तनसमस्तवनस्तनीनां
नेत्रारविन्दसुकृतैरिव सानुबन्धैः ।
तीर्थावगाहनधिया दिशि पश्चिमाया-
मायातवानुपशमायतनं कृती यः ॥

सरस्वतीसागरसंप्रयोगविभूषिताभोगमथागमद्यः।
सोमेशचूडावलमानबालचन्द्रप्रभासंवलितं प्रभासम्॥
इह महीतलतीर्थविगाहनादखिलतीर्थमयीं दधदाकृतिम्।
भुवनभूषणभूतमभूषयन्नगरमिन्दुकलाभरणस्य यः॥
इह साक्षादुमाकान्तः श्रीमान्गण्डबृहस्पतिः।
आर्यमेनं विनिर्माय पष्ठं चक्रे महत्तरम्॥
स्थानकं निजविशुद्धचरित्रैरुद्धरिष्यति महत्तर एषः।
इत्यवेत्य मुमुदे हृदि चातुर्जातकेन गुणजातरसेन॥
अस्ति श्रीत्रिपुरान्तकोऽपि विबुधश्रेणीकिरीटोपल-
च्छायापल्लवलालिताङ्घ्रिकमलः कासां गिरामध्वनि।
यस्योद्दामचरित्रवैभवनिधेरेषा कियन्तं गुण-
ग्रामं धारयतु स्वकुक्षिकुहरक्रोडे वराकी श्रुतिः॥
धनानि कामाधिकवामलोचनाविलोचनप्राञ्चलचञ्चलानि यः।
ददौ महादौस्थ्यनिपीडितात्मने सतां प्रपन्नार्तिहरा हि संपदः॥
आस्थितस्य पुरुषोत्तमभूयं कामजन्मनि समाहितबुद्धेः।
यस्य पुण्यघटितस्य रमेति प्रेयसी भुवनभूषणमास्ते॥
सरस्वतीमौलिशयालुकेतकीपलाशलक्ष्मीमहपांशुकेलयः।
महात्मनो यस्य महोज्ज्वला गुणा दिगङ्गनानामवतंसतां ययुः॥
सोमेश्वरायतनमण्डपमुत्तरेण
श्रीभाजि जीर्णघटिकालयसंनिधाने।
श्रीकण्ठपञ्चमुखवासमधिष्ठितानि
येनाक्रियन्त कृतिनायतनानि पञ्च॥
मातुर्माल्हणदेव्या यः श्रेयसे माल्हणेश्वरम्।
सतामध्येयमहिमा तन्मध्ये निरमापयत्॥
उमापतेरायतनं नाम्ना गण्डबृहस्पतेः।
कृती कृतयुगाचारः कारयामास तत्र यः॥

श्रीबृहस्पतिभार्याया उमायाः श्लाघ्यजन्मनः ।
श्रेयसे यः सतां सीमा निरमार्मादुमेश्वरम् ॥

इह स्वनाम्ना त्रिपुरान्तकेश्वरं महत्तरश्रीत्रिपुरान्तको व्यधात् ।
प्रियाभिधानेन मनोरमं श्रिया रमापतिः गौरदं रमेश्वरम् ॥

गोरक्षकं भैरवमाञ्जनेयं सरस्वतीं सिद्धिविनायकं च ।
चकार पञ्चायतनान्तराले बालेन्दुमौलिस्थितमानसो यः ॥

आत्मबाहुयुगसौहृदश्चितस्तम्भसौम्यशुभं सतोरणम् ।
दूरमस्तदुरितस्तदुत्तरद्वारभूपरिसरे चकार यः ॥

संमार्जनाय देवानां कारवडिद्वयमम्भसः ।
संमार्जनी जगत्याश्च कोलिनी प्रतिवासरम् ॥
कर्तव्यमेतदुभयं बटुकेन परीयसा ।
स्वभामपाटकद्रव्यनैवेद्यान्नोपयोगतः ॥ (युग्मम्)

श्रीखण्डहेतोः शशिखण्डमौलिपुरानुकूल्येन सपाटके यः ।
द्रम्मांश्चकार प्रतिमासमष्टावष्टापदोत्सर्गनिसर्गपूतः ॥

दातव्यं मालिकश्रेण्या शतपत्रशतद्वयम् ।
नवीनकण(र)वीराणां द्वे सहस्रे च नित्यशः ॥
धाटीवाहाय वाटीभ्यो ग्रहीतुं शुचिवेदिकाम् ।
चक्रे परीक्षिपट्टे यः पट्टद्रम्मान्सामपाटके ॥
माणकद्वितयं चोपा मुद्रानामेकमाणकम् ।
घृतं कर्षाश्च चत्वारस्तैलं दीपाय तादृशम् ॥
जात्यानि पञ्च पूगानि स्थितके स्थितिशालिना ।
कोष्ठागारे गुणज्ञेन प्रत्यहं येन चक्रिरे ॥ (युग्मम्)

इहैव धूपवेलार्थं गुग्गुलस्य मणद्वयम् ।
यः पुण्येषु समासक्तः प्रतिमासमकारयत् ॥
पत्र····णां च पञ्चाशत्पत्राणि फणिवीरुधाम्
मेहरेण प्रदेयानि नित्यं बीटकहेतवे ॥

पशुपालेन तदेवं धर्मस्थानोपहारसंबद्धम्।
श्री.........कोष्ठागारादानीय दातव्यम्॥
चोपा माणकमेकं निर्वाप पल्लिकाद्वयं मुद्गाः।
नित्यं घृतकर्षौ द्वाविति पशुपालाय दातव्यम्॥
इदमेव प्रदातव्यं नित्यं नैवेद्यहेतवे।
ततस्तदन्नं बटुना पक्तनीयं प्रयत्नतः॥
पशुपालेन संकल्प्य तन्नैवेद्यं सबीटकम्।
बटुकाय प्रदातव्यं पूजाकर्मविधायिने॥
मण्डपिकायां स्थितके चातुर्जातकशासनात्।
प्रत्यहं यः सतां सीमा द्रम्ममेकमकारयत्॥
अत्रैव कारयामास प्रतिमामसुदारधीः।
स्थितके यो नवद्रम्मान्बटुकग्रासहेतवे॥
पूजामप्रतिमां कर्तुं प्रतिमामसुपेयुषः।
देयाः पञ्चदश द्रम्मा पशुपालस्य धर्मतः॥
चातुर्जातकपादानां यः संमिलितपोत्तके।
ततः पञ्चदशद्रम्मान्प्रतिमासं व्यधत्त यः॥
हट्टानि यो विशिष्टानि त्रीणि प्रीणितमानसः।
चातुर्जातकपादेभ्यो वित्तेनादाय दत्तवान्॥
तेषां मध्यादुत्तमं हट्टमेकं देवश्रद्धामालिना मालिकेभ्यः।
नित्यं पूजापुष्पजातोपहारैः श्रीमच्चातुर्जातकेन प्रदत्तम्॥
चैत्रीमहे भाद्रपदीमहे च पवित्रकं विस्तरणं च कर्तुम्।
महाजनोऽपि प्रतिहट्टमेकं द्रम्मं विशेषस्थितके चकार॥
कोष्ठागारेण पूगानि मेहरेण दलानि च।
शिवरात्रौ प्रदेयानि चातुर्जातकबीटके॥
श्रीसोमनाथप्रभुराजपाटिकात्रये त्रिभिर्हट्टवणिग्भिरात्मना।
सन्नालिकेराणि युगाश्च कोमलाः सदा विधेयानि विशुद्धबुद्धिभिः॥

अमूनि सोमेश्वरदेवरात्या संपूज्य पञ्चायतनानि पूर्वम् ।
अनेन पश्चात्पशुपालकेन श्रीदेवपाल्यामधिरोहणीयम् ॥

चैत्री भाद्रपदी भग्नपतितोद्धारहेतवे ।
चातुर्जातकपादेभ्यो धर्मस्थानमदत्त यः ॥

स्वोपार्जितेन शुचिना विभवेन धर्म-
स्थानं च शासनमिदं च विनिर्ममे यः ।
तेनास्य कीर्तनानिबद्धयशःपताका
राकामृगाङ्कधवलाकृतिरुल्लसाम ॥

श्रीगण्डराणकबृहस्पतिकीर्तनस्य
सारङ्गभूपतिमरस्तटभूषणस्य ।
यः श्रीविलासगृहमायतनस्य मध्ये
स्वात्मीयदेवकुलिकां रचयां चकार ॥

तादृग्विशेषशुचिताधिगमाय सन्त-
श्चित्तेषु बिभ्रति यदीयगुणानजस्रम् ।
पुष्णन्ति सिन्धुतनयाहृदयाधिनाथ-
नाभीसरोरुहमृणालमनाभिता ये ॥

निर्व्याजभक्तिरसवासितविश्वनाथ-
माबिभ्रतः सरिदभीकगभीरमन्तः ।
एतस्य शारदतुषारमयूखलेखा-
निष्कलमषाणि चरितानि जगत्पुनन्ति ॥

सोमार्कवक्रशशिमण्डलतो निपीय
पीयूषवद्धमखितानि सुभाषितानि ।
एषा प्रशस्तिरनवद्यपदार्थबन्धा
धन्धात्मजेन विदधे धरणीधरेण ॥

एनां लिलेख मन्त्री विक्रम इति पूर्णसिंहतनुजन्मा ।
उदटङ्कयदथ शिल्पी नाहडतनयश्च पूणसीह इति ॥

श्रीनृपविक्रमसं० १३४२ वर्षे माघ शुदि ९ सोमे लिङ्गप्रतिष्ठामहोत्सवः समजनि ॥

---

(४८)

मालवमहीपालप्रशस्तिः ।

ओं नमः शिवाय ॥

गङ्गाम्बुसंसिक्तभुजंगमालवाले कलेन्दोरमलाङ्कुराभा ।
यन्मूर्ध्नि नम्रेहितकल्पवल्ल्या भातीव भूत्यै स तवास्तु शंभुः ॥
सानन्दनन्दिकरसुन्दरमान्द्रनान्दी-
नादेन तुम्बुरुमनोरमगानमानैः ।
नृत्यन्त्यवश्यमनिशं सुरवासवेश्या
यस्याग्रतो भवतु वः स शिवः शिवाय ॥
मूर्धस्थिताभ्रसरितोऽक्षमयेव शंभो-
रर्धाङ्गमङ्गघटनाद्घनमाश्रयन्ती ।
दृष्टात्मनाथ वशतां सकलाङ्गतुष्टा
पुष्टिं नगेन्द्रतनया भवतां विदध्यात् ॥
गणेशो वः सुखायास्तु निशातः परशुः करे ।
यस्य नम्रवनावद्यकन्दोच्छित्या इवोद्यतः ॥
अस्त्युर्वीध्रः प्रतीच्यां हिमगिरितनयः सिद्धदांपत्यसिद्धेः
स्थानं च ज्ञानभाजामभिमतफलदोऽखर्वितः सोऽर्बुदाख्यः ।
विश्वामित्रो वसिष्ठादहरत बलतो यत्र गां तत्प्रभावा-
ज्जज्ञे वीरोऽग्निकुण्डाद्रिपुबलनिधनं यश्चकारैक एव ॥
मारयित्वा परान्धेनुमानिन्ये स ततो मुनिः ।
उवाच परमाराख्यः पार्थिवेन्द्रो भविष्यसि ॥
तदन्ववायेऽखिलयज्ञसंघतृप्तामरोदाहृतकीर्तिरासीत् ।
उपेन्द्रराजो द्विजवर्गरत्नं शौर्यार्जितोत्तुङ्गनृपत्वमानः ॥

तत्सूनुरासीदरिराजकुम्भिकण्ठीरवो वीर्यवतां वरिष्ठः ।
श्रीवैरिसिंहश्चतुरर्णवान्तधात्र्यां जयस्तम्भकृतप्रशस्तिः ॥

तस्माद्बभूव वसुधाधिपमौलिमाला-
रत्नप्रभारुचिररञ्जितपादपीठः ।
श्रीसीयकः करकृपाणजलोर्मिमग्न-
शत्रुव्रजो विजयिनां धुरि भूमिपालः ॥

तस्मादवन्तितरुणीनयनारविन्द-
भास्वानभूत्करकृपाणमरीचिदीप्रः ।
श्रीवाक्पतिः शतमखानुकृतिस्तुरंगा
गङ्गासमुद्रसलिलानि पिबन्ति यस्य ॥

जातस्तस्माद्वैरिसिंहोऽन्यनाम्ना लोको ब्रूते वज्रटस्वामिनं यम् ।
शत्रोर्वर्गं धारयासेर्निहत्य श्रीमद्धारा सूचिता येन राज्ञा ॥

तस्मादभूदरिनरेश्वरसंघसेना-
गर्जद्गजेन्द्ररवसुन्दरतूर्यनादः ।
श्रीहर्षदेव इति खोट्टिगदेवलक्ष्मीं
जग्राह यो युधि नगादसमप्रतापः ॥

पुत्रस्तस्य विभूषिताखिलधराभोगो गुणैकास्पदं
शौर्याक्रान्तसमस्तशत्रुविभवाद्विख्यातवित्तोदयः ।
वक्तृत्वोच्चकवित्वतर्ककलनप्रज्ञातशास्त्रागमः
श्रीमद्वाक्पतिराजदेव इति यः सद्भिः सदा कीर्त्यते ॥

कर्णाटलाटकेरलचोलशिरोरत्नरागिपदकमलः ।
यश्च प्रणयिगणार्थितदाता कल्पद्रुमप्रख्यः ॥
युवराजं विजित्याजौ हत्वा तद्वाहिनीपतीन् ।
खड्ग ऊर्ध्वीकृतो येन त्रिपुर्यां विजिगीषुणा ॥

तस्यानुजो निर्जितहूणराजः **श्रीसिन्धुराजो** विजयार्जितश्रीः ।
श्रीभोजराजोऽजनि येन रत्नं नरोत्तमाकम्प(ल्प ?)कृदद्वितीयम् ॥

आ कैलासान्मलयगिरितोऽस्तोदयाद्रिद्वयादा
भुक्ता पृथ्वी पृथुनरपतेस्तुल्यरूपेण येन ।
उन्मूल्योर्वीभरगुरुगणा लीलया चापयष्ट्या
क्षिप्ता दिक्षु क्षितिरपि परां प्रीतिमापादिता च ॥
साधितं विहितं दत्तं ज्ञातं तद्यन्न केनचित् ।
किमन्यत्कविराजस्य श्रीभोजस्य प्रशस्यते ॥
चेदीश्वरेन्द्ररथतोग्गलभीममुख्या-
न्कर्णाटलाटपतिगूर्जरराट्तुरुष्कान् ।
यद्भृत्यमात्रविजितानवलोक्य मौला
दोष्णां बलानि कलयन्ति न····लो···· ॥
केदाररामेश्वरसोमनाथसुण्डीरकालानलरुद्रसत्कैः ।
सुराश्रयैर्व्याप्य च यः समन्ताद्यथार्थसंज्ञां जगतीं चकार ॥
तस्मिन्वासवबन्धुतामुपगते राज्ये च कुल्याकुले
मग्नस्वामिनि तस्य बन्धुरुदयादित्योऽभवद्भूपतिः ।
येनोद्धृत्य महार्णवोपमिलत्कर्णाटकर्णप्रभु-
मुर्वीपालकदर्थितां भुवमिमां श्रीमद्वराहायितम् ॥

तत्रादित्यप्रतापे गतवति सदनं स्वर्गिणां भर्गभक्ते
व्याप्ता धारेव धात्री रिपुतिमिरभरैर्मौललोकस्तदाभूत् ।
विस्रस्ताङ्गो निहत्योद्भटरिपुतिमिरं खड्गदण्डांशुजालै-
रन्यो भास्वानिवोद्यन्द्युतिमुदितजनात्मोदयादित्यदेवः ॥
येन धरणीवराहः परमारेणोद्गतो निरायासात् ।
तस्यैतस्या भूमेरुद्धारो बत कियन्मात्रः ॥
कुंवान्य···· वाजिव्रजरु·················
·· ।
··
·· ॥

(अग्रे सर्वं त्रुटितम् ।)

(४९)

कम्बोजदेशस्थशिवालयप्रशस्तिः ।

जयत्यनन्यसामान्यमहिमा परमेश्वरः ।
ब्रह्मोपेन्द्राञ्जलिन्यासद्विगुणाङ्घ्रियुगाम्बुजः ॥

राजा **श्रीरुद्रवर्मा**सीत्त्रिविक्रमपराक्रमः ।
यस्य सौराज्यमद्यापि दिलीपस्येव विश्रुतम् ॥
तस्याभूतां भिषङ्मुख्यौ भ्रातरावश्विनाविव ।
ब्रह्मदत्तः स यो ज्येष्ठो ब्रह्मसिंहः स योऽनुजः ॥
तयोरपि महाभाग्यौ भागिनेयौ बभूवतुः ।
धर्मदेवः प्रथमजः सिंहदेवस्त्वनन्तरः ॥
स्वशक्त्याक्रान्तराज्यस्य राज्ञः **श्रीभववर्मणः** ।
श्रीगम्भीरेश्वरो यस्य राज्यकल्पतरोः फलम् ॥
यस्य तौ मन्त्रिणावास्तां सन्मतौ कृतवेदिनौ ।
धर्मशास्त्रार्थशास्त्रज्ञौ धर्मार्थाविव रूपिणौ ॥
महेन्द्रवर्मणो भूयः श्रीमतः पृथिवीपतेः ।
तौ चाप्यमात्यतां प्राप्तौ प्रत्ययौ कृत्यवस्तुषु ॥
सिंहदेवोऽनुजो राज्ञा दूतत्वे सत्कृतः कृती ।
प्रीतये प्रेषितः प्रेम्णा चम्पाधिपनराधिपम् ॥
धर्मदेवस्य तु पुनस्तनयोऽभूदनल्पधीः ।
कुलकाननसिंहो यः सिंहवीर इतीरितः ॥
विद्वान्योऽद्यापि विद्वद्भिरपीनकवितारसः ।
श्रीशानवर्मनृपतेरभू(भ)वन्मन्त्रिसत्तमः ॥
निकामवरदं देवं श्रीनिकामेश्वरं हरम् ।
हरिं च सिद्धिसंकल्पस्वामिनं सिद्धिदायिनम् ॥
योऽतिष्ठिपदिमौ देवौ श्रद्धया भूरिदक्षिणौ ।
कीर्तिस्तम्भाविवोदग्रौ यौ स्थितावा भुवः स्थितेः ॥
तस्य सूनुरसूयादिदोषैरस्पृष्टमानसः ।
योऽभवद्भवसंन्यस्तचित्तवृत्तिरुदारधीः ॥
बाल्येऽपि विनयोपेतो यौवनेऽपि जितेन्द्रियः ।
त्रिवर्गारम्भकालेऽपि धर्मे यस्त्वधिकादरः ॥

यस्मिन्नैदंयुगीनेऽपि सदाचारावलम्बिनि ।
कलिप्रचालितो धर्मो न स्खलत्येकपादपि ॥
श्रीमतो राजसिंहस्य जयिनो **जयवर्मणः** ।
यो वैद्यो वेदितव्यानां वेत्तापि निरहंकृतिः ॥
पुनः सत्कृत्य यं राजा प्रादात्स्वे राजमातुले ।
अलब्धराजशब्देऽपि लब्धराजार्हसंपदि ॥
पश्चादाढ्यपुरस्यास्य योऽध्यक्षत्वे कुलक्रमात् ।
योग्योऽयमिति सत्कृत्य स्वयं राज्ञा नियोजितः ॥
यस्मिन्नवति धर्मेण पराभ्युदयकारिणि ।
अन्वर्थसंज्ञां संप्राप्तमिदमाढ्यपुरं पुरम् ॥
उचितं यः करादानमारामेभ्यः कुटुम्बिनाम् ।
अनाददत्प्रभुरपि पूर्णां वृत्तिमदादितः ॥
रोगिणामर्थिनां वापि विस्रम्भादुषितं वचः ।
शृण्वतो यस्य करुणा द्विगुणा समजायत ॥
यन्मदीयं शुभं नाम जन्मप्रभृति संभृतम् ।
तदस्तु पितुरेवेति संकल्पो यस्य कीर्तितः ॥
शिवयज्ञेन यो देवान्मुनीनध्ययनेन च ।
पितॄंश्चातर्पयत्तोयैः सत्पुत्रकरनिःसृतैः ॥
तेनेह सिंहदत्तेन दत्तदातव्यवस्तुना ।
स्थापितो विजयस्यायं दाता श्रीविजयेश्वरः ॥
अस्मिंस्तेन च यद्दत्तं दासारामादि किंचन ।
तदेव देवस्वमिति न हरेन्नापि नाशयेत् ॥

वैशाखप्रथमद्विपञ्चकदिने द्वाराष्टबाणैर्युते
जीवश्चापयुतो वृषे कविसुतः सिंहार्धगश्चन्द्रमाः ।
कौलीरे वणिजो(ऽवनिजो) घटे रविसुतः शेषास्तु मेषस्थिताः
सोऽयं श्रीविजयेश्वरो विजयते यः कीटलग्ने स्थितः ॥

(कम्बोज इन्स्क्रिप्शन्स ५-८

(५०)

कम्बोजदेशस्थशिवालयप्रशस्तिः ।

जितमिन्दुवतंसेन मूर्ध्ना गङ्गां बभार यः ।
उमाभ्रूभङ्गजिह्मोर्मिं मान्यामान्य(?)मिवामलाम् ॥
राजा श्रीभववर्मेति पतिरासीन्महीभृताम् ।
अप्रधृष्यमहासत्त्वो तुङ्गत्वम्तुङ्गो मेरुरिवापरः ॥
सोमान्वये प्रसूतस्य सोमस्येव पयोनिधौ ।
केनापि यस्य तेजस्तु नाऽवर्णीतते(र्णीति ?) महाहवे ॥
अन्तः समुत्था दुर्ग्राह्या मूर्त्यभावादतीन्द्रियाः ।
यदा षडरयो येन जिता बाह्येषु का कथा ॥
नित्यदानपयःसिक्तकरानेव मतङ्गजान् ।
आत्मानुकारादिव यः समरात्र समग्रहीत् ॥
शरत्कालाभियातस्य परानावृततेजसः ।
द्विषामसह्यो यस्यैव प्रतापो न रवेरपि ॥
यस्य सेनारजो धूतमुज्झितालंकृतिष्वपि ।
रिपुस्त्रीगण्डदेशेषु चूर्णभावमुपागतम् ॥
रिपोरिव मनः शुष्कं नगरीपरिखाजलम् ।
यस्य योधैमरापीतमामर्दे रतिना(?) सह ॥
परीतायामपि पुरि ज्वलता यस्य तेजसा ।
पुनरुक्त इवारोपः प्राकारे जातवेदसः ॥
जित्वा पर्वतभूपालांस्तनोति सकृत्वा भुवः ।
बन्दिभिः सगुणानीशे(?)र्यशोभिरिव यो दिशः ॥
येनेयद्भिरवंश्यानां मर्यादालङ्घनं कृतम् ।
यदेषामवधिर्भूमेरतिक्रान्ता पराक्रमैः ॥
शक्त्यापि पूर्वं विजिता भूमिरम्बुधिमेखला ।
प्रभुत्वे क्षमया येन सैव पश्चादजीयत ॥

यस्याक्रुष्टाः प्रभावेन परे युध्यजिता अपि ।
राजश्रियम(मु)पादाय नमन्ते चरणाम्बुजे ॥
परेणाक्रान्तपूर्वेयमखिलेति विचिन्तया ।
अजिताम्भोधिपर्यन्तामवनिं यो न शाम्यति ॥
अवाप्य षोडश कलाः शशाङ्को याति पूर्णताम् ।
असंख्या अपि यो लब्ध्वा न पर्याप्तः कदाचन ॥
नास्ति सर्वगुणः कश्चिदिति वाक्यं महाधियाम् ।
येनासीद्विकृतमिदं(?) स्वेनापि वचसा विना ॥
तस्य राजाधिराजस्य नवेन्दुरिव यः सुतः ।
गुणकान्त्यादिभिर्योगादुन्नमयति यः प्रजाः ॥
रागं दधाति भूपानां·······आरतमरीचयः ।
यस्य··॥
दीव(वं) पदं गते राज्ञि दृष्ट्वा समुदितं प्रजाः ।
मुञ्चन्ति युगपद्बाष्पं शोकानन्दसमुद्भवे(वम्) ॥
······································ ।
······································ ॥
नवे वयसि वृत्तस्य यस्य राज्यभरोद्यनम् ।
चित्रायते कुमारस्य सेनान्यं मरुतामिव ॥
उपधाशुद्धिमा(न्) भृत्यस्तयोरवनिपालयोः ।
······································ ॥
······································ ।
······································ ॥
हैमौ करङ्ककलशावित्यादिश्रियमुत्तमाम् ।
यो लब्धवान्प्रसादेन स्वामिनोरुभयोरपि ॥
न किंचित्स्वाम्यसंभुक्तमाप्तं येन कदाचन ।
भोजन(नं) वसन·······यानाद्याभरणानि वा ॥

प्राणैरसारलघुभिः पितृपिण्डविवर्धितः ।
स्वामिनोऽर्थे गुरुस्थैर्यं क्रतुमैहत यो यमम्(?) ॥
लक्ष्म्या गाढोपगूढोऽपि पूर्वाभ्यासवश(व)तेन यः ।
मुनीनां चरितं धत्ते क्षमास(श)मपरायणः ॥
सुप्रकाशितशौर्यस्य सङ्ग्रामत्यागयोरपि ।
भीरुत्वं यस्य विख्यातमर्कीर्त्तेर्वृजिनादपि ॥
प्रीणयन्नुद्य·······रुचं कुर्वन्द्विषामपि ।
पक्षद्वयं यो मित्रत्वमनयद्गुणसंपदा ॥
कलिदा(ना)वलीना(वलिना) धर्मो भग्नैकचरणोऽपि यम् ।
महास्तम्भमिवालम्ब्य चतुष्पादिव सुस्थितः ॥
अशाश्वतीत्यव(ना)दत्य तनुश्रियमिवात्मनः ।
यशःपुण्यमयीमेव यः स्थिरां बहुमन्यत ॥
इदमुग्रपुराधीशः सुभक्त्या लिङ्गमैश्वरम् ।
प्रतिष्ठापितवानत्र श्रीभद्रेश्वरसंज्ञकम् ॥
दासगोक्षेत्रहेमादिदेयद्रव्यमशेषत(तः ?) ।
प्रमाणमिह ते सन्तु यतयो देवयाजकाः ॥
बान्धवा यजमानस्य पुत्राः संबन्धिनोऽपि च ।
देवस्वं नोपभुञ्जीरन्न प्रमाणि (?) भवन्ति च ॥
यद्दत्तमस्मै देवाय यजमानेन भक्तिनः ।
ये नरा हर्तुमिच्छन्ति ते यान्तु नरकं चिरम् ॥

(कम्बोज इन्स्क्रिपुशन्स् २४–२८)

(५१)

मल्लपुरस्थशिवालयप्रशस्तिः ।

संभवस्थितिसंहारकारणं वीतकारणः ।
भूयादत्यन्तकामाय जगतां काममर्दनः ॥

अमायश्चित्रमायोमात्रगुणो गुणभाजनः(नम्) ।
स्वस्थो निरुत्तरो जीयादनीशः परमेश्वरः ॥
यस्याङ्गुष्ठभराक्रान्तः कैलासः सदशाननः ।
पातालमगमन्मूर्ध्ना **श्रीनिधिस्तं** विभर्त्यजम् ॥
भक्तिप्रह्वेण मनसा भवं भूषणलीलया ।
दोष्णा च यो भुवो भारं जीयात्स **श्रीभरश्चिरम्** ॥
अत्यन्तकामो नृपतिर्निर्जितारातिमण्डलः ।
ख्यातो **रणजयः** शंभोस्तेनेदं वेश्म कारितम् ॥
ज्ञः स्थाणुर्निष्कलः सोमः पावकात्मा वियद्वपुः ।
भीमः शिवो विजयतां शंकरः कामसूदनः ॥
राजराजो न विरसश्चक्रभृन्न जनार्दनः ।
तारकाधिपतिः स्वस्थो जयतात्तरुणाङ्कुरः ॥
श्रीमतोऽत्यन्तकामस्य द्विषद्दर्पापहारिणः ।
श्रीनिधेः कामरागस्य हराराधनसङ्गिनः ॥
अभिषेकजलापूर्णे चित्ररत्नाम्बुजाकरे ।
आस्ते विशाले सुमुखः शिरःसरसि शंकरः ॥
तेनेदं कारितं तुङ्गं धूर्जटेर्मन्दिरगृहम् ।
प्रजानामिष्टसिद्ध्यर्थं शाङ्करीं भूतिमिच्छता ॥
धिक्तेषां धिक्तेषां पुनरपि धिग्धिग्धिगस्तु धिक्तेषाम् ।
येषां न वसति हृदये कुपथगतिविमोक्षको रुद्रः ॥

अत्यन्तकामपल्लवेश्वरगृहम् ।

(साउथ इण्डियन् इन्स्क्रिप्शन्स् १-४)

(५२)

चालुक्यवीरचोडमहीपतेर्दानपत्रम् ।

श्रीधाम्नः पुरुषोत्तमस्य महतो नारायणस्य प्रभो-
र्नाभीपङ्करुहाद्बभूव जगतः स्रष्टा स्वयंभूस्ततः ।

जज्ञे मानससूनुरत्रिरिति यस्तस्मान्मुनेरत्रितः
सोमो वंशकरः सुधांशुरुदितः श्रीकण्ठचूडामणिः ॥
तस्मादभूत्सुधासूतेर्बुधो बुधनुतस्ततः ।
जातः पुरूरवा नाम चक्रवर्ती सविक्रमः ॥

तस्मादायुस्ततो नहुषः। ततो ययातिश्चक्रवर्ती वंशकर्ता। ततः पुरुः ततो जनमेजयः ततः प्राचीशः ततः सैन्ययातिः ततो हयपतिः ततः सार्वभौमः ततो जनमेजयः ततो महाभौमः तस्मादैशानकः ततः क्रोधाननः ततो देवकिः तस्मादृभुकः तस्मादृक्षकः ततो मतिवरः सत्रयागयाजी सरस्वतीनदीनाथः ततः कात्यायनः ततो नीलः ततो दुष्यन्तः तत्सुतः गङ्गायमुनातीरयोरविच्छिन्नान्निधाय यूपान् क्रमशः कृत्वा तथाश्वमेधं नाम महाकर्म भरत इति योऽलभत। ततो भरताद्भूमन्युः। ततो हस्ती ततो विरोचनः। तस्मादजमील्हः ततः संवरणः ततः सुधन्वा ततः परिक्षित् ततो भीमसेनस्ततः प्रदीपनः ततः शंतनुः ततो विचित्रवीर्यः ततः पाण्डुराजः ततः पाण्डवाः।

येनादाहि विजित्य खाण्डवमठो(थो) गाण्डीविना वज्रिणं
युद्धे पाशुपतास्त्रमन्धकरिपोश्चालाभि दैत्यान्बहून् ।
इन्द्रार्धासनमध्यरोहि जयिना यत्कालि(ल)केयादिका-
न्हत्वा स्वैरमकारि वंशविपिनच्छेदः कुरूणां विभोः ॥

ततोऽर्जुनादभिमन्युः ततः परिक्षित् ततो जनमेजयः ततः क्षेमुकः ततो नरवाहनः ततः शतानीकः तस्मादुदयनः ततः प्रभृतिष्वविच्छिन्नसंतानेष्वयोध्यासिंहासनासीनेष्वेकान्नषष्टिचक्रवर्तिषु गतेषु तद्वंश्यो **विजयादित्यो** नाम राजा विजिगीषया दक्षिणापथं गत्वा त्रिलोचनपल्लवमधिक्षिप्य दैवदुरीहया लोकान्तरमगमत्। तस्मिन्संकुले पुरोहितेन वृद्धामात्यैश्च सार्धमन्तर्वती(त्नी) तस्य महादेवी मुडिवेमुनामाग्रहारमुपगम्य तद्वास्तव्येन विष्णुभट्टसोमयाजिना महामुनिप्रभावेन दुहितृनिर्विशेषमभिरक्षिता **विष्णुवर्धनं** नन्दनमसूत। सा तस्य कुमारस्य मानव्यसगोत्रहारीतिपुत्रद्विपक्षगोत्रक्रमोचितानि कर्माणि कारयित्वा तमवर्धयत्। स च माता विदितवृत्तान्तः सन्निर्गत्य चलुक्यगिरौ नन्दां भगवतीं गौरीमाराध्य

कुमारनारायणमातृगणांश्च संतर्प्य श्वेतातपत्रैकशङ्खपञ्चमहाशब्दपालिकेतनप्रतिढक्कावराहलाञ्छनपिच्छकुन्तसिंहासनमकरतोरणकनकदण्डगङ्गायमुनादीनि स्वकुलक्रमागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादाय कड-(द ?)म्बगङ्गादिभूमिपान्निर्जित्य सेतुनर्मदामध्यं सार्धसप्तलक्षं दक्षिणापथं पालयामास ।

तस्यासीद्विजयादित्यो विष्णुवर्धनभूपतेः ।
पल्लवान्वयजाताया महादेव्याश्च नन्दनः ॥

तत्सुतः **पुलकेशिवल्लभः** तत्पुत्रः **कीर्तिवर्मा** तस्य तनयः स्वस्तिश्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेनपादानुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलाञ्छनेक्षणक्षणवशीकृताराातिमण्डलानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोः सत्याश्रयवल्लभेन्द्रस्य भ्राता **कुब्जविष्णुवर्धनोऽ**ष्टादशवर्षाणि वेङ्गीदेशमपालयत् । तदात्मजो **जयसिंहवल्लभ**स्त्रिंशतम् । तदनुज **इन्द्रराजः** सप्तदिनानि । तत्सुतो **विष्णुवर्धनो** नववर्षाणि । तत्सूनुर्मङ्गियुवराजः पञ्चविंशतिम् तत्पुत्रो **जयसिंह**स्त्रयोदश तदवरजः **कोकिलिः** षण्मासान् तस्य ज्येष्ठो भ्राता **विष्णुवर्धन**स्तमुच्चाट्य सप्तत्रिंशतम् तत्पुत्रो **विजयादित्यभट्टारको**ऽष्टादश । तत्तनुजो **विष्णुवर्धनः** षट्त्रिंशतम् तत्सुतो **नरेन्द्रमृगराजो**ऽष्टाचत्वारिंशतं तत्सुतः **कलिविष्णुवर्धनो**ऽध्यर्धं वर्षं तत्सुतो **गुणगाङ्कविजयादित्य**श्चतुश्चत्वारिंशतम् तद्भ्रातुर्विक्रमादित्यस्य तनयश्चालुक्यभीमस्त्रिंशतम् । तत्सुतः **कोल्लभिगण्डविजयादित्यः** षण्मासान् । तत्सुतोऽ**म्मराजः** सप्त वर्षाणि । तत्सुतं विजयादित्यं बालमुत्पाट्य **ताडपो** मासमेकम् । तं जित्वा चालुक्यभीमसुतो **विक्रमादित्य** एकादशमासान् । तत्ताडपराजसुतो **युद्धमल्लः** सप्त वर्षाणि । तमुच्चाट्य देशादम्मराजानुजो **राजभीमः** द्वादशवर्षाणि तत्सूनुर**म्मराजः** पञ्चविंशतिं तस्य द्वैमातुरो **दाननृप**स्त्रीणि वर्षाणि ततः सप्तविंशतिवर्षाणि दैवदुरीहया वेङ्गीमहिर-

नायिकाभवत् । ततो दानार्णवसुतः **शक्तिवर्मभूपतिर्द्वादशवर्षाणि** सम-
रक्षदुर्वीम् ।

ततस्तदनुजः सप्तवत्सरान्भूतवत्सलः ।
विमलादित्यभूपालः पालयामास मेदिनीम् ॥

तत्तनयो नयशाली जयलक्ष्मीधाम **राजराजनरेन्द्रः** ।
चत्वारिंशतमब्दानेकं च पुनर्महीमपालयदखिलाम् ॥

यो रूपेण मनोभवं विशदया कान्त्या कलानां निधिं
भोगेनापि पुरंदरं विपुलया लक्ष्म्या च लक्ष्मीधरम् ।
भीमं भीमपराक्रमेण विहसन्भाति स्म भास्वद्यशाः
श्रीमत्सोमकुलैकभूषणमणिर्दीनैकचिन्तामणिः ॥

तस्यासीदपकल्मषा सुचरितैरम्मङ्गनाम्ना भुवि
प्रख्याता शुभलक्षणैकवसतिर्देवी जगत्पावनी ।
या जह्नोरिव जाह्नवी हिमवतो गौरीव लक्ष्मीरिव
क्षीरोदाद्दिवसेशवंशतिलकाद्राजेन्द्रचोडादभूत् ॥

पुत्रस्तयोरभवदप्रतिघातशक्ति-
निःशेषितारिनिवहो महनीयकीर्तिः ।
गङ्गाधराद्रिसुतयोरिव कार्तिकेयो
राजेन्द्रचोड इति राजकुलप्रदीपः ॥

भासामुन्नतिहेतुं प्रथमं वेङ्गीश्वरत्वमध्यास्य ।
यस्तेजसा दिगन्तानाक्रमदुदयं सहस्ररश्मिरिव ॥

उद्यच्चण्डतरप्रतापदहनप्लुष्टाखिलद्वेषिणा
सर्वान्केरलपाण्ड्यकुन्तलमुखान्निर्जित्य देशान्क्रमात् ।
आज्ञा मौलिषु भूभृतां भयरुजा चित्तेषु दुर्मेधसां
कीर्तिर्दिक्षु सुधांशुधामधवला येनार्पितोज्जृम्भते ॥

भोगीशाभीलभोगप्रतिभयभुजनिर्भर्त्सनात्यन्तविभ्य-
न्नानाभूपाललोकप्रहितबहुविधानर्घ्यरत्नाभिरामम् ।

---

१. E. Hultzsch, Ph. D. महाशयेनैतत्स्कन्धकं गद्यान्तः पातितम्.

धत्ते मौलिं पराध्यों महति नृपकुले यः कुलोत्तुङ्गदेवो
देवेन्द्रत्वादनूने सुरपतिमहिमा चोडराज्येऽभिषिक्तः ॥
हस्तभ्राजितशङ्खचक्रजलजं यं राजनारायणं
लोक[:] स्तौति स सूर्यवंशतिलकाद्राजेन्द्रदेवार्णवात् ।
संभूतां मधुरान्तकीर्ति विदितां नाम्ना परेण स्वयं
लक्ष्मीमुद्वहति स्म लोकमहितां देवीं चरित्रोन्नताम् ॥
गाङ्गौघा इव निर्मलाः कृततमोध्वंसा दिनेशा इव
क्षोणीध्रा इव भूभरश्रमसहा जातास्तयोः सूनवः ।
तन्मध्ये नयविक्रमैकनिलयः **श्रीराजराजं** प्रति
प्रेम्णा वाचमिमामवोचन पिता सर्वोवराधीश्वरः ॥
मया वेङ्गीमहाराज्यं चोडराज्याभिलाषिणा ।
मत्पितृव्ये पुरा न्यस्तं विजयादित्यभूभुजि ॥
स च पञ्चदशाब्दानि पञ्चाननपराक्रमः ।
महीं रक्षन्महीनाथो दिवं देवोपमो गतः ॥
इत्युक्त्वा तां धुरं दत्तां गुरुणा चक्रवर्तिना ।
अनिष्टतद्वियोगोऽपि विनीतो वहति स्म सः ॥
श्रीपादसेवासुखतो गुरूणां न जातु राज्यं सुखमित्यवेक्ष्य ।
संरक्ष्य वेङ्गीभुवमेकमब्दं भूयः स पित्रोरगमत्समीपम् ॥
तदनुजमथ धीरं **वीरचोडं** कुमारं
गुणमिव तनुबद्धं विक्रमं चक्रवर्ती ।
उदयमिव रविस्त्वं प्राप्य वेङ्गीश्वरत्वं
वितनु शिरसि पादं भूभृतामित्यवोचत् ॥
इत्याशिषं समधिगम्य नृपादवन्ध्यां
देव्यास्तथाग्रजनृपद्वितयात्क्रमेण ।
आनम्य तानवनतोवरजैः कुमारः
सृष्टः स्वदेशगमनाय स तैः कथंचित् ॥

शत्रुध्वान्तमपास्य राजनिकरानाच्छाद्य धाम्ना परा-
न्दुर्वृत्तान्विनिवर्त्य भूकमलिनीं कृत्वा तथानन्दिनीम् ।
आरूढो जभनाथ(?)नामनगरीहर्म्योदयाद्रिं विभु-
र्वेङ्गीभूतलभूषणं नृपसुतो बालार्कबिम्बद्युतिः ॥

शाकाब्दे शशिखद्वयेन्दु(१००१)गणिते सिंहाधिरूढे रवौ
चन्द्रे वृद्धिमति त्रयोदशतिथौ वारे गुरोर्वृश्चिके ।
लग्नेऽथ श्रवणे समस्तजगतीराज्याभिषिक्तो मुदा
लोकस्योद्वहति स्म पट्टमनघः श्रीवीरचोडो नृपः ॥

स सर्वलोकाश्रयश्रीविष्णुवर्धनमहाराजो राजपरमेश्वरः परममाहेश्वरपरम-भट्टारकः परमब्रह्मण्यश्रीवीरचोडदेवः गुद्दवाटिविषयनिवासिनो राष्ट्रकूट-प्रमुखान् कुटुम्बिनः सर्वान् समाहूय मन्त्रिपुरोहितसेनापतियुवराजदौवा-रिकसमक्षमित्थमाज्ञापयति—

यथा—

पावने ब्रह्मवंशेऽभूत्परमाह्लाददर्शनः ।
मुनीन्द्रो मुद्गलो नाम क्षीरोद इव चन्द्रमाः ॥
येनातर्क्यानुभावेन समाहूते दिवाकरे ।
यस्य यष्टिः समादिष्टा रविचेष्टामचेष्टत ॥
आसीत्पवित्रचारित्रस्तद्गोत्रे गोत्रवर्धनः ।
दिशो निजयशोधाम्ना द्योतयन्पोतनाह्वयः ॥
गुणाधिको गुणज्ञेन राजराजाधिपेन यः ।
राजराजब्रह्ममहाराजनाम्ना स्तुतो मुदा ॥
तस्य पुण्यनिधेः पत्नी कन्नमाम्बा जगन्नुता ।
अत्रेरिवानसूयासीदनसूयगुणोन्नता ॥
सुतमिव वसुदेवाद्देवकी वासुदेवं
गुहमिव गिरिकन्या नन्दनं चन्द्रमौलेः ।
अथ तनयमसूत श्रीनिधिं सा च तस्मा-

दखिलविबुधसंघैरीडितं मेडमार्यम् ॥
उद्दामधामविमलीकृतदिग्विभागे
नित्योदयस्थितिमति प्रविकासिपद्मे।
यत्रोदिते निखिलबन्धुकुलानि लक्ष्मी-
रध्यास्त वारिजवनानि विवस्वतीव ॥
यस्मिन्नाश्रितवत्सले कृतयुगाचारैकधीरे स्थितिं
बिभ्राणा गुणरत्नभूषण इति प्रख्यातनाम्नि स्वयम्।
सत्यत्यागपराक्रमप्रभृतयः संभूय सर्वे गुणा
वर्धन्ते गुणराशिलोपनिपुणं निर्जित्य कालं कलिम् ॥
धीरो नित्यानुरक्तो दृढनिशितमतिर्ब्रह्मवंशप्रदीपो
लक्ष्मीभूरिद्धतेजा नयविनयनिधिः शास्त्रशस्त्रप्रवीणः।
मान्यः शैलेन्द्रसारस्थिर इति च मया सादरं सप्रसादं
सैनापत्येऽभिषिक्तो वहति जनमुदे पट्टमारोपितं यः ॥
शुश्रूषया गुरुजनं चरितेन लोकं
मानेन बन्धुजनमिष्टधनेन शिष्टान्।
यो माम्मदीयनिखिलक्षितिराज्यभार-
क्षान्त्याभिनन्दयति भक्तिभरेण शौरिम् ॥
यस्य प्राङ्गणभूमिषु प्रतिदिनं प्रक्षाल्यमानामित-
क्षोणीदेवसमूहपादविगलद्वारिप्रवाहैः शुभैः।
शश्वन्मार्गसहस्रपूरिभिरहो गङ्गाप्रवाहा जिता
देवेष्वन्यतमस्य पादगलिता मार्गत्रयायासिताः ॥
द्राक्षारामे पावने पुण्यभाजा पुण्यक्षेत्रे पीठपुर्यां च येन।
भोक्तुं प्रीत्या प्रत्यहं ब्राह्मणानामाकल्पान्तं कल्पितं सत्रयुग्मम् ॥
चेब्रूरुनामप्रथिताभिरामशिष्टाग्रहारोत्तरदिग्विभागे।
महत्तटाकं मधुराम्बुपूर्णमचीकरद्यः करुणारसात्मा ॥
विप्रैरगस्त्यप्रतिमैरसंख्यैर्नित्योपभोग्येन शशिप्रभेण।
यद्वारिणाब्धिं हसतीव भूयो निःशेषपीतं कलशोद्भवेन ॥

महौजसा तेन महामहिम्ना ग्रामस्य तस्यापरदिग्विभागे ।
निर्मापितं धर्मपरायणेन विष्णोर्गृहं वैष्णवपुंगवेन ॥
समुन्नते चन्द्रमरीचिगौरे लक्ष्मीनिवासे नयनाभिरामे ।
तत्राविरासीत्स्वयमेव देवो लक्ष्मीपतिर्लक्षितशङ्खचक्रः ॥

तस्मै श्रीविष्णुभट्टारकाय प्रत्यहं चरुबलिपूजार्थं खण्डस्फुटितनवकर्मार्थं च भवद्विषये कोलारू नाम ग्रामः सर्वकरपरिहारेण देवभोगीकृत्य उदकपूर्वकं दत्त इति विदितमस्तु वः अस्य ग्रामस्य सीमानः पूर्वतः कु..................................सीमा ॥ अस्योपरि न कैर्नचिद्बाधा कर्तव्या । यः करोति स पञ्चमहापातकयुक्तो भवति । तथा चोक्तं भगवता व्यासेन—

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
गामेकां स्वर्णमेकं वा भूमेरप्येकमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥
बहुभिर्वसुधा भुक्ता बहुभिश्चानुपालिता ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

श्रीविजयराज्यसंवत्सरे एकविंशे दत्तस्यास्य शासनस्याज्ञप्तिः पञ्चप्रधाना काव्यकर्ता विद्यभट्टः लेखकः पेन्नाचारिः ॥

(साउथ इण्डियन् इन्स्क्रिपशन्स् १।५३-५७)

(५३)

चालुक्यविष्णुवर्धनमहाराजदानपत्रम् ।

सर्वाकारमशेषस्य जगतः सर्वदा शिवम् ।
गोब्राह्मणनृपाणां च शिवं भवतु सर्वदा ॥

स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतीपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेनपादा-

नुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलाञ्छनेक्षणक्षणवशीकृतारातिमण्डलानां अश्वमेधावभृथस्नानपवित्रीकृतवपुषां चलुक्यानां कुलमलंकरिष्णुः सत्याश्रयवल्लभस्य भ्राता **कुब्जविष्णुवर्धनो**ऽष्टादशवर्षाणि। तत्पुत्रो **जयसिंहवल्लभ**स्त्रयस्त्रिंशद्वर्षाणि। तद्भ्रातुरिन्द्रराजनन्दनो **विष्णुवर्धनः** नववर्षाणि। तत्पुत्रो **मङ्गियुवराजः** पञ्चविंशतिसंवत्सरान्। तत्सूनु**र्जयसिंह**स्त्रयोदश वत्सरान्। तद्वैमातुरानुजः **कोकिलिः** षण्मासान्। तदग्रजो **विष्णुराजः** स्वानुजमुच्चाट्य सप्तत्रिंशत्संवत्सरान् तत्पुत्रो **विजयादित्यभट्टारकः** अष्टादशाब्दान्। तन्नन्दनो **विष्णुवर्धनः** षट्त्रिंशदब्दान्। तत्पुत्रः

गङ्गरट्टबलैः सार्धं द्वादशाब्दानहर्निशम्।
भुजार्जितबलं खड्गसहायो नयविक्रमैः॥
अष्टोत्तरं युद्धशतं युद्ध्वा शंभोर्महालयान्।
तत्संख्यायाकरोद्वीरो विजयादित्यभूपतिः॥
कृत्वा राज्यं स वेङ्गीशः स चत्वारिंशतः समान्।
चतुरुत्तरसंख्यातान्ययौ सख्यं शचीपतेः॥ ४॥
तत्सूनुर्नयविद्वीरः **कलियादिर्विष्णुवर्धनः**।
वेङ्गीनाथः समस्तानामायुधानां कलौ कृती॥

वर्णाश्रमस्थितिनियोजनदक्षरक्षा-
शिक्षापरः परपुरंजयसक्तबाहुः।
नित्यं त्रिवर्गपरिपालनतन्त्रिमन्त्रि-
संवर्धिताखिलधरातललब्धतेजाः॥

गजवाजियुद्धकुशलः सार्धसंवत्सरं पतिः।
बभूव राज्ये नयविदभिषिक्तः कुलोन्नतेः॥

तत्सुतोऽजनि समस्तभूभृतां शासकः सकलसंपदां पतिः।
धैर्यदानधृतिधर्मनिर्मलश्रीप्रतापधरमूर्तिविश्रुतः॥

समरनिरताराातिव्रातानानेकधरेश्वरा-
न्प्रकृतिबलसंपन्नस्तेजस्तातिक्रमजोन्नतिः।

विलसदसिना जित्वा सूर्यं प्रतापयशोमये-
जगति **विजयादित्यो** नित्यं गुणैश्च जिगाय सः ॥
गङ्गानङ्गजवैरिशक्तिरसमात्रट्टेशसंचोदितो
जित्वा मङ्गिशिरोहरस्युधि महाबाह्वामवीर्योर्गमा ।
कृष्णं संकिलमङ्कितागिलबलप्राप्तोरुमद्विक्रमो
भीतार्तो च विधाय तत्पुरमरं यो निर्ददाह प्रभुः ॥

स समस्तभुवनाश्रयश्रीविजयादित्यश्चतुश्चत्वारिंशद्वर्षाणि । तदनु सवितर्यस्तं गते तिमिरपटलेनेव रट्टदायादबलेनाभिव्याप्तं वेङ्गीमण्डलम् तदनुजविक्रमादित्यसूनुश्चलुक्यभीमाधिपो द्रोहार्जुनापरनामा स्वविक्रमक्रमहायतरवारिप्रभयावभास्याधिपतिरभूत् किं च दीनानाथनग्ननटगायकधर्मध्वजवृत्तीनां पितराविव सख्येव गुरुरिवाभिलषितं विस्नी(नी)र्य कल्पतरुप्रतिमश्चेतांसि दानेन संतर्प्य त्रिंशद्वर्षाणि पालयित्वात्मगुणैः पुरंदरमानन्दयन्निव तत्सख्यमगमत् ।

तत्पुत्रो **विजयादित्यः** शैशवाल्लब्धसंपदा ।
सर्वं भोगाधिराज्याङ्कबलरत्नरविश्रुतः ॥

जीवत्येव प्रतापात्पितरि भुजबलध्वस्तनद्वैरिवर्गः
पश्चाज्जित्वारिवर्गं निजमजितमहाशक्तिसंपन्नमन्त्रः ।
प्रज्ञाचक्रेण बाह्यां रिपुममितिमपि स्वार्थभोगैः कृतार्थो
राज्याशीर्लब्धतेजाः समदल(बल ?)मधिपो जेतुमिन्द्रं प्रयातः ॥

तत्सूनुरुदयादित्य **इवाम्भो** राजमहेन्द्रापरनामा रिपुतिमिरमारान्निहत्य प्रकृतिसपत्नपक्षनिक्षिप्तसामन्तकुल्यकुटिलमनोभङ्गकरं करवालमुत्कृष्य शक्तित्रयसंपन्नप्रतापार्जितपितृपितामहप्रकृतिबलः प्रज्ञया सुरगुरुं तेजसा भानुमन्तं क्षमया क्षमाममरगिरिं विविध(वि)बुधसमाश्रयतयानुकुर्वन् सर्वलोकाश्रयश्रीविष्णुवर्धनमहाराजः स्वराज्याभिषेककृतकल्याणः सिंहासनारूढः कण्डेरुवाडिविषयनिवासिनः सर्वान्कुटुम्बिनः समाहूयेत्थमाज्ञापयति स्म । अस्मत्कुलकल्याणपरम्परानियोगाधिकृतपट्टवर्धनी वंशाग्रण्या । कल्ल-

कम्प इति विश्रुतेन कुब्जविष्णुवर्धनानुचरेण संग्रामे तदनुज्ञया दुर्धर्षबलं दद्दरनामानं विनिहत्य तच्चिह्नानि येन जगृहिरे। तत्कुलप्रसूतसोमादित्यस्य सूनुरनेकयुद्धलब्धप्रतापः प्रतिवियराजः।

तत्सूनुः सकलारातिमदच्छेदकरायुधः।
सेवको विजयादित्यकलियर्त्यङ्कभूभुजः॥
अंभपुर्भण्डनादित्यं दृष्ट्वा प्रतिमुखाञ्जनम्।
प्राप्तमुज्ज्वलगण्डाङ्कं यं परे यमसंनिभम्॥

यो हि—

शत्रूणां तुमुलेषु वीरपटहं संश्राव्य जित्वा बलं
कुन्तादित्य इति श्रुताङ्कितमहाकीर्तिप्रतापालयः।
मच्चित्तं परितोष्य भृत्यपदवीं लब्ध्वा प्रसादं गतः
स्फीतानेकबलारिभूपविजयश्रीजन्मबाहून्नतिः॥

तस्मै मद्वादशग्रामटिको गोण्ट्रुरुनामग्रामः सर्वकरपरिहारीकृत्यास्माभिर्दत्त इति विदितमस्तु वोऽस्माभिः। अस्यावधयः। पूर्वतः गोङ्कुव। दक्षिणतः गोणयूरु। पश्चिमतः कुलुचेरुवुलु। उत्तरतः मडपल्लि। एतेषां मध्यवर्तिनः क्षेत्रसीमानः। पूर्वतः पोतुरायु। आग्नेयतः पेद्दकोयिलमु। दक्षिणतः कुरुवपोटि। नैर्ऋततः पेरुवातिकुरुव। पश्चिमतः पालगुण्ट्ट पङ्गमटिकट्ट। वायव्यतः पोलकुंगोण्ड मोनदुर्गे मधवति। उत्तरतः मडपल्लिपर्रु। ऐशानतः चामिरे निगुण्ट्ट। अस्योपरि न केनचिद्बाधा कर्तव्या। यः करोति स पञ्चमहापातको भवति। तथा च व्यासेनोक्तम्—

बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
स्वदत्तां परदत्तां वा यो हरेत्तु वसुंधराम्।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः॥

(साउथ इण्डियन् इन्स्क्रिप्शन्स् ३९–४१.)

---

(५४)

श्रीबदरिकाश्रमयात्रान्तर्गतपण्डुकेश्वर-मन्दिरोपलब्धदानपत्रम् ।

स्वस्ति श्रीमत्कार्तिकेयपुरात्सकलामरदितितनुजमनुजविभुभक्तिभावभरभारानमितामितोत्तमाङ्गसङ्गिविकटमुकुटकिरीटविटङ्ककोटिकोटिशोल्लोकितानाना(ताता)यकप्रदीपदीपदीधितिपानमदरक्तचरणकमलामलविपुलबहुलकिरणकेशरासारसारिताशेषविशेषमोषिघनतमतेजसः स्वर्धुनीधौतजटाजूटस्य भगवतो धूर्जटेः प्रसादान्निजभुजोपार्जितोर्जित्यनिर्जितरिपुतिमिरलब्धोदयप्रकाशदयादाक्षिण्यसत्यसत्त्वशीलशौचशौर्यौदार्यगाम्भीर्यमर्यादार्यवृत्ताश्चर्यकार्यवर्यादिगुणगणालंकृतशरीरो महासुकृतिसंतानबीजावतारः कृतयुगागमभूपाललिलतकीर्तिर्नन्दाभगवतीचरणकमलकमलासनाथमूर्तिः **श्रीनिम्बरः**, तस्य तनयस्तत्पादानुध्यातो राज्ञीमहादेवी **श्रीनाशूदेवी**, तस्यामुत्पन्नः परममाहेश्वरः परब्रह्मण्यः शितकृपाणधारोत्कृत्तमत्तेभकुम्भाकृष्टमुक्तावलीयशःपताकाच्छायचन्द्रिकापहसिततारागणः परमभट्टारकमहाराजाधिराजपरमेश्वर**श्रीमदिष्टगणदेवः**, तस्य पुत्रस्तत्पादानुध्यातो राज्ञी महादेवी **श्रीवेगदेवी**, तस्यामुत्पन्नः परममाहेश्वरः परमब्रह्मण्यः कलिकलङ्कपङ्कातङ्कमग्नधरण्युद्धारधारितधौरेयवरवराहचरितः सहजमतिविभवविभुविभूतिस्थगितारातिचक्रप्रतापदहनोऽतिवैभवसंहारारम्भसंभृतभीमभ्रुकुटिकुटिलकेसरिसटाभीतभीताराती भकलभभरोऽरुणारुणकृपाणबाणगुणप्राणगणहठाकृष्टोत्कृष्टसलीलजयलक्ष्मीप्रथमसमालिङ्गनावलोकनवलक्ष्यसखेदसुरसुन्दरीविधूतकरस्खलद्वलयकुसुमप्रकरप्रकीर्णावतंससंवर्धितकीर्तिबीजः पृथुरिव दोर्दण्डसाधितधनुर्मण्डलबलावष्टम्भवशवशीकृतगोपालनानिश्चलीकृतधराधरेन्द्रः परमभट्टारकमहाराजाधिराजपरमेश्वर**श्रीमल्ललितशूरदेवः** कुशली अस्मिन्नेव श्रीमत्कार्तिकेयपुरविषये समुपगतान्सर्वानवनियोगस्थान् राजराजत(न्य)कराजपुत्रासृष्टामात्यसामन्तमहासामन्तठक्कुरमहामनुष्यमहाकर्तृकृतिकमहाप्रतीहारमहादण्डनायकमहाराजप्रमातारशरभङ्गकुमारामात्यापरिकदुःसाध्यासाध-

निकदशापराधिकचौरोद्धरणिकशौल्किकशौल्मिकतदायुक्तकविनियुक्तकप-
ट्टाकापचारिकाशेषभङ्गाधिकृतहरत्यश्वोष्ट्रबलव्यापृतकभूतप्रेषणिकदण्डिकद-
ण्डपाशिकगमागमिकशार्ङ्गिकाभित्वरमाणकराजस्थानीयविषयपतिभोगपति-
नरपत्यश्वपति······ण्डरक्षप्रतिशूरिकस्थानाधिकृतवर्त्मपालकोट्टपालघट्टपाल-
क्षेत्रपालप्रान्तपालकिशोरवर(ड)वागोमहिष्यधिकृतभट्टमहत्तमाभीरवणिक्श्रे-
ष्ठिपुरोगास्त(?)ष्टादशप्रकृत्यधिष्ठानीयान्खषकिरातद्रविडकलिङ्गशौरहूणोड्डु-
मेदान्ध्रचाण्डालपर्यन्तान्सर्वसंवसान्समस्तजनपदान्भटाचटसेवकादीनन्यांश्च
कीर्तितानकीर्तितानस्मत्पादोपजीविनः प्रतिवासिनश्च ब्राह्मणोत्तरान्यथार्ह
मत्तयति बोधयति समाज्ञापयति—अस्तु तेऽस्माद्विदितम्—उपरिनिर्दि-
ष्टविषये गोरुन्नसायां प्रतिबद्धखषियाकपरिभुज्यमानपल्लिका, तथा पणि-
भूतिकायां प्रतिबद्धगुग्गुलपरिभुज्यमानपल्लिकाद्वयं एते मया मातापित्रो-
रात्मनश्च पुण्ययशोभिवृद्धये पवनविघट्टिताश्वत्थपत्रवच्चलतरङ्गजीवलोकम-
वलोक्य जलबुद्बुदाकारमसारं वायुर्दृष्ट्वा गजकलभकर्णाग्रचपलतां चालक्ष्य
········त्वापरलोकनिःश्रेयसार्थं संसारोत्तरणार्थं च पुण्येऽहनि उत्तरायण-
संक्रान्तौ गन्धपुष्पधूपदीपोपलेपननैवेद्यबलिचरुनृत्यगेयवाद्यसत्त्वादिप्रवर्त-
नाय खण्डस्फुटितसंस्करणाय अभिनवकर्मकरणाय च भृत्यपदमूलभरणाय च
गोरुन्नसायां महादेवी**श्रीसामदेव्या** स्वयंकारायितभगवते **श्रीनाराय-
णभट्टारकाय** शासनदानेन प्रतिपादिताः । प्रकृतिपरिहारयुक्तः प्रचा-
टाभटाप्रवेशः अकिंचित्प्रग्राह्याः, अनाच्छेद्य आचन्द्रार्कक्षितिस्थितिसमका-
लिको विषयादुद्धृतपिण्डास्थसीमागोचरपर्यन्तस्य वृक्षारामः, हृ(ह्र)दप्रस्रव-
णोपेतदेवब्राह्मणभुक्तभुज्यमानवर्जिताः । यतः—सुखं पारम्पर्येण परि-
भुञ्जतश्चास्योपरिनिर्दिष्टैरन्यतरैर्वा धरणविधारणपरिपन्थिजनादिकोपद्रवो
मनागपि कर्तव्यो नोऽन्यथा·······महान्द्रोहः स्यादिति प्रवर्धमानविजयरा-
ज्यसंवत्सर एकविंशति[त]मे । सम्वत् २।१ माघवदि ३। महादानाक्षयपट-
लाधिकृत**श्रीपोजकः** । लिखितमिदं महासंधिविग्रहाक्षपटलाधिकृतश्रीम-
दायटाववनातङ्कोत्कीर्ण**श्रीगङ्गभद्रेण** ।

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः॥
भूमेर्दाता याति लोके सुराणां हंसैर्युक्तं यानमारुह्य दिव्यम्।
लोहे कुम्भे तैलपूर्णे सुतप्ते भूमेर्हर्ता पच्यते कालदूतैः॥
षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥
गामेकां च सुवर्णं च भूमेरप्येकमङ्गुलम्।
हृत्वा नरकमायाति यावदाभूतसंप्लवम्॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत॥
................भ्रममिदं समुदाहरद्भि-
रन्यैश्च दानमिदमभ्यनुमोदनीयम्।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयशःपरिपालनं च॥
इति कमलदलबिन्दुलोलमिदमनुचिन्त्य मनुष्यजीवितं च।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः॥

नोट्स ऑन धि हिस्टरी ऑफ धि हिमालय—एटकिन्सन.

(५५)

सुप्रसिद्धश्रीवीरबुक्करायसुतहरिहरमहाराजस्य दानपत्रम्।

श्रीगणाधिपतये नमः।

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शंभवे॥

अव्याद्व्याहतैश्वर्यैकारणं वारणाननः ।
हरन्तीव्रतिमिरमिहिरो हरनन्दनः ॥
श्रीमानादिवराहो यः श्रियं दिशतु भूयसीम् ।
गाढमालिङ्गिता येन मेदिनी यत्र मोदते ॥
अस्ति कौस्तुभकल्पद्रुकामधेनुसहोदरः ।
रमानुजः सुधानाथः क्षीरसागरसंभवः ॥
उदभूदन्वये तस्य यदुर्नाम महीपतिः ।
पालितं यत्कुलीनेन वासुदेवेन भूतलम् ॥
अभूदस्य कुले श्रीमान्भूमौ गुरुगुणोदयः ।
अपास्तदुरितासङ्गः संगमो नाम भूपतिः ॥
आसन्हरिहरः कम्पो बुक्करायमहीपतिः ।
मारपो मुद्गपश्चेति कुमारास्तस्य भूपतेः ॥
पञ्चानां दृप्तगात्राणां प्रख्यातो बुक्कभूपतिः ।
प्रसिद्धविक्रमो मध्यः पाण्डवानामिवार्जुनः ॥
दिक्करीन्द्रधुराधारादक्षिणस्कन्धबन्धुरः ।
बुक्करायस्ततः श्रीमानासीदाहवकर्कशः ॥
यस्योद्यद्युद्धरङ्गे वितरति परितस्ताण्डवं मण्डलाग्रे
वक्रे शुष्कास्तुरुष्का भयभरभरितः कोङ्कणः शङ्कितायुः ।
सान्ध्रा रन्ध्राणि धावन्त्यधमनतनया गुर्जरा जर्जराङ्गाः
काम्बोजाः स्विन्नधैर्याः सपदि समभवन्प्राप्तभङ्गाः कलिङ्गाः ॥
राजाधिराजस्तेजस्वी यो राजपरमेश्वरः ।
भाषातिरिङ्गिभूपालभुजंगमविहंगराट् ॥
राजवेश्याभुजङ्गो यः पररायतपंकरः ।
हिन्दुरायसुरत्राणः शास्त्रेत्यादिभिरन्वितः ॥
श्रीविद्यानगरी विश्वविजयोदयशालिनी ।
राज्ञा विजयिना येन राजधानी कृता स्थिरा ॥

तस्य **गौराम्बिका** नाम महिषी समजायत ।
माननीयगुणा मायावल्लभस्य यथा रमा ॥
कपर्दिनो यथा गौरी शचीव नमुचिद्विषः ।
पितामहस्य सावित्री छायेव द्युमणेरिव ॥
विलासविभ्रमोल्लासतिरस्कृततिलोत्तमा ।
अनसूयापि सासूया यत्पातिव्रत्यसंपदा ॥
अहीनभोगसंपत्तिरमा राजशिखामणिः ।
तस्यां **हरिहरं** गौर्यां कुमारमुदपादयत् ॥
शिष्टान्संरक्षिता यश्च दुष्टानामपि शासकः ।
लब्धासो विदुषा साकं श्लाघ्यो हरिहरे परः ॥
यस्मिन्षोडशदानानि(नां) यशसा परिशोभिते ।
दानाम्बुधारया यस्य वर्धते धर्मपादपः ॥
ऋषिभूवह्निचन्द्रे(१३१७)तु गणिते धात(तृ)वत्सरे ।
माघमासे शुक्लपक्षे पौर्णमास्यां महातिथौ ॥
नक्षत्रे पितृदैवत्ये भानुवारेण संयुते ।
तुङ्गभद्रानदीतीरे हेमकूटोपशोभिते ॥
श्रीविरूपाक्षदेवस्य संनिधौ शुभदायिने ।
भारद्वाजसगोत्राय बह्वृचोऽग्रसराय च ॥
वाचस्पतेर्भिलाख्यस्य सूनवे सूनृतोक्तये ।
पटवर्धनिने **विष्णुदीक्षितेन्द्राय** धीमते ॥
वसिष्ठगोत्रजायापस्तम्बशाखाग्रयायिने ।
रामभट्टसुतानन्तदीक्षिताय विपश्चिते ॥
प्रसिद्धपाण्डवाकान्तरूर्चाङ्कस्थलवासिने ।
भिलिचन्द्राभिधासीमामध्ये ख्यातं महोदयम् ॥
पूर्वभागे स्थितं ग्रामादरिसीकेरसंज्ञकात् ।
गडिकेहल्याभिधाद्ग्रामाद्दक्षिणां दिशमाश्रितम् ॥

ग्रामात्पल्लवकटाख्यात्प्रतीच्याभिमुखाश्रितम्।
ग्रामाच्च भूदिहल्याख्यादुत्तरस्यां दिशि श्रितम्॥
प्रतिनाम्ना समाख्यातं पुरं हरिहराभिधम्।
मादेनहल्लीतिग्रामं सर्वसस्यसमन्वितम्॥
सर्वमान्यं चतुःसीमासंयुतं च समन्ततः।
निधिनिःक्षेपपाषाणसिद्धसाध्यसमन्वितम्॥
अक्षिण्यागामिसंयुक्तं द्विभोग्यं रम्यभूरुहम्।
वापीकूपतडागैश्च कच्छेनापि समन्वितम्॥
पुत्रपौत्रादिभिर्भोग्यं क्रमादाचन्द्रतारकम्।
सर्वस्याधमनस्यापि विक्रयस्यापि चोचितम्॥
परीतं प्रयतैः स्निग्धैः पुरोहितपुरोगमैः।
विविधैर्विबुधैः श्रीतोपयिकैरपिकैर्गिरा॥
वीरो हरिहरश्चाभून्माननीयो मनस्विनाम्।
भूदानपात्रभूतात्मा भूसुरात्मा विशेषतः॥
सहिरण्यपयोधारापूर्वकं दत्तवान्मुदा।
.... ॥

इदमखिलराजशासनमधुकरकाकारगीतमहात्मनः।
राज्ञां हरिहरनृपतेः शासनमचलैकपारिजातस्य॥
तस्य तच्छासनेनैव शासनं तु विनिर्मितम्।
शासनाचार्यधर्मेण वाणिदेवेन शिक्षितम्॥
अस्मिन्ग्रामेऽष्टदिक्षु सीमा देशभाषया लिखिता॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम्।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम्॥
स्वदत्ताद्द्विगुणं पुण्यं परदत्तानुपालनम्।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिवर्षसहस्राणि विष्ठायां जायते क्रमिः॥

एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥

लाइफ एण्ड एसेज् आफ एच्. टी. कोलब्रुक.
वाल्युम २ पेज २३२ ।

(५६)

श्रीलक्ष्मीवर्मदेवानां शासनपत्रम् ।

(उज्जयनीप्रान्त उपलब्धम् ।)

जयति व्योमकेशोऽसौ यः सर्गाय बिभर्ति ताम् ।
ऐन्दवीं शिरसा लेखां जगद्बीजाङ्कुराकृतिम् ॥
तन्वन्तु वः स्मराराते: कल्याणमनिशं जटाः ।
कल्पान्तसमयोद्दामतडिद्वलयपिङ्गलाः ॥

परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीउदयादित्यदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीनरवर्मदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीयशोवर्मदेवपादानुध्यातसमस्तप्रशस्तोपेतसमधिगतपञ्चमहाशब्दालंकारविराजमानमहाकुमारश्रीलक्ष्मीवर्मदेवः श्रीमहाद्वादशकमण्डले श्रीराजशासनभोगे सुरासणीसंबद्धवडनुदग्रामतथासुवर्णप्रासादिकासंबद्धउथवणकग्रामयोः समभूतिषयिक(समस्तविषयिक)पट्टकिलजनपदादीन्ब्राह्मणोत्तरान्बोधयति—अस्तु वः संविदितम्—यथा श्रीमद्धारायां महाराजाधिराजपरमेश्वरश्रीयशोवर्मदेवेन श्रीविक्रमकालातीतसंवत्सरैकनवत्यधिकशतैकादशेषु कार्तिकशुदि अष्टम्यां संजातमहाराजश्रीनरवर्मदेवसांवत्सरिके तीर्थाम्भोभिः स्नात्वा देवऋषिमनुष्यपितॄंस्तर्पयित्वा भगवन्तं भवानीपतिं समभ्यर्च्य शमीकुशतिलाज्याद्याहुतिभिर्हिरण्यरेतसं हुत्वा भानवे

अर्घ्यं विधाय कपिलां त्रिः प्रदक्षिणीकृत्य संसारस्यासारतां दृष्ट्वा नलिनी-दलगतजलवत्तरलतरं जीवितं धनं चावेक्ष्य, उक्तं च—

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने ॥'

एवमाकल्य्य अद्देलवद्धावरिस्थानविनिर्गतभरद्वाजगोत्राय भरद्वाजाङ्गिर-सबार्हस्पत्यत्रिप्रवरायाश्वलायनशाखिने दक्षिणायातकर्णाटब्राह्मणद्विवेदठक्कुर-श्रीमर्महिरस्वामिपौत्रश्रीविश्वरूपसुत आवसथिकश्रीधनपालाय उपरि-लिखितवडउदग्रामउथवणकग्रामौ सवृक्षमालाकुलौ निधिनिक्षेपसहितौ वा-पीकूपतडागान्वितौ चतुष्कण्टकविशुद्धौ चन्द्रार्कयावदुदकपूर्वकतया शा-सनेन प्रदत्तौ। संवत्सरशतद्वादशकेषु श्रावणशुदि पञ्चदश्यां सोमग्रहणप-र्वणि श्रीमत्पितृश्रेयोर्थं पुनरेवास्माभिरेतौ ग्रामौ उदकपूर्वकतया शासनेन प्रदत्तौ। तदनयोर्ग्रामयोर्निवासिसमस्तपट्टकिलादिलोकैस्तथा कर्षकैश्च यथो-त्पद्यमानकरहिरण्यभागभोगादिकमाज्ञाश्रवणविधेयैर्भूत्वा सर्वममुष्मै समुपने-तव्यम्। सामान्यं वै तत्पुण्यफलं बुद्ध्वास्मद्वंशजैरन्यैरपि भाविभूपतिभिर्ध-र्मदायोऽयं मन्तव्यश्चेति। यतः—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिवर्षसहस्राणि विष्टायां जायते कृमिः ॥

सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः।
सामान्योऽयं धर्मसे………………………………।

(अग्रे सर्वं त्रुटितम्)

रॉयल् एशियाटिक् सोसायटी ना. १ पे. ३८२।

(५७)

श्रीमदमोघवर्षदेवापराभिधानश्रीमद्वाक्पतिराजदेवानां शासनपत्रम् ।

ॐम्

य: स्फूर्जत्फणभृद्विषानलमिलद्धूम्रप्रभा: प्रोल्लस-
न्मूर्धाबद्धशशाङ्ककोटिघटिता या: सैंहिकेयोपमा: ।
याश्चस्वद्गिरिजाकपोललुलिता: कस्तूरिकाविभ्रमा-
स्ता: श्रीकण्ठकठोरकण्ठरुचय: श्रेयांसि पुष्णन्तु व: ॥
यल्लक्ष्मीवदनेन्दुना न सुखितं यन्नार्दितं वारिधे-
र्वारा यन्न निजेन नाभिसरसीपद्मेन शान्तिं गतम् ।
यच्छेषाहिफणासहस्रमधुर: श्वासैर्न चाश्वासितं
तद्राधाविरहातुरं मुररिपोर्वेल्लद्वपु: पातु व: ॥

परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीकृष्णराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवैरिसिंहदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीसीयकदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमदमोघवर्षदेवापराभिधानश्रीमद्वाक्पतिराजदेवपृथ्वीवल्लभश्रीवल्लभनरेन्द्रदेव: कुशली तिणिसपदद्वादशकसंबद्धमहासाधनिकश्रीमहाङ्कभुक्तसेम्बलपुरग्रामे समुपगतान्समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिवासिपट्टकिलजनपदादींश्च बोधयति—अस्तु व: संविदितम्—यथा ग्रामोऽयमस्माभि: षट्तृं(त्रिं)शसहस्रिकसंवत्सरेऽस्मिन्कार्तिकशुद्धपौर्णमास्यां सोमग्रहणपर्वणि श्रीभगवत्पुरावासितैरस्माभिर्महासाधनिकश्रीमहाइकपत्नीआसिनीप्रार्थनयोपरिलिखितग्राम: स्वसीमा तृणयूतिगोचरपर्यन्त: सहिरण्याभोगभाग: सोपरिकर: सर्वादायसमेत: श्रीमदुज्जयिन्यां भट्टारिकाश्रीमद्भट्टेश्वरीदेव्यै स्नानविलेपनपुष्पगन्धधूपनैवेद्यप्रेक्षणिकादिनिमित्तं च, तथा खण्डस्फुटितदेवगृहजगतीसमारचनार्थं च मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धयेऽदृष्टफलमङ्गीकृत्या-चन्द्रार्कार्णवक्षितिसमकालं परया भक्त्या शासनेनोदकपूर्वकं प्रतिपादित

इति मत्वा तन्निवासिपट्टकिलजनपदैर्यथादीयमानभागभोगः करहिरण्यादिकं सर्वमाज्ञाश्रवणविधेयैर्भूत्वा सर्वथा सर्वमस्याः समुपनेतव्यम् । सामान्यं चैतत्पुण्यफलं बुद्धास्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मदायोऽयमनुमन्तव्यः पालनीयश्च । उक्तं च—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥

अस्मत्कुलक्रममुदारमुदाहरद्भिरन्यैश्च दानमिदमभ्यनुमोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया दानं फलं परयशःप्रतिपालनं च ॥

सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥

इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥

इति ॥ संवत् १०३६ चैत्र वदि ९ । गुणपुराविसितै(वासिते) श्रीमन्महाविजयस्कन्धावारे स्वयमाज्ञादायकश्चात्र श्रीरुद्रादित्यः । स्वहस्तोऽयं श्रीवाक्पतिराजदेवस्य ॥

(इण्डियन् आण्टिक्वरी १४।१६०)

---

(५८)

श्रीशिवसिंहदेवनृपतीनां शासनपत्रम् ।

श्रीगजरथपुरात्समस्तप्रक्रियाविराजमानश्रीमद्रामेश्वरीवरलब्धप्रसादभवानीभक्तिभावनापरायणरूपनरायणमहाराजाधिराजश्रीमच्छिवसिंहदेवपादाः समरविजयिनो जरैलतप्पायां बिसपीग्रामवास्तव्यसकललोकान्भूकर्षकांश्च समादिशन्ति । ज्ञातमस्तु भवताम्—ग्रामोऽयमस्माभिः सप्रक्रियाभिनवजयदेवमहापण्डितठक्कुरश्रीविद्यापतिभ्यः शासनीकृत्य प्रदत्तः । ग्रामकस्था यूय-

मेतेषां वचनकरी(रा) भूकर्षणादिकर्म करिष्यथेति ॥ ल सं २८३ श्रावण-सुदि ७ गुरौ ।

श्लोकास्तु—

अब्दे **लक्ष्मणसेन**भूपतिमते वह्निग्रहद्व्यङ्किते
मासे श्रावणसंज्ञके मुनितिथौ पक्षेऽवलक्षे गुरौ ।
वाग्वत्याः सरितस्तटे **गजरथे**त्याख्याप्रसिद्धे पुरे
दित्सोत्साहविवृद्धि(द्ध)बाहुपुलकः सभ्याय मध्ये शुभम् ॥
प्रज्ञावान्प्रचुरोर्वरं पृथुतराभोगं नदीमातृकं
सारण्यं ससरोवरं च विसपीनामानमासीमतः ।
श्रीविद्यापतिशर्मणे सुकवये पुत्रादिभिर्भुञ्जतां(ते)
स श्रीमाञ्शिवसिंहदेवनृपतिर्ग्रामं ददे शासनम् ॥
येन साहसमयेन सत्रिणा तुङ्गवाहवरपृष्ठवर्तिना ।
अश्वपत्तिबलयोर्बलं जितं **गज्जनाधिपतिगौडभूभुजाम्** ॥
रौप्यकुम्भ इव कज्जलरेखा श्वेतपद्म इव शैवलवल्ली ।
यस्य कीर्तिनवकेतककान्त्या म्लानिमेति विजितो हरिणाङ्कः ॥
द्विषन्नृपतिवाहिनीरुधिरवाहिनीकोटिभिः
प्रतापतरुवृद्धये समरमेदिनी प्लाविता ।
समस्तहरिदङ्गनाचिकुरपाशवासक्षमं
सितप्रसरपाण्डुरं जगति येन लब्धं यशः ॥
मतङ्गजरथप्रदः कनकदानकल्पद्रुम-
स्तुलापुरुषमद्भुतं निजधनैः पिता दापितः ।
सुखानि च महात्मना जगति येन भूर्माभुजा
परापरपयोनिधिः प्रथममैत्रपात्रं सदा ॥
नरपतिकुलमान्यः कर्णशिक्षावदान्यः
परिचितपरमार्थो दानतुष्टार्थिसार्थः ।
निजचरितपवित्रो **देवसिंहस्य** पुत्रः
स जयति **शिवसिंहो** वैरिनागेन्द्रसिंहः ॥

ग्रामे गृह्णन्त्यमुष्मिन्किमपि नृपतयो हिन्दवोऽन्ये तुरुष्का
गोकोलं स्वात्ममांसैः सहितमनुदिनं भुञ्जते ते स्वधर्मम्।
ये चैनं ग्रामरत्नं नृपकररहितं पालयन्ति प्रतापै-
स्तेषां सत्कीर्तिगाथा दिशि दिशि सुचिरं गीयतां बन्दिवृन्दैः॥
सन् ८०७ संवत् १४५५ शाके १३२१। शुभमस्तु।

(इण्डियन् आण्टिक्वेरी १४।)

---

(५९)

यादववंशभूषणरामभूपतिदानपत्रम्।

ॐ नमो वराहाय॥

जयत्याविष्कृतं विष्णोर्वाराहं क्षोभितार्णवम्।
दक्षिणोन्नतदंष्ट्राग्रविश्रान्तभुवनं वपुः॥
विष्णोर्नाभीकमलकुहरादाविरासीद्विरिञ्चि-
र्यञ्चन्मौलिस्खलितकुसुमं वन्दितो देवदैत्यैः।
तस्मादत्रिः समजनि जगज्जातजैत्रप्रकाश-
श्चन्द्रस्तस्मादभवदमृतोद्गारशृङ्गारिताशः॥
वंशे तस्य पुरूरवाः समभवद्यच्चापमापद्गतो
देवानामधिपः स्मरत्यविरतं व्यालुप्तवज्रग्रहः।
आब्रह्माण्डमखण्डताण्डवरथप्रस्थानलीलां वह-
न्यश्चैको बुभुजे भुजेन विजितामुर्वीं तथैवोर्वशीम्॥
तस्मिन्नेव ययातिराविरभवद्भूमण्डलाखण्डलः
सर्वैः स्वर्वनितानितान्तसुभगप्रोद्गीतदोर्विक्रमः।
यस्याद्यापि मखाहिताहुतिशतप्रोद्दामधूमोत्करै-
राकीर्णं परितः स्फुरत्यविरतं तापिच्छनीलं नभः॥
तस्मादजायत यदुर्यदुपग्रहेण
वंशस्ततः परमगाज्जगतीप्रतिष्ठाम्।

तस्मिन्नथायमभवत्प्रभवः प्रजानां
लीलामयं वपुरमन्दबलं दधानः ॥
यदोस्तस्मिन्वंशे समजनि स निर्वापितरिपु-
प्रतापस्तापच्छिन्निखिलजगतो राजनृपतिः ।
यदीयप्रोदञ्चच्चरणनखरत्नांशुजलधौ
निमज्जन्तश्चित्रं जगदुपरि वृत्तिप्रणयिनः ॥
खेलत्खड्गावतंसो रणशिरसि वशीकृत्य कर्णाटराजं
यः पाण्ड्यं दण्डयित्वा न्यधित जलनिधेः स्तम्भमभ्यर्णभूमौ ।
यद्बाणव्रातपातैर्न समरमभजज्जर्जरो गुर्जरेन्द्रः
स श्रीमानाविरासीत्तुहिनकरकुले सिङ्घणः साहसाङ्कः ॥
तस्मादभूत्प्रभुरशेषमहीपतीनां
श्रीमद्भुगिर्विजयकार्मणकार्मुकश्रीः ।
यस्य प्रतापतरणौ तरणे तरूणां
छायेव दैर्घ्यमजहादरिभूभृतां श्रीः ॥
यस्मिन्भ्रूभङ्गभीमे चलति वसुमतीमण्डलं चण्डभानो-
र्बिम्बं शैलेन्द्रसंधेस्त्रिभिरभित इमे संभ्रियन्ते स्म सर्वं ।
वल्गद्भिर्वाजिवृन्दैस्तुरगखुरहतैः पांसुभिर्भीतिभित्तैः
क्षोणीन्द्रः स प्रवीरस्तदनु समभवद्भिल्लमः सार्वभौमः ॥
यः संख्ये त्रिकलिङ्गराजमवधद्विद्वेषिसीमन्तिनी-
नेत्राम्भःप्रसरप्रगल्भलहरीनिर्वाणवैरानलः ।
यश्चैतस्य समस्तराज्यमहरन्मत्तेभकुम्भस्थली-
कूजत्षट्पदगीतवैभवभरं जातस्ततो जैतुगिः ॥
कारागारात्समानीय करुणावरुणालयः ।
प्रियंवदास्यमकरोत्क्षितेर्गणपतिं पतिम् ॥
हम्मीरतिमिरतरणिः सरणिर्धर्मस्य संक्रमः कीर्तेः ।
तस्मादयमजनि श्रीसिङ्घणदेवभूपालः ॥

बल्लालो विजितः पराभवभुवं संभावितोऽन्ध्राधिपः
कक्कल्लो दलितः क्षणेन गलितो मम्भागिरेरीश्वरः ।
दुर्गाग्रे विनिबाध्य भोजनृपतिं न्यस्तोऽर्जुनो निर्जित-
स्तेनेति प्रति[प]द्य के भुवि भयं भेजुर्न भूमीभुजः ॥

कृष्यन्ते यदुराजरत्न भवता वक्षांसि विद्वेषिणा-
मुष्यन्ते समरस्थलीषु करिणां मुक्तावलिश्रेणयः ।
वर्षन्ति स्तनमण्डलेषु तरुणीनेत्राणि बाष्पोत्करै-
रुद्भेदो भुवनत्रयेऽपि यशसामाश्चर्यमुज्जृम्भते ॥

तस्मादजायत जगत्त्रयगीयमान-
प्रौढप्रतापतपनोदयदुर्निवारः ।
श्रीजैतुगिर्वसुमतीवलयाधिनाथै-
श्चूडामणिप्रकरसंकरचुम्बिताङ्घ्रिः ॥

तस्मात्**कृष्ण** इति प्रसिद्धचरितः श्री**रायनारायणो**
जातः कार्तिकचन्द्रकान्तिजयिनां कीर्तिं चिरं नर्तयन् ।
गर्जद्गुर्जरवीरशोणितसरित्सङ्कत्वरे श्रीपतिः
पाथोधौ सघृणो यदीयहृदये निर्दूषणे निद्रितः ॥

आदाय द्विषतां करङ्कनिवहान्कृत्वा हलादीनि तैः
कृष्टे **कृष्ण**महीभृता कृषिमता क्षेत्रे महीमण्डले ।
येनारातिवधूविलोचनगलत्सान्द्राञ्जनैरस्रुभिः
क्लिन्ने शौर्यसुबीजमुप्तमभितः प्राप्ता यशोराशयः ॥

सत्त्वं यद्घनवाहने रविसुते वैरोचनं श्रीशिबौ
दानं यच्च दधीचिनाम्नि सकलं संगृह्य सृष्टोऽद्भुतः ।
नूनं कृष्णघटोद्भवोऽखिलकृता दारिद्र्यपाथोनिधिः
पीतस्त्यागकरप्रवृद्धचुलुकेनोद्धृत्य येनार्थिनाम् ॥

तस्यानुजो निजभुजार्पितभूमिभारः
स्वच्छन्दचारमुदितोरगसार्वभौमः ।

यो वीसलं समरकौतुकिनां सुराणा-
मग्रे समूलविभवं दलयांचकार ॥
तस्मादभूदामनभूमिपालः समस्तमाहेश्वरमौलिरत्नम् ।
अलिख्यतोच्चैः खुरलेखनीभिर्यद्वाजिभिर्दिक्षु जयप्रशस्तिः ॥
प्रसह्य तस्मादपहृत्य भुङ्क्ते कृष्णानुजः स्वामवनिं स रामः ।
यस्यासिरुज्जृम्भितकैरवाभिर्दिशो यशोभिः सुरभीकरोति ॥
महामाहेश्वरः श्रीमान्रामः क्षोणीभृतां गुरुः ।
यशःक्षीरेण यः शंभोर्मूर्तीरष्टाभिषिञ्चति ॥
यत्पुण्यगिरिगर्भोत्थयशोमारुतमण्डली ।
ब्रह्माण्डपरमाणूनामभवद्बहुलं रजः ॥
प्राप्तः श्रीरामभूपोऽपसरत रिपवः संगरादाशु हित्वा
राज्यं सप्ताङ्गमेतत्पिबत भुवि जलं शीतलं क्वापि याताः ।
नो चेदस्यासिधाराविदलितवपुषस्तत्क्षणादेव दिव्यं
देहं प्राप्यामरस्त्रीजननयननवप्रेमसंपत्सुखं वा ॥
आसन्सन्ति च वंशजाः कति कति प्राज्ञा भविष्यन्ति न
स्फीताः शस्त्रभृतः कलासु कुशला धूर्ता विटाः कर्मठाः ।
वर्ण्योऽयं पुनरेव रामनृपतिः प्रत्यर्थिनामर्थिनां
यो न क्वापि पराङ्मुखः क्षितितलालंकारचूडामणिः ॥
वाक्प्रपञ्चप्रवहणं रिक्तं यद्गुणसंगरम् ।
अपारयन्त नापारं तरीतुं कविनाविकाः ॥

स खल्वेवंविधगुणगणालंकृततनुरनारतद्रविणवितरणकृतार्थीकृतार्थिसार्थः सकलपरिपन्थिपार्थिवान्विनिर्जित्य निजकुलक्रमागतसांराज्यपदमुद्धृत्य दधानो रायनारायणो रामनृपतिः सेउनदेशालंकारभूतं गोदावर्युत्तरकूलस्थितं वादाथनग्रामं पाटारपिम्पलग्रामवेद्यवोघरग्रामवेद्यद्वयसहितमग्रहारीकृत्य निधिनिक्षेपजलपाषाणशुल्कमौलिकश्रोणदानदण्डकारुकादिसमस्तादायसहितं राजराजपुरुषैरप्यनङ्गुलिनिर्देश्यं प्रविष्टग्रामद्वयसहितं चतुराघाटविशुद्धं भक्तिश्रद्धातिशयहिरण्याक्षतोदकसहितं शके च एकादशसु त्रिनवत्यधिके-

प्वतीतेषु ११९३ वर्तमानप्रजापतिसंवत्सरान्तर्गते माघशुद्धद्वादश्यां बुधे आत्मनः श्रीशार्ङ्गपाणिप्रीत्यर्थं नानागोत्रेभ्यः सप्तपञ्चाशत्संख्यकेभ्यो ब्राह्मणेभ्यः प्रादात् ॥ ते च ब्राह्मणा नामतो लिख्यन्ते। तत्र बह्वृचाः—वाशिष्ठगोत्रगोविन्दसुतविष्णु—मुद्गलगोत्रपद्मनाभसुतजानू—वाशिष्ठगोत्रदामोदरसुतबलदेव—विष्णुवृद्धगोत्रदामोदरसुतविष्णु—भारद्वाजगोत्रबलदेवसुतजानू—कौण्डिन्यगोत्रधरणूसुतप्रभाकर—विश्वामित्रगोत्रगोविन्दसुतमाइआ—गर्गगोत्रनागदेवसुतवामन—हरितगोत्रआपदेवसुतश्रीधर—गार्ग्यगोत्रराघवसुतकेशव—कौण्डिन्यगोत्रगौतमसुतमहादेव—जामदग्न्यवत्सगोत्रमाम्यदेवसुतनरसिंह—हरितगोत्रअनन्तसुतसारङ्ग—भारद्वाजगोत्रविनायकसुतआईदेव—भारद्वाजगोत्रवामदेवसुतकृष्ण—कौण्डिन्यगोत्रईश्वरसुतकृष्ण—कौण्डिन्यगोत्रकृष्णसुतपुरुषो—कौण्डिन्यगोत्रकृष्णसुतराम—भरद्वाजगोत्रमल्लिनाथसुतभानु—हरितगोत्रहरिदेवसुतलक्ष्मीधर—वाशिष्ठगोत्रगोविन्दसुतनागदेव—वाशिष्ठगोत्रगोविन्दसुतकेशव—विश्वामित्रगोत्रश्रीपतिसुतएल्हुगि—कौण्डिन्यगोत्रनागदेवसुतईश्वर—गौतमगोत्रधनेश्वरसुतवामन—भरद्वाजगोत्रगदाधरसुतब्रह्मदेव—गौतमगोत्रदामोदरसुतधनेश्वर—मुद्गलगोत्रमाधवसुतगोविन्द—भरद्वाजगोत्रनारायणसुतगङ्गाधर—भरद्वाजगोत्रगङ्गाधरसुतजगन्नाथ॥ अथ तैत्तिरीयाः—कौण्डिन्यगोत्रसोमनाथसुतपद्मनाभभट्ट—कौण्डिन्यगोत्रपद्मनाभसुतनरसिंह—कौण्डिन्यगोत्रपद्मनाभसुतसोमनाथ—कौण्डिन्यगोत्रपद्मनाभसुतसारङ्ग—कौण्डिन्यगोत्रपद्मनाभसुतगणेश्वर—कौण्डिन्यगोत्रपद्मनाभसुतहरिहर—कौण्डिन्यगोत्रपद्मनाभसुतत्रिविक्रम—काश्यपगोत्रमहादेवसुतकूचिष्ठ(?)—गार्ग्यगोत्रदेवन्नसुतदिवाकर—कौशिकगोत्रमल्लिदेवसुतविष्णु—वाध्र्यश्वगोत्रनामदेवसुतविष्णु—आत्रेयगोत्ररामसुतसारङ्ग—काश्यपगोत्रकामदेवसुतसोमनाथ—गौतमगोत्रविष्णुसुतचौवेरि—गार्ग्यगोत्रनारायणसुतविष्णु—कौण्डिन्यगोत्रसारङ्गभट्टसुतऋपिदेव—देवरातगोत्रतीलूआपसुतत्राईदेव—कौण्डिन्यगोत्रनागदेवसुतआदित्य—कौण्डिन्यगोत्रनरसिंहसुतविष्णु—देवरातगोत्रनारायणसुतबापदेव—देवरातगोत्रबापदेवसुतराम—देवरातगोत्रनारायणसुतविष्णु—भरद्वाजगोत्रजनार्दनसुतकृष्ण—देवरातगोत्रनारायणसुतअनन्त॥ अथ बह्वृचो

भरद्वाजगोत्रविष्णुसुतरामपण्डित–भरद्वाजगोत्ररामपण्डितसुतमैदेवपण्डित ॥ एवमङ्कतः ९७ ॥ अथाघाटाः—पूर्वतः–वाहगाँव । आग्नेये–नेउरगाँव । दक्षिणे–देइगाँव, तथा गङ्गा । पश्चिमे–गङ्गा, तथा खाटिगाँव, तथा आलुएँगाँव, तथा नागमथनम् । वायवे–जाँटेगाँव । उत्तरे–पानिव । ईशाने–वेद्खल । एवं सर्वाघाटविशुद्धाः सप्रविष्टखेटकसहितास्त्रयो ग्रामाः ॥ अत्र चैवं समयः । राजसेवकानां वसतिदण्डप्रयाणदण्डौ नस्तः ॥

आचन्द्रार्कमिदं भोज्यमेभिरेषां च वंशजैः ।
वसद्भिरेव भोक्तव्यं न चादेयं कदाचन ॥

पण्याङ्गनानां सदनं न देयं द्यूतप्रचारोऽपि निवारणीयः ।
शस्त्रादिकं चापि न धारणीयं सत्कर्मनिष्ठैर्भवितव्यमेभिः ॥

अस्य धर्मस्य संरक्षणे फलमिति स्माहुः प्राञ्चो महर्षयः—

गण्यन्ते पांसवो भूमेर्गण्यन्ते वृष्टिबिन्दवः ।
न गण्यते विधात्रापि धर्मसंरक्षणे फलम् ॥
बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

अत एवाह रामभद्रः—

सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ॥

मद्वंशजाः परमहीपतिवंशजा वा
पापादपेतमनसो भुवि भाविभूपाः ।
ये पालयन्ति मम धर्ममिमं समग्रं
तेभ्यो मया विरचितोऽञ्जलिरेष मूर्ध्नि ॥

नास्ति भूमिसमं दानं नास्ति राज्ञः समो गुरुः ।
नास्ति सत्यसमो धर्मो नास्ति दानसमो निधिः ॥
अग्निष्टोमप्रभृतिभिरिष्ट्वा यज्ञैः सदक्षिणैः ।
न तत्फलमवाप्नोति भूमिदानाद्यदश्नुते ॥

अपहरतः समर्थस्याप्युपेक्षकस्येव विपरीतफलमाहुः—

गामेकां रत्निकामेकां भूमेरप्येकमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥
दाता दशानुगृह्णाति दश हन्ति तथाक्षिपन् ।
पूर्वदत्तां हरन्भूमिं नरकायोपगच्छति ॥
न ददाति प्रतिश्रुत्य दत्तां वा हरते तु यः ।
तौ च द्वौ वारुणैः पाशैस्तप्येते मृत्युशासनात् ॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरशायिनः ।
कृष्णसर्पाः प्रजायन्ते ब्रह्मभूम्यपहारकाः ॥
पतन्त्यश्रूणि रुदतां दीनानामवसीदताम् ।
ब्राह्मणानां ह(हृ)ते क्षेत्रे हन्ति त्रिपुरुषं कुलम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिर्वर्षसहस्राणि विष्ठायां जायते कृमिः ॥

॥ ७ ॥ लिखितं पण्डितवनेश्वरेण ॥ ७ ॥
मङ्गलं महाश्रीः ॥ ॐ शिवमस्तु ॥ ७ ॥

(इण्डियन् आण्टिक्वेरी १४।३१५–३१९)

(६०)

राज्ञः श्रीशिवसिंहदेवस्य दानपत्रम् ।

श्रीगजरथपुरात्समस्तप्रक्रियाविराजमान–श्रीमद्रामेश्वरीवरलब्धप्रसाद–भवानीभक्तिभावनापरायण–रूपन(ना)रायण–महाराजाधिराज–श्रीमच्छिवसिंहदेवपादाः समरविजयिनो जरैलतप्पायां बिसपीग्रामवास्तव्यसकललोकान्भूकर्षकांश्च समादिशन्ति । ज्ञातमस्तु भवताम् । ग्रामोऽयमस्माभिः सप्रक्रियाभिनवजयदेव[1]–महापण्डित–ठक्कुर[2]–श्रीविद्यापतिभ्यः शासनीकृत्य प्र-

१. जयदेवो गीतगोविन्दकृत्. २. मैथिलप्रसिद्धमुपनाम.

दत्तः। ग्रामकस्था यूयमेतेषां वचनकरी भूकर्षकादिकर्म करिष्यथेति॥ ले सं २८३ श्रावणसुदि ७ गुरौ॥

श्लोकास्तु—

अब्दे लक्ष्मणसेनभूपतिमते वह्निग्रहद्व्यङ्किते
मासे श्रावणसंज्ञके मुनितिथौ पक्षेऽवलक्षे गुरौ।
वाग्वत्याः सरितस्तटे गजरथेत्याख्याप्रसिद्धे पुरे
दित्सोत्साहविवृद्धिबाहुपुलकः सभ्याय मध्ये शुभम्॥
प्रज्ञावान्प्रचरोर्वरं पृथुतराभोगं नदीमातृकं
सारण्यं ससरोवरं च बिसपीनामानमासीमनः।
श्रीविद्यापतिशर्मणे सुकवये पुत्रादिभिर्भुञ्जतां
स श्रीमाञ्शिवसिंहदेवनृपतिर्ग्रामं ददे शासनम्॥
येन साहसमयेन मन्त्रिणा तुङ्गवाहवरपृष्ठवर्तिना।
अश्वपत्तिबलयोर्बलं निजं गज्जनाधिपतिगौडभूभुजाम्॥
रौप्यकुम्भ इव कज्जलरेखा श्वेतपद्म इव शैवलवल्ली।
यस्य कीर्तिनवकेतककान्त्या म्लानिमेति विजितो हरिणाङ्कः॥
द्विषन्नृपतिवाहिनीरुधिरवाहिनीकोटिभिः
प्रतापतरुवृद्धये समरमेदिनी प्लाविता।
समस्तहरिदङ्गनाचिकुरपाशवासक्षमं
सितप्रसरपाण्डुरं जगति येन लब्धं यशः॥
मतङ्गजरथप्रदः कनकदानकल्पद्रुम-
स्तुलापुरुषमद्भुतं निजधनैः पिता दापितः।
सुखानि च महात्मना जगति येन भूमीभुजा
परापरपयोनिधिः प्रथममैत्रपात्रं सदा॥

---

१. लक्ष्मणसेनसंवत्, २. अयमेव लक्ष्मणसेनभूपतिः 'सकलकलाः कल्पयितुं प्रभुः प्रबन्धस्य कुमुदबन्धोश्च। सेनकुलतिलकभूपतिरेको राकाप्रदोषश्च॥ ३९॥' इत्यार्यया गोवर्धनाचार्यैर्वर्णितः. अनेन खिस्ताब्दस्यैकादशशतकसमाप्तिपर्यन्तं वङ्गदेशोऽपायीति केचिदैतिहासिकाः. एतत्कालखिस्ताब्दसंख्या तु गजाङ्कार्मीन्दु(११९८)मिता भवति.

नरपतिकुलमान्यः कर्णशिक्षावदान्यः
परिचितपरमार्थो दानतुष्टार्थिसार्थः।
निजचरितपवित्रो देवसिंहस्य पुत्रः
स जयति शिवसिंहो वैरिनागेन्द्रसिंहः॥
ग्रामे गृह्णन्त्यमुष्मिन्किमपि नृपतयो हिन्दवोऽन्ये तुरुष्का
गोकोलं[1] स्वात्ममांसैः सहितमनुदिनं भुञ्जते ते स्वधर्मम्।
ये चैनं ग्रामरत्नं नृपकररहितं पालयन्ति प्रतापै-
स्तेषां सत्कीर्तिगाथा दिशि दिशि सुचिरं गीयतां बन्दिवृन्दैः॥
सन ८०७ संवत(त्) १४५५ शाके १३२१[2] शुभमस्तु।

(इण्डियन् आण्टिक्केरी १४।१९०-१९१)

(६१)

वलभीप्रभोः प्रथमशिलादित्यस्य दानपत्रम्।

ओं स्वस्ति वलभीतः प्रसभप्रणतामित्राणां मैत्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तप्रहारशतलब्धप्रतापात्प्रतापोपनतदानमानार्जनोपार्जितानुरागानुरक्तमौलभृतश्रेणीबलावाप्तराज्यश्रियः परममाहेश्वरश्रीभट्टार्कादव्यवच्छिन्नराजवंशान्मातापितृचरणारविन्दप्रणतिप्रविधौताशेषकल्मषः शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणताराातिचूडारत्नप्रभासंसक्तपादनखरश्मिसंहतिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनान्वर्थराजशब्दः रूपकान्तिस्थैर्यगाम्भीर्यबुद्धिसंपद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलः प्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः

१. कोलः सूकरः. २. संवत्-शकसंख्ययोर्मध्ये एकतरा संख्याशुद्धा. यदि संवत्संख्या १४५५ एतावती तर्हि शकसंख्या १३२० इयती भवितुमर्हति; यदा च शकसंख्या १३२१ इयती तदा संवत्संख्येयं १४५६ युज्यते.

परममाहेश्वरः श्रीगुहसेनस्तस्य सुतस्तत्पादनखमयूखसंतानविसृजितजाह्नवी-
जलौघप्रक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यमानसंपद्रूपलोभादिवा-
श्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिशिक्षाविशेषविस्मायिताखिलबल-
धनुर्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मदायानामपाकर्ता प्रजोप-
घातकारिणामुपप्लवानां दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य संहतारातिप-
क्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममाहेश्वरः
श्रीधरसेनस्तस्य सुतस्तत्पादानुध्यातः सकलजगदानन्दनात्यद्भुतगुणसमुदय-
स्थगितसमग्रदिङ्मण्डलः समरशतविजयशोभासनाथमण्डलाग्रद्युतिभासुरांस-
पीठोदूढगुरुमनोरथमहाभारः सर्वविद्यापरावरविभागाधिगमविमलमतिरपि स-
र्वतः सुभाषितलवेनापि सुखोपपादनीयपरितोषः समग्रलोकागाधगाम्भीर्यहृद-
योऽपि सुचरितातिशयसुव्यक्तपरमकल्याणस्वभावः खिलीभूतकृतयुगनृपति-
पथविशोधनाधिगतोदग्रकीर्तिर्धर्मानुपरोधोज्ज्वलतरीकृतार्थसुखसंपदुपसेवानि-
रूढधर्मादित्यद्वितीयनामा परममाहेश्वरः श्रीशिलादित्यः कुशली सर्वानेवायु-
क्तकविनियु·········हस्तरचाटभटकुमारामात्यादीनन्यांश्च यथाभिसंबध्य-
मानकान्समाज्ञाप[यति]······[वि]दितं यथा मया मातापित्रोः पुण्याप्या-
यनायवलभीप्रतिष्ठपितराज्ञीडड्डाकारितविहारनिवासिचतुर्दिगभ्यागतार्यभि-
क्षुसंघस्य चीवरपिण्डपातशयनासनभैषज्यपरिष्कारार्थं बुद्धानां च भगवतां
गन्धधूपपुष्पमाल्यदीपतैलाद्युपयोगार्थं विहारस्य च खण्डस्फुटितप्रतिसंस्का-
राय·······पुष्पानकस्थल्यन्तर्गत उच्चापद्रके कुटुम्बिसूर्यकप्रत्ययक्षेत्रं तथा
·······प्रत्ययक्षेत्रं तथा कक्किजग्रामे अर्विकप्रत्ययवापि तथा कुम्भारप्रत्य-
यवापि तथेन्द्राणिपद्रके····रप्रत्ययक्षेत्रं तथा वलभीस्वतलसीम्नि पुष्पवाटि-
काकूपकचतुष्टयमेवमयं क्षेत्रत्रयवापिद्वयपुष्पवाटिकाकूपकचतुष्टयसमेतो
ग्रामः सोद्रङ्गः सोपरिकरः सवातभूतप्रत्यायः सधान्यहिरण्यादेयः सदसा-
पराधः सोत्पद्यमानविष्टिः सर्वराजकीयानामहस्तप्रक्षेपणीयः पूर्वप्रत्तदेवब्रह्म-
देयवर्जितो भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनो व्यव-
च्छित्तिभोग्यो धर्मदायतया प्रतिपादितः। यत उचितया च देवाग्रहार-
स्थित्या भुज्यमानको न कैश्चित्परिपन्थिनीयः। आगामिभद्रनृपतिभिरप्यस्म-

द्वंशजैरन्यैर्वानित्यान्यैश्वर्याण्यस्थिरं मानुष्यं सामान्यं च भूमिदानफलमवगच्छभिरयमस्मद्दायोऽनुमन्तव्यः पालयितव्यश्चेति।

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत॥
षष्टिं वर्षसहस्राणि स्वर्गे मोदति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥

दूतकश्चात्र भट्टादित्ययशाः। लिखितं संधिविग्रहाधिकृतदिविरपतिवत्रभट्टिना॥ सं २०० ८०६ ज्येष्ठ व ६॥ स्वहस्तो मम॥

(इण्डियन् आण्टिक्वेरी १४।२२९-२३०)

(६२)

श्रीध्रुवराजदेवस्य शासनपत्रम्।

[1]..

....।

दाता मानभृदग्रणीर्गुणवतां योऽसौ श्रियो वल्लभो
भोक्तुं स्वर्गफलानि भूरितपसा स्थानं जगामापरम्॥
येन श्वेतातपत्रप्रहतरविकरव्राततापात्सलीलं
जज्ञे नासीरधूलीधवलितशिरसा वल्लभाख्यः सदाजौ।
श्रीमद्गोविन्दराजो जितगदहित····स्त्रैणवैधव्यदक्ष-
स्तस्यासीत्सूनुरेकः क्षणरणदलितारातिमत्तेभकुम्भः॥
तस्यानुजः श्रीध्रुवराजनामा महानुभावोऽप्रहतप्रतापः।
प्रसाधिताशेषनरेन्द्रचक्रः क्रमेण बालार्कवपुर्बभूव॥

१. लेखोऽयं प्रायः प्राचीनलेखमालामुद्रितचतुर्थलेखसमोऽस्ति, अतस्तत्प्रारम्भश्लोका अत्रापि स्युः.

रक्षता येन निःशेषं चतुरम्भोधिसंयुतम् ।
राज्यं धर्मेण लोकानां कृता हृष्टिः परा हृदि ॥

तस्यात्मजो जगति सत्प्रथितोरुकीर्ति-
गोविन्दराज इति गोत्रललामभूतः ।
त्यागी पराक्रमधनः प्रकटप्रताप-
संतापिताहितजनो जनवल्लभोऽभूत् ॥

एकोऽनेकनरेन्द्रवृन्दसहितान्यस्तान्समस्तानपि
प्रोत्खातासिलताप्रहारविधुरान्बद्ध्वा महासंयुगे ।
लक्ष्मीमप्यचलां चकार विलसत्सच्चामरग्राहिणीं
संसीदद्गुरुविप्रसज्जनसुहृद्बन्धूपभोग्यां भुवि ॥

तत्पुत्रेऽत्र गते नाकमाकम्पितरिपुव्रजे ।
श्रीमहाराजशर्वाख्यः ख्यातो राजाभवद्गुणैः ॥

राजाभूत्तत्पितृव्यो रिपुभवविभवोद्भूत्यभावैकहेतु-
र्लक्ष्मीवानिन्द्रराजो गुणिनृपनिकरान्तश्चमत्कारकारी ।
सङ्गादन्यान्व्युदस्य प्रकटितविनया यं नृपान्सेवमाना
राज्यश्रीरेव चक्रे सकलकविजनोद्गीतकथ्यस्वभावम् ॥

श्रीकर्कराज इति रक्षितराज्यभारः
सारः कुलस्य तनयो नयशालिशौर्यः ।
तस्याभवद्विभवनन्दितबन्धुसार्थः
पार्थः सदैव धनुषि प्रथमः शुचीनाम् ॥

स्वेच्छागृहीतविनयान्दृढसंघभाजः
प्रोद्वृत्तदृप्ततरशुल्किकराष्ट्रकूटान् ।
उत्खातखड्गनिजबाहुबलेन जित्वा
योऽमोघवर्षमचिरात्स्वपदे व्यधत्त ॥

पुत्रीयतस्तस्य महानुभावः कृती कृतज्ञः कृतवीर्यवीर्यः ।
वशीकृताशेषनरेन्द्रवृन्दो बभूव सूनुर्ध्रुवराजनामा ॥

चन्द्रो जडो हिमगिरिः स हिमः प्रकृत्या
वातश्चलश्च तपनस्तपनस्वभावः ।
क्षारः पयोधिरिति यः सममस्य नास्ति
येनोपमा निरुपमस्तत एव गीतः ॥
अभिरामोज्ज्वलवपुषि क्षितिसंतापहारिणि सुम्नम् ।
धारावर्षे वर्षति जलद इव न कः कृतार्थः स्यात् ॥
ब्रह्माण्डमेतत्कियदिति प्रजासृजा न मत्प्रमाणेन पुरा विनिर्मितम् ।
एवं विचिन्त्य ध्रुवराजकीर्तिर्बिधातुरासीत्सुतरामसूयिनी ॥
तेनेदमनिलविद्युच्चञ्चलमालोक्य जीवितमसारम् ।
क्षितिदानपरमपुण्यः प्रवर्तितो धर्मदायोऽयम् ॥

स च समधिगताशेषमहाशब्दमहासामन्ताधिपतिधारावर्षश्रीध्रुवराजदेवः सर्वानेव यथासंबध्यमानान्राष्ट्रपतिविषयपतिग्रामकूटायुक्तनियुक्ताधिकारिकमहत्तरादीन्समनुदर्शयति—अस्तु वः संविदितम् । यथा मया श्रीखेटकबहिः सर्वमङ्गलासनावासितेन मातापित्रोरात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृद्धये वदरसिद्धिवास्तव्यतच्चातुर्विद्यसामान्यवाजसगोत्रवाजिमाध्यंदिनसब्रह्मचारिभट्टमहेश्वरसुतयोगायानन्तरं श्रीगोविन्दराजदेवेन ख्यापितज्योतिपिकनाम्ने काशदहदेशान्तर्वर्तिपूसिलाविल्लिनामा ग्रामो यस्याघाटनानि पूर्वतो वेहिच्चाभिधाना नदी वोरीवद्रवकग्रामश्च दक्षिणतश्चतुःसरीनामा ग्रामोपरतस्तिमिलाविल्लिनामा उत्तरतो विदुचवल्लिनामा ग्रामः, एवमयं चतुराघाटनोपलक्षितः सोद्रङ्गः सपरिकरः सदण्डदशापराधः सभूतपातप्रत्यायसोत्पद्यमानविष्टिकः सधान्यहिरण्यादेयोचाटभटप्रवेश्यः सर्वराजकीयानामहस्तप्रक्षेपणीय आचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनः पुत्रपौत्रान्वयक्रमोपभोग्यः पूर्वप्रदत्तदेवब्रह्मदायरहितोऽभ्यन्तरसिद्ध्या शकनृपकालातीतसंवत्सरशतेषु सप्तसु सप्तपञ्चाशदधिकेषु कार्तिकशुद्धपञ्चदश्यां महाकार्तिकीपर्वणि स्नात्वाद्योदकातिसर्गेण बलिचरुवैश्वदेवाग्निहोत्रातिथिपञ्चमहायज्ञक्रियोत्सर्पणार्थं प्रतिपादितो यतोऽस्योचितया ब्रह्मदायादस्थित्या भुञ्जतो भोजयतः कर्षतः कर्षयतश्च प्रतिदिशतो वा न केनचित्परिपन्थिता कार्या ।

तथागामिनृपतिभिरस्मद्वंश्यैरन्यैर्वा सामान्यं भूमिदानफलमवेत्य विद्युल्लोलान्यनित्यैश्वर्याणि तृणाग्रलग्नजलबिन्दुचञ्चलं च जीवितमाकलय्य(य्य) स्वदायनिर्विशेषोऽयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्च । यश्चाज्ञानतिमिरपटलावृतमतिराच्छिन्द्यात्, आच्छिद्यमानं वानुमोदेत, स पञ्चभिर्महापातकैरुपपातकैश्च संयुक्तः स्यात् । इति ॥ उक्तं च भगवता वेदव्यासेन व्यासेन—

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये ॥
अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकत्रयं तेन भवेद्धि दत्तं यः काञ्चनं गां च महीं च दद्यात् ॥
बहुकि(भि)र्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष नराधिप ।
महीं महिमतां श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥
इति कमलदलाम्बुबिन्दुलोलां
श्रियमनुचिन्त्य मनुष्यजीवितं च ।
अतिविमलमनोभिरात्मनीनै-
र्नहि पुरुषैः परकीर्तयो विलोप्याः ॥ इति ॥

दूतकोऽत्र श्रीदेवराजः । लिखितं च श्रीदुर्गभटसूनुना सांधिविग्रहिकश्रीनारायणेन ॥ इति मतं मम श्रीध्रुवराजदेवस्य श्रीकर्कराजदेवसुतस्य यदुपरि लिखितम् ॥

(इण्डियन् आण्टिकेरी १४।१९९–२००)